REPRODUCTION OF EARLIE EDITION OF THE
SABDARTHACINTAMANIH

शब्दार्थचिन्तामणिः

SABDĀRTHACİNTAMANIH

द्वितीय खण्ड

भाग - ब

ब्राह्मावधूत श्रीसुखानन्दनाथः

प्रिन्टवैल

जयपुर- 302 004

Published by
PRINTWELL
S-12, Shopping Complex,
Tilak Nagar, Jaipur - 302 004

Distributed by
RUPA BOOKS PVT. LTD.
H.O. S-12, Shopping Complex, Tilak Nagar, Jaipur - 302 004.
B.O. 295-B, Bharti Nagar, P.N. Pudur, Coimbatore - 641 041.

ISBN 81-7044-369-5 (Set)

SABADARTH CHINTAMANI
First Published - 1860
Reprint - 1992

Printed at :
Efficient Offset Printers
215, Shahzada Bagh Indl. Complex,
Phase-II, Phone : 533736, 533762
Delhi - 110035

षोडशस्वादा । दशार्ह एवया । स्वा
र्थिकःप्रत्ययः ॥ चि । दशार्हदेशजे ॥
दाशी । स्त्री । धीवर्याम् ॥
दाशेयी । स्त्री । व्यासमातरि ॥ दाश्याः
अपत्यं स्त्री । चुद्राभ्योवेतिढ्गभावे
ह्यच इति ढक् । ङीप् ॥
दाशेरकः । पुं । मालवदेशे ॥ इ०त्रि० ॥
दाश्वः । त्रि । दातरि ॥
दाश्वान् । त्रि । दत्तवति ॥ दाश्वान् सा
ह्वान्मीढ्वांश्चेतिनिपातितः ॥
दासः । पुं । ज्ञातात्मनि ॥ शूद्रे ॥ धीव
रे ॥ दानपात्रे ॥ शूद्रनामोपपदे ॥
सेवके । भृत्ये ॥ सचपञ्चदशवि
धो नारदेनोक्तो यथा । गृहजात
स्तथाक्रीतोलब्धो दायादुपागतः ।
अन्नाकालभृत स्तद्दाहितः स्वामि
ना चयः ॥ मोचितो महतश्चार्णाद्यु
द्धे प्राप्तः पणेजितः । तवाहमित्युप
गतः प्रव्रज्यावसितःकृतः ॥ भक्तदा
सश्चविज्ञेय स्तथैववडवाकृतः । विक्रे
ताचात्मनः शास्त्रेदासाःपञ्चदशस्मृ-
ताः ॥ अस्यार्थः । गृहजातः दास्यामुत्प
न्नः । दायादुपागतः क्रमागतः । अन्ना
कालभृतः दुर्भिक्षपोषितः । स्वामि
नाआहितः बन्धकीकृतः । मोचितः
ऋणदानेनाङ्गीकृतदास्यः । तवाह
मित्युपगतःकस्याप्यदासःसन् स्वयं-

दासत्वेन दत्तरूपः । प्रव्रज्याऽवसि
तः सन्न्यासभ्रष्टः । कृतः केनचि-
न्निमित्तेन एतावत्कालपर्यन्तं तवाहं
दासइतिकृतसमयः । भक्तदासः सु-
भिक्षेपि भक्तार्थमङ्गीकृतदास्यः । व
डवाकृतः वडवा दासीतल्लोभादङ्गी
कृतदास्यःइति ॥ ध्वजाहृतो भक्त-
दासोगृहजः क्रीतदत्त्रिमौ । पैत्रि
कोदण्डदासश्चसप्तैते दासयोनयः
॥ * ॥ विप्रस्यकिङ्करोभूपो वैश्यो भू
पस्य भूमिप । सर्वेषां किङ्कराःशूद्रा
ब्राह्मणस्य विशेषतः ॥ दसति । दंस
दशने । दंसयति दंशतेवा । दसिदी
सौ । दंसेष्टटनौनआच ॥
दासकः । पुं । सामान्यदासे ॥ दासे ॥
दासएव । स्वा० कः ॥
दासकर्म्म । न । दासस्यकृत्ये ॥ कर्म्म
पिद्विविधं ज्ञेय मशुभं शुभमेवच ।
अशुभं दासकर्मोक्तं शुभं कर्मकृतां
स्मृतम् ॥ गृहद्वाराशुचिस्थानरथ्याव-
स्करशोधनम् । गुह्याङ्गस्पर्शनोच्छि
ष्टविण्मूत्रग्रहणोज्झनम् ॥ अशुभं
कर्मविज्ञेयं शुभमन्यदतः परम् ॥
दासनन्दिनी । स्त्री । व्यासमातरि ।
सत्यवत्याम् ॥
दासपुरम् । न । कैवर्त्तीमुस्तके ॥
दासान् शूद्रान् पिपर्त्ति । पृ० । मू०

कः। उदोष्ठ्यपूर्वस्येत्युत्वम् ॥

दासपूरम्। न। दासपुरे॥ दासान्पूरयति। पूरपूर्त्तौ। कर्मण्यण्॥

दासिका। स्त्री। पीतझिण्ट्याम्॥भुजिष्यायाम्॥ वेश्याम्॥ दास्येव। स्वार्थे कः। केण इति ह्रस्वः॥

दासी। स्त्री। वेश्याम्। भुजिष्यायाम्॥ बाणायाम्। झिण्ट्याम्॥ काकजङ्घायाम्॥ नीलाम्लाने॥ नीलझिण्ट्याम्॥ पीतझिण्ट्याम्॥ वेश्याम्॥ शूद्रायाम्॥ कैवर्त्तभार्यायाम्॥ दस्यते। दसुउपक्षये। कर्मणि घञ्। गौ०ङीष्॥

दासीफली। स्त्री। ओषधिविशेषे॥ पाककर्णेतिङीष्॥

दासीसभम्। न। दासीनांसभायाम्॥ दासीनां सभा। अशालाचेतिन पुंसकत्वम्॥

दासेयः। पुं। धीवरे॥ भृत्ये। दासीतनये॥ दास्या अपत्यम्। क्षुद्राभ्यो वेति ढगभावपक्षे द्व्यचइतिढक्॥

दासेयी। स्त्री। सत्यवत्याम्। व्यासजनन्याम्॥ ङीप्॥

दासेरः। पुं। क्रमेलके। उष्ट्रे॥ धीवरे॥ त्रि। चेटे। दासीपुत्रे॥ दास्या अपत्यम्। क्षुद्राभ्योवेति ढक्॥

दासेरकः। पुं। दासेरार्थेषु॥ स्वा०-कन्॥

दास्यम्। न। दासत्वे। दासभावे॥ दासस्यभावः। ष्यञ्॥

दास्यमानः। त्रि। भविष्यद्दानसम्बन्धिवस्तुनि॥

दास्रम्। न। अश्विनीनक्षत्रे॥ दस्रयोरिदम्। तस्येद मित्यण्॥

दास्रभम्। न। अश्विनीनक्षत्रे॥ दास्रदेवतं भम्॥

दाहः। पुं। दहने। भस्मीकरणे॥ गात्रसन्तापे॥ दहनम्। दहभस्मीकरणे। घञ्॥

दाहकः। पुं। चित्रके॥ रक्तचित्रके॥ त्रि। दाहकर्त्तरि॥ दह०। ण्वुल्॥

दाहज्वरः। पुं। देहज्वालायुक्तेज्वररोगे॥ यथा। पीतं हरिद्रकम्बन्तु पर्युषितजलेनवै। सार्द्धं विनाशयेद्दाहज्वरञ्च परमेश्वरेतिगारुडे १८३ अध्यायः॥

दाहनम्। न। भस्मीकरणाय प्रेरणे। दाहकरावना इतिभाषा॥ यस्मादहेर्ल्युट्॥

दाहसरः। पुं। श्मशाने॥

दाहहरणम्। न। वीरणमूले॥ त्रि। दाहघ्ने॥

दाहागुरु/दाहार्षितः। पुं। गन्धविशेषे॥ यथा। देवदार्वगुरुश्लक्ष्णसालसाराश्चन्दनाः

। प्रियादीनाञ्च योद्‌गध्वा गृह्यते दारुजोरसः । सदाशाकर्षितोगन्धः स्मृतीयः परिकीर्त्तितइति ॥

दाह्वागुरु । न । सुगन्धिद्रव्यविशेषे । दारुकाष्ठे । तैलागुरुणि ॥

दाहिका । स्त्री । तेजसोभार्यायाम् ॥ पद्मप्रभाम् ॥

दाही । त्रि । दाहके ॥

दिक्कः । पुं । करभे ॥ विंशतिवर्षकेगजे ॥

दिक्करः । पुं । यूनि ॥

दिक्करवासिनी । स्त्री । कामरूपदेशप्रसिद्धनद्याम् ॥ देवीविशेषे ॥ दिक्करस्त्वरुणः प्रोक्तस्तथाशम्भुश्च दिक्करः । तस्मिन्नध्युषितादेवी तस्माद्दिक्करवासिनीति ॥

दिक्करिका । स्त्री । नाटकशैलस्य पश्चिमभागान्निःसृतायां नद्याम् ॥

दिक्करी । स्त्री । युवत्याम् ॥

दिक्पतिः । पुं । दिगधीश्वरे ॥ यथा । सूर्यः शुक्रः क्षमापुत्रः सैंहिकेयः शनिः शशी । सौम्यस्त्रिदशमन्त्रीच-प्राच्यादिदिगधीश्वराः ॥ * ॥ इन्द्रोवह्निः पितृपतिर्नैर्ऋतोवरुणोमरुत् । कुबेरईशःपतयः पूर्वादीनांदिशांक्रमात् ॥ * ॥ मेषसिंहधनुः प्राच्यां दक्षिणस्यान्तुतत्परे । प्रतीच्यांतत्परे ज्ञेयाः उदीच्याञ्चततः परे ॥ दिशःपतिः ॥

दिक्पालः । पुं । पूर्वादिदशदिक्पतौ ॥ यथा । इन्द्रोवह्निःपितृपतिर्नैर्ऋतोवरुणोमरुत् । कुबेरईशोब्रह्माचानन्तो दिक्पालसंज्ञकाः ॥

दिक्शूलम् । न । दिग्विशेषगमनेनिषिद्धवारे ॥ यथा । शुक्रादित्यदिनेनवारुणदिशं नशेकुजेचोत्तरां मन्देन्दोश्चदिनेनशक्रककुभंयाम्यांगुरौनव्रजेत् । शूलानीति विलङ्घ्ययान्तिमनुजा येवित्तलाभाशयाभ्रष्टाशाः पुनरापतन्ति यदिते शक्रेणतुल्या अपि ॥

दिगन्तः । पुं । शास्त्रीयस्नानकर्मसंस्कृतजनाधिष्ठितमध्यदेशादतिरिक्ते देशे ॥ दिशामन्तः ॥

दिगम्बरः । पुं । शङ्करे ॥ तमसि ॥ क्षपणे । आत्मनोमध्यमपरिमाणवादिनिर्वौद्धविशेषे ॥ यथा । दिगम्बरामध्यमत्त्वमाहुरापादमस्तकम् । चैतन्यव्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि ॥ अस्य भाषा प्राकृतावान्तरभेदभिन्ना मागधी । अस्यस्वरूपन्तु । गलन्मलपङ्केन पिच्छिलवीभत्सदुष्प्रेक्ष्यदेहच्छविरुल्लुञ्चितचिकुरो मुक्तवसनो वेशदुर्दर्शनः शिखिशिखण्डपिच्छिकाहस्त इति । अस्य शिष्याः श्रावकाः ॥ त्रि । नग्ने । विवसने ॥ दिगे

शाम्बरमस्य ॥

दिगम्बरी । स्त्री । कालिकायाम् ॥ दिगेवाम्बरमस्याः ॥

दिगीश्वरः । पुं । दिगधीश्वरे ॥ यथा । दिगीश्वरा भास्करशुक्रभौमाराह्वार्किचन्द्रज्ञसुरार्चिताः स्युरिति ॥ दिशः ईश्वरः ॥

दिग्गजः । पुं । दिग्घस्तिनि ॥ ऐरावतः पुण्डरीको वामनः कुमुदो ऽञ्जनः । पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥ दिक्षु स्थिताः गजाः दिग्गजाः ॥

दिग्दर्शनम् । न । दिक्साधनयन्त्रे । कम्पासइतीङ्ग्रभाषा ॥ दिशां दर्शनं ज्ञानं येन ॥

दिग्दाहः । पुं । उत्पातविशेषे ॥ यथा तल्लक्षणं वराहाचार्यः । तद्वर्णभेदेन तत्फलम् । दाहो दिशां राजभयाय पीतो देशस्य नाशाय हुताशवर्णः । यश्चारुणः स्यादपसव्यवायुः सस्यस्य नाशञ्च करोति दृष्टः ॥ योतीव दीप्त्या कुरुते प्रकाशं छायामभिव्यञ्जयतेर्कवत्तः । राज्ञो महद्वेदयते भयं स शस्त्रप्रकोपं क्षतजानुरूपः ॥ सर्वासु दिक्षु फलम् । प्राक् क्षत्रियाणां सनरेश्वराणां प्राग्दक्षिणे शिल्पकुमारपीडा । याम्ये सहोग्रैः पुरुषैस्तु वैश्या दूताः पुनर्भूप्रमदाश्च कोणे ॥ पश्चात् तु शूद्राः कृषिजीविनश्च चौरास्तुरङ्गैः सहवायुदिक्स्थः । पीडां व्रजन्त्युत्तरतश्च विप्राः पाषण्डिनो वाणिजकाश्च शार्व्याम् ॥ * ॥ शुभलक्षणम् । नभः प्रसन्नं विमलानि भानि प्रदक्षिणं वाति सदागतिश्च । दिशां च दाहः कनकावदातो हिताय लोकस्य सपार्थिवस्येति ॥

दिग्द्वारभवनम् । न । पूर्वादिदिक्षु मिरावृत्त्या मेषादिराशिषु ॥

दिग्धः । पुं । लिप्तके । विषाक्तवाणे ॥ अग्नौ ॥ प्रवृद्धे ॥ स्नेहे ॥ प्रबन्धे ॥ त्रि । लिप्ते । लीपा इति भाषा ॥ दिह्यते स्म । दिह उपचये । क्तः ॥

दिग्वासाः । पुं । शिवे ॥ त्रि । नग्ने । दिगम्बरे ॥ दिगेव वासो ऽस्य ॥

दिग्विजयः । पुं । विद्यया युद्धेन वा दिशांविजये ॥ यथा । शङ्करदिग्विजयः पाण्डवदिग्विजयइति ॥

दिङ्गः । पुं । उत्कुणडिम्भे ॥ इति शब्दार्थकल्पतरुः ॥

दिङ्मात्रम् । न । एकदेशे ॥

दिण्डिभाण्डम् । न । डिण्डिभाण्डाख्ये वादित्रविशेषे ॥ पटहमृदङ्गकरटाः समेताय च वाद्यन्ते तत् दिण्डिभाण्डमित्युच्यते ॥

दितः । त्रि । छिन्ने ॥ दीयतेस्म । दोञ् अवखण्डने । क्तः । द्यतिस्यतीतीत्वम् ॥

दितिः । स्त्री । दैत्यजनन्याम् ॥ खण्डने ॥ दोञवखण्डने । क्तिच्क्तौचसंज्ञायामितिक्तिच् । द्यतिस्यतीतीत्वम् ॥

दितिजः । पुं । दैत्ये ॥ दितेर्जातः । जनी० । डः ॥

दितिसुतः । पुं । दैतेये ॥ दितेःसुतः ॥

दिती । स्त्री । दैतेयमातरि ॥ कृदिकारादितिङीष् ॥

दित्सा । स्त्री । दातुमिच्छायाम् ॥ डुदाञ्० । सनिमीमेत्यादिना इसादेशः । अत्रलोपोऽभ्यासस्येत्यभ्यासलोपः । अप्रत्ययात् इत्यकारप्रत्ययः ॥

दिदृक्षमाणः । त्रि । द्रष्टुमिच्छति ॥ दृशेःसन्नन्तात् लटःशानच् ॥

दिदृक्षा । स्त्री । द्रष्टुमिच्छायाम् ॥ दृशेः सन्नन्तादप्रत्यये टाप् ॥

दिदृक्षुः । त्रि । द्रष्टुमिच्छति ॥ सनाशंसभिक्षउः ॥

दिद्युत् । त्रि । द्योतनशीले ॥ द्योतते तच्छीलः । द्युतदीप्तौ । द्युतिगमिजुहोतीनांद्वेचेति क्विप् ॥

दिधिषाय्यः । पुं । मन्त्रे ॥ दधाति आह्लादम् धीयते वा । डुधाञ्० । दिधिषाय्य इति आय्यः धातोर्द्वित्वमित्त्वंषुक्‌चनिपात्यते ॥ आरोपितवन्धौ । मित्रद्वये दिधिषाय्यः ॥

दिधिषुः । पुं । द्विरूढास्वामिनि । पुनर्भूपतौ ॥ दिधिषूमात्मनइच्छति । सुपआत्मनःक्यच् क्विप् । वाहुलकाद्ध्रस्वः ॥ स्त्री । द्विरूढायाम् ॥

दिधिषूः । स्त्री । द्विरूढायाम् । पुनर्भ्वाम् ॥ दधाति पापम् धिष्यते वा । डुधाञ्० धिषशब्दे वा । अन्दूदृन्भू इति साधुः ॥ यद्वा । दिधिं धैर्यंस्यति । षो० । प्राग्वत् ॥ मनुस्तु । ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा । साचाग्रेदिधिषूर्ज्ञेया पूर्वातु दिधिषूः स्मृतेत्याह ॥ पुं । पुनर्भूपतौ ॥

दिधिषूपतिः । पुं । द्विरूढायाः पत्यौ ॥ भ्रातुर्मृतस्य भार्यायां योनुरज्येतकामतः । धर्मेणापि नियुक्तायां सज्ञेयो दिधिषूपतिः ॥

दिनम् । न । सूर्यकिरणावच्छिन्ने काले । अहनि । घस्रे । वासरे ॥ तत्तु मनुष्यमाने षष्टिदण्डात्मकम् । पितृमाने गौणचान्द्रमासात्मकम् । देवासुरमाने वत्सरात्मकम् । ब्रह्ममाने दिव्यद्विसहस्रयुगात्मकम् ॥ * ॥ मनुष्यमाने ब्रह्मणो दिनस्य सङ्ख्या । ८६४००००००० । इति

पुराणम् ॥ * ॥ तदेव मनुष्याणां सौरसावनचान्द्रनाक्षत्रभेदेन चतुर्विधम् । यथा । सावनम् दण्डाः षष्टिरहः स्वलग्नखगुणां शाख्यास्तद्दिनं भवेत् । १ । उदयादोदयाद्भानोर्भौमसावनवासराः । २ । तिथिनैकेन दिवसश्चान्द्रमाने प्रकीर्त्तितः । ३ । आयुर्दाये स्मृतं प्राज्ञैर्नाक्षत्रं षष्टिनाडिकमिति । ४ । जीमूतवाहनमतेतु सूर्यकिरणावच्छिन्नचतुर्यामात्मकम् ॥ * ॥ लग्नविशेषे ॥ यथा । अजगोपतियुग्मस्त्रककिधन्विमृगास्तथा । निशासंज्ञाः स्मृताश्चैते शेषाश्चान्ये दिनात्मका इति ज्योतिस्तत्त्वम् ॥ दीयते क्षीणं भवति । दीक्षये । दिवादिः । इण्षिञ्जिदीति नक् । वाहुलकाद्ध्रस्वः ॥ चि । खण्डिते ॥ द्यति । दो० । द्यतेरितीनक् । यत्पक्षि दिनमिति तैत्तिरीये खण्डितमित्यर्थात् ॥

दिनकरः । पुं । सूर्ये ॥ करोति । कृञ्० । अच् । दिनस्यकरः ॥

दिनकरात्मजा । स्त्री । यमुनायाम् ॥

दिनकेशवः । पुं । अन्धकारे ॥ इतिशब्दरत्नावली ॥

दिनक्षयः । पुं । दिनपाते ॥ एकस्मिन् सावनेत्वह्नि तिथीनां त्रितयं यदा । तदा दिनक्षयः प्रोक्तः सहस्राश्वमेधिकं फलम् ॥

दिनज्योतिः । न । आतपे ॥ इ० रानि० ॥

दिनपतिः । पुं । सूर्ये ॥ दिनस्यपतिः ॥ षण्मात्रस्यद्वितीयप्रभेदे (। ऽ । ऽ) ॥

दिनपातः । पुं । दिनक्षये ॥

दिनपिण्डः । पुं । अहर्गणे ॥

दिनप्रणीः । पुं । सूर्ये ॥

दिनवलः । पुं । पञ्चमषष्ठसप्तमाष्टमैकादशद्वादशराशिषु ॥

दिनमणिः । पुं । सूर्ये ॥ दिनस्यमणिरिव ॥

दिनमुखम् । न । प्रभाते ॥

दिनमूर्द्धा । पुं । उदयाचले ॥

दिनयौवनम् । न । मध्याह्ने ॥

दिनांशः । पुं । प्राह्णमध्याह्नापराह्णसायाह्नादौ ॥

दिनादिः । पुं । प्रभाते ॥

दिनान्तः । पुं । सायं । दिवावसाने ॥

दिनान्तकः । पुं । अन्धकारे ॥ दिनस्य अन्तकः ॥

दिनावसानम् । न । सायङ्काले ॥ दिनस्यावसानोऽस्मिन् ॥

दिनिका । स्त्री । दिनभृतौ । एकदिवसकृतकर्ममूल्ये ॥ इतिशब्दमाला ॥

दिनौघः । पुं । अहर्गणे ॥

दिलीपः । पुं । नृपविशेषे । रघोः

पितरि ॥

दिलीपराट् । पुं । दिलीपे ॥ इ० त्रि ॥

दिल्लीरम् । न । गोमयच्छत्रिकायाम् । शिलीन्ध्रके ॥

द्यौः । स्त्री । स्वर्गे ॥ आकाशे ॥ दीव्यन्त्यस्याम् । दिवु० । वा० दिवेर्डिविः । द्यौःदिवौ दिवः । द्युभ्याम् ॥

दिवम् । न । स्वर्गे ॥ आकाशे ॥ वने ॥ दीव्यन्त्यस्मिन् । दिवु०। इगुपधे तिकः ॥

दिवसः । पुं । न । दिने ॥ सावनादि प्रभेदेन दिवसोपि चतुर्विधिः । नाडीषष्टितमस्तत्र सावनो दिवसःस्मृतः ॥ त्रिंशांशभागार्कराशेर्दिवसःसौरउच्यते। चान्द्रस्तु तिथ्यवच्छिन्नो भावधिस्त्वभभूःस्मृतः ॥ दीव्यन्त्यत्र । दिवु० । दिवःकिदित्यसच् ॥

दिवसकरः । पुं । सूर्ये ॥

दिवसमुखम् । न । प्रभाते ॥

दिवस्पतिः । पुं । वासवे । इन्द्रे ॥ दिवःपतिः । तत्पुरुषे कृतीत्यत्र वहुलग्रहणादकृत्यपि अलुक् इति मुकुटः । तन्न । पातेर्डतिरित्युणादिसूत्रस्य सत्त्वात् । वस्तुतस्तु । षष्ठ्याः पतिपुत्रेति सत्त्वविधानसामर्थ्याल्लोकवेदसाधारण्येना लुगुन्नापितः । कस्कादित्वात्सः । यत्तु षष्ठ्याः पतिपुत्रेति सत्त्वमितिमुकुटेनोक्तं तन्न । तत्र छन्दोधिकारात् ॥

दिवस्पृथिव्यौ । स्त्री । द्यावापृथिव्योः ॥ द्यौश्चपृथिवीच । दिवसश्चपृथिव्यामितिदिवोदिवसादेशः ॥ द्विवचनान्तः ॥

दिवा । अ । दिवसे ॥ दीव्यन्त्यत्र । दिवु० । कामप्रत्ययः ॥

दिवाकरः । पुं । भास्करे । सूर्ये ॥ अर्कवृक्षे ॥ दिवादिनं करोति । दिवाविभेतिटः ॥ काके ॥ पुष्पविशेषे ॥ इतिशब्दचन्द्रिका ॥

दिवाकीर्त्तिः । पुं । नापिते ॥ रात्रौक्षुरकर्मनिषेधात् । दिवाकीर्त्तिरस्य ॥ अन्तावसायिनि । चण्डाले ॥ दिवाचरेयुः कार्यार्थं चिह्निता राजशासनैरिति चण्डालेषु नियमात् ॥ उलूके ॥ इतिहेमचन्द्रः ॥

दिवाटनः । पुं । काके ॥

दिवातनः । त्रि । दिनभवे ॥

दिवान्धः । पुं । पेचकादौ ॥ यथा । दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथ परे । केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टय इतिदेवीमाहात्म्यम् ॥

दिवान्धकी । स्त्री । छुच्छुन्दर्याम् ॥

दिवान्धा । स्त्री । वल्गुलापक्षिणि ॥

दिवाभीतः । पुं । कुम्भिले । चौरे ॥

उलूके ॥ कुमुदाकरे ॥

द्विवाभीतिः । पुं । पेचके ॥ दिवा दिवसे भीतिर्भयं यस्य ॥

द्विवामणिः । पुं । सूर्य्ये ॥ दिवादिवसस्य मणिरिव ॥

द्विवामध्यम् । न । दिनार्द्धे । मध्याह्ने ॥

द्विवाशयः । त्रि । दिनेशयनकर्त्तरि ॥ द्विवाशेते स्वपितीति । शीङोऽधिकरणेशेतेरित्यच् ॥

द्विवास्वापः । पुं । दिननिद्रायाम् ॥ दिवास्वापं न कुर्वीत यतोऽसौ स्यात्कफावहः । ग्रीष्मवर्जेषुकालेषु दिवास्वापोनिषिध्यते ॥ उचितोह्विदिवास्वापो नित्यं येषांशरीरिणाम् । वातादयः प्रकुप्यन्ति तेषामस्वपतांदिवा ॥ * ॥ येषामुचितस्तानाह । व्यायामाध्वव्यवायवाहनरताक्रान्तानतीसारिणः शूलश्वासवतस्तृषापरिगतान् हिक्कामरुत्पीडितान् । क्षीणान् क्षीणकफान् शिशून् मदहतान् वृद्धान् रसाजीर्णिनो रात्रौजागरितान्नरान् निरशनान् कामं दिवास्वापयेदिति ॥

द्विवास्वापा । स्त्री । दिवान्धायाम् ॥

द्विविः । पुं । चाषखगे ॥

द्विविजः । त्रि । स्वर्गीये ॥

द्विविषत् । पुं । देवे ॥ द्विविस्वर्गे सीदतिवसतीते । सदेर्दिवियोगस्यवसादेनेषु । सत्सूद्विषेति क्विप् । ह्युद्युभ्याम्वेतिङेरलुक् । सुषामादित्वात्षत्वम् ॥

द्विविष्ठः । त्रि । स्वर्गस्थे ॥

द्विवी । स्त्री । उपजिह्विकाकीटे ॥

द्विवेदिवे । अ । अहन्यहनि ॥

द्विवौकाः । पुं । द्विवौकसि । द्यौरोकोयस्येतिविग्रहः ॥

द्विवोदासः । पुं । चन्द्रवंशीयभीमरथस्यराजः पुत्रे । काशिराजे ॥ दिवरथनेन तात्स्याद्देवाः । तेषाम् दिवः स्वर्गस्यवा दासः । दिवसश्च दासइतिषष्ठ्या अलुक् ॥

द्विवोद्भवा । स्त्री । एलायाम् ॥ त्रि । द्विविजाते ॥

द्विवौकःपुष्करिणी । स्त्री । तीर्थविशेषे ॥

द्विवौकाः । पुं । देवे ॥ द्यौः दिवि वा ओकोयस्य । पृ० ॥ यद्वा । दिवमोकोयस्येत्यदन्तेन विग्रहः ॥ चातके ।

द्विव्यम् । न । लवङ्गे ॥ हरिचन्दने ॥ शपथे ॥ तद्भेदाः यथा । घटोग्निरुदकञ्चैवविषं कोषश्चपञ्चमम् । षष्ठञ्चतण्डुलाः प्रोक्ताः सप्तमंतप्तमाषकम् ॥ अष्टमंफालमित्युक्तं नवमं धर्मजंस्मृतम् । द्विव्यान्येतानिसर्वाणि

निर्द्दिष्टानि स्वयम्भुवा ॥ गङ्गाजलस्य स्पर्शपूर्वकशपथे तत्रमिथ्याकथने दोषो यथा । गङ्गातोयमुपस्पृश्यमिथ्यां यदिवदेज्जनः । सयातिकालसूत्रञ्च यावदैत्रह्मणोवय इतिब्रह्मवैवर्त्तपुराणम् ॥ पानीयप्रभेदे ॥ यथा । दिव्यंचतुर्विधंप्रोक्तंधाराजं करकाभवम् । तौषारञ्चतथाहैमं तेषुधारं गुणाधिकमिति ॥ पुं । गुग्गुलौ ॥ यवे ॥ आगमोक्ते भावविशेषे यथा । दिव्यश्च देवताप्रायः शुद्धान्तःकरणः सदा । द्वन्द्वातीतो वीतरागः सर्वभूतसमः-क्षमीति ॥ नायकविशेषे ॥ त्रि । द्योतनात्मके मनुष्यैरलभ्ये सर्वप्रपञ्चातीते अत्यद्भुते अप्राकृते ॥ दिविद्योतनात्मन्यादिव्येभवः । दिविपरमेव्योम्निस्वस्वरूपेवाभवः । द्युमागपागुदक्प्रतीचोयत् ॥ मनोज्ञे ॥ दिविभवे ॥

दिव्यकुण्डम् । न । कामरूपे क्षोभकाद्रिपूर्वभागस्थे पुष्करिणी विशेषे ॥

दिव्यगन्धः । पुं । गन्धके ॥ न । लवङ्गे ॥

दिव्यगन्धा । स्त्री । स्थूलैलायाम् ॥ महाचञ्चुशाके ॥

दिव्यगायनः । पुं । गन्धर्वे । स्वर्गगायके ॥

दिव्यचक्षुः । पुं । सुगन्धद्रव्यप्रभेदे ॥ मर्कटे ॥ त्रि । अन्धे ॥ सुलोचने ॥

न । ज्ञानात्मके नेत्रे ॥

दिव्यतेजाः । स्त्री । ब्राह्मयाम् ॥

दिव्यदृष्टिः । स्त्री । निमेषशून्यायां दृष्टौ ॥ दिव्याचासौ दृष्टिश्च ॥

दिव्यदोहदम् । न । मनोराज्यस्य सिद्धये देवेभ्योदीयमाने द्रव्ये । उपयाचिते ॥ यद्दीयतेतु देवेभ्योमनोराज्यस्यसिद्धये । उपयाचितकं दिव्यदोहदंतद्विदुर्बुधाइतिहारावली ॥

दिव्यपञ्चामृतम् । न । मिलितगव्याज्यगव्यदधिगव्यक्षीरमाक्षिकशर्करारूपे ॥ इतिराजनिर्घण्टः ॥

दिव्यपुष्पः । पुं । करवीरे ॥

दिव्यपुष्पा । स्त्री । महाद्रोणायाम् ॥

दिव्यपुष्पिका । स्त्री । लोहितवर्णार्कवृक्षे ॥

दिव्ययमुना । स्त्री । कामरूपे दमनिकायानद्याः पूर्वभागस्थे नदीविशेषे ॥

दिव्यरत्नम् । न । चिन्तामणौ ॥

दिव्यरथः । पुं । देवविमाने । व्योमयाने ॥

दिव्यरसः । पुं । पारदे ॥

दिव्यलता । स्त्री । मूर्वालतायाम् ॥

दिव्यवस्त्रः । पुं । सूर्यशोभायाम् ॥ न । शुभांशुके ॥ दिविभववस्त्रे ॥ त्रि । सुन्दरवस्त्रवति ॥

दिव्यसारः । पुं । शालवृक्षे ॥

दिव्यस्त्री। स्त्री। अप्सरःप्रभृतौ॥

दिव्या। स्त्री। आमलक्याम्। धात्र्याम्॥ वन्ध्याकर्कोटक्याम्॥ शतावर्याम्॥ महामेदायाम्॥ ब्राह्मयाम्॥ स्थूलजीरके॥ श्वेतदूर्वायाम्॥ हरीतक्याम्॥ सुरायाम्। गन्धवत्याम्॥

दिव्यादिव्या। स्त्री। उपदेवीविशेषे॥

दिव्योदकम्। न। आकाशजले। खवारिणि॥

दिव्योपपादुकः। त्रि। अमरे। निर्जरे॥ मातृपित्रादिदृष्टकारणनिरपेक्षा अदृष्टसहकृतेभ्योजाता ये देवास्ते दिव्योपपादुकाउच्यन्ते॥ दिवि-भवः। द्युप्रागपागितियत्। उपपद्यते। पदगतौ। लषपतपदेत्युकञ्। दिव्यश्चासावुपपादुकश्च॥

दिव्यौघः। पुं। गुरुविशेषे॥

दिव्यौषधिः। स्त्री। मनःशिलायाम्॥

दिक्-ग्। स्त्री। ककुभि। आशायाम्। काष्ठायाम्। प्राच्यादिव्यवहारहेतौ। कृत्वैकमवधिं तस्मादिदं पूर्वञ्च पश्चिमम्। इति देशोनिदिश्येत यया सादिगितिस्मृतेतिव्युत्पत्तेः कार्यमात्रनिमित्तकारणे॥ साचैकानित्याविभ्वी चेतिन्यायमतम्॥ सादशधा। यथा। पूर्वा आग्नेयी दक्षिणाच

नैर्ऋती पश्चिमा तथा। वायवी चोत्तरैशानी ऊर्द्धा चाधोदिशोदशेतिवराहपुराणम्॥ दिशन्त्यवकाशम्। दिशअतिसर्जने। ऋत्विगित्यादिना निपातनात् क्विन्॥ दिश्यतेऽसौवा। दिशेःकर्मणिक्विन्॥ दन्तक्षतविशेषे॥ दिग्दष्टे वर्त्तुलाकारे इति वैजयन्ती॥

दिशा। स्त्री। दिशि॥ भागुरिमतेन टाप्॥ अस्याअङ्गारिण्यादि संज्ञा चोक्ता। यथा। अङ्गारिणी दिग्रविविप्रयुक्ता यस्यांरवि स्तिष्ठतिसा प्रदीप्ता। प्रधूमिता यास्यतियांदिनेशः शेषाःप्रशस्ताःशुभदास्वताःस्युः॥

दिश्यम्। त्रि। दिग्भवेवस्तुनि॥ दिशिभवम्। दिगादिभ्योयत्॥ दिगन्तरादानीते॥

दिष्टः। पुं। काले॥ दारुहरिद्रायाम्॥ न। भाग्ये। दैवे। भागधेये॥ त्रि। आदिष्टे। उपदिष्टे॥ दिशति। दिशअतिसर्जने। क्तिच्क्तौचसंज्ञायामितिक्तः॥ दत्ते॥

दिष्टान्तः। पुं। मरणे॥ दिष्टस्यदैवस्य अन्तः॥

दिष्टिः। स्त्री। मुदि। हर्षे॥ माने॥ परिमाणे॥ दिशति। दिश०। क्तिच्क्तौचेतिक्तिच्॥

दिष्ण्या । अ । हर्षे ॥ मङ्गले ॥ भाग्येने
त्यर्थे ॥ देशनम् । दिश० । सं० क्विप्
। दिशं ख्यायति वा । ख्यै ष्ण्यै शब्दस
ङ्घातयोः । क्विप् । ष्टुत्वम् । संज्ञा
पूर्वकत्वाज्जशत्वं न ॥ यद्वा । दिशति
। अघ्न्यादिभ्यश्चेति यक् ॥

दिष्णुः । त्रि । दातरि ॥

दीक्षणीया । स्त्री । इष्टिभेदे । सौ
मिक्याम् ॥

दीक्षा । स्त्री । नियमे ॥ य० । एतांश्चा
न्यांश्च सेवेत दीक्षा विप्रो वनेवस
न्निति ॥ गुरुमुखात् स्वेष्टदेवस्य मन्त्र
ग्रहे ॥ क्रियावर्णकलास्पर्शवाग्दृग्ध्या
नस संज्ञकाः । दीक्षा मोक्षप्रदा देवि
सप्तधा परिकीर्त्तिताः ॥ दीक्षा च द्वि
विधा प्रोक्ता बाह्याभ्यन्तरभेदतः
। क्रियादीक्षा भवेद्बाह्या वेधाख्याभ्य
न्तरी भवेत् ॥ दिव्यभावप्रदानाच्च
क्षालनात् किल्बिषस्य च । दीक्षेति
कथिता सद्भिर्भवबन्धविमोचनी ॥
दीयते सकलं देवि गुरवे प्राणसंयुत
म् । धनं तच्च सुवर्णादिपट्टवस्त्रसमु
च्चयम् ॥ क्षयं प्राप्नोति सद्भावान्ना
नापापसमुच्चयः । तस्माद्दीक्षेति ना
मास्याः सर्वशास्त्रेषु सुव्रते ॥ दीयते
विमलं ज्ञानं क्षीयते कर्मवासना । ते
न दीक्षेति सा प्रोक्ता मुनिभिर्धर्मको
विदैः ॥ क्रियाविशेषे ॥ दीक्षा च तृ
तीयं जन्म ब्राह्मणादेः । यथाह मनुः ।
मातुरग्रेऽधिजननं द्वितीयं मौञ्जिब-
न्धने । तृतीयं यज्ञदीक्षायां द्विजस्य
श्रुतिचोदनादिति ॥

दीक्षागुरुः । पुं । मन्त्राद्युपदेशकर्त्तरि
। देशिके ॥

दीक्षान्तः । पुं । अवभृथे ॥ प्रधानया
गो दीक्षा तस्या अन्तः समापको योऽ
परो यज्ञो न्यूनत्वादिदोषशान्त्यर्थं प्र
धानयागस्य पूरणार्थं प्रतिष्ठार्थं क्रिय
ते सोऽवभृथो दीक्षान्तोऽप्युच्यते ॥

दीक्षितः । त्रि । संजातदीक्षे । स्वीकृ
तदीक्षे ॥ य० । अदीक्षितो हि मर
णे रौरवं नरकं व्रजेत् । तस्माद्दी-
क्षां प्रयत्नेन सदा कुर्य्यात्सतान्त्रिका
दिति ॥ अपि च । अदीक्षितस्य मर
णं रौरवाय प्रकल्पते । न पूजाद्यधि
कारोऽस्ति विना दीक्षां वरानने इति
॥ दीक्षणीयेष्टिकृति ॥ सोमपानाध्व
रान्विते । सोमपानवति यागे आदे
ष्टरि ॥ दीक्षते स्म । दीक्ष मौण्ड्ये
ज्योपनयननियमव्रतादेशेषु । गत्य
र्थेति क्तः ॥ यद्वा । दीक्षा संजाताऽस्य
। ता० इतच् ॥ अवाच्यो दीक्षितो
नाम्ना यवीयानपि यो भवेत् । भोभव
त्पूर्वकं त्वेन मभि भाषेत धर्मविदि-

तिमनुः ॥ काम्पिल्लनगरस्थयज्ञदत्तनामकेविप्रे ॥ सचकाशीखण्डे प्रसिद्धः ॥

दीक्षिता । पुं । सोमयागाख्ये ॥ दीक्षते तच्छीलः । दीक्ष० । तृन् । सूददीपदीक्षश्चेतियुजन ॥

दीक्षितायनी । स्त्री । काम्पिल्लनगरस्थदीक्षितनामकविप्रस्यपत्न्याम् ॥

दीदिविः । पुं । धिषणे । वृहस्पतौ ॥ पुं । न । अन्ने ॥ दीव्यन्त्यनेन । दिवु० । दिवोदेदीर्घश्चाभ्यासस्येत्यौणादिकःक्विन् । कित्त्वाद्गुणाभावः । गोपामृतस्यदीदिर्वामितिमन्त्रेतु द्योतमानमित्यर्थः ॥

दीधितिः । स्त्री । किरणे ॥ दीधीते दीप्यते । दीधीङ्दीप्तिदेवनयोः । क्तिच् । तितुत्रेतीणिनषेधस्तुन । अग्रहादीनामितिवार्त्तिकात् । यीवर्णयोरितीकारलोपः ॥

दीनः । त्रि । दुर्गते । दरिद्रे ॥ भीते ॥ शोच्ये ॥ दीयतेस्म । दीङ्क्षये । गत्यर्थेतिक्तः । स्वादयओदितः । ओदितश्चेतिनत्त्वम् ॥ यद्वा । इगुपधज्ञा जिदीङ्कितिनक् ॥ न । तगरपुष्पे ॥ इतिराजनिर्घण्टः ॥

दीननाथः । त्रि । दरिद्रजनभर्त्तरि ॥

दीना । स्त्री । मूषिकायाम् । मूंसी इतिभाषा ॥

दीनारः । पुं । स्वर्णभूषणे ॥ मुद्रायाम् । व्यावहारिकरूपके । रुपया इति भाषा ॥ निष्कपरिमाणे ॥ सुवर्णकर्षद्वये ॥ सम्यग् व्यवहारार्थं मानवस्तुनि ॥ द्वात्रिंशद्रक्तिकापरिमिते काञ्चने ॥ दीयते । दीङ्० दीङेनुट् चेत्यारन् ॥

दीपः । पुं । वर्त्तिस्थज्वलदग्निशिखायाम् । प्रदीपे । कज्जलध्वजे । गृहमणौ ॥ घृततैलध्वदीपार्थे स्नेहान्यन्या निवर्जयेत् ॥ इति वह्निपुराणम् ॥ दीपनिर्वापणात् पुंसः कुष्माण्डच्छेदनात् स्त्रियः । अचिरेणैव काले नवंशनाशो भवेद्ध्रुवम् ॥ नैवनिर्वापयेद्दीपं देवार्थमुपकल्पितम् । दीपहर्त्ता भवेदन्धः काणो निर्वापको भवेत् ॥ इतिकालिकापुराणम् ॥ कोषजं रोमजं वस्त्रं वर्त्त्यर्थं नचाददेत् । नमिश्रीकृत्य दद्यात्तु दीपेस्नेहान्घृतादिकान् ॥ कृत्वामिश्रीकृतं स्नेहं तामिस्रं नरकं व्रजेत् । वसामज्जास्थिनिर्यासैः स्नेहैः प्राण्यङ्गसम्भवैः । प्रदीपं नैवकुर्यात्तु कृत्वा पङ्केविषीदतीतिका० पु० ॥ दीप्यते ऽनेनवा । दीपीदीप्तौ । इगुपधत्वात् कः । घञ्वा । अच् ॥

दीपकः। पुं। दीपे। स्नेहाशे। दीपाइति दीवा इतिच भाषा॥ खगग्राहिखगे। बाजइतिसिकरा इतिच भाषा॥ यमान्याम्॥ लोचमस्तके॥ मात्रावृत्तविशेषे। य०। तुरगैकमुपधाय सुनरेन्द्र मवधाय। इहदीपक मवेहिलघुमन्तमवधेहि॥ यथा। चरणमानमति वल्गुजगदेतदतिफल्गु। धनलोभमपहाय नमपद्मनयनाय॥ रागविशेषे॥ न। कुङ्कुमे॥ इतिशब्दरत्नावली॥ वागलङ्कारे॥ सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम्। सैवक्रियासुबह्वीषु कारकस्येतिदीपकम्॥ प्राकरणिकाना मर्थात् उपमानोपमेयानां धर्मः क्रियादिरेक वारमेवयदुपादीयते तदेकस्यैव समस्तवाक्यदीपनाद्दीपकम्॥ यथा। किवणाणं धणं णाआणं फणमणी केसराइं सीहाणम्। कुलवालिआणं थणा कुत्तोघिप्पन्ति अमुआणम्॥ कृपणानांधनं नागानां फणामणिः केसराणिसिंहानाम्। कुलपालिकानांस्तनाः कुतः स्पृश्यन्ते अमृतानामितिसंस्कृतम्॥ अचामृतानामिति स कलघष्व्यन्तविशेषणम्। अन्नवर्ण्यत्वेन प्रकृतानां कुलवधूस्तनानां तदुपमानत्वेन प्रकृतानामन्येषांचकुतः स्पृश्यन्त इतिसकृद्धर्मोपादानाद्दीपकालङ्कारः॥ ६५॥ कारकस्यच बह्वीषु क्रियासु सकृद्वृत्तिर्दीपकम्। यथा। स्विद्यति कूणति वेल्लति विचलति निमिषति विलोकयति तिर्यक्। अन्तर्नन्दति चुम्बितुमिच्छति नवपरिणयावधूः शयने॥ स्विद्यति स्वेदंभजते। कूणति सङ्कोचमालम्बते। वेल्लतिपरिवृत्त्यशेते। विचलतिविशेषतश्चञ्चलाभवति। निमिषति निद्राव्याजेन नेत्रेमुद्रयति। अन्तर्नन्दति हृष्यति नवोढात्वेन वाह्यतोहर्षाप्रकाशनात्। अतएवचुम्बितुमिच्छति नतु चुम्बतीत्यनेकासुक्रियासु वधूरूपकर्त्तृकारकस्यसकृद्वृत्तिरित्यर्थः॥ अपिच। वदन्तिवर्ण्यावर्ण्यानां धर्मैक्यंदीपकंबुधाः। मदेनभातिकलभः प्रतापेनमहीपतिः॥ दीपयति। दीपीदीप्तौ। णयन्तः। ण्वुल्॥ त्रि। दीपेकुशले॥ आ० कन्॥ दीप्तिकारके। भासके॥

दीपकूपी। स्त्री। दीपवर्त्याम्। तैलमाल्याम्। पलीता इतिवत्ती इति च भाषा॥

दीपखोरी। स्त्री। दीपकूप्याम्॥ इति शब्दमाला॥

दीपध्वजः। पुं। कज्जले॥ इतिजटा

धरः ॥

दीपनः । पुं । कासमर्द्दे ॥ पलाण्डौ ॥ मयूरशिखायाम् ॥ शालिञ्चशाके ॥ न । तगरमूले ॥ कुङ्कुमे ॥ त्रि । दीपयितरि ॥

दीपनी । स्त्री । पाठायाम् ॥ मेथिकायाम् ॥ यवान्याम् ॥

दीपनीयः । पुं । यवान्याम् ॥ औषधवर्गविशेषे ॥ यथा । पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम् । दीपनीयः स्मृतो वर्गः कफानिलगदापहः इतिचक्रदत्तः ॥ त्रि । दीपनयोग्ये ॥

दीपपुष्पः । पुं । चम्पकवृक्षे ॥

दीपमाला । स्त्री । दीपशृङ्खलायाम् । दीपाल्याम् ॥ दीपानां माला ॥

दीपमालिका । स्त्री । दीपान्विताया ममावास्यायाम् । दीपाल्याम् । यक्षरात्रौ ॥ दीपमालेव । स्वार्थे कः । इत्वम् ॥

दीपलक्षणम् । न । प्रज्वलितदीपस्य शुभाशुभफलाय तत्स्वरूपनिरूपणे ॥ तत्राशुभफलम् । वामावर्त्तो मलिनकिरणः सस्फुलिङ्गोऽल्पमूर्त्तिः क्षिप्रं नाशं व्रजति विमलस्नेहवर्त्त्यन्वितोपि । दीपः पापं कथयति फलं शब्दवान् वेपनश्च व्याकीर्णार्चिर्विशलभमरुद्यस्य नाशं प्रयाति ॥ १ ॥ शुभल० । दीपः संहतमूर्त्तिरायततनुर्निर्वेपनो दीप्तिमान् निःशब्दो रुचिरः प्रदक्षिणगतिर्वैदूर्य्यहेमद्युतिः । लक्ष्मीं क्षिप्रमभिव्यनक्ति सुचिरं यश्चोद्यतं दीप्यते शेषं लक्षण मग्निलक्षणसमं योज्यं यथायुक्तितः ॥ इति वाराह्याम् ८१ ॥

दीपवती । स्त्री । कामाख्यायां नदीविशेषे ॥ यथा । एषा च हिमवज्जाता छिन्दन्ती दीपवत् तमः । तेन देवमनुष्येषु नदी दीपवती स्मृतेति कालिकापुराणम् ॥

दीपवृक्षः । पुं । दीपाधारे । दीपतरौ । दीवट इतिभाषा ॥ यथा । दीपवृक्षाश्च कर्त्तव्या स्तैजसाद्यैः सभैरव । वृक्षेषु दीपो दातव्यो नतु भूमौ कदाचन ॥ सर्वसहा वसुमती सहते न त्विदं द्वयम् । अकार्य्यपादघातञ्च दीपतापं तथैव च । तस्माद्यथा तु पृथिवी तापं नाप्नोति वै तथा ॥ दीपं दद्यान् महादेव्यै अन्येभ्योपि च भैरवेति ॥

दीपवृक्षकः । पुं । दीपवृक्षे ॥

दीपशिखा । स्त्री । प्रदीपज्वालायाम् ॥

दीपशृङ्खला । स्त्री । दीपमालिकायाम् ॥

दीपाग्निः । पुं । अर्कनिष्कासनाय वह्नि

विशेषे ॥ यथा । द्वाभ्यां तस्य चतुर्थ्यां योग्नि दीपाग्निरुच्यते। तस्य काष्ठस्येत्यर्थः ॥

दीपान्विता । स्त्री । दीपाल्याम् ॥ सा च मुख्यचान्द्रेणाश्विनस्य । गौणचान्द्रेण कार्त्तिकस्यामावास्या । यथा । येयं दीपान्विता राजन् ख्याता पञ्चदशी भुवि । तस्यां देया न चैद्दत्तं पितॄणां वै महालये ॥ तत्र कर्माणि यथा । प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम् । दीपवृक्षास्तथा कार्या भक्त्या देवगृहेष्वपि ॥ चतुष्पथे श्मशानेषु नदीपर्वतसानुषु । वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च ॥ वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः । दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरम् ॥ ब्राह्मणान् भोजयित्वादौ विभाज्य च बुभुक्षितान् । अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना ॥ स्निग्धैर्मुग्धैर्विदग्धैश्च वान्धवैर्भृतकैः सहेति ॥ पश्यान्नसुखरात्रिकाम् ॥

दीपाली । स्त्री । दीपान्वितायाममायाम् । यत्र रात्रौ । दिवाली इति भाषा ॥ दीपमालायाम् ॥

दीपिका । स्त्री । प्रकाशिकायाम् ॥ ग्रन्थविशेषे ॥ हिन्दोलरागस्य रागिण्याम् ॥ प्रदोषकाले गृहसम्प्रविष्टा प्रदीपहस्ता ऽरुणगात्रवस्त्रा । सीमन्तसिन्दूरविराजमाना सुरक्तमाल्याकिल दीपिकेयमिति ध्यानम् ॥ गानकालः सायाह्नः ॥

दीपितः । त्रि । प्रकाशिते ॥ उज्ज्वलिते । निखारा इति भाषा ॥ मण्डिते ॥

दीपिता । त्रि । दीप्तिकर्त्तरि ॥

दीपोत्सवः । पुं । दीपान्वितायाममायाम् ॥

दीप्तः । पुं । निम्बूके ॥ सिंहे ॥ न । स्वर्णे ॥ हिङ्गुनि ॥ त्रि । ज्वलिते ॥ दग्धे ॥ निर्भासिते ॥ दीप्तिमति ॥ दीप्यते स्म । दीपी दीप्तौ । क्तः । श्वीदितो निष्ठायामिति नेट् ॥

दीप्तकम् । न । स्वर्णे ॥

दीप्तजिह्वा । स्त्री । उल्कामुख्याम् ॥ दीप्ता ज्वलन्ती जिह्वा यस्याः । शिवानां वाशितेन जिह्वा ज्वलतीति प्रसिद्धिः ॥

दीप्तपिङ्गलः । पुं । सिंहे ॥

दीप्तरसः । पुं । किञ्चुलुके ॥

दीप्तलोचनः । पुं । विडाले ॥

दीप्तलोहम् । न । कांस्ये ॥

दीप्ता । स्त्री । लाङ्गलिकायाम् । अग्निशिखौषधौ ॥ ज्योतिष्मत्याम् ॥ सातलायाम् ॥

दीप्ताक्षः । पुं । मार्जारे ॥

दीप्ताग्निः । पुं । अगस्त्यमुनौ ॥ त्रि । तीक्ष्णजठरानलयुक्ते ॥
दीप्ताङ्गः । पुं । मयूरे ॥
दीप्तिः । स्त्री । प्रभायाम् । रुचि । त्विषि ॥ प्रभाप्रसरे ॥ दीप्यतेऽनया । दीपी० क्तिन्नावादिभ्यः ॥ लाक्षावेगस्यतीव्रतायाम् ॥ स्त्रियाः अयत्नजगुणे ॥ कान्तिरेव वयोभोगदेशकालगुणादिभिः । उद्दीपितातिविस्तारं प्राप्ताचेद्दीप्तिरुच्यते ॥ लाक्षायाम् ॥ कांस्ये ॥
दीप्तिकः । पुं । दुग्धपाषाणवृक्षे ॥
दीप्तोपलः । पुं । सूर्यकान्तमणौ ॥
दीप्यः । पुं । यमान्यम् ॥ लोचमस्तके ॥ जीरके ॥ न । शुभ्रजीरे ॥ दीपनम् । दीपी० भावे घञ् ॥ दीपेसाधुर्वा । तत्रसाधुरितियत् ॥ त्रि । दीपोये ॥ दीपायहितम् । अपूपादित्वात् पचेयत् ॥
दीप्यकः । पुं । अलङ्कारे ॥ यमान्याम् ॥ लोचमस्तके ॥ न । अजमोदायाम् ॥ यवान्याम् ॥ वर्हिचूडायाम् । रुद्रजटेति गौडभाषा ॥
दीप्यमानः । त्रि । प्रकाशमाने ॥
दीप्या । स्त्री । यवान्याम् ॥
दीप्रः । त्रि । दीप्तिमति ॥
दीयमानः । त्रि । वर्त्तमानदानसम्बन्धिवस्तुनि ॥
दीर्घः । पुं । लताशालवृक्षे ॥ उष्ट्रे ॥ रामशरे ॥ उष्ट्रे ॥ हिमाचवर्गे । गुरुवर्णे ॥ त्रि । आयते ॥ दृणाति । दृविदारणे । बाहुलकाद्दृघञ् ॥
दीर्घकणा । स्त्री । गौरजीरके ॥
दीर्घकण्टकः । पुं । बर्बुरे ॥
दीर्घकणः । पुं । वके ॥
दीर्घकन्दकम् । न । मूलके ॥
दीर्घकन्दिका । स्त्री । मुषल्याम् ॥
दीर्घकन्धरः । पुं । वकपक्षिणि ॥
दीर्घकाण्डः । पुं । गुण्डतृणे । त्रिकोणके ॥
दीर्घकाण्डा । स्त्री । तिक्ताङ्गायाम् ॥
दीर्घकीलः । पुं । } अङ्कोठवृक्षे । नि
दीर्घकोलकः । पुं । } कोचके ॥
दीर्घकूरकम् । न । आन्ध्रदेशोद्भवेशालिविशेषे । राजान्ने । धान्यश्रेष्ठे ॥
दीर्घकेशः । पुं । भल्लूके ॥ त्रि । आयतकचे ॥
दीर्घकोशा । स्त्री । दुर्नामायाम् ॥ दीर्घःकोशोयस्याः ॥
दीर्घकोशिका । स्त्री । दुर्नामायाम् । झिनुक इति गौडभाषा प्रसिद्धे जलजन्तुविशेषे । सीपीइतिदेशभाषा ॥ दीर्घःकोशोयस्याः । जातेरितिङीष् । संज्ञायां कन् । केण इति ह्रस्वः ॥

दीर्घकोषा । स्त्री । } दीर्घकोषि
दीर्घकोषिका । स्त्री । } कायाम् ॥
प्रक्रियापूर्ववत् ॥

दीर्घगतिः । पुं । उष्ट्रे ॥ इ०रानि० ॥

दीर्घग्रन्थिः । पुं । गजपिप्पल्याम् ॥

दीर्घग्रीवः । पुं । उष्ट्रे ॥ दीर्घा ग्रीवा यस्य सः ॥ नीलक्रौञ्चे । अतिजागरे ॥

दीर्घघाटिकः । पुं । उष्ट्रे ॥ इतिशब्दमाला ॥

दीर्घच्छदः । पुं । इक्षौ ॥ दीर्घाश्छदा यस्य सः ॥

दीर्घजङ्गलः । पुं । भङ्गानमत्स्ये ॥

दीर्घजङ्घः । पुं । वके ॥ उष्ट्रे ॥ चि । दीर्घप्रसृतावति ॥

दीर्घजिह्वः । पुं । सर्पे ॥

दीर्घतरुः । पुं । ताले ॥

दीर्घतिमिषा । स्त्री । कर्कट्याम् ॥

दीर्घतुण्डा । स्त्री । छुच्छुन्दर्याम् ॥

दीर्घतृणः । पुं । पल्लिवाहे ॥

दीर्घदण्डः । पुं । एरण्डवृक्षे ॥ शुक्लैरण्डे ॥

दीर्घदण्डी । स्त्री । गोरक्ष्याम् ॥

दीर्घदर्शी । पुं । पण्डिते । विदुषि ॥ गृध्रे ॥ भल्लूके ॥ त्रि । दूरदर्शके ॥ आगामिकार्यज्ञे ॥ दीर्घं दीर्घाद्वा पश्यति । दृशिर्० । ग्रह्यादित्वात् णिनिः । सुपीति वा ॥

दीर्घदृष्टिः । पुं । दीर्घदर्शिनि ॥ दूरावलोकनाय यन्त्रविशेषे । दूरवीक्षणे ॥ दीर्घा दृष्टिर्यस्य येन वा ॥

दीर्घद्रुः । पुं । तालवृक्षे ॥

दीर्घद्रुमः । पुं । शाल्मलिवृक्षे ॥

दीर्घनादः । पुं शङ्खे ॥

दीर्घनालः । पुं । यावनाले ॥ वृत्तगुण्डे ॥ न । दीर्घरोहिषके ॥

दीर्घनिद्रा । स्त्री । मरणे ॥ अनया निद्रया राजन् दीर्घनिद्राभविष्यति ॥

दीर्घपक्षः । पुं । कलिङ्गे । धूम्याटखगे ॥

दीर्घपटोलिका । स्त्री । धुँदुल इति गौडभाषाप्रसिद्धे लताफलविशेषे ॥

दीर्घपत्रः । पुं । जलजमधूलके ॥ रसोनभेदे । राजपलाण्डौ ॥ विष्णुकन्दे ॥ हरिदर्भे ॥ कुन्दरे ॥ ताले ॥ कुपीलौ ॥

दीर्घपत्रकः । पुं । एरण्डे ॥ रक्तलशुने ॥ हिज्जले ॥ वेतसे ॥ करवीरवृक्षे ॥ जलजमधूके ॥ लशुने ॥ दीर्घाणि पत्राणि यस्य सः । स्वार्थे कः ॥

दीर्घपत्रा । स्त्री । अल्पजम्बूवृक्षे ॥ शालपर्ण्याम् ॥ चक्राङ्ग्याम् । चेंचूशाके ॥ चित्रपर्णिकायाम् ॥ केतक्याम् ॥ गन्धपत्रायाम् ॥ डोडीक्षुपे ॥ दीर्घाणि पत्राणि यस्याः ॥

दीर्घपत्रिका । स्त्री । घृतकुमार्याम् ॥

शालपर्ण्याम् ॥ श्वेतवचायाम् ॥

दीर्घपर्वी । स्त्री । पलाशीलतायाम् ॥ महाचञ्चुशाके ॥

दीर्घपर्णी । स्त्री । पृश्निपर्ण्याम् ॥

दीर्घपल्लवः । पुं । शणवृक्षे ॥ न । आयतच्छदे ॥ त्रि । दीर्घच्छदवति ॥

दीर्घपात् । पुं । कङ्कपक्षिणि ॥

दीर्घपादः । पुं । कङ्कपक्षिणि ॥ दीर्घौ पादौयस्य ॥

दीर्घपादपः । पुं । ताले ॥ पूगे ॥

दीर्घपृष्ठः । पुं । सर्पे ॥ दीर्घंपृष्ठमस्य ॥

दीर्घफलः । पुं । आरग्वधे ॥ दीर्घाणि फलान्यस्य ॥

दीर्घफलकः । पुं । अगस्त्यवृक्षे ॥

दीर्घफला । स्त्री । कपिलद्राक्षायाम् ॥ जतुकायाम् ॥

दीर्घमारुतः । पुं । हस्तिनि ॥ दीर्घो मारुतोवायुर्यस्य ॥

दीर्घमूलः । पुं । मोरटलतायाम् ॥ बिल्वान्तरवृक्षे ॥ न । लामज्जके ॥

दीर्घमूलकम् । न । मूलके ।

दीर्घमूला । स्त्री । शालपर्ण्याम् ॥ श्यामलतायाम् ॥ दीर्घंमूलं यस्याः ॥

दीर्घमूली । स्त्री । दुरालभयाम् ॥

दीर्घरदः । पुं । शूकरे ॥ दीर्घौरदौयस्य ॥ त्रि । आयतदन्ते ॥

दीर्घरसनः । पुं । सर्पे ॥ दीर्घारसना जिह्वायस्य ॥

दीर्घरागा । स्त्री । हरिद्रायाम् ॥

दीर्घरात्रम् । न । चिरकाले ॥

दीर्घरोमा । पुं । भल्लूके ॥

दीर्घरोहिषकम् । न । कत्तृणविशेषे । दृढकाण्डे ॥

दीर्घवंशः । पुं । नले ॥ आयते कुले । तृणध्वजे च ॥

दीर्घवक्त्रः । पुं । हस्तिनि ॥

दीर्घवल्ली । स्त्री । पलाश्याम् ॥ पातालगरुडीलतायाम् ॥ महेन्द्रवारुण्याम् ॥ आयतायां लतायाम् ॥

दीर्घवाला । स्त्री । चमर्याम् ॥

दीर्घवृन्तः । पुं । श्योनाकद्रुमे ॥ दीर्घं वृन्त मस्य ॥

दीर्घवृन्तकः । पुं । स्योनाकप्रभेदे ॥

दीर्घवृन्ता । स्त्री । इन्द्रचिर्भिट्याम् ॥

दीर्घवृन्तिका । स्त्री । एलापर्ण्याम् ॥

दीर्घशरः । पुं । यावनाले ॥

दीर्घशाखः । पुं । शणवृक्षे ॥ शालवृक्षे ॥

दीर्घशाखिका । स्त्री । नीलाम्लीक्षुपे ॥

दीर्घशिम्बिकः । पुं । चणे ॥ इतिराजनिर्घण्टः ॥

दीर्घशूकः । पुं । शालेर्जात्यन्तरे ॥

दीर्घशूककम् । न । राजान्ने ॥

दीर्घसत्त्रम् । न । यज्ञविशेषे ॥ तीर्थविशेषे ॥

दीर्घसुरतः । पुं । कुक्कुरे । शुनि ॥ दीर्घसुरतंमैथुनमस्य ॥

दीर्घसूत्रः । त्रि । चिरक्रिये । दीर्घकालेन क्रियानुष्ठातरि ॥ दीर्घंसूत्रंव्यवस्थायस्य ॥ अदीर्घसूत्रश्च भवेत् सर्वकर्मसु पार्थिवः । दीर्घसूत्रस्य न्रृपतेः कर्महानि र्ध्रुवं भवेत् ॥ रागे द्वेषेच कामेच द्रोहे पापेच कर्म्मणि । अप्रियेचैवकर्त्तव्ये दीर्घसूत्रश्च शस्यते इतिमत्स्यपुराणम् ॥ न । विस्तृततन्तौ ॥

दीर्घसूत्री । त्रि । दीर्घसूत्रे । निरन्तरशङ्कासहस्रकवलितान्तःकरणत्वेनातिमन्थरप्रवृत्तौ । यदद्यकर्त्तव्यं तन्मासेनापि करोति नवेत्येवंशीले ॥

दीर्घसोमः । पुं । सोमयागविशेषे ॥

दीर्घस्कन्धः । पुं । तालवृक्षे ॥

दीर्घा । स्त्री । पृश्निपर्ण्याम् ॥ दीर्घप्रमाणायाङ्गवि ॥

दीर्घाध्वगः । पुं । लेखहारे । धाउडिया० इति गौडभाषा ॥ उष्ट्रे ॥

दीर्घायुधः । पुं । कुन्तास्त्रे ॥ दीर्घमस्यावायुधश्च ॥ शूकरे ॥ दीर्घआयुधोऽस्य ॥

दीर्घायुष्यः । पुं । श्वेतमन्दारके ॥

दीर्घायुः । पुं । शाल्मलिद्रुमे ॥ वायसे ॥ जीवकवृक्षे ॥ मार्कण्डेयमुनौ ॥ त्रि । आयुष्मति । चिरजीविनि ॥ दीर्घमायुर्यस्य ॥

दीर्घालर्कः । पुं । श्वेतमन्दारे ॥

दीर्घिका । स्त्री । वाप्याम् । अधिकायतायांचतुरस्रायां वाप्याम् ॥ किञ्चिद्दीर्घतधनुः परिमिते जलाशये इतिगौडाः ॥ दीर्घैव । संज्ञायांकन् ॥

दीर्घिमा । पुं । दीर्घत्वे ॥ दीर्घस्य भावः । इमनिच् ॥

दीर्घोरुकः । पुं । ढङ्कर्याम् ॥ इ० रा० नि० ॥

दीर्णः । त्रि । विदारिते ॥ भीते ॥

दीविः । पुं । किकीदिवौ ॥

दुःकूलः । पुं । चोरनामगन्धद्रव्ये ॥

दुःखम् । न । संसारे ॥ मनोधर्मविशेषे ॥ न्यायमते आत्मगुणभेदे ॥ तत् अधर्मजन्यं सचेतसां प्रतिकूलमिति भा० प० ॥ पीडायाम् । बाधायाम् । कष्टे । सर्वेषां प्रतिकूलवेदनीये ॥ बाधनालक्षणं दुःखम् । २१ ॥ बाधनापीडा तदेव लक्षणंस्वरूपं यस्य । तथाचानुभवसिद्धदुःखत्वजातिरेवलक्षणं शरीरेन्द्रियार्थेषु दुःखसाधनत्वात् । सुखेचदुःखानुषङ्गात् दुःखव्यवहारो गौण इति । वस्तुतोऽसत्स्वरूपेचित्तस्यराजसे परिणामे बाधनालक्षणे ॥ तद्दुःखंत्रिविध

म् । आध्यात्मिकं शारीरं मानसञ्च व्याधिवशात् कामादिवशाच्च भवति । आधिभौतिकं व्याघ्रादिजनितम् ॥ आधिदैविकंग्रहपीडादिजनितम् ॥ * ॥ अधर्मसाधारणकारणके प्रतिकूलवेदनीये ॥ निरुपाधिद्वेषविषयीभूताचित्तवृत्तिरधर्मासाधारणकारणिकादुःखम् ॥ इष्टवियोगानिष्टसंयोगजे अध्यात्मादिनिमित्ते ॥ तात्कालिक्यां पीडायाम् ॥ रजसि ॥ न दुःखंपञ्चभिःसह ॥ दुष्टानिखान्यस्मिन् ॥ यद्वा । दुर्निन्दितं खनति । खनु० । अन्ये० डः ॥ यद्वा । दुःखयति । सुखदुःखतत्क्रियायाम् । चु० । पचाद्यच् ॥ दुःखंचित्तस्यरागजः परिणामोवाधनालक्षणः यद्वाधात् प्राणिनस्तदपघाताय प्रवर्त्तन्ते ॥

दुःखग्रामः । पुं । संसारे ॥

दुःखत्रयम् । न । आध्यात्मिकाधिभौतिकाधिदैविकस्वरूपे ॥ तत्राध्यात्मिकं द्विविधम् । शारीरं मानसञ्च । शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तम् । मानसं कामक्रोधलोभमोहभयेर्ष्याविषादविषयविशेषदर्शननिमित्तम् । सर्वञ्चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम् । वाह्योपायसाध्यं दुःखंद्वेधा। आधिभौतिकम् आधिदैविकञ्च । तत्राधिभौतिकम् मानुषपशुपक्षिमृगसरीसृपस्थावरनिमित्तम् । आधिदैविकम् यक्षराक्षसविनायकग्रहाद्यावेशनिबन्धनम् ॥ प्रत्यात्मवेदनीयोरजःपरिणामभेदो दुःखम् । दुःखानांत्रयम् ॥

दुःखत्रयाभिघातः । पुं । दुःखत्रयसम्बन्धे ॥ दुःखत्रयं प्रत्यात्मवेदनीयंरजःपरिणामभेदो नशक्यते प्रत्याख्यातुम् । तदनेनदुःखत्रयेणान्तःकरणवर्त्तिना प्रतिकूलतयाचेतनाशक्तेरभिसम्बन्धो ऽभिघातः ॥

दुःखदिरः । पुं । दुष्खदिरे । मह्यासारे ॥

दुःखदोह्या । स्त्री । दुर्दोह्यगव्याम् । करटायाम् ॥ दुःखेनदुह्यते । दुह० । ऋदुपधाच्चाक्लृपिचृतेः इति क्यप् ॥ दुःखेनदुह्यते इति । दुह० । ऋहलोर्ण्यत् ॥

दुःखावसानम् । न । दुरन्ते ॥

दुःखितः । त्रि । दुःखिनि ॥ संसारिणि ॥ दुःखमूलं हि संसारः स यस्यास्ति सदुःखितः । तस्यत्यागःकृतोयेन समुखीनापरःप्रिये इति कुलार्णवतन्त्रम् ॥ ईर्षादियुक्ते । यथोक्तं महाभारते । ईर्ष्यीघृणीत्वसन्तुष्टःक्रोधनोनित्यशङ्कितः । परभाग्योपजीवीचषडेते नित्यदुःखिताइति ॥ * ॥

त्यक्त्वात्म सुखभोगेच्छां सर्वसत्त्वसु खैषिणः । भवन्तिपरदुःखेन साधवो नित्यदुःखिताः इतिवह्निपुराणम् ॥ दुःखं सञ्जातमस्य । ता० इतच् ॥

दुःखी । त्रि । दुःखान्विते । अध्यात्मादिदुःखवति ॥ दुःखमस्त्यस्य । सुखादिभ्यश्चेतीनिः ॥ उपाधिजनितोयोयं चिदाभासोवभासते । दुःखाद्यनुभव स्तत्रश्रौते स्तचविनिश्चितः ॥ दुःखीयदि भवेदात्मा कः साक्षी दुःखिनोभवेत् । दुःखिनः साक्षिता नैव साक्षिणो दुःखिता तथा ॥ न र्त्तेस्याद्विक्रियां दुःखी साक्षिता का विकारिणः । धीविक्रियासहस्राणां साक्ष्यतोहमविक्रियः ॥ शरीरेन्द्रियसङ्घात आत्मत्वेनाभिमानिनीम् । चिदाभासयुतां बुद्धिं विशिषन्ति सुखादयः ॥

दुःशकुनम् । न । अशुभसूचके निमित्ते ॥ यथा । वन्ध्याचर्मतुषास्थिसर्पलवणाङ्गारेन्धनक्लीबविट्तैलोन्मत्तवसौषधारिजटिलप्रव्राट्तृणव्याधिताः। नग्नाभ्यक्तविमुक्तकेशपतितव्यङ्गक्षुधार्त्ता असृक् स्त्रीपुष्पं शरटस्वगेहदहनं मार्जारयुद्धं क्षुतम् ॥ काषायी गडतक्रपङ्कविधवाः कुब्जाः कुटुम्बेकलि र्वस्त्रादेःस्खलनं लुलापसमरं कृष्णानिधान्यानिच । कार्पासं वमनञ्च गर्द्दभरवो दक्षेऽतिरुट् गर्भिणी मुण्डार्द्राम्बरदुर्वचोन्धबधिरो दक्यानदृष्टाःशुभाः ॥ कृष्णाम्बराकृष्णाविलेपनाढ्या कृष्णास्रजं मूर्द्धनि धारयन्ती । दृष्टाप्रकोपायदिकृष्णवर्णा नारी नरै स्तद्विपदोभवन्तीति ॥

दुःशासनः । पुं । दुर्योधनात्मजे भारतप्रसिद्धे क्षत्रिये ॥ दुःखेनशास्यते । शासु० । भाषायां शासियुधीतियुच् ॥

दुःशीलः । त्रि । दुष्टस्वभावे ॥ दुष्टंशीलं यस्यसः ॥

दुःषमम् । अ । गर्हे । निःषममित्यर्थे ॥ दुष्टं समम्त्र । तिष्ठद्गुप्रभृतीनि चेत्यव्ययीभावत्त्वम् । सुविनिर्दुर्भ्यं इति षत्वम् ॥

दुःसमम् । अ । असमञ्जसे ॥

दुःसहः । त्रि । असह्ये ॥

दुःसहा । स्त्री । नागदमन्याम् ॥

दुःसाक्षी । त्रि । कूटसाक्षिणि ॥

दुःसाधी । पुं । दौःसाधिके । द्वारपाले ॥

दुःसाध्यः । त्रि । दुःखनिष्पाद्ये ॥ दुःखेनसाध्यतेनिष्पाद्यते । साध० । ण्यत् ॥

दुःस्थः । त्रि । दुर्गते ॥ मूर्खे ॥ दुःखेन तिष्ठति । सुपिस्थ इतिकः ॥ लुब्धे ॥

दुःस्थितः । त्रि । अनवस्थिते ॥ ष्ठा० । क्तः । द्यतिस्यतीतीत्त्वम् ॥

दुःस्पर्शः । पुं । धवांसा इतिजवासा इति चप्रसिद्धे धन्वयासे । दुरालभायाम् ॥ लताकरञ्जे ॥ त्रि । खरस्पर्शे ॥ दुःखेनस्पृश्यते । स्पृशस्पर्शने । ईषद्दुरितिखल् ॥

दुःस्पर्शा । स्त्री । कण्टकार्याम् ॥ आकाशवल्ल्याम् ॥ कपिकच्छाम् ॥ दुरालभायाम् ॥ टाप् ॥

दुःस्फोटः । पुं । शस्त्रप्रभेदे ॥ इतिहे० ॥

दुकूलम् । न । सूक्ष्मवाससि । श्लक्ष्णवस्त्रे ॥ चौमाम्बरे ॥ दुष्टं कूलति । कूलआवरणे । इगुपधेतिकः । पृ० ॥ यद्वा । द्रवति । दुगतौ । पिञ्ञा० ऊलच् । धातोः कुक् ॥

दुगूलम् । न । दुकूले ॥ इतिहेमचन्द्रः ॥

दुग्धम् । त्रि । प्रपूरिते ॥ कृतदोहे ॥ न । चीरे । पीयूषे । ऊधस्ये । स्तन्ये । पयसि । अमृते । बालजीवने ॥ विदाहीन्यन्नपानानि यानिभुङ्क्ते हि मानवः । तद्विदाहप्रशान्त्यर्थंभोजनान्ते पयःपिबेत् ॥ दुह्यतेस्म । दुहप्रपूरणे । क्तः ॥ दुग्धं सुमधुरं स्निग्धं वातपित्तहरं सरम् । सद्यःशुक्रकरं शीतं सात्म्यं सर्वशरीरिणाम् ॥ जीवनं बृंहणं बल्यं मेध्यं वाजीकरं परम् । वयःस्थापकमायुष्यंसन्धिकारि रसायनम् ॥ विरेकवान्तिवस्तीनां तुल्य मोजो विवर्द्धनम् । जीर्णज्वरे मनोरोगे शोषमूर्च्छाभ्रमेषु च ॥ ग्रहण्यां पाण्डुरोगेच दाहे तृषि हृदामये । शूलोदावर्त्तगुल्मेषु वस्तिरोगे गुदाङ्कुरे ॥ रक्तपित्तेऽतिसारेच योनिरोगे श्रमे क्लमे । गर्भस्रावे चसततं हितं मुनिवरैः स्मृतम् ॥ बालवृद्धक्षतक्षीणाः क्षुद्व्यवायकृशाश्चये । तेभ्यः सदातिशयितं हित मेतदुदाहृतम् ॥ * ॥ धारोष्णं गोःपयो बल्यं लघु शीतं सुधासमम् । दीपनञ्च त्रिदोषघ्नं तद्धाराशिशिरं त्यजेत् ॥ धारोष्णं शस्यते गव्यंधाराशीतन्तु माहिषम् । शृतोष्णमाविकंपथ्यं शृतशीतमजापयः ॥ आमंक्षीर मभिष्यन्दि गुरु श्लेष्मामवर्द्धनम् । ज्ञेयं सर्वमपथ्यं तद्गव्यमाहिषवर्जितम् ॥ नारीक्षीरन्त्वाममेवहितंनतुशृतंहितम् । शृतोष्णंकफवातघ्नंशृतशीतन्तुपित्तनुत् ॥ * ॥ यदौष्ट्रकंक्षीरशेष मामाल्लघुतरं पयः ॥ * ॥ जलेनरहितं दुग्ध मतिपक्वं यथायथा । तथातथा गुरु स्निग्धं वृष्यं बलविवर्द्धनम् ॥ * ॥ पेयूषञ्च किलाटश्चक्षीरशाकंतथैवच । तक्रपिण्ड इमे सर्वा बृंहणा बलवर्द्धनाः ॥ गुरवः श्लेष्मलाश्चैवातपित्तविना

शनाः। दीप्ताग्नीनां विनिद्राणां व्यायेचातिपूजिताः ॥ * ॥ मुखशोषतृषादाहरक्तपित्तज्वरप्रणुत्। लघुर्वलकरोरुच्योमेरटः स्यात् सितायुतः॥ खण्डेन सहितं दुग्धं कफकृत् पवनापहम् । सितासितोपलायुक्तं शुक्रलं कृमिलापहम्॥ सगुडं मूत्रकृच्छ्रघ्नं पित्तश्लेष्मकरं स्मृतम् ॥ * ॥ रात्रौ चन्द्रगुणाधिक्या छायामाकरणा त्तथा । प्राभातिकं पयः प्रायःप्रादोषा द्गुरु शीतलम् ॥ दिवाकरकरातापा छायामकरणात् पयः । प्राभातिका त्तुप्रादोषं लघु वातकफापहम् ॥ * ॥ वृष्यं बृंहण मग्निदीप्तिजनकं पूर्वाह्णकाले पयोमध्याह्नेतुबलावहं कफहरं पित्तापहं दीपनम्। वालेवृद्धिकरं चये चयहरं वृद्धेषु रेतोवहं रात्रौ चीर मनेकदोषशमनं पथ्यं सदाचचुषोः ॥ * ॥ वदन्ति पथ्यं निशि केवलं पयोभोज्यं न तेनेहसहौदनादिकम्। भवेदजीर्णं नसपीतशर्वरी चीरस्य पीतस्य नशेष मुत्सृजेत् ॥ * ॥ दिवाहीन्यन्नपानानि दिवाभुङ्क्तेहि यनरः। तद्विदाहप्रशान्त्यर्थं रात्रौ चीरं सदापिवेत् ॥ * ॥ दीप्तानले कृशे पुंसि वाले वृद्धे पयः प्रिये । मतं

हिततमं दुग्धं सद्यः शुक्रकरं यतः ॥ * ॥ मथितदुग्धस्यतु। चीरं गव्यमथाजंवा कोष्णं दण्डाहतं भवेत्। लघु वृष्यं ज्वरहरं वातपित्तकफापहम् ॥ * ॥ दुग्धफेनगुणाः । गोदुग्धप्रभवं किंवा छागीदुग्धसमुद्भवम्। भवेत्फेनं त्रिदोषघ्नं रोचनं वलवर्द्धनम् ॥ वह्निवृद्धिकरं पथ्यं सद्यस्तृप्तिकरं लघु । अतिसारेऽग्निमान्द्येच ज्वरेजीर्णे प्रशस्यते ॥ * ॥ विदग्धं विरसं चाम्लं दुर्गन्धं ग्रथितंपयः । वर्जयेदम्ललवणयुक्तं कुष्ठादिकृद्यतः॥ शाकाम्लफलपिण्याककुलत्थलवणामिषैः । करीरदधिमाषैश्चप्रायः चीरंविरुध्यते ॥ * ॥ केष्याविकं पथ्यतमं शृतोष्णं चीरं नृजानां शृतशीतमाहुः। देहान्तशीतं महिषीपयस्यं गव्यन्तु धारोष्णमिदं प्रशस्तम् ॥ * ॥ वृष्यं बृंहण मग्निवर्द्धनकरं पूर्वाह्णपीतं पयो मध्याह्ने वलदायकं रतिकरं कृच्छ्रस्यविच्छेदनम् । वाल्येवह्निकरं ततोवलकरं वार्यप्रदं वार्द्धके रात्रौ चीरमनेकदोषशमनं सेव्यं ततः सर्वदा ॥ * ॥ चीरं मुहूर्त्तं चितयोषितं यदतस्तमेतद्विकृतिं प्रयाति। पश्चात्तु दोषं कुरुतेतदूर्द्धं विषोपमं स्याद्दूषितं दशाना

म् ॥ * ॥ जीर्णज्वरे कफे क्षीणे क्षीरं स्यादमृतोपमम् । तदेव तरुणे पीतं विषवद्धन्ति मानुषम् ॥ * ॥ चतुर्थभागं सलिलं निधाय यत्ना द्यदावर्त्तित मुत्तमं तत् । सर्वामयघ्नं बलपुष्टिकारि वीर्यप्रदं क्षीरमतिप्रशस्तम् ॥ * ॥ गव्यं पूर्वाह्णकाले स्यादपराह्णेतु माहिषम् । क्षीरं समर्करं पथ्यं यद्वासात्म्यञ्च सर्वदा ॥ * ॥ क्षीरं नभुञ्जीतकदाप्यतप्तं तप्तञ्चनैत लवणेनसार्द्धम् । पिष्टान्नसन्धानकमाषमुद्गकोषातकीकन्दफलादिकैश्च ॥ * ॥ मत्स्यमांसगुडमुद्गमूलकैः कुष्ठ मावहति सेवितं पयः । शाकजाम्बवरसादिसेवितं मारयत्यवुधमाशु सर्पवत् ॥ * ॥ स्निग्धं शीतं गुरु क्षीरं सर्वकालं न सेवयेत् । दीप्ताग्निं कुरुते मन्दं मन्दाग्निं नष्टमेवच ॥ * ॥ नित्यं तीव्राग्निना सेव्यं सुपक्वं माहिषं पयः । पुष्यन्ति धातवः सर्वे बलपुष्टिविवर्द्धनम् ॥ क्षीरं गवाजकादे मधुरं क्षारं नवप्रसूतानाम् । रूक्षञ्च पित्तदाहं करोति रक्तामयं कुरुते ॥ * ॥ मधुरं त्रिदोषशमनं क्षीरं मध्यप्रसूतानाम् । लवणं मधुरं क्षीरं विदाहजननं चिरप्रसूतानाम् ॥ गुणहीनं निस्सारं क्षीरं प्रथमप्रसूतानाम् । मध्यवयसां रसायन मुक्ता मिदं दुर्बलानां वृद्धानाम् ॥ तासां मासत्रयादूर्द्ध्वं गुर्विणीनाञ्च यत्पयः । तद्वाहिलवणं क्षीरं मधुरं पित्तशोषकृत् ॥ * ॥ दुग्धाम्रं शीतलं स्वादु वृष्यं वर्णकरं गुरु । वातपित्तापहं रुच्यं बृंहणं बलवर्द्धनम् ॥ एवं भिषग्वराः प्राहुस्तथ्यार्थं न संशयः ॥

दुग्धकन्दगणः । पुं । अश्वगन्धादिषु ॥ अश्वगन्धा च मुसली विदारी च शतावरी । क्षीरवाराहिकाचेति दुग्धकन्दगणस्त्वयम् ॥

दुग्धकूपिका । स्त्री । पक्वान्नविशेषे ॥ यथा । तण्डुलचूर्णविमिश्रितनष्टक्षीरेण सान्द्रपिष्टेन । दृढकूपिकां विदध्यात् ताञ्च पचेत् सर्पिषा सम्यक् ॥ क्वथितां कोरितमध्यां घनपयसा पूर्णगर्भाञ्च । शट्टकमुद्रितवदनां तप्तहतेन पक्ववदनाञ्च ॥ अतिपाण्डुखण्डपाके स्नपयेत् कर्पूरवासिते कुशलः ॥ क्वथदुग्धकूपिका सा वल्या पित्तानिलापहा दृष्टा । शीता वृष्या गुर्वी शुक्रकरी तर्पणी रुच्या । विदधाति कायपुष्टिं दृष्टिं दूरप्रसारिणीं सुचिरम् ॥

दुग्धतालीयम् । न । दुग्धाग्रे ॥ क्षीर

फेने ॥ दुग्धाग्रे ॥

दुग्धपाचनम् । न । यन्त्रके । दुग्धपाकपात्रे ॥ इतिहारावली ॥

दुग्धपाषाणः । पुं । दुग्धपाषाणके ॥

दुग्धपाषाणकः । पुं । शिरगोला इति गौडभाषा प्रसिद्धे वृ० विशेषे । चीर्याम् । गोमेदसन्निभे । वज्राभे ॥

दुग्धपुच्छी । स्त्री । दुग्धपेया इतिगौडभाषा प्रसिद्धे वृ० विशेषे । सेवकालौ । नसङ्कर्याम् ॥ इतिशब्दचन्द्रिका ॥

दुग्धफेनः । पुं । सशर्करदुग्धफेने । चीरडिण्डीरे । शार्करे ॥ इतिराजनि० ॥

दुग्धफेनकः । पुं । दुग्धफेने ॥

दुग्धफेनी । स्त्री । क्षुद्रक्षुपविशेषे । पयः फेन्याम् । गोजापर्ण्याम् ॥

दुग्धाब्धितनया । स्त्री । लक्ष्म्याम् ॥

दुग्धाश्मा । पुं । दुग्धपाषाणे ॥

दुग्धिका । स्त्री । चीराव्याम् । स्वादुपर्ण्याम् । दुद्धी इति ख्यातायाम् ॥ दुग्धमस्यस्याः । अतइनिठनाविति ठन् ॥ दुग्धिकोष्णा गुरू रूक्षा वातला पुत्रदायिनी । स्वादुचीरा कटु स्तिक्ता सृष्टमूत्रमला पटुः ॥ स्वादी विष्टम्भिनी दृष्या कफकुष्ठकृमिप्रणुत् ॥ गन्धिका इति गौडभाषा प्रसिद्धायामुत्तमफलिन्याम् । युग्मफलायाम् ॥

दुग्धिनिका । स्त्री । रक्तापामार्गे ॥

दुग्धी । स्त्री । दुग्धिकायाम् । चीराव्याम् । दुद्धी इति भाषा ॥ दुग्धपाषाणे ॥

दुच्छकः । पुं । गन्धकुव्याम् । मुरानामगन्धद्रव्ये ॥ विहाराद्यवकाशके ॥

दुडिः । स्त्री । कच्छप्याम् ॥ इतिमुकुटः ॥

दुण्डुकः । त्रि । दुष्टचित्ते ॥

दुण्डुभः । पुं । डुण्डुभसर्पे ॥

दुतः । त्रि । पीडिते ॥ टुदु उपतापे । स्वादिः । कर्मणि क्तः ॥

दुद्रुमः । पुं । हरित्पलाशे पलाण्डौ । लताकें ॥ दुष्टोद्रुमः ॥

दुधुचन् । त्रि । दोग्धुमिच्छति ॥ दुहेः सन्नन्तात्लटःशत्रादेशः । घत्वधत्वे ॥

दुन्दमः । पुं । दुन्दुभौ ॥ इतिशब्दरत्नावली ॥

दुन्दुः । पुं । वसुदेवे ॥ दुन्दुभिवाद्ये ॥

दुन्दुभिः । पुं । वरुणे ॥ दैत्यभेदे ॥ ढक्कायाम् । भेर्याम् । आनके ॥ वर्त्तुलश्चर्मवद्धे कानने दुन्दुभिरुच्यते । इतिकेचित् ॥ दुन्दुइतिशब्देनोभति । उभपूरणे । इगुपधात्किदितीन् । शकन्ध्वादिः ॥ यद्वा । दुन्दइति हलन्तस्यैवानुकरणम् ॥ यद्वा । दामुभतिशब्देन । उभ० । सर्वधातुभ्यइन् । पृ० ॥ रचोभेदे ॥ विषे ॥ षट्

पञ्चाशत्तमे वत्सरे ॥ सुभिक्षं जायते लोकः सर्वोपद्रववर्जितः । प्राणिनां जायते हर्षो दुन्दुभीवरवर्णिनि ॥ स्त्री । अक्षे । पाशके ॥ अक्षविन्दुचिकद्वये ॥ अर्द्धविन्दुचिकद्वन्द्वे ॥ विन्द्वन्वितचतुष्पार्श्वस्वर्णशृङ्गादिमयद्यूतोपकरणे पाशटी इतिगौडभाषा प्रसिद्धे इतिकेचित् ॥

दुन्दुमारः । पुं । धुन्धुमारे ॥

दुम्बकः । पुं । मेदःपुच्छे गडके । दुम्बा इति ख्याते मेषविशेषे ॥

दुर् । अ । निषेधे ॥ दुष्टे ॥ निन्दायाम् । अवक्षेपणे ॥ दुःखे ॥

दुरक्षः । पुं । कपटपाशके ॥

दुरतिक्रमः । त्रि । दुरत्यये ॥ दुःखेन अतिक्रमोयस्य ॥

दुरत्ययः । त्रि । दुरतिक्रमे । दुर्गमनीये ॥ दुस्तरे ॥ दुःखेनअत्ययोयस्य ॥

दुरदृष्टम् । न । दुर्भाग्ये ॥

दुरधिगमः । त्रि । दुर्ग्रहे । दुःखेनाधिगन्तुमशक्ये ॥ दुष्प्रापे ॥ दुर्ज्ञेये ॥ दुःखेनाधिगमोऽस्य ॥

दुरध्ययः । त्रि । दुष्प्रापे ॥ इणगतावित्यस्मात् कृच्छ्रार्थेखल् ॥ अध्येतुमशक्ये ॥ इङ्अध्ययने । अस्मात् खलि दुरध्ययइत्येवरूपम् ॥

दुरध्वः । पुं । कुपथे । निन्द्यवर्त्मनि ॥ दुष्टोऽध्वा । प्रादयोगताद्यर्थे इति समासः । उपसर्गादध्वनइत्यच् ॥

दुरन्तः । त्रि । मृगयादिव्यसनेषु । दुःखावसानेषु ॥ नेच आदौ सुखयन्ति अन्ते दुःखानि कुर्वन्ति । दुर्लभोऽन्तो यस्य वा । नहिव्यसनीततो निवर्त्तयितुंशक्यते ॥

दुरन्तभावः । त्रि । गर्भागाभिप्राये ॥

दुरभिग्रहः । पुं । अपामार्गे ॥ त्रि । दुःखग्राह्ये ॥

दुरभिग्रहा । स्त्री । कपिकच्छाम् ॥ दुरालभायाम् ॥

दुराकः । पुं । म्लेच्छभेदे ॥

दुराग्रहः । पुं । युक्तिरहितेऽभिनिवेशे ॥ त्रि । तद्वति ॥

दुराचारः । पुं । विरुद्धाचरणे ॥ त्रि । निन्दिताचारवति ॥ दुर्दुष्टः शास्त्राविहितः आचारोयस्य ॥ दुराचारादुर्विचेष्टादुष्प्रज्ञाः प्रियसाहसाः । असन्तस्त्विति विख्याताः सन्तश्चाचारलक्षणाइतिमहाभारतम् ॥

दुरात्मा त्रि । दुष्टचित्ते ॥

दुराधर्षः । पुं । गौरसर्षपे ॥ त्रि । अधर्षणीये ॥ दुष्प्रापे ॥ दैत्यादिभिर्धर्षयितुमशक्यायां परदेवतायाम् ॥ दुःखेन आईषदपि धर्षयितुमशक्यः । धृषप्रसहने । काङ्[illegible]दिस्मादीष-

दुःसुषुकृच्छाकृच्छार्थेषु खल्लितिकर्मणि खल् ॥

दुराधर्षा । स्त्री । कुटुम्बिनीवृक्षे ॥

दुरानमः । त्रि । आनमयितुमशक्ये ॥ नमेर्ण्यन्तात् खल् ॥

दुरापः । त्रि । दुर्लभे ॥

दुरारुहः । पुं । विल्वे ॥ नारिकेले ॥

दुरारुहा । स्त्री । खर्ज्जूर्य्याम् ॥

दुरारोहः । पुं । शरटे ॥ त्रि । दुःखेनारोहणीये ॥

दुरारोहा । स्त्री । शाल्मलिद्रुमे ॥ श्रीवल्ल्याम् ॥ खर्ज्जूर्य्याम् ॥ दुष्टो दुःखेन वा आरोहो यस्याः ॥

दुरालभा । स्त्री । यवासप्रभेदे । दुस्पर्शायाम् ॥ यवासस्य गुणैस्तुल्या वुधैरुक्ता दुरालभा ॥ त्रि । दुःखेनस्पर्शार्हे ॥ दुःखेन आलभ्यते । डुलभष० । ईषद्दुःसुष्विति खल् । आगमशासनस्यानित्यत्वान्नुम् ॥

दुरालम्भा । स्त्री । दुरालभायाम् ॥ दुःखेन आलभ्यते । डुलभष० । ईषद्दुःसुष्विति खल् । नुम् ॥

दुरालापः । त्रि । गालिप्रदे ॥ पुं । दुष्टभाषणे ॥

दुराशयः । त्रि । दुष्टाभिप्राये ॥

दुरासम् । त्रि । आसितुमशक्ये ॥ आसेरकर्मकात् ईषद्दुरित्यादिना खल् तयोरेव कृत्यक्त खलर्था इति नियमात् ॥

दुरासदः । त्रि । दुष्प्रापे । दुःखेनासादनीये । दुष्टजने ॥ दुर्द्धर्षे ॥

दुरितम् । न । पापे ॥ यथा । नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयमिति ॥ दुरोभावे क्तः । दुष्टमितं गमनमनेन ॥

दुरितदमनी । स्त्री । पापनाशिन्याम् ॥ शम्याम् ॥ दुर्गायाम् ॥

दुरिष्टकृत् । पुं । अभिचारकर्त्तरि ॥ यथा । देवद्विजपितृद्वेष्टा रत्नदूषयिता च यः । सयाति कृमिभक्षे वै कृमीशे च दुरिष्टकृदिति विष्णुपुराणम् ॥

दुरीशः । त्रि । दुष्टप्रभौ ॥

दुरीषणा । स्त्री । शापे ॥ इतिशब्दार्थकल्पतरुः ॥

दुरुक्तम् । न । शापे ॥

दुरुच्छेदः । त्रि । दुर्वारे ॥

दुरुत्तरः । त्रि । दुस्तरे ॥

दुरुदाहरः । त्रि । दुर्वचे ॥ हरतेःखल् ॥

दुरुधरा । स्त्री । हित्वार्कं सुनफाऽनफादुरुधरास्वान्त्यो भयस्थैर्ग्रहैः शीतांशोरित्युक्तेयोगविशेषे ॥ एतदेवस्पष्टीकृतं कल्याणवर्मणा । रविवर्जं द्वादशगैरनफा चन्द्राद्द्वितीयगैः सुनफा । उभयस्थितैर्दुरुधराके

मद्रूमसंचितोतोन्य इति ॥

दुरुपसदः । त्रि । दुःसहे ॥

दुरूहः । त्रि । दुर्विज्ञेये ॥

दुरोगः । पुं । कलशे ॥ यज्ञगृहे ॥

दुरोदरः । पुं । द्यूतकारे ॥ पणे ॥ अक्षे ॥ न । द्यूतभेदे । पाशकक्रीडायाम् ॥ दुष्टं मासमन्तात् उदरमस्य ॥ दुष्टमुदरं मस्य वा । पृ० ॥

दुर्ग्गः । पुं । असुरभेदे ॥ यंहत्वा चण्डिकायास्तु दुर्गानामवभूवह ॥ गुग्गुलौ ॥ न । गिर्यादिभि र्दुर्गमे पुरे । कोट्टे । गढइति कोटइतिच भाषाप्रसिद्धे राज्ञां वासस्थाने ॥ तत् षड्विधं यथा । धन्वदुर्गं मही दुर्गमब्दुर्गं वार्क्षमेववा । न्वदुर्गं गिरिदुर्गञ्च समाश्रित्य वसेत् पुरम् । इत्युक्तेः ॥ एषां द्विवाहुगुण्येन गिरिदुर्गं विशिष्यते ॥ तत्र । चीण्याद्यान्याश्रिता स्त्वेषां मृगगर्त्ताश्रयाप्चराः । चीण्युत्तराणिक्रमशः प्लवङ्गमनरामराः ॥ यथा दुर्गाश्रय।नेतान् नोपहिंसन्ति शत्रवः । तथारयो न हिंसन्ति न्वपंदुर्गं समाश्रितम् ॥ एकः शतंयोधयतिप्राकारस्थोधनुर्द्धरः । शतंदशसहस्राणितस्माद्दुर्गंविधीयते ॥ तत् स्यादायुधसम्पन्नं धनधान्येन वाहनैः । ब्राह्मणैः शिल्पिभि र्यन्त्रै र्यवसेनोदकेनच ॥ तस्यमध्ये सुपर्याप्तं कारयेद् गृहमात्मनः । गुप्तंसर्वर्त्तुकं शुभ्रं जलवृक्षसमन्वितमितिमनुः ॥ अपिच । दुर्गञ्च परिखोपेतं वप्राट्टालकसंयुतम् । शतघ्नीयन्त्रमुख्यैश्चशतशश्चसमावृतम् ॥ गोपुरं सकपाटञ्च तत्र स्यात् सुमनोहरम् । सपताकं गजारूढो येन राजाविशेत् पुरमितिमात्स्ये ॥ १९१ अध्यायः ॥ अस्यावश्यकत्वं शुभाशुभञ्चोक्तं कालिकापुराणे ८५ अध्याये राजनीतिविशेषे ॥ त्रि । दुर्गमे । दुर्गमप्रदेशे । उच्छ्रिते । दुःसम्पाद्ये । कोटादौ । प्राकारे ॥ दुस्तरे ॥ कामक्रोधादिसंसार दुःखसाधने ॥ दुःखेनगच्छत्यचेतिविग्रहे सुदुरोरधिकरणइति दुरुपपदात् गमेर्डः प्रत्ययः ॥ दुःखादवाप्यते वा ॥ दुःखेनगम्यतेप्राप्यते । अन्यचापिदृश्यतइतिडः ॥

दुर्ग्गकारकः । त्रि । दुर्गकर्त्तरि ॥ न । दृक्षविशेषे ॥

दुर्ग्गतः । त्रि । दरिद्रे ॥ दुर्गच्छतिस्म । गम्लृ० । गत्यर्थेतिक्तः ॥

दुर्ग्गतिः । स्त्री । नरके ॥ नैःस्वे । दारिद्र्ये ॥ दुष्टागतिः ॥

दुर्ग्गतिनाशिनी । स्त्री । दुर्गादेव्याम् ॥

दुर्ग्गन्धः । पुं । पूतिगन्धे । दुष्टगन्धे ॥ प

लाण्डौ ॥ न । सौवर्चल लवणे ॥ दुष्टो गन्धः ॥

दुर्गन्धी । त्रि । दुर्गन्धयुक्ते ॥

दुर्गपुष्पी । स्त्री । गौडभाषायां केश पुष्टा इति ख्याते वृक्षविशेषे । मानस्याम् । केशधारिण्याम् ॥

दुर्गमः । त्रि । दुर्गे ॥ दुःखेनगम्यते प्राप्यते । गम्लृ० । ईषदुःसुषुकृच्छ्राकृच्छ्रार्थेषुखल् ॥ दुर्गमनीयस्थानादौ ॥ यथा । दुर्गमः पन्थाः ॥ पुं । हिरण्याक्षान्वयेजाते रुरोः पुत्रेमहादैत्ये ॥

दुर्गलङ्घनः । पुं । उष्ट्रे ॥ दुर्गं दुःसम्पाद्यं लङ्घनं यस्य ॥ त्रि । दुःखेनलङ्घनीये ॥

दुर्गसञ्चरः । पुं । सङ्क्रमे । दुर्गदेशप्रवेशक्रियायाम् ॥ सञ्चरणम् । चर० । पुंसीतिघः । दुर्गस्यसञ्चरः ॥

दुर्गा । स्त्री । ओषधिविशेषे । नील्याम् ॥ अपराजितायाम् ॥ दुष्प्रापायाम् ॥ श्यामायाम् । पोतकीखगे ॥ अमरेशमहापीठदेवतायाम् ॥ उमायाम् । कात्यायन्याम् । गौर्याम् । काल्याम् । हैमवत्याम् । शिवायाम् ॥ दुःखेन गम्यते ज्ञायते ऽस्याम् । सुदुरोरधिकरणे इतिडे टाप् ॥ दुःखेनगीयतेस्तूयते । गैशब्दे । आत-

श्चोपसर्गेइत्यङ् । टाप् वा ॥ यद्वा । दुर्गं गिरिं वनंवा वासत्त्वेनास्या अस्तीत्यर्शआद्यच् । टाप् ॥ दुर्गनामासुरवधाद्वा । यथा । तत्रैवच वधिष्यामि दुर्गमाख्यं महासुरम् । दुर्गादेवीतिविख्यातं तन्मनामभविष्यतीति ॥ अपिचास्यानाम्नोव्युत्पत्तिः । दुर्गोदैत्ये महाविघ्ने भवबन्धे कुकर्मणि । शोके दुःखेच नरके यमदण्डे च जन्मनि ॥ महाभये ऽतिरोगेचाप्याशब्दो हन्तृवाचकः । एतान्हन्त्येवयादेवी सादुर्गापरिकीर्त्तिता ॥ * ॥ अपिच । दैत्यनाशार्थवचनो दकारः परिकीर्त्तितः । उकारोविघ्ननाशस्यवाचको वेदसम्मतः ॥ रेफो रोगघ्नवचनो गश्चपापघ्नवाचकः । भयशत्रुघ्नवचनश्चाकारः परिकीर्त्तितः ॥ स्मृत्युक्तिश्रवणाद्यस्या एते नश्यन्तिनिश्चितम् । ततो दुर्गा हरेः शक्तिर्हरिणा परिकीर्त्तिता ॥ दुर्गेति दैत्यवचनो प्याकारो नाशवाचकः । दुर्गंनाशयति या नित्यं सादुर्गाप्रकीर्त्तिता ॥ विपत्तिवाचकोदुर्गं श्चाकारो नाशवाचकः । तं ननाश पुरा तेन बुधैर्दुर्गाप्रकीर्त्तिता ॥ * ॥ अस्याःस्थानं कृष्णावेणीतुङ्गभद्रयोर्मध्यभागे सह्याद्रेरीषत्प्राच्यां प्रसिद्ध

म् । अयमवतारोऽस्मिन्कल्पेऽद्या पिनजातः । श्वेतवाराहकल्पात्प्राक्तनकल्पेषुमन्वन्तरयुगभेदेनजातए व । ततस्तत्तत्कुलदेवतात्वेनार्चन मधुनातनानामपिसङ्गच्छतेइतिगुप्त वत्यांभास्कररावः ॥ * ॥ सर्वस्वरूपि णीशक्तिःसादुर्गेतिचपठ्यते । यथामु ण्डमालायाम् । भूतानिदुर्गा भुवना निदुर्गा नराः स्त्रियश्चापि सुरासुरादि कम् । यद्यद्धिदृश्यं खलु सैवदुर्गा दु र्गास्वरूपादपरंनकिञ्चिदिति ॥

दुर्गाध्यक्षः । पुं । दुर्गस्यरक्षके ॥ तल्ल क्षणं यथा । अनाहार्य्यश्च शूरश्च तथा प्राज्ञः कुलोद्गतः । दुर्गाध्यक्षः स्मृतोराज्ञस्तद्युक्तः सर्वकर्मसु ॥ इ तिमत्स्यपुराणम् ॥

दुर्गानवमी । स्त्री । आश्विनशुक्लनव म्याम् । महानवम्याम् ॥ कार्त्तिकशु क्लनवम्याम् ॥ साचेतायुगाद्या । तत्र जगद्धात्रीपूजाकर्त्तव्येति वाङ्गाः ॥ कार्त्तिकेऽमलपक्षे तु नवम्याञ्चविशे षतः । प्रगल्भाञ्चजगद्धात्रीं पूजयेद् दीपमालयेतियोगिनीतन्त्रम् ॥

दुर्गास्मरणम् । न । दुर्गाजगदिदं स र्वं दुर्गासर्वस्यकारणम् । अतश्च दुर्गे त्यैवं यत् तद्दुर्गास्मरणंविदुः ॥

दुर्गाह्वः । पुं । भूमिजगुग्गुलौ ॥

दुर्ग्रहः । त्रि । दुरासदे ॥ दुर्द्धर्षे ॥ दुः खेनग्रहोऽस्य ॥

दुर्ग्रहा । स्त्री । अपामार्गे ॥

दुर्घटः । त्रि । दुःसम्पाद्ये ॥

दुर्घोषः । पुं । भल्लूके ॥ निन्दितरवे ॥ त्रि । तद्वति ॥

दुर्ज्जनः । त्रि । खले ॥ दुष्टोजनः । कु गतीतिसमासः ॥ दुर्जनः परिहर्त्त व्यो विद्ययाभूषितोपिसः । मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥

दुर्ज्जयः । पुं । असुरविशेषे ॥ कार्त्तवी र्य्यन्टपवंशोद्भवानन्तपुत्रे ॥ त्रि । दुर्जेये ॥ दुःखेन जीयते । जीजये । एरच् ॥

दुर्ज्जरः । त्रि । दुःखेन जीर्य्यति ॥ जॄष् । अङ् ॥

दुर्ज्जरा । स्त्री । ज्योतिष्मतीलतायाम् ॥

दुर्ज्जातम् । न । व्यसने ॥ यथा । दुर्जा तवन्धुः आपद्विवन्धुरितितदर्थः ॥ त्रि । असम्यग्जाते ॥ असमञ्जसे ॥

दुर्द्दर्शः । पुं । काद्रवेयविशेषे ॥ दुःखे न दर्शनमस्य । दुःखेदृश्यते इतिवा ॥ त्रि । दुर्विज्ञेये ॥ द्रष्टुमशक्य ॥ दुः खेनद्रष्टुंयोग्ये ॥

दुर्द्दान्तः । पुं । कलहे ॥ वत्सतरे ॥ त्रि । अशान्ते ॥ दुःखेनदान्तः ॥

दुर्द्दिनम् । न । मेघच्छन्नेह्नि ॥ दिवा निशिचवर्षणे ॥ मेघान्धकारे ॥ मे

धान्धकारितेऽक्षीतिराचेरप्युपलक्ष
णम् । तेनराचावपितया दुर्द्दिनं क
विनेरितम् ॥ * ॥ घनान्धकारे वृ
ष्टौचदुर्दिनं कवयोविदुरिति साम्रः
॥ दुर्दिनं जलदध्वान्ते इतिरत्नकोषः
॥ द्यतितमः इतिदिनम् । दोअवख
ण्डने । द्यतेरिति इनच् । दुष्टंदिनं
दुर्दिनम् । दुष्टत्वञ्चतमोनाशकस्व
रूपहीनत्वात् । स्वच्छायातु कालाति
रिक्तेपिदुर्दिनपदप्रयोगः ॥ यदच्युत
कथालापरसपीयूषवर्जितम् । तद्दि
नं दुर्द्दिनं मन्ये मेघाच्छन्नं नदुर्दि-
नम् ॥

दुर्दुरूटः । पुं । नास्तिके ॥ दुलउत्क्षेपे
। दुःपूर्वः । औणादिकः कूटप्रत्ययः
। वहुलमन्यत्रापीतिणिलुक् । रलयो
रेकत्वस्मरणाद्रः ॥ पलाण्डौ ॥

दुर्द्रिता । स्त्री । लताविशेषे ॥

दुर्द्धरः । पुं । नरकान्तरे ॥ ऋषभौष
धौ ॥ पारदे ॥ भल्लातके ॥ महिषा
सुरस्यसेनापतिविशेषे ॥ श्रीहरौ
॥ पृथिव्यादीनि धारकाणि अन्यैर्द्धा
रयितुमशक्यानि धारयन् स्वयञ्चन के
नचिद्धारयितुं शक्यते इति दुःखेनमु
मुक्षुभिर्हृदयेधार्यते वेतिनिरुक्तेः ॥
त्रि । दुर्द्धर्षे ॥ दुःखधार्ये ॥ दुःखेनध्रि
यते दुरुपपदाद्धरतेः खल् ॥

दुर्द्धर्षः । त्रि । अप्रधृष्ये । तिरस्कर्त्तुमश
क्ये ॥ अप्रक्षोभ्ये ॥

दुर्द्धर्षा । स्त्री । कन्थारीवृक्षे ॥ नागद
मन्याम् ॥ त्रि । दुःखधर्षणीये ॥

दुर्द्रुमः । पुं । हरित्पलाण्डौ । लतार्कै
। हरिद्वर्णपलाशे पलाण्डौ ॥ दुष्टा
द्रुमः ॥

दुर्धावः । त्रि । दुःशोधे ॥

दुर्नामकम् । न । अर्शसि । गुदरोगे ॥
दुष्टंनामास्य पापरोगत्वात् । क्षुभ्ना
दित्वान्नणत्वम् ॥

दुर्नाम । न । अर्शोरोगे ॥ दुष्टंनामा-
स्य पापरोगत्वात् ॥ क्षु० नणत्वम् ॥

दुर्नामा । स्त्री । दीर्घकोशिकायाम् ॥
दुर्न्निन्दितं नामास्याः । डाबुभाभ्या-
मिति डाप् ॥

दुर्नामारिः । पुं । शूरणे ॥

दुर्नाम्नी । स्त्री । दुर्नामायाम् ॥ अनउ
पधेति पाक्षिकोङीप् ॥ क्षु० नणः ॥

दुर्निमितः । त्रि । सम्भ्रमादुत्क्षिप्ते ॥

दुर्निष्प्रयतरम् । त्रि । दुःखतरनिस्स-
रणे ॥

दुर्बलः । पुं । ऊनाढ्तमेढ्रमणौ ॥
त्रि । वलशून्ये । अमांसे ॥ दुष्टंवल
मस्य ॥

दुर्बला । स्त्री । अम्बुशिरीषिकायाम् ॥

दुर्बोधः । त्रि । दुर्ग्रहे ॥ बोद्धुमशक्ये ॥

दुःखेनबुध्यते । बुध० । ईषद्‌दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ॥

दुर्भगः । त्रि । अनिष्टे ॥

दुर्भगा । स्त्री । विरक्तायाम् ॥ पतिस्नेहरहितायाम् ॥ दुष्टोभगो भाग्यं यस्याः ॥

दुर्भाग्यम् । न । दुरदृष्टे ॥

दुर्भिक्षम् । न । भिक्षायाअप्राप्तिकाले । अकाल इति काल इतिच भाषाप्रसिद्धे समयविशेषे ॥ यद्देशे यत्काले तद्देशतत्कालयोग्यसस्यादिकं न जायते तद्दातद्देशेयाच्यमानद्रव्याभावात् दुर्भिक्षं जातमितिव्यवह्रियते ॥ अत्र चाणक्येन मुनिना नववृत्तयउक्ताः । तथाहि । शकटः शाकिनी गावो जाल मस्पन्दनं वनम् । अनूपं पर्वतोराजा दुर्भिक्षेनवहृत्तय इति ॥ अस्यार्थः शाकिनीशब्देद्रष्टव्यः ॥ भिक्षाया अभाव इत्यर्थे ऽव्ययीभावः ॥ द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । दाताऽन्नस्यतु दुर्भिक्षे सुभिक्षे वस्त्रहेमदः ॥ दुर्भिक्षमल्पंस्मरणं चिराय ॥

दुर्म्मतिः । त्रि । विवेकप्रतिबन्धकपापेन मलिनमतौ ॥ दुष्टामतिर्यस्य ॥ वत्सरविशेषे । यथा । दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्त्तते । भवेद्‌ मध्यमाद्वृष्टिर्दुर्मतौ समुपस्थिते ॥ ५५ ॥

दुर्म्मदः । त्रि । अतिमत्ते ॥

दुर्म्मनाउ । त्रि । अन्तर्मनसि । विमनसि । चिन्तादिव्याकुलचित्ते ॥ क्रियास्वस्थिरे ॥ दुःस्थितं मनोऽस्य ॥ स्त्री । शतावर्याम् ॥

दुर्म्मरः । पुं । दुर्मृतौ ॥ मरणंमरः । दुष्टोमरः ॥

दुर्म्मरा । स्त्री । श्वेतदूर्वायाम् ॥ कृष्णदूर्वायाम् ॥

दुर्म्मर्षणः । त्रि । मर्षितुमशक्ये ॥ दुःखेनमृष्यते । मृष० । भाषायांशासियुधीतियुच् ॥

दुर्म्मिलका । स्त्री । मात्रावृत्तप्रभेदे ॥ यथा । द्वात्रिंशन्मात्रं फणिपतिजल्पितसकलविभूषणवृत्तवरम् दशवसुभुवनैर्यति रत्नप्रभवतिकविकुलहृदयानन्दकरम् । यदष्टचतुष्कलगणनिर्मितपदमितिदुर्मिलकानाम वरम्नरपतिवरतोषणवन्दिविभूषणभुवनविदितसन्तापहरम् ॥ यथा । यमुनाजलकेलिविलोलविलोचनगोपीजनहृतवसनवरम् तटजातविशालतमालतरुणातरुदुर्गमशाखारोहपरम् । निजभुजमदमत्तभोजपतिमानससम्भृतदम्भविनाशकरम् करक-

मलमयूखमुषितकमलं मम खीला मानुषवेषधरम् ॥

दुर्मिला । स्त्री । दुर्मिलकाहृत्ते ॥

दुर्मुखः । पुं । कपिविशेषे ॥ नागभेदे ॥ वाजिनि ॥ गणेशमूर्त्यन्तरे ॥ महिषासुरस्यसेनापतिविशेषे ॥ उत्तरद्वारेनवमगृहे ॥ वत्सरविशेषे ॥ तुषधान्यक्षयोदेविसर्वस्यमहार्घता । व्यवहाराश्चनश्यन्तिदुर्मुखेदुर्मुखाः प्रजाः ॥ त्रि । मुखरे । अवद्दमुखे । अप्रियवादिनि ॥ दुर्निन्दितंमुखमस्य ॥

दुर्मेधा । त्रि । मन्दमतौ । विवेकासमर्थे ॥ दुष्टामेधावस्यसः । नित्यमसिच् प्रजामेधयोः ॥

दुर्मोहः । पुं । काकतुण्ड्याम् ॥

दुर्मोहा । स्त्री । कौवाडोडी इतिभाषा प्रसिद्धे हृक्षे । काकादन्याम् ॥

दुर्योधनः । पुं । धृतराष्ट्रतनये । कौरव्यभूपतौ । सुयोधने ॥ दुःखेनयुध्यते । युध० । भाषायांशासियुधीतियुच् ॥

दुर्लतिका । स्त्री । छन्दोभेदे ॥ यथा । वसुभिश्च रसै रथदिग्भि रुदीरितसद्यतिका विहिताहि यदा सगणाष्टकभूषितसच्चरणा जितदुर्नयदुर्लतिकेतितदा । फणभृत्कुलमङ्गलनामकनागवरग्रथिता सुकृतांसुखदा यशसन्तधराधिपगौडकुलोज्ज्वलतामवधेहिहृदेहसदा ॥

दुर्लभः । पुं । कच्छुरे ॥ द्राविडके । कर्पूरे ॥ त्रि । दुष्प्रापे ॥ यथा । दुर्लभं त्रयमेवैतत् देवानुग्रहहेतुकम् । मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रय इति विवेकचूडामणिः ॥ अतिप्रशस्ते ॥ प्रिये ॥ दुर्लभं प्राकृतं वाक्यं दुर्लभःक्षेमकृत्सुतः । दुर्लभासदृशीभार्या दुर्लभःस्वजनःप्रियः ॥ दुःखेनलभ्यते । लभ० । ईषद्दुःसुष्विति खल् ॥

दुर्लभा । स्त्री । भक्तौ ॥ जन्मान्तरसहस्रेषु तपोज्ञानसमाधिः । नराणांक्षीणपापानां कृष्णे भक्तिः प्रजायते ॥ इति व्यासवचनम् ॥ दुरालभायाम् ॥ श्वेतकण्टकार्याम् ॥

दुर्वचः । त्रि । वक्तुमशक्ये । दुःखकथ्ये ॥

दुर्वचः । न । मन्दवाक्ये ॥ असह्यं दुर्वचो ज्ञातेर्मेघान्तरितरौद्रवत् ॥

दुर्वर्णम् । न । रजते । रूप्ये ॥ सुवर्णापेक्षया दुष्टोवर्णोस्य ॥ एलवालुके । एलेये ॥ त्रि । असद्वर्णे ॥

दुर्वर्णकम् । न । रजते ॥ इति हेमचन्द्रः ॥

दुर्वाक् । स्त्री । दुष्टायांवाचि ॥ त्रि । कददे ॥ दुष्टावागस्य ॥

दुर्वाच्यम् । त्रि । अवक्तव्ये ॥

दुर्वादः । पुं । दुर्नाम्नि । निन्दितवाक्ये ॥ दुष्टोवादः ॥ स्तुतिपूर्वकदुर्वाक्ये ॥

दुर्वासाः । पुं । अत्रितनये शङ्करांशाज्जाते मुनिविशेषे । कुमारशौ ॥ त्रि । कुत्सितवस्त्रधृते ॥

दुर्विज्ञेयः । त्रि । दुर्दर्शे ॥ दुःखेनविज्ञेये ॥

दुर्विधः । त्रि । दरिद्रे ॥ दुष्टा विधाप्रकारः सम्पद्दिर्वास्य ॥ खले ॥ मूर्खे वालिशे ॥

दुर्विनीतः । पुं । शूकले । कुशिक्षिताश्वे ॥ त्रि । अविनीते ॥

दुर्विभाव्यः । त्रि । अवितर्क्ये ॥

दुर्वृत्तः । त्रि । दुर्जने । दुष्टे । ऐन्द्रजालिकक्रितवादौ ॥ दुष्टंवृत्तमस्य ॥

दुर्वृत्तिः । त्रि । दुष्टेकर्मणिवर्त्तमाने ॥ दुष्टेकर्मणिवृत्तिः दुष्टाचारवृत्तिर्यस्य ॥

दुर्हृत्-द् । त्रि । वैरिणि । शत्रौ ॥ दुष्टंहृदयमस्य । सुहृद्दुर्हृदौमित्रामित्रयोरितिनिपातनात् हृदयस्यहृद्भावः ॥

दुर्हृदयः । त्रि । दुष्टान्तःकरणे ॥

दुलिः । पुं । मुनिविशेषे ॥ स्त्री । कच्छप्याम् ॥ दे । लाति । दुल उत्क्षेपे । इगुपधात्किदितिइन् ॥

दुली । स्त्री । कमठ्याम् ॥ कृदिकारादक्तिनइतिङीष् ॥

दुष्करः । पुं । मत्कुके ॥ शम्बूके ॥ त्रि । दुष्करे ॥

दुश्चरितम् । न । श्रुतिस्मृत्यविहिते पापकर्म्मणि ॥ दुष्टंचरितम् ॥

दुश्चर्मा । पुं । अच्छन्नमेढ्रमणौ । छिन्नमेढ्रे ॥ कोठरोगे ॥ दुष्टंचर्मास्य ॥

दुश्चिक्यम् । न । लग्नात् तृतीयभवने । सहजे ॥

दुश्च्यवनः । पुं । इन्द्रे ॥ दुःखेन दुष्टं दुष्टेषुवा च्यवनंपतनमस्य ॥ च्यवनमुनिनैकदाजितत्वात् दुस्सहः च्यवनोस्येति वा ॥

दुष्करम् । न । दुःखेनकरणे ॥ आकाशे ॥ त्रि । दुःखेनक्रियमाणे ॥ कर्त्तुमशक्ये ॥ अपियत् सुकरंकर्म्म तदप्येकेनदुष्करम् ॥ दुःक्रियते । ईषद्दुस्सु प्वितिखल् ॥

दुष्कर्म्म । न । पापे ॥

दुष्कुलम् । न । दुष्टकुले ॥ त्रि । दुष्टकुलजे ॥

दुष्कुलीनः । पुं । चोराख्यगन्धद्रव्ये ॥ त्रि । दौष्कुलेये ॥ दुष्कुलस्याऽपत्यम् । दुष्कुलाड्ढगितिपक्षे खः ॥

दुष्कृतम् । न । पापे ॥ तत् तत्कर्त्तुर्मरणानन्तरं तेनसहगच्छतीत्युक्तं वह्निपुराणे । गृहादर्था निवर्त्तन्ते

श्मशानादपिवान्धवाः । सुकृतं दुष्कृतं लोके गच्छन्त मनु गच्छति ॥ तस्मात् वित्तं समासाद्य दैवात् वा पौरुषा दथ । दद्यात् सम्यग् द्विजातिभ्यः कीर्त्तनानिच कारयेदिति ॥ दुष्टंकृतं करणमनेन । इदुदुपधस्यचाप्रत्ययस्येतिषः ॥ त्रि । तद्वति ॥

दुष्कृतात्मा । त्रि । पापहृदये । पापवद्धौ ॥

दुष्कृती । त्रि । पापकारिणि । पापेन सहनित्ययोगिनि । वेदमार्गविरोधिनि ॥ दुष्कृतमस्यास्त्यस्मिन्वा । इनिः ॥

दुष्क्रीतः । त्रि । महार्घे ॥ यथा । क्रीत्वा मूल्येन यो द्रव्यं दुष्क्रीतं मन्यते क्रयी । विक्रेतुः प्रतिदेयं तत् तस्मिन्नेवाह्न्यविक्षतमितिनारदः ॥

दुष्खम् । न । दुःखे ॥

दुष्खदिरः । पुं । खदिरप्रभेदे । महासारे । गोरटे । क्षुद्रखदिरे ॥

दुष्टम् । न । कुष्ठौषधौ ॥ त्रि । अधमे ॥ दुर्बले ॥ वञ्चके ॥ दोषयुक्ते ॥ यथा । दुष्टः शब्दः स्वरतोवर्णतोवेतिभाष्यम् ॥

दुष्टकालः । पुं । केत्वाद्युत्पातदर्शने ॥ गुरुशुक्रास्तादौ ॥

दुष्टचारिणी । स्त्री । स्वैरिण्याम् ॥

दुष्टयोगः । पुं । व्यतीपातादौ ॥

दुष्टवृषः । पुं । गलौ ॥ शक्तोप्यधुर्वहो योक्त्रिवृषोगलिरुदाहृतः ॥

दुष्टा । स्त्री । दुःशीलायाम् । पुंश्चल्याम् ॥ दुष्टाभार्या शठंमित्रं भृत्याश्चोत्तरदायकाः । ससर्पेचगृहेवासो मृत्युरेवनसंशयः ॥ दुर्वचनायाम् ॥

दुष्टाश्वः । पुं । अदान्ताश्वे ॥

दुष्ठु । अ । निकृष्टे । निन्दायाम् ॥ दुःस्थानम् । ष्ठा० । अपदुःसुषुस्थइति कुः । सु० षत्वम् ॥

दुष्ठुः । त्रि । अविनीते ॥

दुष्पत्रः । पुं । चोराभिधगन्धद्रव्ये ॥ चण्डाद्रुमे ॥ दुष्टानिपत्राण्यस्य ॥

दुष्पूरः । त्रि । पूरयितुमशक्ये ॥

दुष्प्रधर्षणी । स्त्री । वार्त्ताकाम् । वनभण्टा इतिभाषा ॥ दुःखेनप्रधृष्यते । ञिधृषाप्रागल्भ्ये । कर्मणिल्युट् ॥

दुष्प्रधर्षा । स्त्री । दुरालभायाम् ॥ खर्ज्जूर्याम् ॥

दुष्प्रधर्षिणी । स्त्री । वार्त्ताकौ ॥ कण्टकार्याम् ॥ इन्द्रच्छाम् ॥ पुनः पनर्दुःखेनप्रधृष्यते । ञिधृषा० । आभीक्ष्ण्येणिनिः ॥

दुष्प्रवृत्तिः । स्त्री । दुर्वार्त्तायाम् ॥

दुष्प्रवेशा । स्त्री । कन्यारीवृक्षे ॥

दुष्यन्तः । पुं । चन्द्रवंशीयनृपतिविशेषे । शकुन्तलापतौ । भरतपितरि ॥

दुः । अ । दुःखे ॥ कोपे ॥ दुःखभावने ॥ दोषे ॥

दुस्तरः । त्रि । दुःखेनतर्त्तुंशक्ये । तरितुमशक्ये ॥ ईषद्दुःसुष्वितिखल् ॥

दुस्तर्कः । पुं । शुष्कतर्के ॥ दुस्तर्कात् सुविरम्यताम् ॥

दुस्थः । त्रि । दुर्गते ॥ मूर्खे ॥ दुःखेन तिष्ठति ॥ ष्ठा० । सुपिस्थइतिकः ॥

दुस्पर्शः । त्रि । दुःस्पर्शे ॥

दुस्पर्शा । स्त्री । दुःस्पर्शायाम् ॥

दुहितुःपतिः । पुं । जामातरि ॥ विभाषा स्वसृपत्योरितिवाऽलुक् ॥

दुहिता । स्त्री । सुतायाम् । कन्यायाम् ॥ दोग्धि । दुहप्रपूरणे । नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहित्रितिदुहेस्तृन् इट् गुणाभावश्च निपातितः ॥ दहतिवा । दहभस्मीकरणे । तथासाधुः । स्वस्रादित्वान्न ङीप् ॥

दूतः । पुं । सन्देशहरे । वार्त्ताहरे ॥ दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम् । इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम् ॥ अनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालवित् । वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते ॥ अमात्ये दण्डआयत्तो दण्डे वैनयिकी क्रिया । न्टपतौ कोषराष्ट्रे च दूते सन्धिविपर्ययौ ॥ दूत एव हि सन्धत्ते भिनत्त्येवच संहतान् । दूतस्तत् कुरुते कर्म भिद्यन्ते येनवा नवा ॥ सविद्यादस्यकृत्येषु निगूढेङ्गितचेष्टितैः । आकारमिङ्गितं चेष्टां भृत्येषुचचिकीर्षितम् ॥ वुद्ध्वाच सर्वं तत्त्वेन परराजचिकीर्षितम् ! तथा प्रयत्नमातिष्ठेद् यथात्मानं नपीडयेदितिमनुः ॥ अस्यलक्षणं यथा । यथोक्तवादीदूतः स्याद्देशभाषाविशारदः । सक्तःक्लेशसहो वाग्मी देशकालविभागवित् । विज्ञातदेशकालश्च दूतः स्यात् समहीक्षितः ॥ वक्ता नयस्य यः काले स दूतो न्टपतेर्भवेदितिमत्स्य पु० ॥ मेधावी वाक्पटुः प्राज्ञः परचित्तोपलक्षकः । धीरो यथोक्तवादीच एषदूतोभिधीयते इतिचाणक्यम् ॥ अस्यावध्यत्वं यथा । वैरूप्यमङ्गेषु कशानिपातो मौण्ड्यं तथा लक्षणसन्निवेशः । एतान्वधानर्हतिरूक्षवादी शास्त्रेषुदूतस्यवधोनदृष्ट इति ॥ दवति । दुगतौ । दुतनिभ्यांदीर्घश्चेतिक्तः ॥ यद्वा । दूयतेस्म । दूङ्परितापे । गत्यर्थेतिक्तः ॥ दुनोतिवा । टुदुउपतापे । पूर्ववत् ॥

दूतघ्नी । स्त्री । कदम्बपुष्प्याम् ॥

दूतागारम् । न । पत्रगृहे । डाक इति पोष्ट इतिचेतरभाषा ॥

दूतिः । स्त्री । दूतिकायाम् ॥ दूयते । दूङ्ग । क्तिच् ॥

दूतिका । स्त्री । सञ्चारिकायाम् ॥

दूती । स्त्री । स्त्रीपुंसोःसन्देशप्रापिकायाम् । सञ्चारिकायाम् ॥ गौ० ङीष् ॥

दूतीका । स्त्री । सञ्चारिकायाम् ॥

दूत्यम् । न । दूतत्वभावे ॥ दूतभावे ॥ दूतकर्म्मणि ॥ दूतस्यभावःकर्मवा । दूतवणिग्भ्याञ्चेतियः ॥

दूनः । त्रि । अध्वादिनाश्रान्ते ॥ दूयते स्म । दुगतौ क्तः । दुग्वोर्दीर्घश्चेति नत्वम् ॥ अकर्मकत्वात् कर्त्तरि वा क्तः ॥ सन्तप्ते ॥ पित्तेनदूने रसने सितापि तिक्तायते हंसकुलावतंसेतिनैषधम् ॥

दूरः । त्रि । विप्रकृष्टे ॥ महदन्तरेणवर्त्तमाने ॥ अगोचरे ॥ दुःखेनेयते प्राप्यते । दुरीणोलोपश्चेतिसाधुः ॥

दूरदर्शनः । पुं । गृध्रे ॥

दूरदर्शी । पुं । पण्डिते दूरं दूराद्वा पश्यति । दृशिर् । गृ० णिनिः । सुपीति वा ॥ गृध्रे ॥ त्रि । दीर्घदर्शके ॥

दूरदृक् । पुं । पण्डिते ॥ गृध्रे ॥ त्रि । दीर्घदर्शके ॥ दूरावलोकनार्थयन्त्रविशेषे । दूरवीक्षणे । दूरबीन इतिभाषा ॥ दूरे दृक् दर्शनंयेन ॥

दूरमूलः । पुं । मुञ्जतृणे ॥

दूरवर्त्ती । त्रि । महदन्तरेण वर्त्तनशीले ॥ यथा । किन्तया दूरवर्त्तिन्या श्रिया राक्षसपुङ्गव । अरयोयां नपश्यन्तिबन्धुभिर्या नभुज्यतइतिरामायणे विभीषणंप्रतिरामवाक्यम् ॥

दूरवीक्षणम् । न । दूरवीन इतिप्रसिद्धे दूरदृशि यन्त्रे ॥

दूरवेधी । पुं । दूरापातिनि । दूरनिक्षेप्याक्षे ॥

दूरभिन्नः । त्रि । अत्यन्तभिन्नक्षणे ॥

दूरस्थः । त्रि । विप्रकृष्टस्थिते ॥ योजनलक्षकोट्यन्तरिते ॥ दूरेतिष्ठति । ष्ठा० । सुपिस्थ इति कः ॥

दूरापाती । पुं । दूरवेधिनि ॥

दूरेत्यः । त्रि । दूरेजातादौ ॥ पथिके ॥ दूरादेत्यः ॥

दूरेरितेक्षणः । त्रि । केकरे ॥

दूर्य्यम् । न । गूथम् ॥ विष्ठायाम् ॥

दूर्व्वा । स्त्री । शतपर्व्विकायाम् । नीलदूर्व्वायाम् । तिक्तपर्व्वायाम् ॥ श्वेतदूर्व्वायाम् । गोलोम्याम् ॥ नीलश्वेतविभेदेनदूर्व्वेद्वेसमुदाहृते ॥ रक्तपित्तकण्डूत्वग्दोषनाशिनीयमिति राजवल्लभः ॥ दूर्वति दूर्व्यतेवा । दुर्वी हिंसायाम् । अच् घञ्वा । उपधाया

च्वेतिदीर्घः ॥

दूर्वाकाण्डम् । न । दूर्वाणांसमूहे ॥ दूर्वादिभ्यः काण्डः ॥

दूर्वाष्टमी । स्त्री । भाद्रशुक्लाष्टम्याम् ॥

दूलिका । स्त्री ।
दूली । स्त्री । } नील्याम् ॥

दूषकः । त्रि । पांसने । दोषोत्पादके ॥ पुं । शालेर्जात्यन्तरे ॥ दूषयति । दुष० । णयन्तः । ण्वुल् । दोषोणा विच्यूत्त्वम् ॥

दूषणः । पुं । राक्षसविशेषे । रावणभ्रातृखरसेनापतौ ॥ न । दोषे ॥ दूषयति । दुषवैकृत्ये । नं० ल्युः ॥

दूषणारिः । पुं । श्रीरामे ॥

दूषिः । स्त्री । दूषिकायाम् ॥ दूषयति । दुष० । णयन्तः । दोषोणाविच्यूत्त्वम् । अचइः ॥

दूषिका । स्त्री । तूलिकायाम् ॥ लोचनशमले । पिच्चोडके । गीड इति भाषा ॥ दूषयति । दुष० । णयन्तः । ऊत्त्वम् । ण्वुल् ॥ यद्वा । दूषयते रचइ रिति इप्रत्ययः । ऊत्त्वम् । स्वार्थे कन् ॥

दूषितः । त्रि । अभिशस्ते । चारिते । वाच्ये । प्राप्तदोषे ॥

दूषिता । स्त्री । दोषप्राप्तायां कन्यायाम् । सस्वेदायाम् ॥

दूषी । स्त्री । नेत्रमले ॥ कृदिकारादक्तिनइतिङीष् ॥

दूषीका । स्त्री । दूषिकायाम् ॥ दूषयति । दुष० । णयन्तः । ऊत्त्वम् । कषिदूषिभ्यामीकन् ॥ स्वार्थे कन्वा ॥

दूषीविषम् । न । औषधादिभिरवीर्यीविषे । आदिना दावाग्निवायुरौद्रशोषिते विषे ॥ जीर्णं विषमौषधिभि र्हतंवा दावाग्निवातातपशोषितं वा । स्वभावतोवा गुणविप्रहीनं विषं हिदूषीविषता मुपैतीतिमाधवः ॥

दूष्यम् । न । वस्त्रे ॥ वस्त्रगृहे ॥ पूये ॥ त्रि । दूषणीये ॥ यथा । दूष्यंवचो मम पुनर्निपुणं विभाव्यभावाववोधविहितेनदुनोति दोषइति ॥ दूष्यते । दुष० । णयन्तादचोयत् । दोषोणाविच्यूत्त्वम् ॥ दूषयितुमर्होवा । अर्हेकृत्यटचश्च ॥

दूष्या । स्त्री । कक्षायाम् । वरत्रायाम् । गजमध्यबन्धनरज्ज्वाम् ॥ दूष्यतेऽनया । दुष । यत् । टाप् ॥

दृकम् । न । छिद्रे ॥ इतिसंक्षिप्तसारोणादिवृत्तिः ॥

दृकाणः । पुं । द्रेक्काणे ॥

दृक्कर्णः । पुं । सर्पे ॥ दृशौकर्णावस्य ॥

दृक्काणः । पुं । द्रेक्काणे । लग्नत्रिभागे ॥

दृक्प्रसादा । स्त्री । कुलत्थायाम् ॥ कुलत्थाञ्जने ॥

दृक्प्रिया । स्त्री । शोभायाम् ॥

दृक्श्रुतिः । पुं । सर्पे ॥

दृक्स्थितिः । स्त्री । दृष्टेःस्थैर्ये ॥ दृशः स्थितिः ॥ दृष्टिंज्ञानमयीं कृत्वा पश्येद्ब्रह्ममयं जगत् । सादृष्टिःपरमोदारा न नासाग्रविलोकिनी ॥ दृष्टिदर्शनदृश्यानां विरामो यत्रवा भवेत् । दृष्टि स्तत्रैव कर्त्तव्या न नासाग्रविलोकिनी त्याचार्य्याः ॥

दृगध्यक्षः । पुं । सूर्ये ॥

दृग्गोलः । पुं । खगोलान्तर्गते गोलविशेषे ॥

दृग्भूः । स्त्री । सर्पे ॥ वज्रे ॥ भास्करे ॥

दृग्विषः । पुं । नागे ॥

दृढम् । न । लौहे ॥ अतिशये । नितान्ते ॥ क्रियाविशेषणेस्यक्लीवत्वंद्रव्यविशेषणेतुवाच्यलिङ्गता ॥ पुं । रूपकप्रभेदे ॥ यथा । दृढाख्यः स्याल्लघुदन्द्वं तालेच हंसलीलके । चतुर्दशाक्षरैर्युक्तः शृङ्गारे परिकीर्त्तितइति सङ्गीतदामोदरः ॥ त्रि । स्थूले ॥ प्रगाढे । अप्रशिथिले ॥ बलवति । शक्ते ॥ कठिने ॥ दृंहति दृंहतिस्मवा । दृहदृंहिरद्वौ । क्तप्रत्यये । दृढः स्थूलबलयोरिति क्तस्ये डभावः तस्यढत्वम् हस्यलोपः इदितोनलोपश्चनिपात्यते ॥

दृढकण्टकः । पुं । क्षुद्रफलकवृक्षे । धौला आँकडा इतिगौडभाषा ॥

दृढकाण्डः । पुं । वंशवृक्षे ॥ न । दीर्घरोहिषके ॥

दृढकाण्डा । स्त्री । पातालगरुडीलतायाम् ॥

दृढकारी । त्रि । प्रारब्धकर्मसम्पादयितरि ॥

दृढक्षुरा । स्त्री । वल्वजायाम् ॥

दृढगात्रिका । स्त्री । मत्स्यण्ड्याम् ॥

दृढग्रन्थिः । पुं । वंशे ॥

दृढच्छदम् । न । दीर्घरोहिषके ॥

दृढतरुः । पुं । धववृक्षे ॥

दृढतृणः । पुं । मुञ्जतृणे ॥

दृढतृणा । स्त्री । वल्वजायाम् ॥

दृढत्वक् । पुं । यावनालशरे ॥

दृढदंशकः । न । हांगर इति प्रसिद्धे यादसि ॥

दृढनिश्चयः । त्रि । स्थिरप्रज्ञे ॥ दृढः कुतार्किकैरभिभवितुमशक्यतयास्थिरो निश्चयो ऽहमस्यकर्त्तभोक्तृसच्चिदानन्दाद्वितीयं ब्रह्मेत्यध्यवसायशीले संसारादुपरतेमुनौ ॥

दृढनीरः । पुं । नारिकेलवृक्षे ॥

दृढपत्रः । पुं । वंशे ॥

दृढपत्री । स्त्री । वल्वजायाम् ॥

दृढपादा । स्त्री । यवतिक्तायाम् ॥

दृढपादी । स्त्री । भूम्यामल्याम् ॥

दृढप्ररोहः । पुं । प्लक्षवृक्षे ॥

दृढफलः । पुं । नारिकेरे ॥ दृढानि फलानि यस्य सः ॥

दृढबन्धिनी । स्त्री । श्यामालतायाम् ॥

दृढभूमिः । त्रि । विषयसुखवासनया चालयितु मशक्ये ॥

दृढमुष्टिः । पुं । खड्गादौ ॥ त्रि । कृपणे ॥ दृढामुष्टिर्यस्य ॥

दृढमूलः । पुं । मुञ्जतृणे ॥ मन्थानकतृणे ॥ नारिकेले ॥

दृढरङ्गा । स्त्री । स्फट्याम् ॥

दृढलता । स्त्री । पातालगरुड्याम् ॥

दृढलोमा । पुं । शूकरे ॥ त्रि । कठिनलोमयुक्ते ॥ दृढानि लोमानि यस्य ॥

दृढवल्कलः । पुं । पूगे ॥ लकुचे ॥

दृढवल्का । स्त्री । अम्बष्ठायाम् ॥

दृढबीजः । पुं । चक्रमर्दे ॥ वदरे ॥ बर्बुरे ॥

दृढव्रतः । त्रि । अचाल्यसङ्कल्पे । फलपर्यन्तं प्रारब्धव्रतापरित्यागशीले ॥ सर्वथाभगवानेव भजनीयः सचैवंरूपएवेतिप्रमाणजनिताऽप्रामाण्यशङ्काशून्यविज्ञाने ॥ दृढानि प्रतिपक्षैश्चालयितुमशक्यानि अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहादीनि व्रतानि नियमा यस्य सतथा । शमदमादिसाधनसम्पन्नइतियावत् ॥

दृढसन्धिः । त्रि । संहते । निष्छिद्रे ॥ दृढःसन्धिःसन्धानमस्य ॥

दृढसूत्रिका । स्त्री । मूर्वायाम् ॥

दृढस्कन्धः । पुं । क्षीरिकावृक्षे ॥

दृढाङ्गम् । न । हीरके ॥

दृता । स्त्री । जीरके ॥

दृतिः । पुं । चर्मपुटे । चर्मनिर्मितोदकादिपात्रे ॥ मत्स्ये ॥ दृणाति । दृविदारणे । दृणातेर्ह्रस्वश्चेति तिः ॥ शरीरावयवविशेषे ॥ उदकनोदनचर्मयन्त्रे ॥

दृतिधारकः । पुं । आकनपाता इतिगौडभाषाप्रसिद्धे वृक्षे ॥

दृतिहरिः । पुं । पशौ ॥ दृतिंहरतीति विग्रहे दृत्युपपदाद्धरतेःपशौकर्त्तरि इन्प्रत्ययः ॥

दृन् । अ । दृढार्थे ॥ हिंसायाम् ॥

दृन्भूः । स्त्री । सर्पे ॥ चक्रसर्पे ॥ पुं । वज्रे ॥ अब्धभूपतौ ॥ तक्षसर्जातौ । कपौ ॥ सन्दर्भकर्त्तरि ॥ कयके ॥ सूर्ये ॥ दृभति । दृभीग्रन्थे । अन्दूदृन्भूजम्बितिकूप्रत्ययो निपातनान्नुम् अनुस्वाराभावोपि । हूहूवद्रूपाणि ॥ दृढशब्दउपपदेभुवःकूप्रत्ययःउप

पदस्यदृशादेशो निपातनादितिमाधवः ॥ यद्वा । दृश्निति नान्तमव्ययं दृढार्थकमुपपदम् । वर्षाभूवद्रूपमस्येत्याहुः ॥

दृप्तः । त्रि । उद्धते । गर्विते ॥ दृप्यते । दृपहर्षविमोहनयोः । अकर्मकत्वात्कर्तरि क्तः ॥

दृप्रः । त्रि । बलवति ॥ दृप्यति । दृप० । स्फायितञ्चीतिरः ॥

दृब्धः । त्रि । ग्रथिते ॥ दृभ्यते स्म । दृभीग्रन्थे । क्तः ॥

दृब्धिः । स्त्री । गुम्फे ॥

दृक् । स्त्री । दर्शने ॥ नेत्रे ॥ नेत्रेणाहि रूपं व्याप्यते दृक्स्यविवादम् ॥ बुद्धौ ॥ ज्ञाने ॥ रूपंदृश्यं लोचनं दृक् तदृश्यं द्रष्टृमानसम् । दृश्याधीवृत्तयः साक्षीदृगेव नतु दृश्यते ॥ त्रि । वीक्षके ॥ अध्यक्षे ॥ ज्ञातरि ॥ पश्यति दृशिर्प्रेक्षणे । क्विप् ॥ यद्वा । दृश्यते दर्शनमनयावा । सं० क्विप् । क्विन् प्रत्ययस्येति बहुव्रीह्याश्रयणात् क्विप्यपिकुत्वम् । त्यदादिषुदृशः क्विनोविधानात् ॥ ह्यक्के ॥

शत् । स्त्री । दृषदि ॥

दृशदती । स्त्री । दृषदत्याम् ॥

दृशा । स्त्री । चक्षुषि ॥

दृशाकाङ्क्ष्यम् । न । पद्मे ॥

दृशानः । पुं । विरोचने । सूर्ये ॥ आचार्ये ॥ लोकपाले ॥ न । ज्योतिषि ॥ पश्यति । दृशिर्० । युधिबुधिदृशः किच्चेत्यानच् ॥

दृशिः । स्त्री । चक्षुषि ॥ दर्शने ॥ गोपीदृगुत्सवदृशिःप्रविवेशगोष्ठम् ॥

दृशिस्वरूपः । त्रि । चैतन्यघने ॥

दृशी । स्त्री । नेत्रे ॥

दृशोपमम् । न । सिताम्भोजे ॥

दृश्यम् । न । अनात्मस्वरूपे । ममेदंओषं ममेदंमनइत्यादिममतास्पदत्वेनात्मनउपसर्जनभूते स्थूलदेहादौ ॥ दृष्टिवृत्तिव्याप्यंदृश्यमितिप्रसिद्धम् ॥ त्रि । द्रष्टव्ये । दर्शनीये ॥ द्रष्टुंयोग्यम् । दृशेर्ऋहलोर्ण्यत् ॥ ऋदुपधाच्चाक्लृपिचृतेरितिक्यप् वा ॥

दृषत्कारम् । न । मुण्डायसे ॥

दृषद् । स्त्री । निष्पेषणशिलापट्टे । शिल् इति भाषा ॥ पाषाणे । प्रस्तरे ॥ दृणात्यनेन । दृविदारणे । दृणातेःषुग्घ्रस्वश्चेत्यदिः ॥

दृषद्वती । स्त्री । नदीविशेषे ॥ दृषदः सन्त्यस्याम् । मतुप् । झयइतिमस्यवः ॥ कात्यायन्याम् ॥

दृष्टम् । न महीभुजां स्वपरचक्रोत्थभये ॥ स्वराष्ट्राच्चौराटविकादेर्भयम् ॥ परराष्ट्राद्दाहविलोपादेर्भयम् ॥ प्रति

विषयाध्यवसाये ॥ त्रि । साक्षात्कृते । प्रत्यक्षे । अक्षिगोचरे । ईक्षिते ॥ अग्निचित् कपिला सती राजा भिक्षु र्महोदधिः । दृष्टमात्राः पुनन्त्येते तस्मात् पश्येत नित्यशः ॥ दृश्यते स्म । दृशिर् ० क्तः ॥ ज्ञाते ॥ दर्शने ॥

दृष्टपृष्ठः । त्रि । पलायमाने ॥

दृष्टप्रत्ययः । त्रि । दृढविश्वासे ॥

दृष्टरजाः । स्त्री । मध्यमायाम् । प्रथमं प्राप्तरजस्कायां नार्याम् ॥ दृष्टं रजो यस्याः ॥ प्रौढायाम् ॥

दृष्टान्तः । पुं । मरणे ॥ शास्त्रे ॥ उदाहरणे ॥ प्रतिपाद्यप्रतिपादकयोर्यस्मिन्नर्थे बुद्धिसाम्यं सदृष्टान्तः ॥ तथाच गौतमसूत्रम् । लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं सदृष्टान्त इति ॥ लौकिकोऽप्राप्तशास्त्रपरिशीलनजन्यबुद्धिप्रकर्षाः प्रतिपाद्यइतिफलितोर्थः । परीक्षकः शास्त्रपरिशीलनप्राप्तबुद्धिप्रकर्षः प्रतिपादकइति फलितोर्थः ॥ तथाच प्रतिपाद्यप्रतिपादकयोरितिपर्यवसन्नम् । बहुवचनंकथावहुत्वमभिप्रेत्य बुद्धेःसाध्यसाधनोभयविषयिण्यास्तदभाव विषयिण्यावा साम्य मविरोधो यस्मिन्नर्थे सोर्थोदृष्टान्तः । वादिप्रतिवादिनोःसाध्यसाधनोभयप्रकारकतदभावद्वयप्रकारकान्यतरनिश्चयविषयो-दृष्टान्तइतिपर्यवसितोर्थः ॥ * ॥ अलङ्कारविशेषे । दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिविम्बनम् ॥ एतेषांसाधारणधर्मादीनां दृष्टोऽन्तोनिश्चयोयत्र सदृष्टान्तः । त्वयि दृष्ट एव तस्यानिर्वाति मनो मनोभवज्वलितम् । आलोकेहिहिमांशो र्विकसति कुमुदं कुमुद्वत्याः ॥ एषसाधर्म्येण । वैधर्म्येणतु । तवाहवे साहसकर्मशर्मणः करं कृपाणान्तिक मानिनीषतः । भटाः परेषां विशरारुतामगुर्दधत्यवाते स्थिरतां हि पांशवः ॥ * ॥ उपमाने ॥ दृष्टः अन्तोनिश्चयो च । दृष्टअन्तः सादृश्यवलेन प्रकृतार्थनिर्णयोयेनवा ॥

दृष्टिः । स्त्री । वुद्धौ ॥ लोचने ॥ दर्शने ॥ ज्ञाने ॥ अन्यः कारणवृत्तौ ॥ चक्षुर्जन्यमनोवृत्ति र्विषयुक्ता रूपभासिका । दृष्टिरित्युच्यते द्रष्टा दृष्टेः कर्त्तेति लौकिकैः ॥ दर्शनम् । दृशिर् ० । क्तिन् । दृश्यतेऽनया वा करणे क्तिच् ॥ * ॥ अथग्रहाणां दृष्टिकथनं यथा । तृतीये दशमेचैव पाददृष्टिरुदाहृता । अर्द्धदृष्टिस्तुनवमे पञ्चमेच प्रकीर्त्तिता ॥ चतुर्थेचाष्टमे चैवपादोना परिकीर्त्तिता । सप्तमे

परिपूर्णाच फलमेवं प्रकल्प्यते ॥ द्वितीयद्वग्रमावार्कि: पश्यन् पूर्णफलप्रद: । त्रिकोणगान् गुरुश्चैव चतुर्थाष्टमजान् कुज: ॥ सुतमदनमवान्त्ये पूर्णदृष्टि: सुरारे र्युगलदशमराशौ दृष्टिपादत्रयार्द्दै: । सहजरिपुचतुर्थे ष्वऽष्टमेचार्द्धदृष्टि: स्थितिभवनमुपान्त्यं नैवदृश्यंश्चिराद्हो: ॥ स्वस्थान द्वितीयञ्च षष्ठ मेकादशं तथा । द्वादशाख्यं नपश्यन्ति शेषंपश्यन्तिते ग्रहा: ॥

दृष्टिकृत् । न । } स्थलपद्मे ॥
दृष्टिकृतम् । न । }

दृष्टिगुण: । पुं । वाणादेर्लक्ष्ये ॥

दृष्टिबन्धु: । पुं । खद्योते ॥ खाञ्छने ॥

दृष्टियोनि: । पुं । ईर्ष्यके ॥

दृष्टिविक्षेप: । पुं । कटाक्षे ॥

दृष्टिविष: । पुं । सर्पविशेषे ॥

दृष्ट्वा । अ । विलोक्येत्यर्थे ॥

दृहित: । त्रि । वृद्धिम्प्राप्ते ॥

देदीप्यमान: । त्रि । जाज्वल्यमाने । अतिशयदीप्तिविशिष्टे । य:पुन:पुनरतिशयेनवा दीप्यते तत्र ॥

देयम् । त्रि । दातव्ये ॥ दातुंयोग्यम् । डुदाञ्० । अचोयत् । ईद्यतिगुण: ॥ न । धनविशेषे ॥ यथा । अपराबाधमक्लेशं प्रयत्नेनार्जितं धनम् । स्वल्पं वा बहुलंवापि देयमित्यभिधीयते ॥ अपरावाधम् परपीडारहितम् । अक्लेशं पाचकक्लेशाजनकम् ॥

देव: । पुं । वसुरुद्रादौ । ब्रह्मविष्णुशिवसूर्याग्निगणपतिदुर्गादौ । सुरे । अमरे ॥ एतेषांवर्णोयथा । आदित्या: क्षत्रियास्तेषां विशश्चमरुतस्तथा । अश्विनौचस्मृतौशूद्रौ तपस्युग्रेसमास्थितौ ॥ स्मृतास्त्वाङ्गिरसादेवा ब्राह्मणाइति निश्चय: इति ॥ ज्ञानातिशयशक्तिनिद्योतनात्मके आत्मनि ॥ दीव्यति क्रीडति सर्गादिभि:विजिगीषते असुरादीन् व्यवहरति सर्वभूतेष्वात्मतया द्योतते स्तूयते स्तुत्यै: सर्वत्रगच्छतिवा तस्माद्देव: ॥ दीव्यते: पचाद्यच् ॥ दीव्यते स्तूयते इतिदिवे: कर्मणिघञ्वा ॥ दीव्यते क्रीडतेयस्माद्रोचते द्योततेदिवि । तस्माद्देवइतिप्रोक्त: स्तूयते सर्वदैवतै: ॥ मेघे ॥ राज्ञि ॥ नाट्योक्त्याभूपाले ॥ पारदे ॥ वज्रटीके ॥ देवदारुणि ॥ न । इन्द्रिये ॥ त्रि । पूज्ये ॥ दीप्तिमति ॥

देवक: । पुं । यदुवंशीये नृपविशेषे । श्रीकृष्णस्य मातामहे ॥ दीव्यति । ण्वुल् ॥

देवकर्द्दम: । पुं । सुगन्धिद्रव्यविशेषे ॥

सतुश्रीखण्डागुरुकर्पूरकुङ्कुममिश्रितैर्भवति ॥ इतिराजनिर्घण्टः ॥

देवकल्पः । त्रि । देवतुल्ये ॥ ईषदूनो देवः । ईषदसमाप्ताविति कल्पप् ॥

देवकात्मजा । स्त्री । देवक्याम् ॥

देवकार्य्यम् । न । देवानुद्दिश्यक्रियमाणे ॥

देवकाष्ठम् । न । देवदारुणि ॥

देवकिरी । स्त्री । मेघरागस्य भार्य्यायाम् ॥ यथा । ललिता मालती गौरी नाटी देवकिरीतथा । मेघरागस्य रागिण्यो भवन्तीमाःसुमध्यमाः ॥ अस्याः स्वरूपं यथा । भ्रमन्ती नन्दने श्यामा पुष्पप्रचयतत्परा । ख्याता देवकिरीच्छोषाकरार्पित सखीकरा ॥

देवकी । स्त्री । वसुदेवभार्य्यायाम् । श्रीकृष्णमातरि ॥ मथुरायां यादवेश्वर्य्याम् ॥ देवकानाचष्टे इति णिजन्तादचः । ततोङीष् ॥ यद्वा । देवकस्यापत्यम् । इतइञ् । संज्ञापूर्वकत्वात् दृद्ध्यभवः । इतोमनुष्यजातेरितिङीष् ॥ यद्वा । देवकशब्दस्ततदपत्ये लक्षणया वृत्त्या पुंयोगादिति ङीष् । नहितत्र दाम्पत्यलक्षण एव पुंयोगः किन्तुजन्य जनक स्वाद्यपीतिहरदत्तादयः । अतएव प्राक् केकयी तोभरतस्ततो ऽभूदितिभट्टिः । एवं रेवतीरमणोपि ॥

देवकीनन्दनः । पुं । श्रीकृष्णे ॥ देवक्यानन्दनः पुत्रः ॥

देवकीसूनुः । पुं । श्रीकृष्णे ॥ देवक्याः सूनुः ॥

देवकुम्भा । स्त्री । महाद्रोणायाम् ॥

देवकुलम् । न । प्रासादे । देवल इति भाषा प्रसिद्धे आयतने ॥

देवकुल्या । स्त्री । सरिति ॥

देवकुसुमम् । न । लवङ्गे ॥ देवानांकुसुमम् ॥ कुसुमेषु देवइववा । राज० ॥ देवयोग्यं कुसुमं वा । श्रा० ॥

देवकूटम् । न । तीर्थविशेषे ॥

देवखातः । पुं । न । अकृत्रिमजलाशये ॥ देवेनखातः ॥ देवद्वारस्थजलाशये । देवसम्बन्धित्वे नप्रसिद्धे सरसि ॥ स्त्री । न । गुहायाम् ॥

देवखातकम् । न । अखाते देवखाते ॥ देवे न खातम् । स्वा० कः ॥

देवखातबिलम् । न । गुहायाम् ॥

देवगन्धा । स्त्री । महामेदायाम् ॥

देवगर्भा । स्त्री । कङ्कालपीठाधिष्ठात्र्यां देवतायाम् ॥

देवगान्धारी । स्त्री । श्रीरागस्य भार्य्यायाम् ॥ यथा । गान्धारी देवगान्धारी मालवश्रीश्चसारवी । रामकीर्य्यपि रागिण्यःश्रीरागस्यप्रियाइमे ॥ अस्यागानसमयःशिशिरर्त्तौ तृतीयप्रहरा

वधिरात्र्यर्द्धपर्यन्तमिति गानविदः ॥

देवगायनः । पुं । गन्धर्वे ॥

देवगिरिः । पुं । भारतवर्षस्य ग्रैलविशेषे ॥

देवगिरी । स्त्री । रागिणीविशेषे ॥ सा च सोमेश्वरमते वसन्तरागस्यभार्या वसन्तर्त्तौचसदा गेया । भरतमते हिन्दोलरागपुत्रस्य नागध्वने र्भार्या ॥ सङ्गीतदर्पणमतेतु नटकल्याणभार्या ॥ अस्याः स्वरूपं यथा । अत्यभिरामतनुः उत्तुङ्गपीनस्तनी शारकण्टभूषणा स्त्रीपङ्क्तिमध्यस्था मत्तचकोरनयना सुभङ्ग्यङ्गीच । अस्या गानसमयो हेमन्ते दिवाचतुर्थप्रहरावधिरात्र्यर्द्धपर्य्यन्तम् ॥

देवगुरुः । पुं । सुराचार्य्ये ॥ देवानांगुरुः ॥

देवगुह्यम् । न । मरणे ॥ तद्धि प्राणिनां वैराग्यानुदयाय देवैर्गोप्यते ॥

देवगृहम् । न । देवालये ॥ सूर्यचन्द्रादीनां ज्योतिर्मण्डलेषु ॥

देवचिकित्सकौ । पुं । अश्विनीकुमारयोः ॥ इति हलायुधः ॥

देवच्छन्दः । पुं । शतयष्टिहारे ॥ देवैश्छन्द्यते । छदि० । घञ् ॥

देवजग्धम् । न । देवजग्धके ॥

देवजग्धकम् । न । कत्तृणे ॥ देवैरद्यते स्म । अद० । क्तः । अदोजग्धिर्ल्यप्तिकिति ॥

देवजनविद्या । स्त्री । गन्धयुक्तिनृत्यगीतवाद्यशिल्पादिविज्ञानेषु ॥

देवटः । पि । शिल्पिनि ॥ दीव्यति । दिवु० । शकादिभ्योऽटन् ॥

देवट्टी । स्त्री । गङ्गाचिल्ल्याम् ॥

देवतरुः । पुं । मन्दारादिवृक्षेषु ॥ पञ्चैते देवतरवो मन्दारः पारिजातकः । सन्तानः कल्पवृक्षश्चपुंसिवा हरिचन्दनम् ॥ देवानां तरुः ॥ चैत्यवृक्षे ॥

देवता । स्त्री । अमरे । सुरे ॥ देवएव । स्वार्थे तल् ॥ विष्ण्वादिप्रतिमायाम् ॥ त्यज्यमानद्रव्ये उद्देश्यविशेषे ॥ ॥ मन्त्रस्तुत्यायाम् ॥ तस्याः सङ्ख्या यथा । सदाराविबुधाः सर्वेस्वानांस्वानांगणैःसह । त्रैलोक्ये तत्त्रयस्त्रिंशत्कोटिसंख्या यथाभवेति पाद्मोत्तरखण्डम् ॥

देवताडः । पुं । सैंहिकेये । राहौ ॥ जीमूते । खरायाम् । देताडा इतिगौडभाषा प्रसिद्धे वृक्षे ॥ अग्नौ ॥ देव मिन्द्रियं ताडयति । तड आघाते । कर्म्मण्यण् ॥

देवताडकः । पुं । देवताडे ॥ स्वा०कः ॥

देवताधिपः । पुं । इन्द्रे ॥

देवत्वम् । न । देवभूये । देवसायुज्ये ॥

देवस्यभावः कर्मवा । तस्यभावस्त्व-
तलैा ॥

देवदण्डा । स्त्री । नागबलायाम् ॥

देवदत्तः । पुं । अर्जुनस्य शङ्खे ॥ बुद्धानुजे ॥ जृम्भणकरे वायुविशेषे ॥ विजृम्भणे देवदत्तः शुद्धस्फटिकसन्निभः ॥ देवाएनं देयासुः । क्तिच्क्तौचसंज्ञायामिति आशिषिक्तः । दोदद्घोरिति दथादेशः ॥ चि । सुरार्पिते ॥ देवायदत्तः ॥ ग्रामविशेषे ॥

देवदत्ताग्रजः । पुं । बुद्धे । शाक्यमुनैा॥

देवदानी । स्त्री । हस्तिघोषायाम् ॥

देवदारु । न । स्वनामाप्रसिद्धे वृक्षविशेषे । भद्रदारुणि । पूतिकाष्ठे ॥ देवस्यदारु ॥ देवदारु लघु स्निग्धं तिक्तोष्णं कटुपाकि च । विबन्धाध्मानशोथामतन्द्राहिक्काज्वरास्रजित् ॥ प्रमेहपीनसश्लेष्मश्वासकण्डुसमीरनुत् ॥ पुं । यथा । अमुंपुरः पश्यसि देवदारुमितिरघुः ॥

देवदालिका । स्त्री । महाकाले ॥

देवदाली । स्त्री । लताविशेषे । जीमूतके । कर्कटफलायाम् । घघरबेल इतिसोनैया इतिच भाषा ॥ देवदाली रसेतिक्ता कफार्शः शोफपाण्डुताः । नाशयेद्वामनी तिक्ता क्षयहिध्माकृमिज्वरान् ॥ देवदालीफलं तिक्तं कृमिश्लेष्मविनाशनम् । स्रंसनं गुल्मशूलघ्न मर्शोघ्नं वातजित् परम् ॥ * ॥ देवदालीदलं तक्रे स्वेदितं खण्डितं भृशम् । वेसवारयुते साज्ये भर्जितं हिङ्गुना दृढम् ॥ पीतापरा खरस्पर्शा विषशीगरनाशिनी ॥ इत्थं परादेवदाली ॥

देवदासी । स्त्री । वनबीजपूरे ॥ वेश्यायाम् ॥

देवदीपः । पुं । लोचने ॥

देवदुन्दुभिः । पुं । गन्धपर्णासे । सरक्ततुलस्याम् ॥ देवानां दुन्दुभिवाद्ये ॥

देवदूती । स्त्री । अम्लायाम् । वनबीजपूरके ॥

देवदेवः । पुं । शिवे । महेश्वरे ॥ ब्रह्मणि ॥ देवानां देवेषुवादेवः ॥

देवदेवाधिपः । पुं । नैमिषेशम्भैा ॥

देवद्रोणी । स्त्री । देवयात्रायाम् ॥

देवद्र्यङ् । चि । देवपूजके ॥ देवान् अञ्चति । अञ्चु० । ऋत्विगादिना क्विन् । विष्विग्देवयोरित्यद्र्यादेशः ॥

देवधनम् । न । देवस्वे ॥

देवधान्यम् । न । जूर्णाह्वये । योनले । बीजपुष्पिकायाम् । जुन्हरी इति जुवार इतिच भाषा ॥

देवधूपः । पुं । गुग्गुलैा ॥ राले ॥

देवनः । पुं । पाशके ॥ दीव्यतेऽनेन-

। दिव्० । भावकरणादौल्युट् ॥ न । व्यवहारे ॥ जिगीषायाम् ॥ क्रीडायाम् ॥ लीलोद्याने ॥ पद्मे ॥ दीप्तौ ॥

देवनदी । स्त्री । गङ्गायाम् ॥ यमुनायाम् ॥

देवनन्दी । पुं । शक्रद्वारपाले ॥

देवनलः । पुं । नलोत्तमे । महानले ॥

देवना । स्त्री । क्रीडायाम् ॥ सेवायाम् ॥

देवनालः । पुं । स्थूलदण्डे । देवनले ॥

देवनिर्म्मिता । स्त्री । गुडूच्याम् ॥

देवपतिः । पुं । इन्द्रे ॥

देवपत्नी । स्त्री । मध्वालुके ॥ देवनार्याम् ॥

देवपथः । पुं । सुराध्वनि । छायापथे । सोमधारायाम् ॥ देवैरर्चिरादिभिर्गमयितृत्वेनाधिकृतैः रुपलक्षितःपन्था देवपथउच्यते ॥ देवानांपन्थाः । ऋक्पूरित्यः ॥ न । तीर्थविशेषे ॥

देवपरः । त्रि । मूर्खे ॥ यज्ञविघ्ने ॥ देवःपरःउत्कृष्टोस्य ॥

देवपर्णम् । न । सुरपर्णे ॥

देवपुत्रिका । स्त्री । पृक्कायाम् ॥

देवपुत्री । स्त्री । देवकन्यायाम् ॥ पृक्कायाम् ॥

देवपूः । स्त्री । अमरावत्याम् ॥

देवपुरी । स्त्री । अमरावत्याम् ॥ देवानांपुरी ॥

देवपुरोधाः । पुं । बृहस्पतौ ॥

देवप्रश्नः । पुं । उपश्रुतौ । ग्रहनक्षत्रादिघटितजिज्ञासायाम् ॥

देवप्रियः । पुं । पीतभृङ्गराजे ॥ बकपुष्पे ॥

देववला । स्त्री । त्रायमाणायाम् ॥ सहदेव्याम् ॥

देववल्लभः । पुं । पुन्नागवृक्षे ॥

देवब्रह्मा । पुं । नारदमुनौ ॥

देवब्राह्मणः । पुं । देवपूजकेब्राह्मणे ॥ शा०मध्यमपदलोपः ॥

देवभवनम् । न । बोधिद्रुमे । अश्वत्थे ॥ नाके । स्वर्गे ॥ देवानां भवनम् ॥

देवभूः । पुं । देवे ॥ स्वर्गे ॥

देवभूतिः । स्त्री । मन्दाकिन्याम् ॥ सुरैश्वर्ये ॥

देवभूयम् । न । देवत्वे । देवसायुज्ये ॥ देवस्य भावः । भुवोभावइतिक्यप् ॥

देवमणिः । पुं । भर्गे । हरे । शिवे ॥ अश्वस्यकण्ठावर्त्ते । अश्वरोमावर्त्ते ॥ आवर्त्तोरोमजोदेवमणिरित्येवनिगद्यते ॥ विष्णुवक्षोमणौ । कौस्तुभे ॥ महामेदायाम् ॥

देवमाता । स्त्री । अदित्याम् ॥ देवानांमाता ॥

देवमातृकः । पुं । वृष्ट्यम्बुसम्पन्नव्रीहिपालिते देशे ॥ देवो माताऽस्य

। नच्यृतश्चेतिकप् ॥

देवमानक: । पुं । कौस्तुभमणौ ॥

देवमास: । पुं । गर्भाष्टमे । गर्भस्याष्टमे मासि ॥ मनुष्यमानेनचिंशद्वर्षात्मके देवानांमासे ॥

देवयजनम् । न । यज्ञभूमौ ॥ कुशचेचे ॥ देवा ईज्यन्ते यस्मिन् ॥

देवयजि: । पुं । देवपूजके । मुनौ ॥

देवयज्ञ: । पुं । होमे । देवोद्देश्यक यागे ॥

देवयाजी । चि । कामनापुरस्सरं देवान् यजमाने । य:फलकामनयादेवान्यजते स: ॥ देवयाजिभ्यआत्मयाजीश्रेयान् ॥

देवयात्रा । स्त्री । देवद्रोणाम् । देवगमने ॥ देवोत्सवादौ ॥

देवयान: । पुं । न । विद्यावतोमार्गविशेषे । तत्त्वदर्त्यंविदुरितिविद्या तया प्रतिपत्तव्येपथि ॥ न । देवरथे । देवविमाने ॥

देवयानी । स्त्री । शुक्राचार्यस्यपुत्र्याम् । ययातेर्न्नृपस्यपत्न्याम् ॥

देवयु: । चि । धार्मिके ॥ लोकयात्रिके ॥ पुं । देवे ॥ देवान् याति । याप्रापणे । स्व०कु: ॥

देवयोनि: । पुं । विद्याधरादिषु ॥ तेच दश । यथा । विद्याधरोऽप्सरोयक्ष रक्षोगन्धर्वकिन्नरा: । पिशाचो गुह्यक: सिद्धो भूतोऽमीदेवयोनय: ॥ देवोयोनि: उत्पत्तिस्थानंयस्यस: इत्यर्थ: ॥

देवर: । पुं । देवरि । पतिभ्रातरि ॥ देवते । देवृदेवने । अर्त्तिकमिभ्रमीत्यरन्नित् ॥ पत्यु:कनिष्ठभ्रातरि इतिस्वामी । ज्येष्ठस्तुश्वशुरएवेतिसुभूत्यादय: ॥ पतिश्वशुरताज्येष्ठे पतिदेवरतानुजे । इतरेषुतुपांचाल्याभिरतयं चितयं मतम् ॥

देवरथ: । पुं । पुष्पकादौदेवानांविमाने ॥

देवराज: । पुं । इन्द्रे । मरुत्वति ॥ देवानांराजा । राजाह:सखिभ्यष्टच् ॥

देवरात: । पुं । परीक्षिति । अभिमन्युसुते न्नृपतिभेदे ॥

देवर्षि: । पुं । नारदादिषु ॥ देवाएवसन्तो ये मन्त्रदर्शित्वेन ऋषित्वं प्राप्ता:तेदेवर्षयउच्यन्ते ॥ सप्तगोदावरतीर्थदेवे ॥

देवल: । पुं । मुन्यन्तरे । व्यासशिष्येधौम्यर्षेर्ज्येष्ठभ्रातरि ॥ देवरे ॥ देवाजीवे ॥ धार्मिके ॥ सुरर्षौ ॥ दीव्यति । दिवु० । वृषा०कल: ॥ देवान् जीविकार्थंलाति आदत्ते । लाआदाने । आतोनुपेतिक: ॥

देवलकः। पुं। वर्त्तनार्थत्वेनप्रतिमाप रिचारके। पुजारी इतिभाषा॥ चि कित्सकान् देवलकान् मांसविक्रयि णस्तथा। विपणेनचजीवन्तो वर्ज्याः स्यु र्हव्यकव्ययोः॥ देवकोशोपजीवी चनाम्नादेवलकोभवेत्॥ स्वा०कः॥

देवलता। स्त्री। नवमल्लिकायाम्॥

देवलाङ्गुलिका। स्त्री। वृश्चिकाल्याम्॥

देवलोकः। पुं। स्वर्गे॥ भूर्लोकोऽथ भुवर्लोकः स्वर्लोकोऽथ महर्जनः। त पः सत्यञ्च सप्तैतेदेवलोकाःप्रकी- र्त्तिता इतिमत्स्यपुराणम्॥

देववक्त्रम्। न। वह्नौ॥ देवानांवक्त्रम्॥

देववर्द्धकिः। पुं। विश्वकर्म्मणि॥

देववल्लभः। पुं। पुन्नागे। गुर्जरदेशे सन्देशरा इतिप्रसिद्धे॥ देवानांवल्ल- भः॥

देववित्। त्रि। देवताकाण्डीये॥ सचे त्थंकल्पयति। अग्नीन्द्रादयोदेवास्त- त्तत्फलदातारो नेश्वर स्तथेति। ए तच्चकल्पनामात्रम्। अस्मदादिप्रया सिमपेक्ष्य फलदातृत्वे तेषां भृत्येभ्यो विशेषाभावप्रसङ्गात्। स्वातन्त्र्येणो पकारकत्वे तदाराधनवैयर्थ्यात्। त द्भक्तानामपि विप्रतिपत्तिदर्शनात् तत् प्रसादस्याकिञ्चित्करत्वात्॥

देवविद्या। स्त्री। निरुक्ते॥

देववृक्षः। पुं। सप्तपर्णे॥ मन्दारादि- देवतरौ॥ गुग्गुलौ॥ देवानां वृक्षः॥

देवव्रतः। पुं। भीष्मपितामहे॥ भी- ष्मोहि पितरि शन्तनौमृते स्वस्यराज्या धिकारसत्त्वेपि पितरं शन्तनुं प्रतिना हं राज्यं विवाहं वाकरिष्यामि त्वंस त्यवतीं वृणु इतिसत्यवती विवाहस मये प्रतिज्ञातत्वाच्चित्राङ्गदं सत्यव तीज्येष्ठपुत्रमेव राज्येस्थापयामास- तादृशसत्यरूपस्य देवानां व्रतस्य प- रिपालनाद्देवव्रतनामा भवत् इति पुराणप्रसिद्धेः॥ देवानां व्रते॥

देवशेखरः। पुं। दमनके॥

देवश्रुतः। पुं। ईश्वरे॥ शास्त्रे॥ ना- रदे॥

देवश्रेणी। स्त्री। मूर्वायाम्॥

देवसखः। पुं। पर्वतान्तरे॥

देवसभा। स्त्री। सुधर्मायाम्॥ सदभा न्यस्याम्। सभाराजेतिनिपातनाट् ङ्। देवानां सभा आस्थानगृहम्॥

देवसभ्यः। त्रि। क्रीडासंसक्ते। स- भिके॥

देवसर्षपः। पुं। वृक्षविशेषे। अम्लाक्षे। रक्तमूलके। सूक्ष्मदले॥ इ०रानि०॥

देवसहा। स्त्री। दण्डोत्पलौषधौ॥ भिक्षाशूचे॥

देवसात्। अ। देवाधीने॥ देवदेये॥

देवसायुज्यम् । न । देवभूये । देवत्वे ॥ युनक्ति । युजिर्० । इगुपधेतिकः । युजेनसह । तेनसहेति बहुव्रीहिः । वोपसर्जनस्येतिसहस्यसः ॥ यद्वा । योजनंयुक् । सं० क्विप् । सहयुजा सयुक् । सयुजस्य सयुजोवा भावः । ब्रा० ष्यञ् । देवस्य सायुज्यम् ॥

देवसृष्टा । स्त्री । मद्ये ॥ इतिहेमचन्द्रः ॥ देवेन सृष्टा ॥

देवसेना । स्त्री । मातृकाविशेषे । इन्द्रस्य सुतायाम् । षष्ठ्याम् । स्कन्दस्य पत्न्याम् ॥ षष्ठांशरूपा प्रकृतेस्तेन षष्ठी प्रकीर्त्तिता ॥ देवतानां सेनायाम् ॥

देवसेनापतिः । पुं । स्कन्दे ॥

देवस्वम् । न । यज्ञशीलानां धने ॥ यद्धनं यज्ञशीलानां देवस्वं तद्विदुर्बुधाः ॥ प्रतिमादिदेवतार्थमुत्सृष्टधने ॥ देवानां स्वम् । ब्रह्मस्वञ्च गुरोर्द्रव्यं देवस्वञ्चहरेत्तुयः । कन्यां ददातिशुल्केन सप्रेतो जायते सुत इतिमहाभारते पञ्चप्रेतोपाख्यानम् ॥

देवहूः । पुं । वामकर्णे ॥ पितृहूर्दक्षिणः कर्ण उत्तरोदेवहूः स्मृतः ॥

देवहूतिः । स्त्री । स्वायम्भुवमनोःकन्यायाम् ॥ यथा । आकूतिः प्रथमाकन्या द्वितीयादेवहूतिका । तृतीयाचप्रसूतिर्विख्याताक्लोकपावनी ॥

देवह्रदः । पुं । तीर्थविशेषे ॥

देवा । स्त्री । चाम्पयोपधौ ॥ अम्लानपर्याम् ॥

देवागारिकः । त्रि । देवागारे नियुक्ते ॥ अगारान्ताट्ठन् ॥

देवाजीवः । त्रि । देवले । प्रतिमापरिचारके । पुजारीब्राह्मन् इति भाषा ॥ देवआजीवो ऽस्य ॥

देवाजीवी । त्रि । देवले ॥ देवैराजीवितुंशीलमस्य । सुप्यजातौणिनिस्ताच्छील्ये णिनिः ॥

देवाटः । पुं । हरिहरक्षेत्रे ॥ देवानामटनाच्चैवदेवाट इतिसंज्ञितम् ॥

देवात्मा । पुं । अश्वत्थवृक्षे ॥

देवानांप्रियः । पुं । छागे ॥ त्रि । मूर्खे ॥ मूर्खाहि देवानां प्रीतिं जनयन्ति देवपशुत्वात् ॥ षष्ठ्या अलुक् ॥

देवापिः । पुं । असुरविशेषे ॥ देवानाप्नोति । आप्लृ० । फनेश्चइरात्मम्भरिश्चेतिचकारादिन् ॥ प्रतीपराजस्य पुत्रे ॥ ससुमेरुसमीपे कलापग्रामे योगीभूत्वा आस्ते । सकलौ लुप्तं चन्द्रवंशं पुनः सत्ययुगे भावयिष्यति ॥

देवाभीष्टा । स्त्री । ताम्बूल्याम् ॥

देवायतनम् । न । देवालये ॥ न देवायतनं गच्छेत् कदाचिद्वा ऽप्रदक्षिणम्

म् । नपीडवेद्वा वस्त्राणि नदेवायत नेष्वपीतिकूर्मपुराणम् ॥

देवायुधम् । न । शक्रधनुषि ॥ देवाना मस्त्रे ॥

देवारातिः । पुं । दैत्ये ॥

देवार्यः । पुं । वर्द्धमानाख्ये ऽर्हद्भेदे ॥

देवार्हम् । न । सुपर्णे ॥ त्रि । देवयोग्ये ॥

देवार्हा । स्त्री । सहदेवीलतायाम् ॥

देवालयः । पुं । देवगृहे ॥ देवस्यालयः ॥ स्वर्गे ॥ देवानामालयः ॥

देवाला । स्त्री । रागिणीविशेषे ॥

देवावासः । पुं । अश्वत्थवृक्षे ॥

देवाश्वः । पुं । इन्द्रस्याश्वे । उच्चैःश्रवसि ॥

देविका । स्त्री । सरिद्भेदे ॥ दीव्यति । दिवु० । ण्वुल् ॥ अर्द्धयोजनविस्तारां पञ्चयोजनमायताम् । एतावद्देविकामाहुर्देवर्षिपरिषेवितामिति-पाद्मे भूमिखण्डम् ॥ धुस्तूरे ॥

देविलः । त्रि । धार्मिके ॥ अनुकम्पितो देवदत्तः । घनिलचौचेतीलच् ॥

देवी । स्त्री । कृताभिषेकायाम् । महिष्याम् ॥ नटोक्त्याभिषिक्तराजपत्न्याम् ॥ पृक्कायाम् ॥ मूर्वायाम् ॥ आदित्यभक्तायाम् ॥ लिङ्गिन्याम् ॥ वन्ध्याकर्कोटक्याम् ॥ शालिपर्ण्याम् ॥ सहदेवायाम् ॥ पाठायाम् ॥ नागरमुस्तायाम् ॥ स्पृक्कायाम् ॥ हरीतक्याम् ॥ अतस्याम् ॥ श्यामानामपक्षिजातौ ॥ दुर्गायाम् । पार्वत्याम् ॥ देव्याः पादोदकमाहात्म्यमुक्तं देवीभागवते । सकृत्कृत्वा महापूजां देवीपादजलं पिबन् । नजातु जननीगर्भे गच्छेदिति विनिश्चयइति । दीव्यति यद्वा । देवयति सर्वान् ॥ प्रवृत्तिनिवृत्युपदेशेन यथाधिकारं व्यवहारयति । दिवु० । पचादौ देवडिति निपातनान्ङीप् ॥ सामान्यतो देवपत्न्याम् ॥ ब्राह्मणस्त्रीनामोपपदे ॥ देव्यन्ताद्विजस्त्रियोमताः ॥ देव्यन्ता क्षत्रियः सर्वा दासान्ताः शूद्रयोनयः ॥

देवीकोटः । पुं । बाणपुरे ॥

देवीभक्तः । त्रि । शाक्ते ॥ यथा । अपराधं परं कृत्वा देवीभक्तस्य कोजनः । सुखं लभेत यद्यपि भवेत् धाता शिवः स्वयमितिभागवतम् ॥

देवा । पुं । देवरे ॥ दीव्यति । दिवु० । दिवेर्ऋः । देवरौ देवरः इत्यादिपितृवत् ॥

देवेज्यः । पुं । बृहस्पतौ ॥ देवानामीज्यः ॥

देवेशः । पुं । श्रीसदाशिवे ॥ देवानामिन्द्रादीनामीशोनियन्ता ॥ विष्णौ ॥

देवेशी । स्त्री । दुर्गायाम् ॥

देवेड्ः । पुं । गुग्गुलौ ॥ महामेदायाम्

। त्रि । देववाञ्छिते ॥

देवेष्टा । स्त्री । वनबीजपूरके ॥

देवोद्यानम् । न । सुपर्वणां लीलाकाननेषु ॥ तानिच नन्दनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमितिचत्वारि देवोद्यानानि भवन्ति ॥ देवोद्यानानि वैभ्राजं मिश्रकं सिश्रकावणम् । चैत्ररथश्चेति त्रिकाण्डशेष: ॥

देश: । पुं । भूगोलभागविशेषे । कुरुपञ्चालादिविषये । जनपदे । नीरुति ॥ स्थानमात्रे । सचत्रिविध: । जाङ्गलो ऽनूप: साधारणश्चेति । एतन्मध्येपि देवेशि देशभेदाह्यनेकश: । कोटिश:सन्तिदेवेशि एते मुख्या:प्रकीर्त्तिता: ॥ एतन्मध्येषट्पञ्चाशन् मध्ये । एतेमध्यप्राच्यादिदेशाद्यर्थ: ॥ दिशति । दिश° । पचाद्यच् ॥

देशक: । त्रि । शास्तरि ॥ इतिहेमचन्द्र: ॥

देशकारी । स्त्री । रागिणीविशेषे ॥

देशपरिच्छिन्न: । त्रि । मूर्त्तत्वेन सर्वदेशावर्त्तिनि ॥

देशरूपम् । न । उचिते । समञ्जसे ॥ दिशअतिसर्जने । घञ् । देशोरूपमस्य । दिश्यमानस्योचितस्यरूपम् ॥ यद्वा देशनम् । घञ् । प्रशस्तं देशनं वा । प्रशंसायां रूपप् ॥

देशाखी । स्त्री । रागिणीविशेषे ॥

देशान्तरम् । न । सुमेरुलङ्कयोर्मध्यरेखास्वरूपदेशस्वदेशयो रन्तरयोजने ॥ देशान्तरपरिभाषायां वृद्धमनु: । वाचोयत्रविभिद्यन्ते गिरिर्वाव्यवधायक: । महानद्यन्तरं यत्र तद्देशान्तरमुच्यते ॥ देशनामनदीभेदान्निकटोपिभवेद्यदि । तत्तुदेशान्तरं प्रोक्तंस्वयमेवस्वयम्भुवा ॥ दशरात्रेणया वार्त्ता यत्रनश्रूयते ऽथवेति वृहस्पति: ॥ देशान्तरं वदन्त्येके षष्टियोजनमायतम् । चत्वारिंशद्वदन्त्येके त्रिंशदेकेतथैवचेति ॥

देशिक: । पुं । मूलमन्त्रप्रदे श्रीगुरौ ॥ यथा । शरणं नहि मम जननी न पिता न सुता न सोदरा नान्ये । परमं शरणमिदमेव चरणं मम मूर्द्ध्नि देशिकन्यस्त मिच्चाचार्यो ॥ त्रि । पथिके ॥ शिष्ये ॥

देशित: । त्रि । उपदिष्टे ॥

देशी । पुं । गानप्रकारे । क्वचिद्देशविशेषे गीयमाने ॥

देशिनी । स्त्री । तर्जन्याम् ॥

देशी । स्त्री । रागिणीविशेषे ॥

देश्यम् । न । पूर्वपक्षे ॥ त्रि । देशार्हे ॥

देष्णु: । त्रि । दातरि ॥ दुर्दमे ॥ ददाति । डुदाञ्° । गादाभ्यामिष्णुच् ॥

देह: । पुं । न । काये । शरीरे ॥

सचस्थूलसूक्ष्मकारणभेदात् त्रिविधो भवति ॥ मांसासृक्पूयविण्मूत्र स्नायुमज्जास्थिसंहतौ । देहेचेत्-प्रीतिमान् मूढो भविता नरकेपिसः ॥ स्मृतौ ॥ दिह्यते । दिह० । घञ् ॥ न्यायमते पृथिव्यादेहं योनिजमयोनिजञ्च । योनिजं जरायुजमण्डजञ्च । अयोनिजं स्वेदजोद्भिदादिकम् । नारकिणां शरीरमप्ययोनिजम् । जलीयंदेहमयोनिजं वरुणलोकेप्रसिद्धम् । तैजसंदेहमयोनिजं सूर्यलोके प्रसिद्धम् । वायोर्देहमयोनिजं तद्देवःपिशाचादीना मितिसिद्धान्तमुक्तावली ॥

देहकः । पुं । देहे ॥ स्वार्थे संज्ञायांवा कन् ॥

देहकोषः । पुं । पक्षे । पङ्खा इति-भाषा ॥ इ०श०चं० ॥

देहक्षयः । पुं । कायनाशे ॥ रोगे ॥ देहस्यक्षयः येनदा ॥

देहदः । पुं । पारदे ॥

देहदुर्गन्धता । स्त्री । शरीरदौर्गन्ध्ये ॥ तन्नाशकौषधं यथा । अर्जुनस्यतु पुष्पाणि जम्बुपत्रयुतानिच । सलोध्राणिच तल्लेपो देहदुर्गन्धतांहरेदिति गारुडे १९४ अध्यायः ॥

देहद्वयम् । न । स्थूलसूक्ष्मलक्षणे ॥ देहयोर्द्वयम् ॥

देहधारकम् । न । अस्थि ॥

देहधिः । पुं । पक्षे । पङ्खा इतिभाषा ॥

देहधृक् । पुं । वायौ ॥

देहनाशः । पुं । प्राणे ॥

देहभृत् । पुं । जीवे ॥ मनुष्योहं ब्राह्मणोहं गृहस्थोहमित्याद्यभिमानेनावाधितेन देहंकर्माधिकारहेतुवर्णाश्रमादिरूपं कर्तृत्वभोक्तृत्वाद्याश्रयं स्थूलसूक्ष्मशरीरेन्द्रियसङ्घातं विभर्त्ति अनाद्यविद्यावासनावशात् व्यवहारयोग्यत्वेन कल्पित मसत्यमपि सत्यतया स्वभिन्नमपिस्वाभिन्नतया पश्यन् धारयति पोषयतिचेति देहभृत् । डुभृञ्० । क्विप् तुक् ॥ विवेकज्ञानशून्ये अविद्यावति कर्तृत्वाभिमानिनि ॥ सत्रिविधः । रागादिदोषप्राबल्यात् काम्यनिषिद्धादियथेष्टकर्मानुष्ठायी मोक्षशास्त्रानधिकार्येकः १ । अपरस्तु यःप्राकृतःसुकृतवशात् किञ्चित्प्रक्षीणरागादिदोषः सर्वाणिकर्माणित्यक्तुमशक्नुवन् निषिद्धानि काम्यानिचपरित्यज्य नित्यानि नैमित्तिकानिचकर्माणि फलाभिसन्धित्यागेनसत्त्वशुद्ध्यर्थमनुतिष्ठन् गौणसन्न्यासी मोक्षशास्त्राधिकारीद्वितीयः २ । ततोनित्यनैमित्ति

कर्मानुष्ठानेनान्तःकरणशुद्ध्यासमुपजातविविदिषः श्रवणादिना वेदनं मोक्षसाधनं सम्पिपादयिषुः सर्वाणि कर्माणि विधितः परित्यज्य ब्रह्मनिष्ठं गुरुमुपसर्पतिविविदिषासन्न्यासिसमाख्यस्तृतीयः ३ ॥

देहयात्रा । स्त्री । यमपुरीगमने । मरणे ॥ भोजने ॥ देहस्य यात्रा ॥

देहला । स्त्री । मद्ये ॥ इतिशब्दचन्द्रिका ॥

देहलिः । स्त्री । देहल्याम् ॥

देहलिकाश्रमम् । न । अश्वं देश्यधिष्ठिते पिठविशेषे ॥

देहली । स्त्री । गृहावग्रहण्याम् । द्वारपिण्ड्याम् । देहलं इतिभाषा ॥ देहनम् । दिह० । भावेघञ् । देहंलाति । ला० । आतोनुपेतिकः । गौ० ङीष् ॥

देहसाम्यम् । न । अङ्गसमत्त्वे ॥ अङ्गानां समतां विद्यात् समे ब्रह्मणि लीयते । नोचेन्नैवसमानत्व मृजुत्वं शुष्कवृक्षवत् ॥

देहसारः । पुं । मज्जनि ॥

देहातीतः । पुं । घटादिवद्देहद्रष्टृत्वेन देहविलक्षणआत्मनि ॥

देहात्मवादी । त्रि । चार्वाके ॥ तस्येदं मतम् । शरीरमेवात्मा प्रज्वलितगृहात् स्वपुत्रं परित्यज्यापि स्वस्यनिर्गमदर्शनात् स्थूलोहं कृशोहमित्यनुभवाच्चेति ॥ देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृताः । इति भाष्यम् ॥

देहाध्यासः । पुं । मनुष्योहं कृष्णोहं गौरोहमित्त्यादिबुद्धौ ॥ देहे अध्यासः ॥

देहिका । स्त्री । कीटविशेषे । उपादिके । उपजिह्विकायाम् ॥

देही । त्रि । देहवति । शरीरिणि । देहतादात्म्याध्यासापन्नेजीवे ॥ देहाः सर्वेभूतभविष्यद्वर्त्तमाना जगन्मण्डलवर्त्तिनोऽस्यसन्तीतितथा । एकस्यैवविभुत्वेन सर्वदेहयोगित्वाल्लिङ्गदेहोपाधिरात्मादेहीत्युच्यते ॥ देहभिन्नात्मदर्शिनि ॥ सच प्रवासीव परगेहे तत् पूजापरिभवादिभिरप्रहृष्यन्नविषीदन्नहङ्कारममकारशून्यस्तिष्ठति । अतोऽद्देहतादात्म्याभिमानाद्देहएवनतुदेही सचदेहाधिकरणमेवात्मनोऽधिकरणं मन्यमानो गृहे भूमा वासनेवाहमासे इति मन्यते नतुदेहमास इति ॥ * ॥ न्यायमते अस्य गुणायथा । बुद्ध्यादिषट्कंसङ्ख्यादि पञ्चकं भावनातथा । धर्माधर्मौ गुणाएते आत्मनः स्युश्चतुर्दश ॥ अयमिन्द्रियाद्यधिष्ठाता पुण्यपापाश्रयः । ज्ञानसुखादियोगतोमान

सप्रत्यक्षविषयः। परदेशादौ प्रवृत्त्यादिना ऽनुमेयः। अहमित्याकारप्रत्ययाश्रयः। मनोमात्रस्य गोचरः। विभुः परममहत्त्ववान्। इति भाषापरिच्छेदः॥

दैत्यम्। न। दीक्षायाम्भवे मौञ्ज्यादिकर्मणि॥

दैतेयः। पुं। असुरे। दैत्ये॥ दित्या अपत्यम् इत्यर्थे ङीषन्तात् स्त्रीभ्यो ढक्॥

दैत्यः। पुं। असुरे॥ दितेरपत्यमित्यर्थे दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः॥

दैत्यगुरुः। पुं। उशनसि। शुक्रे॥ दैत्यानां गुरुः॥

दैत्यदेवः। पुं। वरुणे॥ वायौ॥

दैत्यनिषूदनः। पुं। विष्णौ॥

दैत्यपुरोधाः। पुं।
दैत्यपुरोहितः। पुं। } शुक्रे॥

दैत्यमाता। स्त्री। दितौ॥

दैत्यमेदजः। पुं। गुग्गुलौ॥ इ०रानि०॥

दैत्यमेदजा। स्त्री। भूमौ॥

दैत्ययुगम्। न। असुराणांयुगे॥ तद्देवपरिमाणेन द्वादशसहस्रवर्षाणि। मनुष्यमानेन चतुर्युगसङ्ख्यम्॥ इतिशब्दार्थकल्पतरुः॥

दैत्या। स्त्री। मुरायाम्॥ चण्डौषधौ॥ मद्ये॥ दैत्यभार्यायाम्॥ दितेरिदं यम्। ण्यन्ताट्टाप्॥

दैत्यारिः। पुं। देवमात्रे॥ विष्णौ॥ दैत्यानामरिः॥

दैत्याहोरात्रः। पुं। मानवानां वर्षे॥ इतिशब्दार्थकल्पतरुः॥

दैनन्दिनम्। त्रि। दिनेदिने भवे॥

दैनिकी। स्त्री। दिनभृतौ। एकदिनकर्ममूल्ये॥ इतिशब्दमाला॥

दैन्यम्। न। दीनत्वे॥ कार्पण्ये॥

दैर्घ्यम्। न। आयामे। दीर्घत्वे॥ दीर्घस्य भावः। ष्यञ्॥

दैवम्। न। भागधेये। भाग्ये। फलाभिमुखे कर्मणि। पूर्वजन्मार्जितसदसत्कर्मविपाके॥ प्राग्जन्मनि कृतं कर्मशुभंवा यदिवा ऽशुभम्। दैवशब्देन निर्दिष्टमिहजन्मनितद्बुधैः॥ दैवं पुरुषकारश्च देवेशसदृशावुभौ। उपायस्तुविधातव्यो दैवात् फलति सर्वथा॥ अत्रोक्तं ब्रह्मवैवर्त्ते गणेशखण्डे। दैवाधीनं जगत् सर्वंजन्मकर्म शुभाशुभम्। संयोगाश्च वियोगाश्च नचदैवात् परंबलम्॥ कृष्णायत्तश्च तद्दैवं सदवात् परतस्ततः। भजन्ति सततं सन्तः परमात्मानमीश्वरम्॥ दैवं वर्द्धयितुं शक्तः क्षयं कर्त्तुं स्वलीलया। नदैववद्भ्रु सङ्क्त-

भाविनाशीच निर्गुण इति ॥ अस्य गतिर्विलक्षणोक्ता यथा। ह्यणं वज्जाय ते ननं वज्र श्चैव ह्यणायते। बलवान् बलहीनः स्याद्दैवस्यगतिरीदृशीति॥ दैवतीर्थं । दक्षहस्ताङ्गुलीनामग्रे॥ देवताज्ञाने॥ दैवश्राद्धे॥ अनुग्राहकदेवताज्ञाने। उपास्ये॥ उत्पातविज्ञाने॥ देवादागतम्। ततआगतइत्यण्॥ देवानामिदम्। तस्येदमित्यण्॥ देवोदेवतास्यहा। सास्य देवतेत्यण्। देवाद्यञ्ञाविस्यस्वा॥ पुं। विवाहविशेषे॥यथा। यज्ञेतु वितते सम्यगृत्विजे कर्मकुर्वते। अलङ्कृत्यसुतादानं दैवंधर्मं प्रचक्षते॥ यज्ञेज्योतिष्टोमादौ। दैवस्यऋ वायम्। नतुदैवदैवतत्त्वं त्रिवाहस्य सम्भवति॥ वृद्धभेदे॥ दैवसर्गे। त्रिविधभूतादिसर्गे॥ त्रि। होमादौ दैवकर्मणि॥ प्रमीतौ पितरौ यस्य देहस्तस्याऽशुचि र्भवेत्। नापिदैवं न वापित्र्यंयावत्पूर्णोनवत्सरः॥ द्विविभवे॥

दैवकी। स्त्री। देवक्याम्॥

दैवकीनन्दनः। पुं। देवकीनन्दने॥

दैवकोविदा। स्त्री। दैवज्ञायाम्॥त्रि। दैवपण्डिते॥

दैवज्ञः। पुं। गणके। ज्योतिर्विदि। पूर्वजन्मार्जितसदसत्कर्मविपाकस्य॥ दैवंजानाति। ज्ञा०। आतोनुपेति कः॥ लाचालोहादिव्यापारी रसादिविक्रयी च यः। सयाति नागवेष्ट च्च नागै र्वेष्टित एवच॥ वसेत्स्वलोमसमानाब्दं तथैवनागदंशितः। ततो भवेत्सगणको वैद्यश्चसप्तजन्मसु॥ गोपश्चचर्मकारश्च रङ्गकारस्ततःशुचिरितिब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

दैवज्ञा। स्त्री। विप्रश्निकायाम्। जन्मादिना जनानां शुभाशुभं आत्मन्याम्॥ दैवंशुभाशुभंजानाति। ज्ञा०। कः। टाप्॥ दैवज्ञभर्यायाम्॥

दैवतः। पुं। न। सुरे॥ प्रतिमायाम्। देवशब्दात्स्वा०तल्। ततःस्वा०प्र० अण्॥ न। देवतानांसमूहे॥ त्रि। देवतासम्बन्धिनि॥

दैवतन्त्रः। त्रि। ईश्वराधीने॥ दैवंतन्त्रंप्रधानंयस्य॥

दैवदीपः। पुं। लोचने॥

दैवपरः। त्रि। दैवसारे। यद्भविष्ये। कर्मठीक इतिभाषा॥ दैवंपरंश्रेष्ठंयस्य॥

दैवप्रश्नः। पुं। उपश्रुतौ। आकाशवाण्याम्॥ द्विविभवो दैवः। सचासौ प्रश्नश्च॥ नक्तंनिर्गत्य यत्किञ्चि च्छु

भाशुभकरं वचः । श्रूयतेतद्विदुर्धीरादैवप्रश्न मुपश्रुतिम् ॥

दैवयज्ञः । पुं । दर्शपूर्णमासज्योतिष्टोमादिरूपे कर्मयोगिभिरनुष्ठेये गौणयज्ञे ॥ इष्टाख्येश्रौतकर्मणि ॥ अग्नौहोमे ॥

दैवयुगम् । न । देवानांयुगे ॥ तच्चदेवमानेन द्वादशसहस्रवर्षम् ॥ मनुष्यपरिमाणेन चतुर्युगमानम् ॥

दैवलकः । पुं । भूतसेवके । भौते ॥ इतिहारावली ॥ त्रि । देवलसम्बन्धिनि ॥

दैवलेखकः । पुं । मैाहूर्त्ते । गणके ॥

दैववञ्चितः । त्रि । हतभाग्ये ॥

दैववाणी । स्त्री । खेत्तोक्तौ । दैवप्रश्ने ॥ गीर्वाणवाण्याम् । संस्कृतवाक्ये ॥ संस्कृतंनाम दैवीवागन्वाख्यातामहर्षिभिरितिदण्डी ॥

दैववित्तम् । न । देवताधाने ॥

दैवसर्गः । पुं । त्रिधाभूतादिसर्गेष्वेकस्मिन् ॥ सचब्राह्मादिभेदादष्टविकल्पस्त्रिधासर्गैर्द्रष्टव्यः ॥

दैवसिकम् । त्रि । दिवसभवे ॥

दैवाकरिः । पुं । शनौ ॥ यमे ॥ स्त्री । यमुनायाम् ॥

दैवागारिकः । त्रि । देवागारेनियुक्ते ॥ तत्रनियुक्तइतिठक् । अगारान्ताट्ठनि तु स्वा० अण् ॥

दैवात् । अ । हठादित्यर्थे ॥

दैवाहोरात्रः । पुं । देवानामेकस्मिन् दिने । मानवानां संवत्सरे ॥ उत्तरायणंहिदेवानांदिनंभवति दक्षिणायनंरात्रिः ॥ दैवश्चासावहोरात्रश्च ॥

दैविकम् । न । दैवश्राद्धे ॥ देवानुद्दिश्य यच्छ्राद्धं तत्तुदैविक मुच्यते । हविष्येण विशिष्टेन सप्तम्यादिषु यत्नतः ॥ त्रि । दैवादागते । विधिहेतौ ॥ यत्तुसम्यगुपक्रान्तं कार्यमेति विपर्ययम् । पुमांस्तत्रानुपालभ्यो दैवान्तरितपौरुषः ॥ देवसम्बन्धिनि ॥

दैवी । स्त्री । सात्त्विक्यांप्रकृतौ ॥ देवसम्बन्धिन्याम् ॥ चिकित्साविशेषे ॥ आसुरी मानुषी दैवीचिकित्सात्रिविधामतेति वैद्योक्तेः ॥

दैवोदासिः । पुं । दिवोदासात्मजे । प्रतर्दने ॥ दिवोदासस्यापत्यम् । अतइञ् ॥

दैव्यम् । न । दैवे । भाग्ये ॥ देवानामिदमिति प्राग्दीव्यतीयेष्वर्थेषु देवाद्यञञाविति यञ् ॥

दैशिकः । त्रि । देशसम्बन्धिनि ॥ सम्बन्धविशेषे ॥ देशनिष्ठविशेषणतायाम् ॥

दैष्टिकः । त्रि । भाग्याधीनजाते ॥ का

लेन जाते ॥ दैवप्रमाणके । दैवप
रे ॥ दिष्टंभागधेय मितिमति र्यस्य
। अस्तिनास्तिदिष्टंमतिरिति ठक् ।
नालम्बते दैष्टिकतां न निषीदति
पौरुषे ॥
दैहिकः । त्रि । देहसम्बन्धिनि ॥
दोःशिखरम् । न । स्कन्धे ॥
दोःसहस्रभृत् । पुं । कार्त्तवीर्यार्जुने ॥
बाणासुरे ॥
दोग्धा । पुं । अर्थोपजीविकवौ ॥ गो-
पाले ॥ वत्से ॥ त्रि । दोहनकर्त्तरि ॥
दोग्ध्री । स्त्री । गवि ॥
दोधः । पुं । गोवत्से ॥
दोधकः । पुं । दोधकवृत्ते ॥
दोधकवृत्तम् । न । त्रिष्टुपछन्दःप्रभेदे ॥
यथा । भवितयं यदिकर्णसमेतं पन्न
गराजसुभाषितमेतत् । पण्डितम-
ण्डलिकाहृतचित्तं भामिनिभावय-
दोधकवृत्तम् ॥ यथा । फुल्लकदम्बव
नदनमालो निर्दलदिन्द्रमणीरुचि
जालः । एषउपैतिघनाघनकालःपा
न्यवधूजनदर्शितकालः ॥
दोधूयमानः । त्रि । पुनःपुनरतिशयेन
वाकम्पविशिष्टे ॥ प्रलयेपिदोधूय-
मानाःपरमाणव स्तिष्ठन्तीतिशिरो-
मणिः ॥
दोरः । पुं । डोर इति भाषाप्रसिद्धा
यांरज्जौ ॥
दोरकः । पुं । वीणातन्तुबन्धनरज्जौ ॥
दोर्गडुः । पुं । कुण्ठितहस्ते । बाहु-
कुण्ठे ॥
दोर्ग्रहः । त्रि । अचामे । बलवति ॥ भुज
स्यग्रहणे ॥ भुजस्य व्यथायाम्
दोर्दण्डः । पुं । बाहुरूपदण्डे ॥
दोर्मध्यम् । न । बाहुमध्यभागे । बा
जू० इतिभाषा ॥
दोर्मूलम् । न । कक्षे । भुजकोटरे ।
काख० इति भाषा ॥
दोलः । पुं । दोलने ॥ श्रीकृष्णस्योत्
सवविशेषे । झूला इतिभाषा ॥ दुल
उत्क्षेपे । भावे घञ् ॥
दोलनम् । न । आन्दोलने । कम्पने ॥
दोला । स्त्री । नील्याम् ॥ प्रेङ्खायाम् ।
डोली इतिभाषा ॥ उद्यानादिषु-
क्रीडार्थे काष्ठादिरचिते हिन्दोले ।
हिंडोला इतिभाषा ॥ यन्त्रविशेषे
। स्वेदने ॥ दोलति दोलयति दो-
ल्यते वा । दुल० । अच् घञ्वा ॥
दोलायमानः । त्रि । दोलनविशिष्टे ॥
यथा । दोलायमानं गोविन्दं मञ्चस्थं
मधुसूदनम् । रथस्थं वामनं दृष्ट्वा
पुनर्जन्म न विद्यते इत्युत्कलख-
ण्डः ॥
दोलायुद्धम् । न । अनियतजयपराजये ॥

दोलिका । स्त्री । हिन्दोलायाम् । हिंडोला इतिभाषा ॥ दोलैव । स्वा० कन् ॥

दोलिकाचक्रम् । न । दोलारोहणमुहूर्त्तोपयोगिनक्षत्रविचारार्थंचक्रे ॥ यथा । दोलारोहेऽर्कभात् पञ्चशरपञ्चेषुसप्तभैः । नैरुज्यंमरणं कार्श्यं व्याधिः सौख्यं क्रमाच्छिशोः ॥

दोलितः । त्रि । आन्दोलिते । कम्पिते ॥

दोली । त्रि । दोलनवति ॥ दोलोदोलनमस्त्यस्यामिन्वा । इनिः ॥

दोली । स्त्री । दोलायाम् । डोली इति भाषा ॥

दोलोत्सवः । पुं । चैत्रशुक्लतृतीयायां कर्त्तव्यत्वेनोक्ते उत्सवविशेषे ॥ अस्यविधिस्तुदेवीपुराणादौ द्रष्टव्यः ॥

दोः । पुं । भुजे । प्रकोष्ठे ॥ दाम्यत्यनेन । दम० । दमेर्डोसिः । षत्वणत्वासिद्धत्वात् रुत्वविसर्गौसिद्धौ ॥

दोषः । पुं । दूषणे ॥ एकोहिदोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥ पापे ॥ आचमनं विना भक्षणेदोषाभावो यथा । मधुपर्केच सोमेच ताम्बूलस्यच भक्षणे । फलमूलेचेक्षुदण्डेन दोषं प्राहवै मनुः ॥ अदाताबंशदोषेण कर्मदोषाद्दरिद्रता । उन्मादोमातृदोषेण पितृदोषेण मूर्खता ॥ वातपित्तकफेषु ॥ वायुः पित्तं कफश्चेति त्रयोदोषाः समासतः । विकृताविकृतादेहंघ्नन्ति ते वर्द्धयन्तिच ॥ तेव्यापिनोपि हृन्नाभ्योरधोमध्योर्द्ध्वसंश्रयाः ॥ धातवश्चमलाश्चापिदुष्यन्त्येभिर्यतस्ततः । वातपित्तकफाएते त्रयोदोषा इतिस्मृताः ॥ ऋतुभेदेन विहारादिनाचैषां चय प्रकोपशमना नियथा । ग्रीष्मेसञ्चीयतेवायुः प्रावृट्काले प्रकुप्यति । प्रायेणोपशमंयाति स्वयमेवसमीरणः ॥ शरत्कालेव सन्तेच पित्तं प्रावृट्तौ कफः । चयकोपशमान् दोषा विहाराहारसेवनैः ॥ समानैर्यान्त्यकालेपि विपरीतैर्विपर्यय इति ॥ वातपित्तश्लेष्ममलमूत्रादिपरिपूर्णत्वेन कायजुगुप्सितत्वे ॥ काव्यगुणेतरस्मिन् ॥ सचरसाद्यपकर्षकः । यथा । मुख्यार्थहतिर्दोषो रसश्चमुख्यस्तदाश्रयाद्वाच्यः ॥ दोषं लक्षयति ॥ प्रवर्त्तना लक्षणादोषाः ॥ १८ ॥ दोषाइतिबहुवचनं रागद्वेषमोहात्मकत्वख्यापनाय । प्रवर्त्तनाप्रवृत्तिजनकत्वम् तदेवलक्षणं येषाम् । यद्यपीदं शरीराद्दृष्टेश्वरेच्छादावतिव्याप्तं तथापि लौकिकप्रत्यक्षसविषयकत्वसतीतिविशेषणीयम् । योगादिगोच

रप्रमावारणाय प्रामाण्यत्वेसतीति विशेषयन्ति ॥ दुष्यति अनेनवा । दुषवैकृत्ये । अच् अकर्त्तरिचकारक इत्यनेनकरणेवा घञ् ॥

दोषग्राही । त्रि । पुरोभागिनि । खले ॥ विसृज्य सूर्पवद्दोषान् गुणान् गृह्णन्ति साधवः । दोषग्राही गुणत्यागी चालनीवद्धि दुर्जनः ॥ दोषंगृह्णाति । ग्रह० । णिनिः ॥

दोषज्ञः । त्रि । विपश्चिति । पण्डिते ॥ चिकित्सके ॥ दोषविषयकज्ञानयुक्ते ॥ दोषंजानाति । ज्ञा० । आतइतिकः ॥

दोषत्रयम् । न । वातपित्तकफेषु ॥

दोषवान् । त्रि । दुष्टे ॥

दोषा । अ । रात्रौ ॥ रात्रिमुखे ॥ दुष्यत्यच । दुष० । बाहुलकात् आप्रत्ययः ॥

दोषा । स्त्री । रात्रौ ॥ भुजे ॥ दाम्यत्यनेन । दम० । दमेर्डोसिः । भागुरिमतेनटाप् ॥

दोषाकरः । पुं । चन्द्रे ॥ त्रि । दोषाणामाकरे ॥

दोषाक्लेशी । स्त्री । वनबर्बुरिकायाम् ॥ इतिराजनिर्घण्टः ॥

दोषातनः । त्रि । रात्रिभवे ॥ सायञ्चिरमितिट्युः ॥

दोषातिलकः । पुं । प्रदीपे ॥

दोषास्यः । पुं । प्रदीपे ॥

दोषिकः । पुं । रोगे ॥

दोषी । त्रि । अपराधिनि । दोषयुक्ते ॥

दोषैकदृक् । त्रि । पुरोभागिनि । खले ॥ दोष एवैकस्मिन् नतुगुणे दृक् ज्ञान मस्य ॥

दोस्थः । पुं । क्रीडायाम् ॥ क्रीडके ॥ सेवायाम् ॥ सेवके ॥ त्रि । दोःस्थिते ॥

दोहः । पुं । दोहनपात्रे ॥ दुग्धे ॥ दुह्यते ॥ दुहप्रपूरणे । कर्मणिघञ् ॥

दोहजम् । न । दुग्धे ॥

दोहडिका । स्त्री । मात्रावृत्ते पज्झटिकाप्रभेदे ॥ मात्रात्रयोदशकंयदि पूर्वं लघुकपरिविरामि । पठपुनरेकादशं दोहडिकाद्विगुणेन ॥ प्राकृतेप्रचारः । यथा । राईदोहडिपठन सुनि हाँसिओकाङ्गोआल । वृन्दावनघनकुञ्ज चलिओकमलरसाल ॥ अस्यार्थः । हेमातः दोहडिकापाठंश्रुत्वाकृष्णोगोपालो हसित्वा कमपिरसालं चलितः कुत्र वृन्दावनघनकुञ्जे वृन्दावनस्य निविडनिकुञ्जे । मात्रइतिक्वचित्पाठ स्तन्मतेन राधिकायादोहडिकापाठं श्रुत्वा ॥ गुरुलघुव्यत्ययेनबहुविधाभवति ॥

दोहदः । पुं । न । गर्भे ॥ गर्भिण्याश्च

भिलाषे । लालसायाम् ॥ गर्भिण्या स्तु तदिच्छायां विशेषेण प्रयुज्यते । दोहदस्याप्रदानेन गर्भो दोष मवाप्नुयात् ॥ देय मप्यहितंतस्यै हिताय हितमल्पकम् । श्रद्धाविघाते गर्भस्य विकृतिश्च्युतिरेवच ॥ चिह्ने । गर्भलक्षणे ॥ न । स्पृहायाम् ॥ दोहमाकर्षं ददाति । डुदाञ्० । आतोनुपसर्ग इतिकः ॥

दोहदलक्षणम् । न । वयः सन्धौ ॥ गर्भे ॥

दोहदवती । स्त्री । अन्नादिद्रव्यविशेषाभिलाषवत्यां गर्भवत्याम् । श्रद्धालाम् ॥ अथान्नगर्भिण्याः कर्त्तव्याकर्त्तव्य मुक्तं मत्स्य पुराणे । दित्यां गर्भम थाधत्त कश्यपः प्राहतांपुनः । त्वया यत्नोविधातव्योह्यस्मिन् गर्भे वरानने ॥ संवत्सरशतंत्वेक मस्मिन्नेव तपोवने । सन्ध्यायां नैव भोक्तव्यं गर्भिण्या वरवर्णिनि ॥ नस्थातव्यं नगन्तव्यं वृक्षमूलेषु सर्व्वदा । नोपस्करेषूपविशेन्मुषलोलूखलादिषु ॥ जलञ्च नावगाहेत शून्यागारञ्च वर्जयेत् । वल्मीकेषु न तिष्ठेतनचोद्विग्नमना भवेत् ॥ विलिखेन्न नखैर्भूमिं नाङ्गारेण नभस्मना । नशयालुः सदातिष्ठेद् व्यायामञ्च विविर्जयेत् ॥ नतुषाङ्गारभस्मास्थिकपालेषु समाविशेत् । वर्जयेत् कलहं लोके गात्रभङ्गञ्च वर्ज्जयेत् ॥ नमुक्तकेशा तिष्ठेत नाशुचिः स्यात् कदाचन । न शयीतोत्तरशिरा नचापरशिराः क्वचित् ॥ नवस्त्रहीना नोद्विग्ना नचार्द्रचरणा सती । नामाङ्गल्यां वदेद्वाचं नचहास्याधिका भवेत् ॥ कुर्य्याच्च गुरुशुश्रूषांनित्यं मङ्गलतत्परा । सर्व्वौषधीभिः कोष्णेन वारिणा स्नान माचरेत् ॥ कृतरक्षा सुभूषाच वास्तुपूजनतत्परा । तिष्ठेत् प्रसन्नवदना भर्त्तुः प्रियहितेरता ॥ दानशीला तृतीयायां पार्व्वत्या नक्तमाचरेत् । इतिवृत्ता भवे न्नारी विशेषेणतु गर्भिणी ॥ यस्तु तस्या भवेत् पुत्रः शतायुर्बुद्धिसंयुतः । अन्यथा गर्भपतन मवाप्नोति नसंशयः ॥ तस्मात् त्वमनयावृत्त्यागर्भेऽस्मिन् यत्नमाचरेति ॥ दोहदोगर्भिण्यभिलाषोऽस्त्यस्याः । मतुप् । ङीप् ॥

दोहदान्विता । स्त्री । दोहदवत्याम् ॥

दोहदिनी । स्त्री । दोहदवत्याम् ॥ ताञ्च द्विहृदयां नारी माहुर्दोहदिनीं बुधाः ॥ दोहदोऽस्त्यस्याः । अतइनिः । ङीप् ॥

दोहनम् । न । स्तनाद्दुग्धनिस्सारणे ॥

दोहनी । स्त्री । दोहनपात्रे । पार्य्याम् ॥

दोहलः । पुं । दोहदे ॥ इतिशब्दार्थकल्पतरुः ॥

दोहलवती । स्त्री । दोहदवत्याम् ॥

दोहली । स्त्री । अशोकवृक्षे ॥

दोहा । स्त्री । मात्रावृत्तविशेषे ॥ षट्कलतुरगौ चिकलमपि विषमपदे विनिधेहि । समपादान्ते चैककलमिति दोहामवधेहि ॥ यथा । चरणसरोरुह मस्तु हृदि मदवने तव नाम । चक्षुषि रूपं यावदमु रमय मनो मम रामेति ॥

दोहापनयः । पुं । दुग्धे ॥

दोहीयान् । त्रि । अतिशयदोहके ॥

दोह्यम् । त्रि । दोहनीये । दुग्धे ॥

दौःसाधिकः । पुं । द्वारपाले ॥

दौकूलः । पुं । दुकूलावृतेरथे ॥ ॥ दुकूलेन परिवृतो रथः । परिवृतो रथ इत्यण् ॥

दौत्यम् । न । दूतभावे ॥ दूतकर्मणि ॥ दूतस्य भावः कर्म वा । ब्रा० ष्यञ् ॥

दौरात्म्यम् । न । दुरात्मनो भावे ॥ दुरात्मनः कर्मणि ॥ दुर्निन्दित आत्मा यतः धृतिः बुद्धिः स्वभावः शरीरं वा यस्य सदुरात्मा । तस्य भावः कर्म वा । ब्रा० ष्यञ् ॥

दौर्ग्यम् । न । दुर्गवृत्तिधर्मे । दुर्गसम्बन्धिनि ॥ दुर्गस्यभावः । ष्यञ् ॥ दुर्गस्येदम् ॥

दौर्जन्यम् । न । दुर्जनत्वे । अनार्यतायाम् ॥

दौर्बल्यम् । न । दुर्बलत्वे ॥ भावे ष्यञ् ॥

दौर्भागिनेयः । पुं । दुर्भगापुत्रे ॥ दुर्भगाया अपत्यम् । कल्या० ढक् इनङादेशश्च । हृद्भगेत्युभयपदवृद्धिः ॥ स्त्रियांङीपि दौर्भागिनेयी ॥

दौर्भाग्यम् । न । दुर्भगत्वे ॥ दुर्भगस्य दुर्भगायाश्च भावः । ष्यञ् । हृद्भगसिन्ध्वन्ते पूर्वपदस्य चेत्युभयपदवृद्धिः ॥ भुक्ता पितृगृहेनारी भुङ्क्ते स्वामिगृहे यदि । दौर्भाग्यं जायते तस्याः शपन्ति कुलदेवता इतिज्योतिस्तत्त्वम् ॥

दौर्मनस्यम् । न । दुःखनिबन्धनचित्तावसादे । इच्छाविघातादिबलवद्दुःखानुभवजनिते चित्तस्य तामसपरिणामविशेषे । क्षोभापरपर्याये स्तब्धीभावे ॥ सतुदोषाख्यविपर्ययहेतुत्वात् कषायत्वाच्च लयवत् समाधेर्विरोधीत्युच्यते ॥ दुर्मनसो भावः । ष्यञ् ॥ वाह्याभ्यन्तरैः कारणैर्मनसो दौःस्थ्ये ॥

दौर्वासमम् । न । उपपुराणान्तरे ॥

दौर्वीणम् । न । मृष्टपर्णे ॥ दूर्वारसे ॥

दौर्हृदम् । न । इच्छायाम् । लालसा

याम् । दौर्हृदे ॥ दुर्जनत्वे ॥ दुर्हृदः कर्मभावोवा । यु० अण् ॥

दौलेयः । पुं । कच्छपे ॥ दुल्याअपत्यम् । इतश्चानिञ इति ढक् ॥

दौवारिकः । पुं । द्वाःस्थे । वेत्रधरे ॥ द्वारेनियुक्तः । तत्रनियुक्त इतिठक् ॥

दौवारिकी । स्त्री । प्रतीहार्याम् ॥ ङीप् ॥

दौष्कुलेयः । त्रि । दुष्कुलीने ॥ दुष्कुलस्यापत्यम् । दुष्कुलाढ्ढक् ॥

दौष्ठवम् । न । दुष्टुभावे ॥ उद० अण् ॥

दौष्यन्तिः । पुं । भरतनृपे ॥ दुष्यन्तस्यापत्यम् । अतइञ् ॥

दौहित्रः । पुं । कुतुपे । दुहितुः सुते ॥ दुहितुरपत्यम् । अन्तेष्यानन्तर्ये विदादिभ्योञ् ॥ न । वीणि श्राद्धे पवित्राणि दौहित्रं कुतप स्तिलाः । दौहित्रं खड्गमित्याहु रपत्यं दुहितु स्तिलाः ॥ कपिलायाघृतञ्चैव दौहित्रमितिचोच्यते ॥ इतिमार्कण्डेयपु० ॥ पौत्रदौहित्रयो र्लोके विशेषो नास्ति कश्चन । तयोर्हि मातापितरौ सम्भूतौतस्यदेहतः इति दायभागः ॥ दौहित्रोपि ह्यमुत्रैनं सन्तारयति पौत्रवदितिमनुः ॥

द्य । अ । हिंसायाम् ॥ प्रातिलोम्ये ॥ पादपूरणे ॥

द्यावाक्षमे । स्त्री । द्वि० । भूदिवौः । स्वर्गपृथिव्योः ॥ द्यौश्च क्षमाच । दिवोद्यावा ॥

द्यावापृथिवीयम् । न । द्यावापृथिव्योर्हविरादौ ॥ द्यावापृथिव्यौ देवते अस्य । द्यावापृथिवी त्यादिनाछः ॥

द्यावापृथिव्यम् । न । द्यावापृथिव्योर्हविरादौ ॥ द्यावापृथिव्यौ देवते अस्य । द्यावापृथिवीत्यत्र चाद्यत् ॥

द्यावापृथिव्यौ । स्त्री । द्वि० । स्वर्गपृथिव्योः ॥ द्यौश्चपृथिवीच । दिवसश्च पृथिव्यामित्विचाद्दिवोद्यावा ॥

द्यावाभूमी । स्त्री । द्वि० । द्यावापृथिव्योः ॥ द्यौश्चभूमिश्च । दिवोद्यावेति देवताद्वन्द्वे द्यावादेशः ॥

द्युः । पुं । अग्नौ ॥ न । अह्नि ॥ गगने ॥ स्वर्गे ॥ अव्युत्पन्नप्रातिपदिकोयम् ॥

द्युगः । पुं । पक्षिणि ॥ इतिराजनिघण्टः ॥

द्युगणः । पुं । अहर्गणे ॥

द्युत् । पुं । किरणे ॥ द्युत० । क्विप् ॥

द्युतिः । स्त्री । रश्मौ ॥ शोभायाम् ॥ प्रकाशे ॥ प्रभायाम् ॥ द्युतिरङ्गगता कान्तिरित्याचार्याः ॥ द्योततेऽनया द्युतदीप्तौ । इगुपधादितीन् ॥

द्युतिकरः । पुं । ध्रुवे ॥ त्रि । शोभाकरे ॥

द्युतितम् । त्रि । दीप्तिविशिष्टे । द्योतिते ॥

द्युतिमान् । त्रि । प्रशस्तकान्तिमति ॥

द्युती । स्त्री । शोभायाम् ॥ कृदिका रादितिङीष् ॥

द्युनम् । न । खस्मात्सप्तमराशौ ॥

द्युनिशम् । न । अहोरात्रे ॥ भवति किं द्युनिशं द्युनिवासिनाम् ॥

द्युनिवासी । पुं । देवे ॥

द्युपतिः । पुं । भानौ । हंसे ॥

द्युभ्वाद्यायतनम् । न । दिवोभुवश्चाश्रये ब्रह्मणि ॥

द्युमणिः । पुं । हंसे । सूर्ये ॥ दिवो मणिरिव ॥ अर्कवृक्षे ॥ मारिते-ताम्रे ॥

द्युमयी । स्त्री । सूर्ययोषायाम् । विश्वकर्मणःपुत्र्याम् ॥

द्युम्नम् । न । वित्ते । धने ॥ वले ॥ दिवंमनति । म्नाअभ्यासे । आतोनुपेतिकः ॥

द्युवा । पुं । मित्रे । सूर्ये ॥ द्यौति । द्यु-अभिगमने । कनिन् युवृषितक्षिराजीत्यादिना कनिन् ॥

द्युवृन्दः । पुं । अहर्गणे ॥

द्युषत् । पुं । देवे ॥ दिविसीदति वर्त्तते । षद्लृ० । सत्सूद्विषेति क्विप् । तत्पुरुषे कृतिवहुलमितिङेर्लुक्- । सुषामादित्वात्षत्वम् ॥

द्युसत् । पुं । देवे ॥ दिविसीदति । सत्सूद्विषेति क्विप् । पूर्वपदादिति षत्वन्तु न भवति । छन्दसीत्यनुवृत्तेः । तथाचमाघः । मनसुयेनद्युसदां न्यधीयतेति ॥

द्यूतः । पुं । न । अक्षादिक्रीडायाम् । कैतवे । अप्राणिकरणकखेलायाम् ॥ अप्राणिभिर्यत् क्रियते तल्लोकेद्यूत मुच्यते । जूआ इति भाषा ॥ द्यूतमे तत् पुराकल्पे दृष्टं वैरकरं महत् । तस्माद् द्यूतं न सेवेत हास्यार्थमपिबुद्धिमान् ॥ * ॥ परवञ्चनस्य कर्त्तॄणां सम्बन्धिद्यूतमक्षदेवनादिलक्षणं सर्वस्वापहरणकरं भगवतो विभूतिः ॥ देवनम् । दिवु० । भावे क्तः ॥

द्यूतकरः । त्रि । जुआरीइतिभाषाप्रसिद्धे । द्यूतकर्त्तरि । दुरोदरे धूर्त्ते । कितवे ॥

द्यूतकारः । त्रि । द्यूतकारयितरि । सभिके ॥ द्यूतंकारयति । डुकृञ्० । कर्मण्यण् ॥

द्यूतकारकः । त्रि । द्यूतकारे ॥ स्वार्थेकः ॥ कारयति । कृ० । ण्वुल् । द्यूतस्य-कारको वा ॥

द्यूतकृत् । त्रि । अक्षधूर्त्ते । द्यूतकरे ॥ ॥ द्यूतंकरोति । डुकृञ्० । क्विप् । तुक् ॥

द्यूतपूर्णिमा । स्त्री । कोजागरपूर्णिमा-

याम् ॥

द्यूतपौर्णमी । स्त्री । कोजागरतिथौ ॥ इतिभूरिप्रयोगः ॥

द्यूतप्रतिपत् । स्त्री । कार्त्तिकशुक्लप्रतिपदि । कौमुद्याम् ॥ तुषव्यर्थं कार्त्तिके तस्य शुक्ला या प्रतिपत्तिथिः । विष्णो र्दत्ता मही तत्र कौमुदी सा स्मृता बुधैः ॥ कुशब्देन मही ज्ञेया मुदा हर्षे चवै द्विज । धातुज्ञैःसर्वशब्दज्ञैःसाचवैकौमुदीस्मृता ॥ इति प० पु० ॥ अत्र बलेर्दैत्यस्य पूजादिकं कार्य्यम् । इत्युक्तं वामनपुराणे ॥ शङ्करश्च पुराद्यूतं ससर्ज सुमनोहरम् । कार्त्तिके शुक्लपक्षेतु प्रथमेऽह्नि भूपते ॥ जितश्च शङ्कर स्तत्र जयं लेभेच पार्वती । अतोर्थाच्छङ्करोदुःखी गौरी नित्यं सुखोषिता ॥ तस्माद्द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः । तस्मिन् द्यूतेजयोयस्यतस्यसंवत्सरः शुभः ॥ पराजयोविरुद्धश्च लब्धनाशकरो भवेत् । इति ॥

द्यूतबीजम् । न । वराटके । कपर्द्दके ॥ द्यूतस्यकारणे ॥

द्यूतवृत्तिः । त्रि । सभिके ॥

द्यूनम् । न । लग्नात्सप्तमराशौ ॥ यथा । धीस्थानं पञ्चमंज्ञेयं यामित्रंसप्तमंस्मृतम् । द्युनंद्यूनंतथास्तास्यंपट्

कोशरिपुमन्दिरम् ॥ त्रि । क्षीणे ॥

अदेवीत् । दिवु० । क्तः । दिवोविजिगीषायामितितस्यनः । यस्यविभाषेतिनेट् । च्छ्वोरिट्यूठ् ॥

द्यौः । स्त्री । त्रिदशालये । स्वर्गे ॥ चित्रशवर्त्मनि । आकाशे ॥ द्योतन्ते देवा अस्याम् । द्युतदीप्तौ । बाहुलकाट्डोः ॥ द्योर्गोवत ॥

द्योतः । पुं । प्रकाशे । आतपे ॥ द्योतनम् । द्युतेर्घञ् ॥

द्योतनम् । न । दर्शने ॥ पुं । दीपे ॥ द्युतेर्ल्युट् ॥

द्योतितः । त्रि । दीप्ते ॥

द्योभूमिः । पुं । खगे । पक्षिणि ॥ द्योर्भूमिरस्य ॥

द्योषद् । पुं । देवे ॥

द्यौत्रम् । न । ज्योतिषि ॥ दीव्यन्त्यस्मिन् । दिवु । दिवेर्द्युच्चेतिष्ट्रन् द्युरादेशो वृद्धिश्च ॥

द्रगडः । पुं । प्रतिपत्तूर्य्ये । दगड इति गौडभाषा प्रसिद्धे वाद्ये ॥ इ० चि० ॥

द्रङ्क्षणम् । न । तोलके । कोले । वटके । कर्षार्द्धे ॥ इति वैद्यकपरिभाषा ॥

द्रङ्गः । पुं । पुर्य्यामिति हेमचन्द्रः ॥

द्रढिमा । पुं । दृढतायाम् ॥ दृढस्य भावः । पृथ्वादिभ्यइमनिज्वा । रक्षतो

इलादेर्लघोः । टेर्लोपः ॥

द्रढिष्ठः । त्रि । द्रढीयसि ॥ अयमनयो रेषां वा अतिशयेन दृढः । दृष्ठन् ॥

द्रढीयः । त्रि । दृढतरे ॥

द्रप्सम् । न । घनेतरदधिनि । द्रप्ये ॥ दृप्यन्त्यनेन । दृपहर्षादौ । अनुदात्तस्येत्यम् । बाहुलकात्सः ॥

द्रप्स्यम् । न । द्रप्से ॥ दृप्यन्त्यनेन । दृप प्राणने । अघ्न्यादयश्चेति निपातितः ॥

द्रम्मः । पुं । पणानां षोडशके ॥ वराटकानां दशकद्वयं यत् सा काकिणी ताश्च पणाश्चतस्रः । ते षोडश द्रम्म इहावगम्यो द्रम्मैस्तथा षोडशभिश्च निष्कः ॥

द्रवः । पुं । प्रद्रावे । पलायने ॥ नर्मणि ॥ रसे ॥ गतौ ॥ आसवे ॥ वेगे ॥ द्रवणम् । द्रु गतौ । ऋदोरप् ॥ त्रि । द्रववति ॥ आपो द्रवाः । सर्वाणि द्रवाणि तूद्ग्मुखेन जुहोतीत्यादि प्रयोगात् ॥

द्रवजः । पुं । गुडे ॥ त्रि । द्रवजातवस्तुमात्रे ॥

द्रवणम् । न । अनुतापे ॥ क्षरणे ॥ गमने ॥ द्रु० । ल्युट् ॥

द्रवत्वम् । न । द्रवतायाम् । आद्यस्यन्दनासमवायिकारणे । तत्तु पृथिवीजलतेजोवृत्ति । तद्द्विविधम् । सांसिद्धिकनैमित्तिकभेदात् । तत्र सांसिद्धिकं जले । नैमित्तिकं पृथिवीतेजसोः । पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम् तेजसि सुवर्णादौ च ॥ तदुक्तम् । सांसिद्धिकं द्रवत्वं स्यान् नैमित्तिकमुदाहृतम् । सांसिद्धिकन्तु सलिले द्वितीयं क्षितितेजसोः ॥ परमाणौ जले नित्यमन्यतोऽनित्यमुच्यते । नैमित्तिकं वह्नियोगात् तपनीयघृतादिषु ॥ द्रवत्वं स्यन्दने हेतुर्निमित्तं सङ्ग्रहे तु तत् । इति भाषापरिच्छेदः ॥

द्रवन्ती । स्त्री । शिखण्डीवृक्षे ॥

द्रवमूलम् । न । दुग्धदध्याज्यतक्रासवजलचोद्रतैलमूत्रादिद्रवद्रव्येषु ॥

द्रवन्ती । स्त्री । नद्याम् ॥ मूषिकपर्ण्याम् । शतमूलिकायाम् ॥ द्रवति । द्रु० । लटः शतृ । उगितश्चेति ङीप् ॥ शिखरिणी प्रभेदे ॥ यथा । शुभ्रशर्करया युक्तं निर्नीरं द्विगुणं दधि । आशामुद्धूलनं देय मेतन्मानं बुधैः स्मृतम् ॥ हद्यम्बुरहितं पात्रे खण्डदुग्धेन गालितम् । कर्पूरमरिचोन्मिश्रं द्रवन्ती परिकीर्तिता ॥ द्रवन्ती मधुरा वृष्या बल्या पुष्टिकरी हिमा । वातपित्तहरा पथ्यं किञ्चित्कफकरा हिता ॥

द्रवमूर्त्तिः । त्रि । द्रवद्रव्यकाठिन्ये ॥

द्रवस्य मूर्त्तिः ॥

द्रवरसा । स्त्री । लाक्षायाम् ॥

द्रवाधारः । पुं । चुलुके ॥ द्रवद्रव्यरक्षापात्रे ॥

द्रविडः । पुं । देशविशेषे ॥ जल्लाख्यसङ्करजातौ ॥ द्रविडदेशोद्भवे आदौ क्षत्रिये पश्चाद्विहितक्रियालोपादि नाशूद्रत्वमापन्ने दस्युपदवाच्ये ॥

द्रविडी । स्त्री । रागिणीविशेषे ॥

द्रविणम् । न । वित्ते ॥ काञ्चने ॥ पराक्रमे । बले ॥

द्रविणनाशनः । पुं । शोभाञ्जने ॥

द्रविणोदाः । पुं । अग्नौ ॥ यथोक्तम् । द्रविणं बलमित्युक्तं धनञ्चद्रविणं ततः । ददातितद्भवानेव द्रविणोदास्ततो भवेति वराहपुराणम् ॥ सान्तः ॥

द्रवीकरणम् । न । अद्रवस्य द्रवकरणे । गलावना इतिभाषा ॥

द्रव्यम् । न । पित्तले ॥ वित्ते ॥ विलेपने ॥ भेषजे ॥ भव्ये ॥ जतुनि ॥ विनये ॥ मद्ये ॥ लिङ्गसङ्ख्यान्विते ॥ गुणानामाश्रये ॥ द्रव्याण्यभिनवान्येव प्रशस्तानि क्रियाविधौ । ऋतेघृतगुडक्षौद्रधान्यकृष्णाविडङ्गत इति वैद्यकपरिभाषा ॥ समवायिकारणं द्रव्यमितितार्किकैर्लक्ष्यते । पृथिव्या-

दौ ॥ तानिच पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसिनवैव ॥ * ॥ रसो गुणा स्तथावीर्यं विपाकः शक्तिरेवच पञ्चानांयः समाहारस्तद्द्रव्यमितिकीर्त्त्यते ॥ इतिभिषग्वराः । पुनः पञ्चविधम् । अत्यन्तकठिनकठिनाईवुल्वुलद्रवद्रव्यभेदात् ॥ * ॥ द्रव्याणां गुणवत्तावधिः । गुणहीनं भवेद्वर्षादूर्ध्वं तद्रूपमौषधम् । मासद्वयात् तथाचूर्णं लभते हीनवीर्यताम् ॥ हीनत्वं गुटिका लेहो लभते वत्सरात् परम् । हीनाः स्युर्घृततैलाद्याश्चतुर्मासाधिका स्तथा ॥ घृततैलाद्यादतियोग विशेषणम् । चतुर्मासाधिकाः संवत्सरादुपरि चत्वारोमासा अधिका येषुते ॥ घृतमब्दात् परं पक्कं हीनवीर्यत्व माप्नुयात् । तैलं पक्क मपक्कं वा चिरस्थायिगुणाधिकम् ॥ तदपिषोडशमासाभ्यन्तरे पक्कतैलं गुणाधिकं वोद्धव्यम् । औषध्यो लघुपाकाः स्युर्निर्वीर्या वत्सरात् परम् । औषध्यो धान्यादयः । लघुपाकाः शीघ्रपाकाः । निर्वीर्याः स्यु गुंणैर्युक्ता आसवा धातवो रसाः ॥ त्रि । द्रोर्विकारे ॥ द्रोरिदम् । द्रोर्विकारोवा । द्रव्य ञ्चभव्य इतिसाधु ॥ द्रुरिववा । द्रोर्विकारे द्रो

ध्वेति यथा ॥

द्रव्यकः । त्रि । द्रव्यं हरति वहति आव हति वा । वस्नद्रव्याभ्यांठन् कनावित्यार्हीय: कन् ॥

द्रव्यकल्कः । पुं । वैद्यशास्त्रप्रसिद्धेषु कल्कादिपञ्चसु ॥ द्रव्यकल्कः पञ्चधा स्यात् कल्कं चूर्णं रस स्तथा । तैल मर्कः क्रमाज्ज्ञेयं यथोत्तरमुखं प्रिये॥

द्रव्यनिश्चयः । पुं । द्रव्याणां मेषाद्यधिपतिज्ञानेन शुभाशुभनिश्चये ॥ तत्राद् वे ।।गमप्रदर्शनार्थमाह । ये येषां द्रव्याणा मधिपतयो राशयः समुद्दिष्टाः । मुनिभिः शुभाशुभार्थं नानागमतः प्रवक्ष्यामि ॥ १ ॥ वस्त्राविककुतपानां मसूरगोधूमरालक यवानाम् । स्थलसम्भवौषधीनां कनकस्य च कीर्त्तितो मेषः ॥ २ ॥ गविवस्त्रकुसुमगोधूमशालियवमहिषसुरभितनयाः स्युः । मिथुनेपिधान्यशारदवल्लीशालूककार्पासाः ॥ ३ ॥ कर्किणि कोद्रवकदलीदूर्वाफलकन्दपत्रचोचानि । सिंहे तुषधान्यरसाः सिंहादीनांत्वचः सगुडाः ॥ ४ ॥ षष्ठे ऽतसीकलायाः कुलत्थगोधूममुद्गनिष्पावाः सप्तमराशौ माषा यवगोधूमाः ससर्षपास्चैव ॥ ५ ॥ अष्टमराशाविक्षुःसैक्यं लोहान्यजाविकञ्चापि । नवमेतु तुरगलवणाम्बराशुतिलधान्यमूलानि ॥ ६ ॥ मकरे तरुगुल्माद्यं सैक्ये क्षुसुवर्णकृष्णलोहानि । कुम्भे सलिलजफलकुसुमरत्नचित्राणि रूपाणि ॥ ७ ॥ मीने कपालसम्भवरत्नान्यम्बुद्भवानि वज्राणि । स्नेहाश्च नैकरूपा व्याख्याता मत्स्यजातञ्च ॥ ८ ॥ एतेषां द्रव्याणां शुभाशुभज्ञानार्थमाह । राशेस्तु दशमार्थायसहितनवपञ्चमस्थितो ४ । १० । २ । ११ । ७ । ९ । ५ । जीवः । शुक्रात् शतश पञ्चाष्टमेषु २ । ११ । १० । ५ । ८ । शशिजश्च वृद्धिकरः ॥ ९ ॥ षट्सप्तमगो ६ । ७ । हानिं वृद्धिं शुक्रःकरोतिशेषेषु । उपचयसंस्थाः ३ । ६ । ११ । १० । क्रूराःशुभदाःशेषेषु १ । २ । ४ । ५ । ७ । ८ । ९ । १२ । हानिकराः ॥ १० ॥ * ॥ अथ विशेषमाह । राशेर्यस्य क्रूराः पीडास्थानेषु संस्थिता बलिनः १ तस्योक्तद्रव्याणां महार्घता दुर्लभत्वञ्च ॥ ॥ ११ ॥ इष्टस्थाने सौम्याबलिनो येषां भवन्ति राशीनाम् । तद्द्रव्याणां वृद्धिः सामर्थ्यं वल्लभत्वञ्च ॥ १२ ॥ गोचरपीडायामपि राशिर्बलिभिः शुभग्रहै र्दृष्टः । पीडां न करोति तथा क्रूरैरेव विपर्यासः ॥ इति वारा

शाम् ३९ ऽध्यायः॥

द्रव्यमययज्ञः। पुं। ज्ञानविहीनेयज्ञे॥ द्रव्यमयः द्रव्योपलक्षितो ज्ञानशून्यो योयज्ञः ससंसारफलः॥

द्रव्ययज्ञः। त्रि। पूर्त्तदत्ताख्यस्मार्त्तकर्म्मपरे॥ द्रव्यत्यागएव यथाशास्त्रं यज्ञोयस्य॥

द्रष्टव्यः। त्रि। दृश्ये। दर्शनार्हे॥

द्रष्टा। त्रि। विचारकुशले॥ साक्षिचेतने॥ चेतनोहिद्रष्टा भवति नाचेतनः॥ दृष्टेःकर्त्तरि। दृष्टिमति। श्रात्मनि॥ चक्षुर्जन्यमनोवृत्ति श्चिच्छक्त्यारूपभासिका। दृष्टिरित्युच्यते-द्रष्टादृष्टेः कर्त्तेतिलौकिकैः॥ पश्यति। दृशिर्(१)। तृन्॥

द्रष्टृता। स्त्री। शब्दादिविषयप्रकाशतायाम्॥ भावे तल्॥

द्राक्। अ। द्रुते। शीघ्रे। झटित्यर्थे॥ ॥ द्राति। द्राकुत्सायांगतौ। वा०कः॥

द्राक्षा। स्त्री। मृद्वीकायाम्। गोस्तन्याम्। मनक्काद्राख इतिभाषा॥ द्राक्षा माक्षे॥ द्राक्षा पक्वा सरा शीता चक्षुष्या बृंहिणी गुरुः। स्वादुपाकरसा स्वर्या तुवरा सृष्टमूत्रविट्॥ कोष्ठमारुतकृद्वृष्या कफपुष्टिरुचिप्रदा। हन्ति तृष्णाज्वरश्वासवातवातास्रकामलान्॥ कृच्छ्रास्रपित्तसम्मोहदाहशोषमदात्ययान्। आमा साऽल्पगुणा गुर्वी सैवाम्ला रक्तपित्तकृत्॥ वृष्या स्याद् गोस्तनीद्राक्षा गुर्वीच कफपित्तनुत्। अबीजान्यास्वल्पतरा गोस्तनीसदृशी गुणैः॥ द्राक्षा पर्वतजा लघ्वी साम्ला श्लेष्माम्लपित्तकृत। द्राक्षापर्वतजा यादृक् तादृशी करमर्द्दिकेतिभावप्रकाशः॥ द्राक्षायाः फलम्। हरीतक्यादिभ्यश्चेतिविकारावयवप्रत्ययस्यलुप्॥ यद्वा। द्राङ्क्ष्यते। द्राक्षिकाङ्क्षायाम्। कर्मणि घञ्। आगमशासनमनित्यम्॥ यद्वा। गुरोश्चहलइत्यप्रत्ययः। यवादिगणेपाठान्नलोपः। अतएव द्राक्षामान् इत्यमतोर्वत्त्वंन भवति। अयवादिभ्यइत्युक्तेः॥

द्राक्षासवः। पुं। माधव्याम्॥ यथा। पीत्वा द्राक्षासवं मिष्टं शूल मादायसत्वरमिति॥

द्राघिमा। पुं। दीर्घत्वे। दैर्घ्ये॥ दीर्घस्यभावः। पृथ्० इमनिच्। प्रियस्थिरेत्यादिनादीर्घस्यद्राघ्यादेशः॥

द्राघिष्ठः। त्रि। दीर्घतमे। अतिदीर्घे॥ अतिशयेन दीर्घः। इष्ठन्। प्रियस्थिरेतिसाधुः॥

द्राघीयान्। त्रि। दीर्घतरे॥ अयमनयो रतिशयेन दीर्घः। ईयसुन्। प्रि

यत्थिरेति साधुः ॥

द्राणः । त्रि । सुप्ते ॥ पलायिते ॥ द्रातेः कर्त्तरिक्तः ॥

द्रापः । पुं । पङ्के ॥ आकाशे ॥ कपर्दिनि ॥ मूर्खे ॥ इतिशब्दार्थकल्पतरुः ॥

द्रामिलः । पुं । चाणक्यमुनौ ॥ इति हेमचन्द्रः ॥

द्रावः । पुं । गमने ॥ स्रवणे ॥ अनुतापे ॥ द्रवणम् । द्रुगतौ । घञ् ॥

द्रावकः । पुं । ग्रावप्रभेदे । चन्द्रकान्तमणौ ॥ विदग्धे ॥ घोषके ॥ विटे । षिङ्गे ॥ रसभेदे ॥ न । सिक्थके ॥ स्त्री हरोगस्यौषधे ॥ त्रि । हृदयग्राहिणि ॥ द्रवकारके ॥

द्रावककन्दः । पुं । तैलकन्दे ॥

द्रावकरम् । न । श्वेतटङ्कणे ॥

द्रावणम् । न । कतकफले । निर्मली इतिभाषा ॥ विद्रावणे ॥ पुं । कामवाणविशेषे ॥

द्राविका । स्त्री । लालायाम् । लाल इतिभाषा ॥

द्राविडः । पुं । द्रविडदेशजे ॥ संख्यान्तरे ॥ वेधमुख्ये । कर्चूरे ॥ स्वनामाप्रसिद्धे देशे ॥ द्राविडाः पञ्च । तेयथा । कर्णाटाश्चैव तैलङ्गा गुर्जरा राष्ट्रवासिनः । आन्ध्राश्च द्राविडाः पञ्च वि न्ध्यदक्षिणवासिनः इतिस्कन्दपुराणम् ॥ त्रि । तद्देशजाते ॥ द्रविडेजातः । अण् ॥

द्राविडकः । पुं । द्राविडार्थे ॥ वेधमुख्यके । जिआंचपष्ठीइतिगौड भाषा । कचूर इतिभाषा ॥ न । विड्लवणे ॥ स्वार्थेकन् ॥

द्राविडभूतिकः । पुं । वेधमुख्ये । काल्पके । कचूर इतिप्रसिद्धे ॥

द्राविडी । स्त्री । सूक्ष्मैलायाम् ॥ द्रविडेजाता । अण् । ङीप् ॥

द्रावितः । त्रि । द्रवीभूते ॥

द्राव्यः । त्रि । अवश्यङ्गमनीये क्षरणीये अनुतपनीये ॥

द्रिमीतीर्थम् । न । भीमेतीर्थप्रभेदे ॥

द्रुः । पुं । पादपे । वृक्षे ॥ द्रवत्यूर्द्ध्वम् । द्रुगतौ । मित० डुः ॥ वा० कुर्वा ॥ स्त्री । गतौ ॥ शाखायाम् ॥

द्रुकिलिमम् । न । देवदारुवृक्षे ॥ किलति । किलश्वैत्यक्रीडनयोः । बाहुलकात् किमच् । द्रुष्वाकौकिलिमञ्च ॥

द्रुघणः । पुं । मुद्गरे ॥ लौहमुद्गरे । ङ्गधारादीनां मुद्गराकारे लौहमयास्त्रप्रभेदे ॥ द्रुहिणे । ब्रह्मणि ॥ परशवे ॥ भूमिचम्पके ॥ द्रुः संसारद्रुमोवा हन्यते ऽनेन । करणे ऽप्यवि द्रुष्वितिहन्तेः करणे ऽप् घमादेश-

च । पूर्वपदादितिणत्वम् ॥

द्रुणः । पुं । वृश्चिके ॥ भृङ्गे ॥ त्रि । पिशुने ॥ न । चापे ॥ कृपाणे ॥ द्रुणति । द्रुणहिंसागतिकौटिल्येषु । इगुपधेति कः ॥

द्रुणसः । त्रि । दीर्घनासिकायुक्त ॥

द्रुणहः । पुं । खड्गपिधाने ॥ इतिहारावली ॥

द्रुणा । स्त्री । ज्यायाम् ॥ इतिहेमचन्द्रः ॥

द्रुणिः । स्त्री । कूर्म्याम् ॥ जलद्रोण्याम् ॥ द्रुणति । द्रुण० । इगुपधात् किदितीन् ॥

द्रुणी । स्त्री । अम्बुद्रोण्याम् ॥ कच्छप्याम् ॥ कर्णजलौकायाम् ॥ द्रुणेरिन्नात् कृदिकारादक्तिन इति ङीष् ॥ इगुपधेतिके जातेरितिङीष् गौरादित्वाद्वा ॥

द्रुतः । पुं । द्रुमे ॥ न । शीघ्रे । नृत्यविषयकशीघ्रगमने ॥ नृत्यगीतवाद्येषु द्रवन्तिशीघ्रं गच्छन्ति समुदायमतिप्रदर्शनार्थं करादयोऽत्र तत् द्रुतम् । अधिकरणेक्तः ॥ शीघ्रलये ॥ त्रि । शीघ्रे ॥ विलीने । जातद्रवीभावेष्टतसुवर्णादौ ॥ विद्राणे ॥ पलायिते ॥ द्रवतिस्म । द्रु० गत्यर्थेतिकर्त्तरिक्तः ॥ द्रूयतेस्मवा । कर्मणिक्तः ॥ शीघ्रार्थे क्रियाविशेषणत्वात् अस्त्वे वर्त्तमानं क्लीवम् । द्रव्येतुत्रिलिङ्गम् ॥

द्रुतविलम्बितम् । न । जगती छन्दोभेदे ॥ द्रुतविलम्बित माह नभौभरौ । यथा । तरणिजापुलिने नवबल्लवीपरिषदा सह केलिकुतूहलात् । द्रुतविलम्बितचारुविहारिणं हरिं महं हृदयेन सदा वहे ॥ सुन्दरीत्यप्यस्यैवसंज्ञा ॥

द्रुनखः । पुं । कण्टके ॥ शेर्वृक्षस्यनखः ॥

द्रुपदः । पुं । चन्द्रवंशीये नृपविशेषे । शिखण्डिधृष्टद्युम्नद्रौपदीनांजनके । पञ्चालदेशाधिपतौ ॥

द्रुपदपुत्रः । पुं । धृष्टद्युम्ने ॥ शिखण्डिनि ॥

द्रुपदपुत्री । स्त्री । द्रौपद्याम् ॥

द्रुमः । पुं । महीरुहे । वृक्षे ॥ पारिजाते ॥ कुबेरे ॥ द्रुर्वृक्षः सोऽस्यास्ति जनकतया । यद्वा । समुदायेषुत्ताः शब्दा अवयवेष्वपि वर्त्तन्तइतिन्यायात् द्रुःशाखा साऽस्यास्ति । द्युद्रुभ्यांमः ॥

द्रुमनखः । पुं । कण्टके ॥ द्रुमस्यनखइव ॥

द्रुमरः । पुं । कण्टके ॥

द्रुमव्याधिः । पुं । लाक्षायाम् ॥

द्रुमशीर्षम् । न । कुट्टिमप्रभेदे ॥ कपिशीर्षं द्रुमशीर्षं तथा चाखेटशीर्षकम् । इतिकुट्टिमभेदाः स्युः शाब्दिकैःसमुदाहृताः इति शब्दरत्नाव

स्त्री ॥ इत्यागे ॥

द्रुमश्रेष्ठः । पुं । तालवृक्षे ॥

द्रुमामयः । पुं । लाक्षायाम् ॥

द्रुमारिः । पुं । गजे । हस्तिनि ॥

द्रुमाश्रयः । पुं । सरटे ॥ त्रि । वृक्षाश्रितमात्रे ॥

द्रुमिणी । स्त्री । द्रुमाणां समूहे ॥ खलादिभ्यइनिर्वक्तव्यः ॥

द्रुमेश्वरः । पुं । चन्द्रमसि ॥ इतिहरिवंशः ॥ तालतरौ ॥ इतिशब्दार्थकल्पतरुः ॥

द्रुमोत्पलः । पुं । कर्णिकारे । कठचम्पा इतिभाषा ॥ द्रुमे उत्पलं तदाकारं पुष्पमस्य ॥

द्रुवयम् । न । पात्रे । पौतवे । मानार्थे परिमाणे ॥ द्रोर्विकारभूतं प्रस्थादिपरिमाणम् । मानेवयः ॥

द्रुसल्लकः । पुं । पियाले ॥

द्रुहः । पुं । पुत्रे ॥ इति शब्दार्थकल्पतरुः ॥

द्रुहणः । पुं । ब्रह्मणि । सुरज्येष्ठे ॥ इति द्विरूपकोषः ॥

द्रुहिणः । पुं । स्रष्टरि । प्रजापतौ । ब्रह्मणि ॥ कामक्रोधादिभ्योदुष्टेभ्यो वा द्रुह्यति । द्रुहजिघांसायाम् । बहुलमन्यत्रापीति इनन् । बाहुलकाद् गुणाभावः ॥

द्रूणी । स्त्री । दुहितरि ॥ इतिशब्दार्थकल्पतरुः ॥

द्रूः । पुं । हिरण्ये । स्वर्णे ॥ द्रवति । द्रुगतौ । क्विब्वचीति क्विब्दीर्घौ ॥

द्रूघणः । पुं । द्रुघणे ॥ इतिद्विरूपकोशः ॥

द्रूणः । पुं । द्रुणे ॥ इतिशब्दार्थकल्पतरुः ॥

द्रेक्कः । पुं । द्रेक्काणे ॥

द्रेक्काणः । पुं । लग्नत्रिभागे ॥

द्रेक्काणाधिपः । पुं । लग्नत्रिभागाधीशे ॥ स्वपञ्चनवमानां ये राशीनामधिपा ग्रहाः । ते द्रेक्काणाधिपा राशौ द्रेक्काणा स्त्रय एवहि ॥

द्रोणः । पुं । द्रोणाचार्ये । पार्थगुरौ । पुराणप्रसिद्धे धनुर्विद्यासम्प्रदायप्रवर्त्तकाचार्यविशेषे ॥ दग्धकाके ॥ वृश्चिके ॥ पर्वतविशेषे ॥ चतुः शतधनुष्परिमिते जलाशये ॥ मेघनायकविशेषे ॥ यथा । त्रियुते शाकवर्षेतु चतुर्भिःशेषितःक्रमात् । आवर्त्तं विद्धि संवर्त्तं पुष्करं द्रोणमम्बुदम् ॥ आवर्त्तो निर्जलोमेघः संवर्त्तश्चबहूदकः । पुष्करोदुष्करजलो द्रोणःसस्यप्रपूरकः ॥ श्वेतवर्णक्षुद्रपुष्पवृक्षविशेषे । घलघसियाइति हलकसियाइतिचगौडभाषा ॥ पुं । न । आढकपरिमाणे ॥ आढचाप चतुष्ट

ये । आढकचतुष्टये ॥ ३२ सेर इति लौकिकमाने । घटे । कलसे । उन्माने । इति वै० प० ॥ खार्याःषोडशांशे ॥ द्रोणस्तु खार्याः खलु षोडशांशः । इति खौ० ॥ अष्टाढको भवेद्द्रोण इति केचित् ॥ द्विमतंद्रोण इति कुल्लूकभट्टः ॥ द्रुणति । द्रुण० । पचाद्यच् ॥ द्रवति । द्रु० । ह्रदज्जुसिद्रुपन्यनिस्वपिभ्योनिद्दितिनः ॥

द्रोणकाकः । पुं । दण्डकाके । कृष्णकाके ॥ द्रोणाख्यःकाकः ॥

द्रोणक्षीरा । स्त्री । द्रोणदुघायांगवि ॥ द्रोणपरिमितं क्षीरमस्याः ॥

द्रोणगन्धिका । स्त्री । रास्नायाम् ॥

द्रोणघा । स्त्री । द्रोणक्षीरायाम् ॥

द्रोणदुग्धा । स्त्री । } द्रोणक्षीरायाम् ॥
द्रोणदुग्धिका । स्त्री । }

द्रोणदुघा । स्त्री । द्रोणमितदुग्धायां गवि । द्रोणक्षीरायाम् ॥ द्रोणं दोग्धि । दुह० । दुहःकप्घश्चेति कप् घश्चान्तादेशः ॥

द्रोणपर्णी । स्त्री । भूमिकन्दल्याम् ॥

द्रोणपुष्पी । स्त्री । गुम्मा इति ख्याते क्षुपे । कुम्भयोनौ । खर्वपत्रायाम् ॥ द्रोणपुष्पी गुरुः स्वादू रूक्षोष्णा वातपित्तकृत् । सक्षारलवणा स्वादुपाका कट्वीच भेदिनी ॥ कफामकामलाशोथतमकश्वासजन्तुजित् ॥ घलघसिया इति गौडेषु प्रसिद्धेगोमीषकक्षुपे ॥ कफार्शः कामलाक्रिमिशोथनाशित्वमित्यस्याः गुणाः ॥

द्रोणपुष्पीदलम् । न । गुम्माख्यशाके ॥ द्रोणपुष्पीदलं स्वादु रूक्षं गुरुच पित्तकृत् । भेदनंकामलाशोथमेहज्वरहरं कटु ॥

द्रोणमाना । स्त्री । द्रोणदुघायाम् ॥

द्रोणमुखम् । न । चतुःशतग्राममध्ये-मनोहरग्रामे ॥ इतिहारावली ॥

द्रोणा । स्त्री । द्रोणपुष्पिकायाम् ॥

द्रोणाचार्य्यः । पुं । भारद्वाजे । कीर्त्तिभाजि । अश्वत्थाम्नःपितरि । कृपीपतौ । पाण्डवानामस्त्रशिक्षागुरौ ॥ द्रोणश्चासावाचार्यश्च ॥

द्रोणिः । स्त्री । द्रोण्याम् ॥ द्रवति । द्रुगतौ । वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो-नित् इति निः ॥

द्रोणिका । स्त्री । नीलीवृक्षे ॥

द्रोणी । स्त्री । देशविशेषे ॥ शैलानामन्तरे द्रोण्यः सिद्धचारणसेविताः ॥ काष्ठाम्बुवाहिन्याम् । काष्ठादिकृतच्छिन्नाग्रनौकाकृत्यम्बुसेचन्याम् ॥ गवादन्याम् ॥ नौकाप्रभेदे ॥ शैलविशेषे ॥ नीलीवृक्षे ॥ नदीविशेषे ॥ शैलयोः सन्धौ ॥ इन्द्रचिर्भिन्याम्-

॥ द्रोणीलवणे ॥ विहृत्पेपरिमाणे । गोण्याम् । १२८ सेर इति भाषा । इति वै प० ॥ काष्ठरचितेस्नानपात्रे ॥ यथा । ह्रीवेरपद्मकोशीरचन्दनाम्बुजवारिणा । सम्पूर्णामवगाहेतद्रोणीं दाहार्दितोनरःइति ॥ निप्रच्यान्ताद्दवतेः ब्रूहिकारादितिङीष् । गौरादित्वाद्वा ॥

द्रोणीदलः । पुं । केतकीपुष्पे ॥

द्रोणीमुखम् । न । द्रोणमुखे ॥ इतिभूरिप्रयोगः ॥

द्रोणीलवणम् । न । उपकर्णाटदेशप्रसिद्धे लवणविशेषे । त्रिकूटलवणे । वार्द्धिभवे ॥

द्रोमिणः । पुं । चाणक्योमुनौ । अंगुले ॥

द्रोहः । पुं । जिघांसायाम् । अनिष्टचिन्तने । अपक्रियायाम् ॥ देवद्रोहाद्गुरोर्द्रोहः कोटिकोटिगुणाधिकः इति कूर्मपुराणम् ॥ परजिघांसया शस्त्रग्रहणादौ ॥ छद्मवधे ॥ हिंसातु द्रोहजन्या परेतुहिंसामेवद्रोहंमन्यन्ते ॥

द्रोहचिन्तनम् । न । परानिष्टविभावने । व्यापादे ॥ द्रोहस्यचिन्तनम् । ल्युट् चेति भावेल्युट् ॥

द्राहाटः । पुं । गाथाप्रभेदे ॥ मृगलुब्धके ॥ वैडालव्रतिके ॥ इतिमेदिनी ॥

द्रोही । त्रि । द्रोहके । परानिष्टचिन्तके ॥

द्रौणायनः । पुं । अश्वत्थाम्नि ॥ द्रोणस्यापत्यम् । फक् । द्रोणपर्वतेतिसूत्रे अनादिरित्युद्रोणाइत्युक्ते भारतप्रसिद्धे ऽनन्तरापत्ये ऽश्वत्थाम्नि द्रौणायन इति प्रयोगस्तूपचाराद्बोध्यः ॥

द्रौणिः । पुं । अश्वत्थाम्नि ॥ द्रोणस्यापत्यम् । अतइञ् ॥ एकोनविंशतस्समाप्ते द्रौणिर्व्यासो भविष्यति ॥

द्रौणिकः । पुं । कटाहे ॥ द्रोणं स्वस्मिन् समावेशयतीत्यर्थात् ॥ त्रि । द्रोणवापक्षेत्रे । द्रोणपरिमित व्रीह्यादिवापयोग्यक्षेत्रे ॥ द्रोणस्यवापः । तस्य वापइतिठञ् ॥ त्रि । द्रोणम् पचति । सम्भवत्यवहरति पचति इतिठञ् ॥ द्रोणेनक्रीते ॥ निष्कादित्वाट्ठक् ॥

द्रौपदी । स्त्री । कृष्णायाम् । निष्पचैत्रनायाम् । पाञ्चाल्याम् । याज्ञसेन्याम् । पाण्डवानां स्त्रियाम् ॥ अस्याः पञ्चस्वामित्वे हेतुर्ब्रह्मवैवर्त्तेयथा । राजा ददौ फाल्गुनाय कन्यायास्स्वयं वरे । पप्रच्छ मातरं वीरो वस्तु प्राप्तंमयाधुना ॥ तमुवाच स्वयं माता गृहाण भ्रातृभिः सह । शश्वोर्वैरेणपूर्वञ्च परवक्षात् दाक्षया ॥ द्रौपद्याः स्वामिनस्तेन हेतुना पञ्चपा-

द्भवा इति ॥ द्रुपदस्यापत्यं स्त्री । अ
ण् । ङीप् ॥

द्रौपदेयः । पुं । प्रतिविन्ध्यादिपञ्चसु
द्रौपदीतनयेषु ॥ द्रौपद्याः अपत्यम्
पुमान् । स्त्री भ्योढक् ॥

द्वन्द्वः । पुं । रोगविशेषे ॥ उभयपदार्थ
प्रधाने समासे । अव्ययीभावतत्पु
रुषबहुव्रीहिसमासभेदानामुभयप-
दार्थसाम्याभावेनापकृष्टत्वात् द्वन्द्व
समासो भगवद्विभूतिः ॥ सद्विधा । इ
तरेतरयोगसमाहारभेदात् ॥ पर
स्परविरुद्धे सम्मानावमानादौ । शी
तोष्णादौ ॥ यथा क्षुत्पिपासे शोक
मोहौ रागद्वेषौ तथैवच । कामक्रो
धप्रभृतयो द्वन्द्वशब्देनवर्णिताइति ॥
न । रहस्ये ॥ कलहे । आहवे ॥ मि
थुने । युग्मे ॥ द्वौद्वौ सहाभिव्यक्तौ
इति द्वन्द्वम् । द्वन्द्वंरहस्यमर्यादाव
चनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्य
क्तिष्विति द्विशब्दस्य द्विर्वचनं पूर्वप
दस्याम् भावो ऽत्वञ्चोत्तरपदस्य न
पुंसकत्वञ्च निपात्यते एष्वर्थेषु । चा
र्थेद्वन्द्वइतिनिर्देशात् पुंस्यपि ॥ दुर्गे ॥
यथा । राज्ञोवलंनहिवलं द्वन्द्वमेव-
वलंवलम् । अप्यल्पवलवान् राजा-
स्थिरो द्वन्द्ववलाद्भवेदिति ॥

द्वन्द्वगदः । पुं । रागद्वेषादिरूपेद्वन्द्वरोगे
॥ यथा । अहं हरिः सर्वमिदं जनार्द
नोनान्यंततः कारणकार्यजातम् ।
ईदृङ्मनोयस्य न तस्य भूयोभवोद्भवा
द्वन्द्वगदाभवन्तीतिविष्णुपुराणम् ॥

द्वन्द्वचरः । पुं । } चक्रवाके ॥ द्वन्द्वंच
द्वन्द्वचारी । पुं । } रति । चर० । प-
चाद्यच् । ताच्छील्येणिनिः ॥

द्वन्द्वजः । पुं । द्विदोषजरोगे ॥ अस्यपू
र्वरूपम् । रूपै रन्यतराभ्यान्तुसंसृ-
ष्टं द्वन्द्वजं विदुरिति । अन्यतराभ्यां
जृम्भानेत्रदाहाभ्यां जृम्भानारुचिभ्यां
नेत्रदाहानारुचिभ्यांवा संसृष्टैरूपैः
श्रमादिभि द्वन्द्वजं पूर्वरूपंविदुर्जा-
नीयुः ॥

द्वन्द्वयुक्तिः । पुं । दुर्गविचारग्रन्थे ॥ स
यथा । राज्ञो वलं नहि वलं द्वन्द्व
मेव वलं वलम् । अप्यल्पवलवान्
राजास्थिरो द्वन्द्ववलाद् भवेत् ॥ त-
थाच । एकः शतं योधयति प्राकार
स्थो धनुर्द्धरः । शतं दशसहस्राणि
तस्माद् दुर्गं विशिष्यते ॥ अकृत्रिमं
कृत्रिमञ्च तत् पुन द्विविधं भवेत् ।
यद् दैवसञ्चितं द्वन्द्वं गिरिनद्यादिसं
श्रितम् ॥ अकृत्रिम मिदं ज्ञेयं दुर्लं
ङ्घ्य मरिभूभुजाम् । प्राकारपरि
खाराद्यसंश्रयं यद् भवेदिह । कृ-
त्रिमं नाम विज्ञेयं लङ्घ्यालङ्घ्य

न्तु वैरिणाम् ॥ तथाकृत्रिमद्वन्द्वयुक्ति
र्यथा । अत्युच्चविस्तीर्णशिरा दुरारो
हः सकाननः । सजलाशयसम्भार
भोज्यद्रव्यसमाश्रयः ॥ सुखनिःसरणो
द्वन्द्वः पर्वताख्यो महीभुजाम् । न
द्यो गभीरविस्तीर्णा स्चतुर्दिक्षु व्यव
स्थिताः ॥ तन्मध्ये भूप्रदेशो यो नदी
द्वन्द्वः स उच्यते । यदन्यच्च चिरका
लीनं दुर्लङ्घ्यविपिनादिकम् ॥ त
न्मध्यरचिता भूमि र्द्वन्द्वत्त्वेनो प-
तिष्ठते । वनद्वन्द्वमितिख्यातं यथा
पूर्वं महत्तरम् ॥ * ॥ कृत्रिमद्वन्द्वयु
क्तिर्यथा । यस्मिन् राज्ये गिरिर्ना
स्ति नद्यो वा गहनोदकाः । तस्यम
ध्ये महीपालः कृत्रिमं द्वन्द्व मारभे
त् ॥ गजैरलङ्घ्या विस्तीर्णा गम्भी
राःपूर्णवारयः । द्वन्द्वत्त्वेन समादिष्टाः
परिखा बहुयादसः ॥ विशालशालं
सुघनं बहुकण्टकिसङ्कटम् । द्वन्द्व
त्त्वेन समादिष्टं विस्तीर्णं विषमं व-
लम् ॥ अधोधो बध्यमानोपि क-
न्दरोल्पजलस्त्वम् । द्वन्द्वत्त्वेन समु-
द्दिष्टः स दुर्लङ्घ्यो हि भूभुजाम् ॥
सर्वतः परिखां कृत्वा निरन्ध्रोपरि
कन्दरम् । तज्जलप्लुतदेशत्वात् ज
लद्वन्द्वं तदुच्यते ॥ एषा मभावे नि
म्नस्य भूप्रदेशस्य दन्धनात् । वर्षासु

प्रवते वारि जलद्वन्द्वं ततो भवेत् ॥
एतयोरपि संमिश्रात् संमिश्रं द्वन्द्व
माचरेत् । आश्रित्य कृत्रिमं द्वन्द्वं
बलवद्वैरिणो द्विषि ॥ अन्यच्च कृत्रिमं
द्वन्द्वं कृत्वा नरपति र्वसेत् । रथपति
र्यदा वैरी स्थलद्वन्द्वं तदाचरेत् ॥ ग
जाश्वनाथस्ते वैरी जलद्वन्द्वं तदा
चरेत् । गिरिद्वन्द्वं नृपः सेवेत् यस्य
स्याद् विविधो रिपुः ॥ सर्वो हि त्रिवि
धो युद्धः समासा दुपदिश्यते । प्र-
तिराजस्य राज्यान्ते प्रकटे गुप्तएव
च ॥ राज्यान्ते सैनिकान् रक्षेत् प्र-
कटे निवसेत् स्वयम् । गुप्ते स्त्रीको
षसम्भारं संरक्षे दिति निश्चयः ॥
* ॥ अथसामान्यतो गुणाः । तथा
हिनीतिशास्त्रम् । सप्रवेशापसरणं
द्वन्द्व मुत्तम मुच्यते । अन्यच्च वन्दि-
शालेव न तादृग् वद्ध माश्रयेत् ॥
धनुर्द्वन्द्वं महीद्वन्द्वं गिरिद्वन्द्वं तथै
वच । मनुष्यद्वन्द्वसंसर्गं वनद्वन्द्वञ्च
तानि षट् ॥ * ॥ अन्येतु । न द्वन्द्वं
द्वन्द्व मित्याहुर्यो दुर्द्वन्द्वं प्रकीर्त्ति
तम् । योद्धृशून्यं हि यद् द्वन्द्वं मृतका
यसमं हि तत् ॥ * ॥ अथान्यचापि
। यावत् प्रमाणं नगरं हि राज्ञां ततो
भवे दुत्तममध्यमाभ्याम् । चिंशत्त
दृष्टगुणोत्तरेण चिदेशजानां धरि

णीपतीनाम् ॥ गर्गस्तु । यद्‌न्यदृद्वि विधं द्वन्द्वं प्रोच्यते धरणीभुजाम् । ताभ्या मेवातिरिच्येत मन्त्रद्वन्द्वं वि-शेषतः ॥ अन्येषु दैवाद् भिन्नेषुम-न्त्रद्वन्द्वाज् जयेन् नृपः । मन्त्रद्वन्द्वे हि भिन्ने हि नचान्यत् कार्यकारक म् ॥ भोजस्तु । यदैव वैरिदुर्लङ्घ्यं विस्तीर्णं विषमञ्च तत् । सप्रवेशा पसरणं तद् द्वन्द्वमुत्तमं विदुरिति ॥

द्वन्द्वातीतः । चि । द्वन्द्वैरक्षुभितचित्ते ॥ द्वन्द्वानि क्षुत्पिपासाशीतोष्णवर्षादी नि अतीतो ऽतिक्रान्तः । समाधिद शायां तेषामस्फुरणात् व्युत्थानद शायां स्फुरणेपि परमानन्दाद्वितीया कर्त्रभोक्त्रात्मप्रत्ययेन बाधात् तैर्द्व न्द्वै रुपहन्यमानोप्यक्षुभितचित्तउ-च्यते ॥

द्वन्द्वाभयः । पुं । अग्निभयादिजातगृ हप्रवेशे ॥ अग्निकृतदाहेन नद्या दिजलप्लावनेन अनवरतवृष्टिपातेन् वा क्रुद्धेन राज्ञा पातितत्वेनवा येगृ हनाश स्तद्गृहं यदापुनः सम्पाद्य-तस्मिन् यः प्रवेशः सद्वन्द्वाभय इत्यु च्यते । अन्वर्थसंज्ञेयम् । शीतोष्ण रूपद्वन्द्वात् पुनरुत्थापनेन यदभयं तत् द्वन्द्वाभयं विद्यतेयस्मिन्निति म त्वर्थीयः प्रत्ययः ॥

द्वयम् । न । द्वितये । युग्मे ॥ द्वाववयवा यस्य । सङ्ख्याया अवयवेतयप् । द्वि त्रिभ्यांतयस्यायज्वा ॥

द्वयाग्निः । पुं । पाठिद्रुमे । चित्रके । ची ता इतिभाषा ॥

द्वयातिगः । त्रि । रजस्तमोविहीने । वि रजस्तमसि । सत्त्वगुणयुक्ते ॥ द्वयम तिगच्छति । गम्लृ० । अन्ये० डः ॥

द्वाःस्थः । पुं । प्रतीहारे ॥ नन्दीश्वरे ॥ द्वारितिष्ठति । ष्ठा० । सुपीतिकः ॥

द्वाःस्थितः । त्रि । दर्शके । द्वारपाले ॥ द्वारितिष्ठतिस्म । ष्ठा० । गत्यर्थाक र्मकेति क्तः ॥

द्वाःस्थितदर्शकः । पुं ।
द्वाःस्थितदर्शी । पुं । } द्वारपाले । प्रतीहारे ॥

द्वाचत्वारिंशत् । स्त्री । द्विचत्वारिंशति । बेयालीस इतिभाषा ॥

द्वात्रिंशत् । स्त्री । सङ्ख्याविशेषे । बत्ती स इतिभाषा ॥ तत्सङ्ख्येये ॥ द्वौ चत्रिंशच्च । द्व्यधिकाः त्रिंशद्वा । द्व्यष्ट नः सङ्ख्यायामित्यात्वम् ॥

द्वात्रिंशद्‌चरी । स्त्री । ग्रन्थे ॥ इतित्रि काण्डशेषः ॥ विद्याविशेषे ॥

द्वात्रिंशल्लक्षणोपेतः । पुं । महापुरुषे ॥ तल्लक्षणानियथा । रागः सप्तसु हन्त षट्स्वपिशिशोरङ्गेष्वलंतुङ्गता वि-स्तारस्त्रिषु खर्वता त्रिषु तथागम्भीर

ताचत्रिषु। दैर्घ्यं पञ्चसु किञ्चपञ्चसु सखे सम्प्रोच्यते सूच्मता द्वात्रिंशद्दर लक्षणः कथमसौगोपेषुसम्भाव्यते इतिश्रीहरिभक्तिरसामृतसिन्धुः ॥ सप्तसु नेत्रान्तपादकरतलतालधरो ष्ठजिह्वानखेषु। षट्सु वक्षःस्कन्धन खनासिकाकटिमुखेषु। त्रिषुकटिल लाटवक्षस्सु। केचित्कटिस्थानेशि रः पठन्ति। त्रिषु ग्रीवाजङ्घामेहने षु। पुनस्त्रिषु नाभिस्वरसत्त्वेषु। प ञ्चसु नासाभुजनेत्रहनुजानुषु। पुनः पञ्चसु त्वक्केशरोमदन्ताङ्गुलिपर्वसु॥ द्वात्रिंशद्राशि तत्तल्लक्षणेभ्योऽन्येभ्यो पिश्रेष्ठानि लक्षणानि यस्यसः गोपे षु कथमिति भगवदवताराद्विष्वप्ये- तादृशत्वाश्रवणादितिभावः। इति श्रीमद्व्रजेश्वरं प्रतिकस्यचित्सवयसो गोपस्याश्चर्यसूचकंवचनम्॥

द्वादशः। त्रि। द्वादशानां पूरणे॥ तस्य पूरणेडट्॥

द्वादश। त्रि। सङ्ख्याप्रभेदे॥ सङ्ख्ये ये॥ द्वौचदशच। द्व्यधिकादशेतिवा। द्व्यष्टनइत्यात्वम्॥

द्वादशकरः। पुं। षडानने। कार्त्तिके ये॥ बृहस्पतौ॥ द्वादशकरा अस्य॥

द्वादशपत्रकम्। न। वामनपुराणोक्ते देवस्य योगविशेषे॥

द्वादशलोचनः। पुं। कार्त्तिकेये॥ द्वा दशलोचनान्यस्य॥

द्वादशांशः। पुं। स्यमद्वादशांशे॥ मेषा दीनान्तुराशीनां स्वरांशे द्वादशांश काः। यथा। मेषे प्रथमद्वादशांशे- कांशोमेषस्य। द्वितीयोवृषस्य। तृती योमिथुनस्य। तथा कर्कसिंहकन्या तुलावृश्चिकधनुर्मकरकुम्भमीनानां क्रमादेकैकांशाज्ञेयाः॥ वृषादिष्वप्ये वं स्वराशिमारभ्यद्वादशांशाज्ञेयाः॥

द्वादशांशाधिपः। पुं। राशीना मधिपा येच द्वादशांशाधिपास्तुते॥ ये मेषा दीना मधिपा स्तएव द्वादशांशाधिपा ज्ञेयाः॥

द्वादशांशुः। पुं। बृहस्पतौ॥

द्वादशाक्षः। पुं। स्कन्दे॥ बुद्धमुनौ॥ इ ति हेमचन्द्रः॥

द्वादशात्मः। पुं। वुद्धे॥ इतित्रिकाण्ड शेषः॥

द्वादशाङ्गः। पुं। धूपविशेषे॥यथा। गु ग्गुलुश्चन्दनं पत्रं कुष्ठञ्चागुरुकुङ्कु मम्। जातीकोषञ्चकर्पूरं जटामां सीच वालकम्॥ त्वगुशीरञ्चधूपो ऽसौद्वादशाङ्गः प्रकीर्त्तितइति॥

द्वादशाङ्गुलः। पुं। वितस्तौ॥ द्वादश- अङ्गुलयः प्रमाणमस्य। तद्धितार्थेद्वि गुः। द्विगोर्नित्यमिति मात्रचोलु

क् । तत्पुरुषस्याङ्गुलेरित्यच् ॥
द्वादशात्मा । पुं । दिवाकरे ॥ द्वादशआत्मानो मूर्त्तयो यस्य ॥ अर्कवृक्षे ॥
द्वादशायुः । पुं । कुक्कुरे ॥
द्वादशार्च्चिः । पुं । बृहस्पतौ ॥
द्वादशी । स्त्री । तिथिविशेषे ॥ सा चन्द्रस्य द्वादशकलाक्रियारूपा । साच विष्णोस्तिथिः ॥ मार्गशीर्षशुक्लद्वादशी मत्स्यद्वादशी । पौषी कूर्म द्वादशी । माघी वराहद्वा० । फाल्गुनी नृसिंहद्वा० । चैत्री वामन द्वा० । वैशाखी जामदग्न्यद्वा० । ज्यैष्ठी राम द्वा० । आषाढी कृष्णद्वा० । श्रावणी बुद्धद्वादशी । भाद्री कल्किद्वा० । आश्विनी पद्मनाभद्वा० । कार्त्तिकीनारायणद्वादशी ॥ एतासांनाम धरणीव्रतम् ॥ इतिवराह पुराणम् ॥ द्वादशीजातस्य फलम् । वहुप्रजः सर्वजनानुरागी भूपालमान्य स्त्वतिथिप्रियः स्यात् । चेद्द्वादशी यस्य जनस्य सूतौ प्रवासहीनो व्यवहारदक्षः ॥
द्वापरः । पुं । संशये । सन्देहे ॥ त्रेतायुगानन्तरयुगे ॥ भाद्रकृष्णत्रयोदश्यांगुरुवारे ऽस्योत्पत्तिः ॥ अस्यपरिमाणं यथा । अष्टौ शतसहस्राणि वर्षाणां द्वापरं युगमिति ॥ तद्धर्मा मत्स्यपुराणादौ द्रष्टव्याः ॥ ततोपि द्वा

परे प्राप्ते मृत्युक्तसुकृतोज्झिते । धर्माद्दिलोपे मनुजे आधिव्याधिसमाकुले ॥ संहितायुपदेशेन त्वयैवोद्धारिता नराइति श्रीमहानिर्वाणतन्त्रे प्रथमोल्लासः ॥ तत्तारकब्रह्मनाम । हरे मुरारे मधुकैटभारे गोपालगोविन्द मुकुन्द सौरे । यज्ञेश नारायण कृष्ण विष्णो निराश्रयं मां जगदीशरक्षेति ॥ द्वौपरौ प्रकारौ यस्याच वा । सर्व नाम सङ्ख्ययोरितिद्विशब्द स्य पूर्वनिपातः । पृ० आत्वम् ॥ द्वाभ्यां परोवा ॥ द्वापराये ॥
द्वापरायः । पुं । द्यूतक्रीडासाधनीभूतास्य यत्रभागे द्वावङ्कौ भवतस्तस्मिन्भागे ॥ द्वापरनामकोऽयः ॥
द्वामुष्यायणः । पुं । औद्दालकौ । गौतमे ॥
द्वाः । स्त्री । निर्गमने । प्रतीहारे ॥ उपाये ॥ यथा ज्ञानद्वारा भवेन्मुक्तिरिति ॥ द्वारयति । वृवरणे । णिजन्तः । विच् ॥ यद्वा । द्वार्यते । सं. क्विप् ॥
द्वारम् । न । अभ्युपाये ॥ निर्गमने ॥ यथा । गृहिणां शुभदं द्वारं प्राकारस्य गृहस्यच । न मध्यदेशे कर्त्तव्यं किञ्चिन्न्यूनाधिके शुभम् ॥ मुखे ॥ वाह्येन्द्रिये रुपनीतं विषयं समसौ हङ्कारा वुद्धिर्यस्मात् तद्विषयमवगा

स्त्ते ऽध्यवस्यति तस्माद् वाह्यानी न्द्रियाणि द्वाराणि भवन्ति। द्वारय ति। दृ। अच्। द्वार्यतेवा॥

द्वारकः। पुं। द्वारकापुर्याम्॥ इतिश ब्दरत्नावली॥ रवेःपार्श्वगान्तरे॥

द्वारकण्टकः। पुं। कपाटे॥

द्वारका। स्त्री। द्वारवत्याम्। अब्धि नगर्याम्॥ सर्वतीर्थपराश्रेष्ठा द्वार का बहुपुण्यदा। यस्याः प्रवेशमात्रे ण नराणां जन्मखण्डनम्॥ दानञ्च द्वारकायाञ्च श्राद्धञ्चदेवपूजनम्। चतुर्गुणञ्चतीर्थानां गङ्गादीनाञ्चभू मिपेति ब्र० वै० पु०॥

द्वारकेशः। पुं। श्रीकृष्णे॥ द्वारकाया ईशः॥

द्वारताली। स्त्री। द्वारयन्त्रे॥

द्वारदातुः। पुं। वरदातौ। भूमीसहवृ चे॥ इति भावप्रकाशः॥

द्वारदुर्गक्रिया। स्त्री। कीलखननजलौ घवनादिभिर्दुर्गमत्वकरणे॥

द्वारपः। त्रि। प्रतीहारे। द्वास्थे॥ द्वारंपा ति। पा०। आत इति कः॥

द्वारपालः। पुं। द्वाररक्षके। प्रतीहारे॥ द्वारं पालयति। पालरक्षणे। कर्म ण्यण्॥

द्वारपालकः। पुं। दौवारिके। द्वारपे॥ स्वार्थे कन्॥

द्वारपिण्डी। स्त्री। देहल्याम्॥

द्वारयन्त्रम्। न। द्वारताल्याम्। ताल के। ताला इति भाषा॥ द्वारस्य द्वा रेवा यन्त्रम्॥

द्वारवती। स्त्री। अब्धिपुर्याम्। द्वारका याम्॥ सान्तःकरणायां बुद्धौ॥ नके वलं वाह्यानीन्द्रियाण्यपेक्ष्य प्रधानं बुद्धिः अपितु ये अपि अहङ्कारमन सी द्वारे ते अप्यपेक्ष्य बुद्धिः प्रधा नम्॥

द्वारवलिभुक। पुं। वके॥

द्वारस्थः। पुं। वेत्रिणि। दौवारिके॥ द्वारेतिष्ठति। ष्ठा०। कः॥

द्वारावती। स्त्री। वनमालिन्याम्। द्वारि कायाम्॥ अयोध्या मथुरा माया काशी काञ्ची अवन्तिका। पुरीद्वा रावतीचैव सप्तैतामोक्षदायिकाः॥ एतास्तुपृथिवीमध्ये न गण्यन्ते क दाचन। पुरीद्वारावती विष्णोः पा ञ्चजन्योपरिस्थिता॥ मुक्तिदा एताः सर्वाश्च एकत्र गणिताः सुरैः। यानि यानिच क्षेत्राणि काशीप्राप्तिकरा णि षडिति भूतशुद्धितन्त्रम्॥

द्वारि। न। प्रधाने। प्रकृतौ॥ सान्तः करणा बुद्धिः सर्वं विषय मवगाहते यस्मात्। तस्मात् त्रिविधं करणं द्वा रि द्वाराणिशेषा णीति साङ्ख्याः॥

द्वारिका। स्त्री। द्वारावत्याम्॥ इ०श्रब्०॥

द्वारी । त्रि। द्वारपाले॥ द्वारमस्त्यस्य । इनिः॥

द्वाविंशतिः। स्त्री। द्व्यधिकविंशतौ॥

द्वासप्ततिः। स्त्री। द्विसप्ततौ॥ द्व्यधिकासप्ततिः॥

द्वास्थः। त्रि। प्रतीहारे॥ द्वारितिष्ठति। ष्ठा०। सुपीतिकः। खर्परेशरि वा विसर्गलोपोवक्तव्यः॥

द्वास्थितः। त्रि। द्वारपाले॥ द्वारितिष्ठति। ष्ठा०। गत्यर्थाकर्मकेति क्तः। पाक्षिको विसर्गलोपः॥

द्वास्थितदर्शकः। त्रि। दौवारिके॥

द्वि। त्रि। दो इति भाषाप्रसिद्धायां सङ्ख्यायाम्॥ सङ्ख्येये॥ यथा। द्वौविप्रौ॥

द्विकः। पुं। काके॥ कोके॥ द्वौ कौ वर्णविशेषौ यस्यनाम्नीत्यर्थः॥ द्वितीयके॥ द्वितीयेनरूपेण ग्रहणं ग्रन्थस्य। तावतिथं ग्रहणमितिलुग्वेति कन् पूरणप्रत्ययस्यच वा लुक्। ग्रन्थ एवप्रयोगः॥ न। द्वये॥

द्विककारः। पुं। वायसे। काके॥ द्वौ ककारौ नाम्नियस्य॥

द्विककुत्। पुं। उष्ट्रे॥ इति हेमचन्द्रः॥

द्विगुः। पुं। सङ्ख्यापूर्वे तत्पुरुषावान्तरसमासविशेषे॥ सचिविधः। तद्धितार्थः समाहारः उत्तरपदपरश्चेतिभेदात्। तद्धितार्थोपिद्विविधः। । तद्धितप्रत्ययमात्रस्यअजादेर्हंसादेर्वाअर्थे विषये इत्येकः। अपत्याथेष्ण्यादिकं त्यक्त्वा अजादेस्तद्धितस्यार्थे वाच्ये इत्यपरः। तद्धितार्थविषयो यथा। द्वयोर्मात्रोरपत्यं द्वैमातुरः। पञ्चानां नापितानामपत्यम् पाञ्चनापितिः॥ तद्धितार्थवाच्योयथा। पञ्चभिर्गोभिःक्रीतः पञ्चगुः॥ समाहारो यथा। त्रयाणां सखीनां समाहारः त्रिसखम्। समाहारे अदन्तानां स्त्रीत्वं पात्रादेस्तुक्लीवत्वम्॥ उत्तरपदपरो यथा। पञ्चगावोधनं यस्य पञ्चगवधन इत्यादिः॥ इति मुग्धबोधटीकायां दुर्गादासः॥

द्विगुणः। त्रि। द्वाभ्यां पूरणे। अङ्कद्वयाभ्यांघाते॥ द्वौगुणौ आवृत्तीयस्य सः॥

द्विगुणाकृतम्। त्रि। द्विःकृष्टक्षेत्रे। वारद्वयकृष्टक्षेत्रे॥ द्विगुणं कृतम्। सङ्ख्यायाश्च गुणान्ताया इतिडाच्॥

द्विगुणितः। त्रि। द्विरावृत्तकृते॥

द्विजः। पुं। ब्राह्मणे॥ क्षत्रिये॥ वैश्ये॥ जात्या कुलेन वृत्तेन स्वाध्यायेन श्रुतेनच। एभिर्युक्तोहि य स्तिष्ठे न्नित्यं स द्विजउच्यते॥ नजाति र्नकुलं राजन् नस्वाध्यायः श्रुतंनच। का

रत्नानि द्विजत्वस्य हन्त मेवतु कारणम् ॥ इतिवह्नि पुराणे वशिष्ठ वाक्यम् ॥ दन्ते ॥ अण्डजे ॥ द्विर्जायते । जनी० । अन्येष्वपीतिडः ॥ तुम्बुरुवृक्षे ॥

द्विजकुत्सितः । पुं । श्लेष्मातके ॥ द्विजैः कुत्सितः ॥

द्विजदासः । पुं । शूद्रे ॥ त्रि । द्विजानां दासे ॥

द्विजदेवः । पुं । ब्राह्मणे ॥ द्विजेषु देव इव ॥ ऋषौ ॥ इति श्रीधरस्वामी ॥

द्विजन्मा । पुं । विप्रे ॥ दशने ॥ द्वेजन्मनी अस्य ॥ ब्राह्मणादित्रये ॥ खगे ॥

द्विजपतिः । पुं । चन्द्रे ॥ द्विजानांपतिः ॥

द्विजप्रपा । स्त्री । पक्षिणां जलपानार्थं विहितकूपाद्यन्तिकखाते । तल्ले । आलवाले ॥ द्विजानां प्रपा ॥

द्विजप्रिया । स्त्री । सोमलतायाम् ॥ त्रि । द्विजस्यप्रियवस्तुनि ॥

द्विजबन्धुः । पुं । त्रैवर्णिकाधमे ॥ द्विजा बन्धवोयस्य सः ॥

द्विजब्रुवः । पुं । जातिमात्रोपजीविनि-ब्राह्मणे । ब्राह्मणब्रुवे ॥

द्विजराजः । पुं । चन्द्रे ॥ अनन्ते ॥ गरुडे ॥ द्विजानांराजा । राजाहः सखिभ्यष्टच् ॥ कर्पूरे ॥

द्विजलिङ्गी । पुं । क्षत्रिये ॥ त्रि । विप्रचिह्नधारिणि ॥

द्विजवरः । पुं । द्विजोत्तमे ॥ द्विजेषु द्विजानां वा मध्ये वरः ॥ चतुष्कलस्यपञ्चमे (।।।।) पर्याये ॥

द्विजवर्य्यः । पुं । विप्रश्रेष्ठे ॥

द्विजव्रणः । पुं । दन्तार्बुदे ॥

द्विजशप्तः । पुं । राजमाषे । वरवटी इतिगौडभाषा प्रसिद्धे ॥ त्रि । द्विजैः शप्ते ॥

द्विजसेवकः । पुं । शूद्रे ॥ त्रि । द्विजानां सेवाकर्त्तरि ॥

द्विजा । स्त्री । भार्ग्याम् ॥ हरेणौ । रेणुकानामगन्धद्रव्ये ॥ टाप् ॥

द्विजाङ्गी । स्त्री । कटुकायाम् ॥

द्विजातिः । पुं । विप्रे ॥ वेदाध्ययनादितुल्यधर्मत्वाद् ब्राह्मणादित्रिके ॥ ब्राह्मणः क्षत्रियो वैश्य स्त्रयोवर्णाद्विजातयः । चतुर्थएकजातिस्तु शूद्रो नास्तितु पञ्चम इतिमनुः ॥ शूद्रादिजातिभिर्जातो न भूमेर्भागमर्हतीतिस्मृतिः ॥ द्वे जाती जन्मनी यस्य सः ॥ मातुरग्रेधिजननं द्वितीयं मौञ्जिबन्धने इत्युक्तेः ॥ पक्षिसर्पाद्यण्डजेषु ॥

द्विजायनी । स्त्री । यज्ञोपवीते ॥ इति शब्दरत्नावली ॥

द्विजालयः । पुं । कोटरे ॥ द्विजानां-गृहे ॥

द्विजावलिः । स्त्री । दन्तपङ्क्तौ ॥

द्विजिह्वः । पुं । सर्पे ॥ त्रि । खले ॥ द्वे जिह्वेयस्यसः ॥ चौरे ॥

द्विजोत्तमः । पुं । ब्राह्मणे ॥

द्विट्सेवी । त्रि । शत्रुसेविनि ॥

द्वितयम् । न । युग्मे । द्वये ॥ द्वाववयवौ अस्य। सङ्ख्याया अवयवेतयप्॥

द्वितयी । स्त्री । युग्मायाम् ॥ टिड्ढेङीप्

द्वितीयः । त्रि । द्वयोः पूरणे । द्विपूरके ॥ द्वयोः पूरणः । द्वेस्तीयः ॥ द्वितीयेभागे ॥ पूरणाद्भागेतीयादन् ॥ पुं । पुत्रे ॥

द्वितीयकः । पुं । ज्वरविशेषे ॥ द्वितीयेअहनि भवः । कालप्रयोजना द्रोगइतिकन् ॥ द्विके ॥ द्वितीयेनरूपेण ग्रहणम् । तावतिथं ग्रहणमितिलुग्वेतिकन् ॥

द्वितीया । स्त्री । तिथिप्रभेदे । चन्द्रमसोद्वितीयकलाक्रियारूपायाम् ॥ सा अश्विनीकुमारयोर्जन्मतिथिः ॥ अत्रजातस्य फलम् । निखिलगुणगभीरो दानशीलो दयालुः स्वकुलकुमुदचन्द्रः स्वच्छचित्तोतिशूरः । निजभुजबलगर्वाच्छादितारातिवर्गो भवतिविपुलकीर्त्तिर्योद्वितीयाप्रसूतः ॥ अनध्यायद्वितीया यथा । प्रे क्ताचैचा द्वितीयास्ताः प्रेतपक्षेगरे तथा । याच कोजागरेजाते चैत्रावल्याःपरेपिया ॥ चातुर्मास्येसमाप्तेच द्वितीया या भवेत्तिथिः । परास्वेतास्वनध्यायःपुराणैःपरिकीर्त्तितः ॥ पक्षयोर्माघमासस्यद्वितीयांपरिवर्जयेदिति ॥ सहधर्मिण्याम् । पत्न्याम् ॥ अम्श्रौट् शस् इतित्रिके ॥ टाप् ॥

द्वितीयाकृतम् । त्रि । द्विगुणाकृते । वारद्वयकृष्टे क्षेत्रे ॥ द्वितीयं कृतम् । कृञोद्वितीयेतिडाच् ॥

द्वितीयाभा । स्त्री । दारुहरिद्रायाम् ॥

द्विदन् । त्रि । दन्तद्वययुक्तेपशौ ॥ द्वौदन्तावस्य । वयसिदन्तस्यदतृ ॥

द्विदाम्नी । स्त्री । रज्जुद्वययुक्तायांगवि॥

द्विदेहः । पुं । श्रीगणेशे । विनायके ॥ द्वाभ्यांदेहोऽस्य ॥

द्विदैवः । पुं । विशाखानक्षत्रे ॥

द्विद्वादशम् । न । योगविशेषे ॥ कन्याया द्वादशेभर्त्ता भर्त्तुः कन्या द्वितीयगा । द्विद्वादशं विजानीया द्वर्जितं त्रिदशैरपि ॥

द्विधा । अ । द्विप्रकारे ॥

द्विधागतिः । पुं । कुम्भीरे ॥ त्रि । द्विप्रकारगतिविशिष्टे ॥

द्विधातुः । पुं । गजानने । हेरम्बे ॥ न । धातुद्वये ॥

द्विधात्मकम् । न । जातीकोषे । जाय फल इतिभाषा ॥

द्विधालेख्यः । पुं । हिन्तालवृक्षे ॥ त्रि । द्विप्रकारलेखनीये ॥

द्विनग्नकः । पुं । दुश्चर्मणि ॥

द्विपः । पुं । इभे । हस्तिनि ॥ द्वाभ्यां मुखशुण्डाभ्यां पिबति । पा० । सुपी- तियोगविभागात्कः ॥ नागकेशरे ॥

द्विपग्राहः । पुं । हस्तिबन्धके ॥

द्विपथम् । न । चारुपथे । पथद्वये ॥ द्वयोः पथोः समाहारः । तद्धितार्थेति समासः । ऋक्पूरितिसमासान्तोऽच् ॥

द्विपदः । पुं । मनुजे ॥ देवे ॥ पक्षिणि ॥ राक्षसे ॥ यथा । द्विपदेपिचतुर्भेदा स्त्वदेवपक्षिराक्षसाः ॥ द्विपदाख्ये ॥

द्विपदराशिः । पुं । द्विपदाख्ये ॥

द्विपदा । स्त्री । ऋग्विशेषे ॥ द्वौपादौ यस्याः । सङ्ख्यासुपूर्वस्येति पादस्यान्त्यलोपः । टाबृचीतिटापि पादःपत् ॥

द्विपदाख्यः । पुं । द्विपदराशौ ॥ मिथुन तुलाघटकन्या द्विपदाख्या श्चापपूर्व भागश्च ॥

द्विपदी । स्त्री । मात्रावृत्तान्तरे ॥ आदौ षट्कलसङ्गतमेतत् तदनु पञ्चचतुष्कलम् । गुर्वन्तं द्विपदी भवतीह- विंशत्यष्टकलं दलम् ॥ यथा । चरणमपिमयिविनिधेहि विलासिनि मधुकरमदविमोचने । विषमायुधविषमायुधशासनविकले सुमुखिलोचने ॥ द्वौपादावस्याः । सङ्ख्यासुपूर्वस्येतिपादशब्दस्यान्त्यलोपः । पादोन्यतरस्यामितिङीपिभत्त्वात् पादःपत् ॥

द्विपमदः । पुं । हस्तिमदे ॥

द्विपरार्द्धावसानम् । न । परान्तकाले ॥ द्वितीयस्यपरार्द्धस्य अवसानम् ॥

द्विपर्णी । स्त्री । वनकोल्याम् ॥ माषपर्णीपृश्निपर्ण्योः ॥ त्रि । पर्णद्वययुक्ते ॥

द्विपात् । त्रि । पादद्वययुक्ते ॥ द्वौपादौ यस्य ॥

द्विपाद्यम् । न । द्विगुणदण्डे ॥ द्वौपादौ परिमाणमस्य । पणपादमाषशताद्यत् । इह पादःपदितिन । यस्येतिलोपस्यस्थानिवत्त्वात् । पद्यतदर्थे इत्यपि न । प्राण्यङ्गार्थस्यैव तत्रग्रहणात् ॥

द्विपायी । पुं । हस्तिनि । गजे ॥

द्विपुटः । पुं । सुगन्धिश्वेतपुष्पे । दूडा इति पर्वतीय भाषा प्रसिद्ध ॥

द्विपृष्ठः । पुं । राजप्रभेदे । ब्रह्मसम्भवे ॥

द्विमातृकः । पुं । गणेशे ॥

द्विमुखः । पुं । राजसर्पे ॥ त्रि । मुखद्वययुक्ते ॥ द्वौमुखौयस्य ॥

द्विमुखा । स्त्री । कर्कर्याम् । गडुआ माडू जारी बधनी इत्यादि भाषा ॥

जलौकायाम् ॥ द्वौमुखौयस्याः ॥

द्विमुखाहिः । पुं । सर्पभुजि । राजसर्पे ॥ द्विमुखस्सा सावहिश्च ॥

द्विमुखोरगः । पुं । राजसर्पे ॥

द्विमूर्द्धः । त्रि । मस्तकद्वययुक्ते असुरविशेषे ॥ द्वौ मूर्द्धानौ यस्य । द्वित्रिभ्यांषमूर्द्ध्नः इतिषः ॥

द्विमूर्द्धा । पुं । असुरविशेषे ॥

द्विरः । पुं । भ्रमरे ॥ द्वौरौनाम्नियस्य ॥

द्विरदः । पुं । गजे । हस्तिनि ॥ द्वौरदौ यस्य ॥ स्त्रियांटापिद्विरदा ॥

द्विरदान्तकः । पुं । सिंहे ॥

द्विरशनम् । न । वारद्वयभोजने ॥ मुनिभि र्द्विरशनं प्रोक्तं विप्राणां मर्त्यवासिनां नित्यम् । अहनिच तमस्विन्यां सार्द्धप्रहरयामान्तः इतितिथ्यादितत्त्वम् ॥

द्विरसनः । पुं । सर्पे ॥ द्वे रसने यस्य सः ॥

द्विरागमनम् । न । वधूप्रवेशानन्तरं परावृत्त्या पितृगृहप्राप्ताया वध्वाः पुनर्भर्तृगृहप्रवेशे ॥ तदुक्तम् । वृत्ते पाणिग्रहे गेहात् पितुः पतिगृहं प्रति । पुनरागमनं वध्वा स्तद्द्विरागमनं विदुरिति ॥

द्विरापः । पुं । हस्तिनि ॥ इतिशब्दमाला ॥

द्विराषाढः । पुं । मिथुनस्थरव्यारब्धशुक्लप्रतिपदादिदर्शान्तमासद्वये ॥ स चाषाढमलमासे भवति । यथा । मिथुनस्थो यदाभानु रमावास्याद्वयं स्पृशेत् । द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥ अपिच । माधवादिषुषट्केषु मासि दर्शद्वयं यदा । द्विराषाढः सविज्ञेयः शेतेतुश्रावणेऽच्युत इतिमलमासतत्त्वम् ॥

द्विरुक्तः । त्रि । विषादादिना द्विवारमुच्चारिते ॥ विषादे विस्मये हर्षे खेदे दैन्येऽवधारणे । प्रसादने सम्भ्रमेऽपि द्विस्त्रिरुक्तं न दुष्यतीति ॥

द्विरुक्तिः । स्त्री । द्विवारकथने ॥

द्विरूढा । स्त्री । पुनर्भ्वाम् । द्विवारविवाहितायाम् ॥

द्विरूपः । पुं । कोषविशेषे ॥ द्वे रूपेयस्मिन्सः ॥ त्रि । रूपद्वयविशिष्टे ॥

द्विरेफः । पुं । भ्रमरे ॥ त्रि । वर्वरे ॥ द्वौरेफौनाम्नि यस्य ॥

द्विवचनम् । न । येनपदेन द्वावर्थावुच्येते तस्मिन् ॥ द्वयोरर्थयोर्वचनम् । वचेः करणेल्युट् । कर्मणिषष्ठ्या समासः ॥

द्विवर्षा । स्त्री । द्विहायन्याम् ॥ द्वेवर्षे वयः प्रमाणमस्याः । आर्हीयठक् । अध्यर्द्धेतिलुक् ॥

द्विवर्षिका । स्त्री । द्विवर्षायाङ्गवि ॥

द्वेवर्षे वयो यस्याः सा द्विवर्षा। द्विवर्षेव। स्वार्थेकः। प्रत्ययस्यादितीत्वम्॥

द्विवार्षिकः। त्रि। द्विवर्षभवे॥

द्विवाहिका। स्त्री। दोलायाम्॥

द्विविदः। पुं। वानरविशेषे॥ यो बलरामेण हतः॥ समुद्रस्योत्तरेतीरे द्विविदोनाम वानरः। ऐकाह्निकज्वरं हन्ति तस्य नामानुकीर्त्तनात्॥

द्विवेशरा। स्त्री। लघुरथे। अम्बरम्॥

द्विशफः। पुं। द्विखुरेपशौ॥ यथा। गौरजोमहिषः कृष्णः शूकरोगवयोरुरुः। द्विशफाः पशवश्चेमे अविरुष्ट्रश्चसत्तमः॥ इति श्रीभागवतम्॥

द्विश०। अ। द्वयोर्द्वयोः॥ द्वौ द्वौददातीतिद्विशः। संख्यैकवचनाच्चवीप्सायामितिशस्॥

द्विट्। पुं। शत्रौ॥ त्रि। द्वेष्टरि॥ द्वेष्टि। द्विष अप्रीतौ। क्विप्॥

द्विषन्। त्रि। शत्रौ॥ द्वेष्टि। द्विष०। द्विषोऽमित्रे इति शतृ॥

द्विषन्तपः। त्रि। शत्रुतापने॥ द्विषन्तं तापयति। तप०। खच्प्रत्ययान्तः। द्विषत्परयोस्तापेरितिखच्। खचिह्रस्वः। मुम्॥

द्विष्टः। त्रि। द्वेषविषये॥

द्विष्ठः। त्रि। उभयस्थे॥ संयोगस्तुद्विष्ठतयेति जगदीशः॥ द्वयोस्तिष्ठति। ष्ठा०। कः॥

द्विस्। अ। क्रियाद्वयगणने॥ यथा। द्विः शरंनाभिसन्धत्ते द्विःस्थापयति नाश्रितान्। द्विर्ददातिनचार्थिभ्यो रामो द्विर्नाभिभाषत इति॥ द्विवारमित्यर्थे द्वित्रिचतुर्भ्यः सुच्॥

द्विसप्ततिः। स्त्री। द्व्यधिकसप्तत्याम्॥

द्विसहस्राक्षः। पुं। अनन्ते। नागराजे॥

द्विसीत्यम्। त्रि। द्विगुणाकृते। द्विवार कृष्टक्षेत्रे॥ द्विवारं सीतया सम्मितम्। नौवयोधर्मेत्यादिनायत्॥

द्विस्विन्नाम्नम्। न। सिद्धतण्डुले। उम्नाचाउँर इतिभाषा॥ द्विः स्विन्नमन्नं पृथुकं शुद्धंदेशविशेषके। नाद्यात्तमन्नं विप्राणां भक्ष्ये चनिवेदने॥ अभक्ष्यं तद्यतीनाञ्च विधवाब्रह्मचारिणाम्। ताम्बूलञ्चयथा ब्रह्मन् तथैते वस्तुनी ध्रुवमिति ब्र०वै० ब्रह्मखण्डम्॥

द्विहः। पुं। गजे। हस्तिनि॥ नान्तः॥ इतिशब्दरत्नावली॥

द्विहल्यम्। त्रि। द्विसीत्ये। द्विगुणाकृते॥ द्विवारं हलेन कृष्टम्। मतजन्हलादितियत्॥

द्विहायनी। स्त्री। द्विवर्षायाङ्गवि॥ द्वौहायनौ यस्याः। दामहायनान्ता

श्चेति ङीप् ॥

द्विहृदया । स्त्री । दौहृदिन्याम् ॥ स्व-हृदयेन गर्भहृदयेनच द्विहृदयागर्भिणी भवति ॥

द्वीन्द्रियग्राह्यः । पुं । इन्द्रियद्वयग्रहणी येगुणे ॥ सतुसङ्ख्यादिसप्तद्रववत्वस्नेहरूपः । यथा । सङ्ख्यादि रपरत्वान्तो द्रवत्वं स्नेह एवच । एतेतु द्वीन्द्रियग्राह्या अथस्पर्शान्तशब्दकाः ॥ इति भाषापरिच्छेदः ॥ द्वीन्द्रियग्राह्याः ॥ चाक्षुषप्रत्यक्षत्वाचप्रत्यक्षयो विषया इत्यर्थः ॥

द्वीपः । पुं । न । जलमध्यस्थस्थले । अन्तरीपे ॥ पुराणादिप्रसिद्धेषु सप्तसु ॥ तेचयथा । जम्बूशाककुशक्रौञ्चशाल्मगोमेदपुष्कराः । लक्षादिद्विगुणा द्वीपाः क्षाराद्यब्धिभिरावृताः ॥ द्विर्गता आपोऽत्र । ऋक्पूरित्यः समासान्तः । द्व्यन्तरुपसर्गेभ्योपईत् इत्यपईत् ॥ भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं जम्बूद्वीपं प्राहुराचार्यवर्याः । अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये क्षारक्षीराद्यम्बुधीनां निवेशः ॥ शाकं ततः शाल्मल मत्रकौशं क्रौञ्चञ्च गोमेदकपुष्करेच । द्वयोर्द्वयोरन्तरमेकमेकं समुद्रयोर्द्वीपमुदाहरन्ति ॥ इति सिद्धान्तशिरोमणिः ॥

द्वीपकर्पूरजः । पुं । चीनकर्पूरे ॥

द्वीपखर्ज्जूरम् । न । }
द्वीपजम् । न । } महापारेवते ॥

द्वीपवान् । पुं । नदे ॥ अब्धौ ॥ द्वीपमस्त्यस्य । मतुप् ॥

द्वीपवती । स्त्री । भूमौ ॥ नद्याम् ॥ द्वीपमस्त्यस्याम् । मतुप् । ङीप् ॥

द्वीपशत्रुः । पुं । शतावर्याम् ॥

द्वीपान्तरवचा । स्त्री । चोपचीनी इति भाषा प्रसिद्धे द्रव्ये ॥

द्वीपिका । स्त्री । शतावर्याम् ॥

द्वीपी । पुं । व्याघ्रे । वघेरा इतिभाषा ॥ चित्रके । चीता इतिभाषा । द्वौवर्णावीयते । ईङ् गतौ । बा० पः । द्वीपं चर्मास्त्यऽस्य । अतइनिठनावितीनिः ॥

द्वीपिनखः । पुं । व्याघ्रनखे ॥

द्वीपिशत्रुः । पुं । शतमूल्याम् ॥

द्वीशः । पुं । विशाखानक्षत्रे ॥ द्वौ इन्द्राग्नी ईशौयस्य सः ॥

द्वेधा । अ । द्विप्रकारे ॥ सङ्ख्यायाविधार्थे धा । एधाच्चेतितस्य एधाजादेशः ॥ वेधा द्वेधा भ्रमं चक्रे कान्तासु कनकेषुच । तासु तेष्वऽप्यऽनासक्तः साक्षाद्भर्गो नराकृतिः ॥

द्वेषः । पुं । शत्रुतायाम् । द्वेषणे । वैरे । विरोधे । दुःखसाधने विद्यमाने

किमपि दुःखं मे माभूदिति विपर्य्ययविशेषे तामिस्रे ॥ स चाष्टादशविधस्तामिस्रो द्रष्टव्यः ॥ दुःखमनुशेते कश्चिद्धीवृत्तिविशेषस्तमोनुगतरजः परिणामः । ईदृशं सर्वं सर्वदा मे मा भूदिति । तच्च शत्रुव्याघ्रादिषु सत्सु न निवारयितुं शक्यम् । न च सर्वे ते दुःखहेतवो हन्तुं शक्यन्ते अतः स द्वेषः सदा हृदयं दहति । यदा तु स्वस्येव परेषां सर्वेषामपि दुःखं मा भूदिति करुणां दुःखिषु भावयेत् तदा वैर्यादिद्वेषनिवृत्तौ चित्तम्प्रसीदति । यद्यसौ पुण्यपुरुषेषु मुदितां भावयेत् तदा तद्वासनाभावात् स्वयमेवाप्रमत्तोऽशुक्लाकृष्णे पुण्ये प्रवर्त्तते । तथा पापपुरुषेषूपेक्षां भावयन् स्वयमपि तद्वासनाभावात् पापान्निवर्त्तते । ततश्च पुण्याकरणपापकरणनिमित्तस्य पश्चात्तापस्याभावे चित्तं प्रसीदति । एवं सुखिषु मैत्रीं भावयतो न केवलं रागो निवर्त्तते किन्त्वसूयेर्ष्यादयोऽपि निवर्त्तन्ते । तथा दुःखिषु करुणां भावयतः शत्रुवधादिकरो द्वेषो यदा निवर्त्तते तदा दुःखिप्रतियोगिकत्वसुखित्वप्रयुक्तदर्पोऽपि निवर्त्तते ॥ एवं दोषान्तरनिवृत्तिरप्यूहनीया ॥

दुःखे तत्साधने च इदं मे मा भूदिति-स्पृहाविरोधिनी चित्तवृत्तिः क्रोध इति ईर्ष्येति चोच्यते द्वेषणम् । द्विष० । घञ् ॥ * ॥ द्वेषश्चात्मनो विशेषगुण इति सि० मु० ॥ द्वेषवशवर्त्तित्वनिषेधो यथा । इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ । तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ । इति भगवद्गीता ॥ अस्य कारणं द्विष्टसाधनताज्ञानम् । इति भाषा प० ॥

द्वेषणः । त्रि । शत्रौ ॥ द्वेषशीलः । क्रुधमण्डार्थेभ्यश्चेति युच् ॥ क्ली । द्वेषे ॥

द्वेषपक्षः । पुं । क्रोधेर्ष्यासूयाद्रोहामर्षाभिमानेषु ॥ द्वेषस्य पक्षः ॥

द्वेषी । त्रि । वैरिणि । शत्रौ ॥ द्वेष्टि तच्छीलः । द्विष० । सम्पृचेति घिनुण् ॥

द्वेष्टा । त्रि । विद्वेषकर्त्तरि ॥

द्वेष्यः । त्रि । द्वेषविषये । द्वेषकर्मणि स्वकृतापकारमपेक्ष्यापकारकर्त्तरि ॥ अविगते ॥ द्वेष्टुमर्हः ॥ यत् ॥

द्वै । अ । वितर्के ॥

द्वैगुणिकः । त्रि । वार्द्धुषौ । वृद्ध्याजीवे ॥ द्विगुणार्थं द्रव्यं द्विगुणम् । तत्प्रयच्छति द्विगुणं ग्रहीतुमेकगुणं ददाति । प्रयच्छति गर्ह्यमिति ठक् ॥

द्वैतम् । न । युगले । द्वये । द्वैधीभावे ॥ द्विधा इतं द्वीतम् । तस्यभावः । युवा दित्वाद्ण् स्वार्थेवा ॥ द्वैताद्वैतयोः प्रमाणभूतवेदप्रतिपाद्यत्वात् कस्य सत्यत्वं कस्यासत्यत्वमित्याऽकांक्षायामाहुराचार्याः ॥ अद्वैतमेवसत्यं तस्मिन् द्वैतं न सत्यमध्यस्तम् । रजतमिव शुक्तिकायां मृगतृष्णायामिवोदकस्फुरणम् ॥ आरोपितंयदिण्यादद्वैतंवस्त्ववस्तुनि द्वैते । युक्तं नैव तदा स्यात् सत्ये ध्यासो भवत्यसत्यानाम् ॥ यद्यारोपणमुभयो स्तद्व्यतिरिक्तस्य कस्यचिद्भावः । आरोपणं न शून्ये तस्माद्द्वैतसत्यता ग्राह्या ॥ प्रत्यक्षाद्यनवगतं श्रुत्या प्रतिपादनीयमद्वैतम् । द्वैतं न प्रतिपाद्यं तस्य स्वयमेवलोकसिद्धत्वादिति ॥ प्रपञ्चोयदि विद्येतनिवर्त्तेतनसंशयः । मायामात्रमिदंद्वैतमद्वैतंपरमार्थत इति ॥

द्वैतवनम् । न । शोकमोहादिरहिते तपोवने ॥ द्वेइते गतेयस्मात् तद्द्वीतम् । द्वीतमेव द्वैतम् । तच्चतद्वनञ्च ॥

द्वैतवादी । त्रि । जीवेश्वरयोर्भेदवादिनि । ईश्वरातिरिक्तजीववक्तरि ॥ तस्यमतं यथा । परमात्मनो जीवात्मा पृथक् तन्मध्ये केषाञ्चिन्मते प्रकृति

रतिरिक्ता केषाञ्चिन्मते प्रकृतिरदृष्टमात्रे पर्यवसिता एवंजीवश्च पृथक् । अत्रप्रमाणम् । जन्मकर्ममरणानां प्रतिनियमा दयुगपत् प्रवृत्तेश्च । पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैवेतिसाङ्ख्यार्या ॥ अस्यार्थः । पुरुषबहुत्वं सिद्धम् । कस्मात् । जन्ममरणकरणानां प्रतिनियमात् निकायविशिष्टाभिरपूर्वाभि र्देहेन्द्रियबुद्धिवेदनाभिः पुरुषस्याभिसम्बन्धो जन्म नतु पुरुषस्य परिणामस्तस्यापरिणामित्वात् । तेषामेवच देहादीना मुपात्तानां परित्यागो मरणम् नत्वात्मनोपिनाशस्तस्य कूटस्थनित्यत्वात् । करणानि बुद्ध्यादीनि त्रयोदश । तेषां जन्ममरणकरणानाम् प्रतिनियमोव्यवस्था । साखल्वियं सर्वशरीरेष्वेकस्मिन् पुरुषे नोपपद्यते । तदाखल्वेकस्मिन् जायमाने सर्वेजायेरन् म्रियमाणेवा म्रियेरन् । अन्धादौ चैकस्मिन् सर्व एवान्धाः एकस्मिन् विचित्रे सर्वएव विचित्राः स्युरित्यव्यवस्था प्रतिक्षेत्रं पुरुषभेदे तु भवति व्यवस्था । नचैकस्यापि पुरुषस्य देहोपधानभेदाद् व्यवस्थेति युक्तम् । पाणिस्तनाद्युपधानभेदेनापिजन्ममरणादिव्यवस्थासम्भवात् ।

नह्यिष्मायौ कृत्ते जाते वा कनादौम
इत्यवयवे युवतिर्जाता मृतावा भ
वतीति । एतस्य प्रतिक्षेपं पुरुषभेद
इत्याह । अयुगपत् प्रवृत्तेश्चेति । प्रवृ
त्तिश्च प्रयत्नलक्षणा यद्यप्यन्तः कर
णवर्त्तिनी तथापि पुरुष उपचर्य्यते ।
तथाच तस्मिन्नेकशरीरे प्रयतमाने
सएव सर्वशरीरेष्वेकइति सर्वत्र प्र
यतेत । ततश्च सर्वाण्येव शरीराणि
युगपच्चालयेत् । नानात्वे तु नायं दो
षइति । इतश्च पुरुषभेद इत्याह ।
त्रैगुण्यविपर्य्ययाच्चैवेति । एवकारो
भिन्नक्रमः सिद्धमित्यस्यानन्तरं द्रष्टव्यः
। सिद्धमेव नासिद्धम् । त्रयोगुणास्त्रै
गुण्यम् । तस्यविपर्य्ययो ऽन्यथात्वम्
। केचित् खलु सत्त्वनिकायाः सत्त्व
बहुलाः यथोर्द्ध्वस्रोतसः । केचिद् रजो
बहुलाः यथामनुष्याः । केचित् त-
मोबहुलाः यथातिर्य्यग्योनयः । सो
ऽयमीदृशस्त्रैगुण्यविपर्य्ययो ऽन्यथा
भावस्तेषु तेषु सत्त्वनिकायेषु न भ
वेत् यद्येकः पुरुषः स्यात् । भेदेत्व-
यमदोष इति ॥ * ॥ तत्रेश्वरःसर्वज्ञः
परमात्माएक एव । जीवः प्रतिशरी
रंभिन्नो विभुर्नित्यश्चेतिगोतममत
म् ॥ इहब्रह्मणोजीवेश्वरत्वप्रतिपाद
नात् तयोरद्वैतंनाभिमतम् ॥ नेतरो

द्वैतवा

ऽनुपपत्तेः । १ । १ । १६ । भेदव्यपदेशा
च्च । १ । १ । १७ । मुक्तोपसृप्यव्यप
देशात् । १ । ३ । २ । आकाशोर्था
न्तरत्वादिव्यपदेशात् । १ । ३ । ४१ ।
भोगमात्र साम्यलिङ्गाच्च । ४ । ४ ।
२१ । इति सूत्रे मोक्षे मितयोर्द्वैत
निरूपणाच्च । इति गोविन्दभाष्यम
तम् ॥ यतो द्वैतमतेयुक्ति रेवप्र
माणं युक्त्यायत् फलतितदेव सर्वाध्या
त्मविद्याप्रतिपादकश्रुतीनां तात्पर्य
मितिरामानुजमतञ्च ॥ * ॥ सूत्रार्थ
स्तु । इतर ईश्वरादन्यः संसारीजीवो
नआनन्दमयः । कस्मात् सतपस्तप्त्वा
इदं सर्वं सृजत यदिदं किञ्चेतीतिज
गदर्थं सर्वकानुपपत्तेः सर्वविकारसृष्टि
श्च नपरस्मा दात्मनो ऽन्यत्रोपपद्यते
॥ * ॥ रसं ह्येवायं लब्ध्वानन्दी भवती
तिश्रुतौ प्राप्यप्रापकत्वभेदोक्तेर्नंजी
वआनन्दमयः ॥ * ॥ अथमर्त्यो ऽमृ
तो भवत्यत्र ब्रह्म समश्नुते इतिमु
क्तानामुपसृप्यत्वस्य प्राप्यत्वस्योक्तेः
॥ * ॥ आकाशोवैनाम नामरूपयो
र्निर्वहिते त्यादौ भूताकाशइतिचेन्न
। ते यदन्तरा तद्ब्रह्मेत्यग्रे । ते नाम
रूपे यदन्तरायतोभिन्ने इति नामा
द्यन्तःपातिगगनरूपार्थभिन्नत्वेन ।
आदिना ब्रह्मत्वेनाकाशस्यव्यपदे

यात् ॥ * ॥ एतमानन्दमयमात्मानमनुविश्य न जायते न म्रियते न ह्रसते न वर्द्धते यथाकामं चरति यथाकामंपिबति यथाकामं रमते इति भोगमात्रेणेश्वरसाम्यश्रवणान्न जीवस्य जगत्कृतिः। चकारादश्रुतत्वात् जगद्व्यापारार्थोपास्त्यभावादिति ॥ * ॥ विकल्पो विनिवर्त्तेत कल्पितो यदि केनचित्। उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते इत्यागमविदः ॥

द्वैती। त्रि। भेदवादिनि ॥ कपिलकणादबुद्धार्हतादिदर्शनानुसारिणि ॥ यथा। स्वसिद्धान्तव्यवस्थासु द्वैतिनो निश्चिता दृढम्। परस्परं विरुध्यन्ते तैरयं न विरुध्यत इति ॥ व्यवस्थासु स्वसिद्धान्तरचनासु। निश्चिताः एवमेवैष परमार्थो नान्यथेति तत्र तत्र निरक्ताः। स्वसिद्धान्तदर्शननिमित्तमेवान्योन्यं विरुध्यन्ते तैरस्मदीयो वैदिकः सर्वानन्यत्वादात्मैकत्वदर्शनपक्षो न विरुध्यते यथा स्वहस्तपादादिभिः ॥ अद्वैतं परमार्थो हि द्वैतं तद्भेद उच्यते। तेषामुभयथा द्वैतं तेनायं न विरुध्यते ॥ द्वैतं नानात्वं तस्माद्द्वैतस्य भेदः कार्यम् ॥

द्वैतीयीकः। त्रि। द्वितीये ॥ तीयादीकक् स्वार्थे वा वाच्यः ॥

द्वैधम्। अ। द्विप्रकारे ॥ द्वित्र्योश्च धमुञ् ॥ सैन्यं द्विधा स्थितौ ॥ एकेन सन्धिरपरेण विग्रह इत्येवं द्विप्रकारौ द्वैधम् ॥ विवादे ॥ धमुञन्तात् स्वार्थे डदर्शनम् ॥ पथि द्वैधानि तृणानि ॥

द्वैधीभावः। पुं। द्वैधे। नीतिवेदिनां राज्ञां गुणविशेषे ॥ बलिनो द्विषतो मध्ये वाचात्मानं समर्पयन्। द्वैधीभावेन वर्त्तेत काकाक्षिवदलक्षितः इति नीतिः ॥

द्वैपः। पुं। द्वीपचर्मावृते रथे। वैयाघ्रे ॥ द्वीपिनो विकारः। प्राणिरजतादिभ्योऽञ्। द्वैपेन चर्मणा परिवृतो रथः। द्वैपवैयाघ्रादञ् ॥ न। व्याघ्रचर्मणि ॥ द्वीपिनो विकारः। प्राणिरजतादिभ्योऽञ् ॥ त्रि। द्वीपिसम्बन्धिनि ॥ व्याघ्रचर्मसम्बन्धिनि ॥ द्वीपसम्बन्धिनि ॥ अण् ॥

द्वैपदिकः। पुं। द्विपदामधीते वेद वेत्त्यर्थे ॥ उ॰ ठक् ॥

द्वैपायनः। पुं। व्यासे ॥ द्वीपमयनं स्थानं जन्मभूमिर्यस्य स द्वीपायनः। स एव। प्र॰ अण् ॥ द्वीपे न्यस्तस्तया बालस्तस्माद्द्वैपायनोभवदिति पुराणम्। तया सत्यवत्या ॥

द्वैप्यः। त्रि। द्वीपवासिनि। समुद्रसमीपवर्त्तिद्वीपभवे॥ द्वीपादनुसमुद्रं यञ्

॥ त्रिवर्णदैव्या ॥

द्वैमातुरः। पुं। गणाधिपे। विघ्नराजे ॥ द्वयोर्मात्रो रपत्यम्। मातुरुत्स ङ्ख्येत्यणि उत्वंरपरत्वञ्च। दुर्गाचा मुण्डाभ्यां पालितत्वात्। गजमुखत याहस्तिन्याअप्यपत्यत्वात् ॥ गङ्गाया अपत्यत्वाद्वा ॥ जरासन्धे ॥ त्रि। द्वि मातृजे ॥

द्वैमातृकः। पुं। नदीवृष्टिजलोद्भूतधा न्यभृतेदेशे ॥

द्वैषणीया। स्त्री। नागवल्लीप्रभेदे ॥

द्व्यङ्गः। पुं। द्विस्वभावराशौ ॥

द्व्यङ्गुलम्। त्रि। अङ्गुलिद्वयपरिमिते ॥ द्वे अङ्गुली परिमाणमस्य ॥ न। अ ङ्गुलिद्वयमात्रे ॥ द्वयोरङ्गुल्योः समा हारः ॥

द्व्यञ्जलः। त्रि। अञ्जलिद्वयपरिमिते ॥ द्वावञ्जली परिमाणमस्य ॥ न। अ ञ्जलिद्वयमात्रे ॥ द्वयोरञ्जल्योः समा हारः ॥

द्व्यणुकम्। न। परमाणुद्वयसंयोगा दुत्पन्ने। परमाणु समवेतद्रव्ये। पर माणुद्वयात्मके ॥ तच्च प्रत्यक्षादिवि षयम्। यथा। विषयो द्व्यणुकादि स्तु ब्रह्माण्डान्त उदाहृतः ॥ तस्य प रिमाणम नित्यम्। यथा। अनि त्यं द्व्यणुकादौ तु सङ्ख्याजन्यमुदा हृतमितिभाषा परिच्छेदः ॥

द्व्यन्यः। त्रि। द्वाभ्यामन्यस्मिन् ॥ द्वेअ न्येयस्यवा ॥ न। द्वयोरन्ययोः समा हारे ॥

द्व्यर्थः। त्रि। अर्थद्वययुक्ते शब्दादौ ॥

द्व्यष्टम्। न। ताम्रे। शुल्बे ॥ द्वेष्टमह प्ये अश्नुतेस्म। अशू०। गत्यर्थे- तिक्तः ॥

द्व्यहः। पुं। अहर्द्वये ॥ द्वेअहनीसमा हृते। राजाहःसखिभ्यष्टच्। रात्राह्नाहाःपुंसिः ॥

द्व्यात्मकः। पुं। मिथुनकन्याधनुर्मीन राशिषु ॥ यथा। चरस्थिरद्व्यात्मक नामधेया मेषादयोऽमीक्रमशःप्र दिष्टाः। इति ॥

द्व्यामुष्यायणः। पुं। तवममचायमिति परिभाषया धर्मतःपरिगृहीते ॥ अ मुष्यप्रसिद्धस्यापत्यमामुष्यायणः। द्व यो रामुष्यायणः॥ उभयोरप्यसौपि ण्डदाताभवति। यतःसुतोजायतेये नचायं धर्मतोगृह्यते तयोः। उभ योरप्यसौरिक्थी पिण्डदाताचधर्म तः। इति स्मृतेः ॥

द्व्याह्निकः। त्रि। दिनद्वयभवे ॥ द्व्यहे भवः ॥

धः

धः । पुं । धकारे ॥ धर्म्मे ॥ कुवेरे ॥ ब्रह्मणि ॥ न । वसुनि । धने ॥

धटः । पुं । दिव्यतुलायाम् । तुलापरीक्षायाम् ॥ तुलायाम् । तराजू इति भाषा ॥ तुलाराशौ ॥

धटकः । पुं । चतुर्द्दशवल्लपरिमाणे । द्विचत्वारिंशद्रक्तिकासु ॥

धटपरीक्षा । स्त्री । तुलापरीक्षायाम् ॥

धटी । स्त्री । वाससश्चीरे । धज्जी इति भाषा ॥ कौपीने ॥

धटीदानम् । न । गर्भाधानानन्तरस्त्रीसम्प्रदानकचीरवस्त्रदाने ॥ यथा । मूलश्रवणाहस्तेषु पुष्यादित्युत्तरासु च । मृगे पौष्णे धटी देया सौम्यवारे शुभे तिथाविति ज्योतिःसारसंग्रहः ॥

धत्तूरः । पुं । उन्मत्ते । धुस्तूरे ॥ धत्तूरो मदवर्णाग्निवातकृज्ज्वरकुष्ठनुत् । कषायो मधुरस्तिक्तो यूकालिक्षाविनाशनः ॥ उष्णो गुरुर्व्रणश्लेष्मकण्डूकृमिविषापहः ॥ * ॥ धयति धातून् । धेट्० । वा० उरच् । पृषोदरादित्वात् साधुः ॥

धनम् । न । गोधने ॥ वित्ते । स्वापतेये । रिक्थे । अर्थे । द्रविणे ॥ यदेतद्द्रविणं नाम प्राणा एते बहिश्चराः । स तस्य हरते प्राणान् यो यस्य हरते धनम् ॥ इति कूर्मपुराणम् ॥ श्रीभागवते तु । राजन् यमनुगृह्णामि हरिष्ये तद्धनं शनैः । ततोऽधनं त्यजन्त्यस्य स्वजना दुःखदुःखितमिति ॥ दानं भोगस्तथा नाशो धनस्य गतिरीदृशी । दानभोगौ कृतीनाञ्च नाशः पापात्मनां किलेति देवीभागवतम् ॥ धनात् कुलं प्रभवति धनाद्धर्म्मः प्रवर्त्तते । न धनस्य भवेद्धर्मः कामश्चैव कथञ्चनेति च ॥ तत् त्रिविधमुक्तं गारुडे २१० अध्याये । यथा । धनन्तु त्रिविधं ज्ञेयं शुक्लं शवलमेव च । कृष्णञ्च तस्य विज्ञेयो विभागः सप्तधा पृथक् ॥ * ॥ क्रमायातं प्रीतिदायं प्राप्तञ्च सह भार्यया । अविशेषेण सर्वेषां वर्णानां त्रिविधं धनम् ॥ * ॥ वैशेषिकं धनं दृष्टं ब्राह्मणस्य त्रिलक्षणम् । याजनाध्यापने नित्यं विशुद्धाच्च प्रतिग्रहः ॥ त्रिविधं क्षत्रियस्यापि प्राहुर्वैशेषिकं धनम् । युद्धार्थलब्धं करजं दण्डवध्यापहारतः ॥ वैशेषिकं धनं दृष्टं वैश्यस्यापि त्रिलक्षणम् ॥ कृषिगोरक्षवाणिज्यं शूद्रस्यैभ्यस्त्वनुग्रहात् ॥ कुसीदकृषिवाणिज्यं प्रकुर्वीत स्वयंकृतम् । आपत्काले स्वयंकु-

र्वैनसायुज्यते दिजइति ॥ धनति । धनधान्ये । पचाद्यच् ॥ स्वेद्यार्हे ॥ धनिष्ठ नक्षत्रे ॥

धनकेलिः । पुं । कुबेरे । राजराजे ॥

धनच्छूः । स्त्री । पक्षिविशेषे । करेट व्याघ्रात् ॥ इ०चि० ॥

धनञ्जयः । पुं । अर्जुने । युधिष्ठिरराजसूयार्थं दिग्विजये सर्वान् राज्ञोजित्वा धनमाहृतवाति महाप्रभावे पाण्डवानां मध्येभगवद्विभूतौ ॥ वह्नौ ॥ धनमिच्छेद्धुताशनात् ॥ नागप्रभेदे ॥ अयञ्च जलाशयाधिपतिः ॥ पेषणकरे देहवर्त्तिवायौ ॥ नजहाति मृतञ्चापि सर्वव्यापीधनञ्जयः ॥ ककुभतरौ ॥ चित्रकटचे ॥ प्रलेहप्रभेदे ॥ यथा । मांसकूष्माण्डकदली शृङ्गवेराणि साधयेत् । प्रलेहविधिना चायं प्रजेह्योयं धनञ्जयः ॥ धनञ्जयति । जिजये । अस्मात् संज्ञायां भृतृवृजिधारिसहितपिदमः इतिखच् । अरुर्दिषदिति मुम् ॥

धनदः । पुं । कुबेरे ॥ धनं दयते । देङ्पालने । आतइति कः ॥ हिज्जलवृक्षे ॥ चि । धनदातरि ॥ धनंददाति । डुदाञ्० । आतइति कः ॥

धनदा । स्त्री । देवीविशेषे ॥ टाप् ॥

धनदाची । स्त्री । लताकरञ्जे ॥

धनदानुचरः । पुं । यक्षे ॥ धनदस्यानुचरः ॥

धनदानुजः । पुं । दशास्ये । रावणे ॥ धनदस्य अनुजः ॥

धनदायी । पुं । अग्नौ ॥ आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात् ज्ञानञ्चशङ्करादिच्छे न्मुक्तिमिच्छेज्जनार्द्दनात् ॥ त्रि । रिक्थप्रदे ॥

धनन्ददा । स्त्री । जिनशक्तिविशेषे ॥

धनपतिः । पुं । कुवेरे । त्र्यम्बकसखे ॥ धनस्य धनानां वा पतिः ॥ त्रि । धनान्विते ॥

धनपिशाचिका । स्त्री । } धनाशायाम् ।
धनपिशाची । स्त्री । } तृष्णायाम् । धनलोभे ॥

धनप्रिया । स्त्री । काकजंबाम् ॥

धनमानमदान्वितः । त्रि । धननिमित्तो योमान आत्मनि पूज्यत्वाध्यासः तन्निमित्तोयोमदः परस्मिन् गुर्वादावप्यपूज्यत्वाभिमानस्ताभ्यामन्विते ॥

धनलोलुपः । त्रि । धनविषये अतिलुब्धे ॥ यथा । यदातुम्लेच्छजातीयाराजानोधनलोलुपाः । भविष्यन्ति महाप्राज्ञे तदैवप्रजः कलिरिति श्री महानिर्वाणतन्त्रम् ॥

धनवान् । त्रि । धनिनि । धनविशिष्टे ॥ धनमस्त्यस्यास्मिन्वा । तदस्यास्तीति

मतुप् ॥ धिगस्त्वेता विद्या धिगपिक वित्ता धिक्सुजनता वयोरूपंवाधिक् धिगपिचयशो निर्धनत्वताम्। असौ जीयादेकः सकलगुणहीनोपिधनवान् वहिर्द्वारेयस्य तृणलवसमाःसन्ति गुणिन इति विवेकिनः खेदोक्तिः ॥

धनवती। स्त्री। धनिष्ठानक्षत्रे ॥ ङीप् ॥

धनसूकः। पुं। गोक्षुरे ॥ इतिशब्दच न्द्रिका ॥

धनस्वामी। त्रि। उत्तमर्णे ॥

धनहरी। स्त्री। चण्डाद्रुमे। चोरना-मगन्धद्रव्ये। गन्धहासके ॥ त्रि। धन हारिणि ॥ धनं हरति। हृञ्। हर तेरनुद्यमनेऽच्। गौ० ङीष् ॥

धनहारी। त्रि। धनहारके ॥

धनागारम्। न। भाण्डागारे ॥

धनाढ्यः। त्रि। धनसंयुक्ते ॥ धनेनआढ्यः ॥

धनाधिकृतः। त्रि। धनाध्यक्षे। खजा न्ची इति भाषा ॥

धनाधिपः। पुं। कुवेरे। गुह्यकेश्वरे। धनदे ॥ धनानामधिपः ॥

धनाधिपतिः। पुं। कुवेरे ॥ धनानाम धिपतिः ॥

धनाध्यक्षः। पुं। कुवेरे। धनदे ॥ धना ऽधिकृते। खजान्ची इति भाषा ॥ अस्यलक्षणं यथा। लोहवस्त्राजिना-दीनां रत्नानाञ्च विधानवित्। वि-

ज्ञाता फल्गुसाराणां अनाहार्यः शुचिः सदा ॥ निपुणश्चाप्रमत्तश्च-धनाध्यक्षः प्रकीर्त्तितः ॥ आयद्वारेषु सर्वेषु धनाध्यक्षसमानराः। व्ययद्वारेषु चतथा कर्त्तव्याः पृथिवीक्षिता ॥ इति मत्स्यपुराणम् ॥

धनाशा। स्त्री। धनलोभे ॥ जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः। जीविताशा धनाशाच जीर्यतोपि न जीर्यति ॥

धनाश्रीः। स्त्री। रागिणी विशेषे ॥

धनिकः। पुं। धन्याके ॥ अस्मिन्नर्थेक्ली वमितिराजनिर्घण्टः। पुल्लिङ्ग इति मेदिनी ॥ धवे ॥ त्रि। साधौ ॥ धनि नि ॥ धनमस्यास्ति। अतइनिठनाविति ठन् ॥

धनिका। स्त्री। साधुनार्याम् ॥ वध्वाम् ॥ युवत्याम् ॥ प्रियङ्गुवृक्षे ॥

धनी। त्रि। आढ्ये ॥ वहुधनमस्यास्ति। अतइनिठनाविति्नीनिः ॥

धनिष्ठा। स्त्री। श्रविष्ठायाम्। त्रयोविंश तितमेनक्षत्रे ॥ अतिशयेनधनवती। इष्ठन्। विन्मतुपोर्लुगिति मतुपोलुक् ॥ अत्रजातस्यफलम्। आचारज्ञा ताद्दरचारुशीलो धनाधिशाली वलवान् दयालुः। यस्यप्रसूतौच भवेद्ध निष्ठा महत् प्रतिष्ठा सहितो नरः

स्यात् ॥

धनीका । स्त्री । युवत्याम् ॥

धनीयकम् । न । धान्याके ॥

धनुः । पुं । पियालवृक्षे ॥ राशिभेदे ॥ शरासने ॥ हस्तचतुष्टयमाने ॥ दध न्ति । धारयति । धनति वा । धन० । भृमृशीतृचरितसरितनिधनिमिम सृजिभ्यउरिति उः ॥

धनुःपटः । पुं । पियालतरौ ॥ धनुषइव पटोविस्तारोऽस्य ॥

धनुःशाखा । स्त्री । मूर्वायाम् ॥

धनुःश्रेणी । स्त्री । मूर्वायाम् ॥ महेन्द्र वारुण्याम् ॥

धनुरधिपः । पुं । वृहस्पतौ ॥ धनुषः अधिपः ॥

धनुर्गुणः । पुं । ज्यायाम् । मौर्व्याम् ॥ धनुषोगुणः ॥

धनुर्गुणा । स्त्री । मूर्वायाम् ॥

धनुर्द्रुमः । पुं । वंशे ॥

धनुर्द्धरः । त्रि । धनुष्मति । धन्विनि ॥ धरति । धृञ्० । अच् । धनुषोधरः ॥

धनुर्द्धारी । त्रि । धनुर्द्धरे । निषङ्गिणि । चापिनि ॥ तल्लक्षणं यथा । शूरस्य बलयुक्तस्य गजाश्वरथकोविदः । धनु र्द्धारी भवेद्राज्ञः सर्वक्लेशसहः शुचि रिति मत्स्यपुराणम् ॥

धनुर्भृत् । पुं । धनुर्द्धरे । धानुष्के ॥

धनुर्मध्यम् । न । लक्ष्मणि ॥ धनुषोम ध्यम् ॥

धनुर्माला । स्त्री । मूर्वायाम् ॥

धनुर्यासः । पुं । यवासे ॥

धनुर्लता । स्त्री । सोमवल्ल्याम् ॥

धनुर्वृक्षः । पुं । धन्वनवृक्षे ॥ भल्लातके ॥ वंशे ॥ अश्वत्थे ॥

धनुर्वेदः । पुं । शस्त्रास्त्रप्रयोगोपसंहा रप्रतिपादके मन्त्रसहिते पादचतु ष्टयात्मके यजुर्वेदस्योपवेदे ॥

धनुष्कारः । पुं । धानुष्के ॥ धनुःकारय स्य ॥ यद्वा । धनुःकरोति । दिवावि भेतिटः ॥

धनुष्पटः । पुं । पियालवृक्षे ॥ धनुषइव पटो विस्तारोऽस्य ॥

धनुष्मान् । पुं । धानुष्के । धनुर्द्धारिणि ॥ धनुरस्यास्ति । मतुप् । तसौमत्व र्थे इति भत्वम् ॥

धनुः । पुं । पियाले ॥ पुं । न । राशि विशेषे । तौक्षिके ॥ तत्रराशिजात फलं यथा । बहुकलाकुशलः प्रबलो महान् विमलताकलितः सरलोक्ति भाक् । शरधरेहि धनुर्द्धरगे नरो धनकरो नकरोति धनव्ययम् ॥ त लग्नजातफलम् । धनुर्लग्नेसमुत्पन्नो नीतिमान् धनवान् सुखी । कुलम ध्येप्रधानस्य प्राज्ञः सर्वस्यपोषकः ॥

शरासने । कोदण्डे । कार्म्मुके ॥ अस्य लक्षणं यथा । धनुस्तु द्विविधं प्रोक्तं शार्ङ्गं शांशं तथैव च । कोमलत्वं वर्ण्टदृढता तयोर्गुण उदाहृतः ॥ सुखसम्पत्तिकरणं समम्मुष्व्यायतं धनुः । विपदो मुष्टिवैषम्ये तदङ्गे भङ्गमावहेदिति युक्तिकल्पतरुः ॥ * ॥ धनुषा कार्य्यमेतावदार्त्तानामभिरक्षणम् ॥ * ॥ हस्तचतुष्टयपरिमाणे । काठा । इति गौडभाषा ॥ यथा । चतुर्विंशाङ्गुलो हस्तस्तच्चतुष्कं धनुः स्मृतम् ॥ त्रि । धनुर्द्धरे ॥ दधन्ति धारयति । धन० । उसिः प्रत्ययः ॥ यद्वा । धनति । धनशब्दे । अर्त्तिपृवपियजितनिधनितपिभ्यो नित् इत्युसिः ॥

धनूः । पुं । धनुषि ॥ नवमराशौ ॥ दधन्ति । धन्यते वा । धन० । कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः ॥

धनेश्वरः । पुं । कुबेरे ॥ धनानामीश्वरः ॥

धन्धधम्ध्यम् । न । अपाटवे ॥

धन्यः । पुं । अश्वकर्णवृक्षे ॥ त्रि । श्लाघ्ये ॥ स्वनामा पुरुषो धन्यः पितृनामा च मध्यमः । अधमो भ्रातृनामा च मातृनामाधमाधमः ॥ कृतार्थे ॥ पुण्यवति । सुकृतिनि ॥ वार्हस्पत्यौशनसादावर्थशास्त्रे ॥ धनाय हिते ॥ धनस्य निमित्ते ॥ धनं लब्धा । धनगणं लब्धेतियत् ॥ धनस्य निमित्तं संयोग उत्पातो वा । गोद्यचइत्यादिना यत् ॥ धनं प्रयोजनमस्य वा ॥

धन्यव्रतम् । न । धनजनके व्रतविशेषे ॥

धन्या । स्त्री । आमलक्याम् ॥ धात्र्याम् । उपमातरि । धाय इति भाषा ॥ धन्याके ॥ पिण्डारकवनदेव्याम् ॥ टाप् ॥

धन्याकम् । न । छत्रायाम् । कुस्तुम्बुरुणि । वितुन्नके । धनिआ इति भाषा ॥ शिलायां साधु सम्पिष्टं धन्याकं वस्त्रगालितम् । शर्करोदकसम्मिश्रं कर्पूरादि सुसंस्कृतम् । नवीने मृण्मये पात्रे स्थितं पित्तहरं परम् ॥ धन्यते भक्षार्थिभिः । धनशब्दे । पिना० साधु ॥

धन्यासरस्वती । स्त्री । तीर्थविशेषे ॥

धन्वम् । न । चापे । इत्यमरटीकायां भरतः ॥

धन्वङ्गः । पुं । धामिन् इति भाषाप्रसिद्धे धनुर्वृक्षे । गोत्रवृक्षे ॥ धन्वङ्गः कफपित्तास्रकासहृत् तुवरो लघुः । वृंहणो बलकृद्रूक्षः सन्धिकृद्व्रणरोपणः ॥ इति भावप्रकाशः ॥

धन्वदुर्गम् । न । मरुवेष्टिते चतुर्द्दिशं पञ्चयोजनमनुदके ॥

धन्वा । पुं । अल्पोदकदेशे ॥ मरुदेशे ॥ न । चापे ॥ स्थले ॥ धन्वतेऽस्मा

त् । धन्वि:शैचोगत्यर्थः । कनिन्युवृ षीतिकनिन् । धन्वति । अन्तर्भावित ण्यर्थोवा ॥

धन्वनः । पुं । धामनि इति भाषा प्रसिद्धे धनुर्वृक्षे । रक्तकुसुमे । मन्थावले ॥

धन्वन्तरिः । पुं । देववैद्यविशेषे । नारायणांशे ॥ नारायणांशो भगवान् स्वयं धन्वन्तरि र्महान् । पुरा समुद्रमथने समुत्तस्थौ महोदधेः ॥ सर्ववेदेषुनिष्णातो मन्त्रतन्त्रविशारदः । शिष्योहि वैनतेयस्यशङ्करस्योपशिष्यकः ॥ इति ब्रह्मवैवर्त्तपुराणम् ॥ काशिराजे । दिवोदासे ॥ यथा । अर्हंहिधन्वन्तरि रादिदेवो जरारुजामृत्युहरो ऽमराणाम् । शल्याङ्गमङ्गैरपरैरुपेतं प्राप्तोस्मिगां भूयइहोपदेष्टुम् ॥ धन्वं शल्यशास्त्रम् तस्यान्तंपारमियर्त्ति गच्छति । ऋगतौ । अचइः ॥ विक्रमादित्यसभास्थे वैद्यान्तरे ॥

धन्वन्तरिग्रस्ता । स्त्री । कटुकायाम् ॥

धन्वयवासः । पुं । दुरालभायाम् । धमासा और जवासा इति भाषा ॥ धन्वनोमरुभूमेर्यवासः । तत्रोत्पन्नत्वात् ॥

धन्वयवासकः । पुं । दुरालभायाम् ॥

धन्वयासः । पुं । दुरालभायाम् । यवासे । जवासा इतिभाषा ॥ धन्वनोयासः मरुभवत्वात् ॥

धन्वी । पुं । अर्जुने । पार्थे ॥ ककुभद्रुमे ॥ दुरालभायाम् ॥ वकुले ॥ त्रि । छेके । विदग्धे ॥ चापिनि । धनुर्द्धरे ॥ लोलार्ककेशवौ कोटी गङ्गाद्या नगरं धनुः । कलि र्लक्ष्यः शरो धर्म्मः शिवो धन्वी पुनातुमाम् ॥ धनुश्चापो ऽस्त्यस्य । व्रीह्यादित्वादिनिः ॥

धन्विस्थानम् । न । प्रत्यालीढादिषु ॥ वैशवं समपादञ्च वैशाखं मण्डलं तथा । प्रत्यालीढ मथालीढं स्थानान्येतानि धन्विनाम् ॥ धन्विनां युद्धकाले स्थानम् ॥

धमः । त्रि । अग्निसंयोगकर्त्तरि ॥ शब्दकर्त्तरि ॥ धमतेः पचाद्यच् ॥

धमकः । पुं । कर्मकारे ॥ धमति । ध्माशब्दाग्निसंयोगयोः । ध्मोधमचेति कुन् ॥

धमनः । पुं । नले । नडे । नरकटइति मरसल इतिचप्रसिद्धे तृणे ॥ त्रि । भस्त्राध्मापके ॥ क्रूरे ॥ धमति धम्यते वा । धमध्याने शौचः । बहुलमिति युच् ॥

धमनिः । स्त्री । धमन्याम् ॥ धम्यते । धमिः शौचो ध्याने । अर्त्तिसृ धृधम्यम्यश्यवितृभ्यो ऽनिरित्यनिः प्रत्ययः ॥

धमनी । स्त्री । शिरायाम् । नाड्याम् ॥

कन्धरायाम् ॥ हट्टविलासिन्याम् ॥ हरिद्रायाम् ॥ धम्यते । धमिःसौत्रः । अनिप्रत्ययः । ततः कृदिकारादक्तिन इतिङीष् ॥ नलिकायाम् ॥ पृश्निपर्ण्याम् ॥

धम्मिल्लः । पुं । संयतकचेषु । बद्धकुन्तलेषु । खोपा इतिगौड भाषा ॥ सचकुसुमगर्भो मौक्तिकपद्मरागलतिकादिना बद्धःसंयतोबद्धः केशकलाप इतिभरतः । जूडा इतिभाषा ॥ धमति । धमध्माने सौत्रः । क्विप् । मिलति । मिलसङ्गमे । अच् । धम्चासौमिलश्च । मोनेधातोरिति सोचेषुन भवति । पृषोदरादिः ॥

धरः । पुं । गिरौ । पर्वते ॥ कार्पासतूले ॥ कूर्मराजे ॥ वसुविशेषे ॥ धरति । धृञ्० । पचाद्यच् ॥

धरणः । पुं । अद्रिपतौ ॥ लोके ॥ स्तने ॥ धान्ये ॥ दिवाकरे ॥ सेतौ ॥ न । चतुर्विंशतिरक्तिकारूपे मानभेदे । वल्ले ॥ दशपलमाने । पलंसुवर्णाश्चत्वारः पलानिधरणंदशेतिमनुः ॥ पलदशमांशे । इतिवैद्यकम् ॥ धारणे ॥ षोडशरूप्यमाषकैः परिमिते । पुराणे ॥

धरणिः । स्त्री । भूमौ ॥ धरति । धृञ्० । ध्रियते विश्वमनया । धृङ् अवस्था

नेवा । अर्त्तिसृधृधमीत्यनिः ॥

धरणिधरः । पुं । विष्णौ ॥ धरण्याः धरः ॥ नगे ॥

धरणिस्थः । त्रि । भूतलचारिणि ॥ धरण्यांतिष्ठति । ष्ठा० । कः ॥

धरणी । स्त्री । भुवि ॥ धरणीपतितंतोयं चातकानां रुजाकरम् ॥ शाल्मलिद्रुमे ॥ धरति विश्वम् । धृञ्० । अर्त्तिसृभित्यादिना ऽनिः । कृदिकारादितिङीष् ॥ नाड्याम् ॥ कन्दविशेषे । कन्दालौ । वनकन्दे ॥

धरणीकन्दः । पुं । धरणीनाममूलविशेषे ॥

धरणीकीलकः । पुं । नगे । पर्वते ॥

धरणीधरः । पुं । विष्णौ ॥ पर्वते ॥ कच्छपे ॥ शेषदिग्गजादिरूपेण धरणींधत्ते । धृञ्० । अच् ॥ धरण्याःधरोवा ॥

धरणीपुरम् । न । चतुरस्रमण्डले ॥ पुं । अब्धौ ॥ धरण्याः पुरम् । धरणीपुरंयस्य ॥

धरणीपूरः । पुं । सिन्धौ । समुद्रे ॥

धरणीप्लवः । पुं । समुद्रे ॥ धरणीप्लवो ऽस्मिन् ॥

धरणीश्वरः । पुं । ईश्वरे । शिवे ॥ धरण्याईश्वरः ॥ नृपे ॥

धरणीसुतः । पुं । भौमे ॥ धरण्याः-

सुतः ॥

धरणीसुता । स्त्री । सीतायाम् । जानक्याम् ॥ धरण्याःसुता ॥

धरसंस्थः । त्रि । पर्वताकारे । गिरिसदृशे ॥ धरइव संस्था साहश्यं यस्य ॥

धरा । स्त्री । भुवि । पृथिव्याम् ॥ गर्भाशये । जरायौ ॥ मेदसि ॥ नाड्याम् ॥ महादानविशेषे ॥ धरतिविश्वम् । धृञ्० । धराः शैलाः सन्त्यस्यांवा । यद्वा । भ्रियते । धृङ्० । अच् ॥ तीर्थविशेषे ॥ यत्रस्नानात शोकनाशो भवति ॥

धराकदम्बः । पुं । धाराकदम्बवृक्षे । प्रावृष्ये । भृङ्गवल्लभे ॥

धराकदम्बकः । पुं । धराकदम्बे ॥

धरात्मजः । पुं । भौमे । मङ्गलग्रहे ॥ धरायाः आत्मजः ॥

धराधरः । पुं । वराहरूपे विष्णौ ॥ अशेषशेषैः शेषाद्यैरशेषां धरां धारयति तथा ॥ धरायाधरः ॥ पर्वते ॥

धरामरः । पुं । भूमिदेवे । ब्राह्मणे ॥ यथा । धरामरेन्द्रपाणिषु प्रधातुमीहसे धरांयदिक्षमादरात् सदा प्रदेहि तत्फलप्रदाम् । पयस्विनीं स्वलङ्कृतांसुवंशभुक्तिमुक्तिदां यदातदाभवेच्छिशुर्निमेदशंनिमेवरूमिति वीरवत् ॥

धरित्री । स्त्री । भूमौ ॥ धरतिविश्वम् । धृञ्० । अशि० इत्रः । गौ० ङीष् ॥

धरिमा । पुं । रूपे ॥ तुलायाम् ॥ यथा । तथा धरिममेयानां शताद्भ्यधिके वधः ॥ भ्रियते । धृञ्० । हृभधृसृस्तृशृभ्यइमनिच् ॥

धरिममेयः । त्रि । तुलापरिच्छेद्ये ॥

धर्त्तव्यः । त्रि । धारणीये ॥

धर्तम् । न । आलये । गृहे ॥ धरतिभ्रियते वा । धृञ्० । गुधृवीपचिवचियमिसदिचदिभ्यस्त्रः ॥

धर्म्मः । पुं । न । शास्त्रविहितकर्मानुष्ठानजन्येऽपूर्वेपूर्वमीमांसा प्रसिद्धेभाविफलाधारभूते पुण्ये । श्रेयसि । सुकृते । वृषे ॥ यथा । श्रुतिस्मृतिभ्यामुदितं यत् स धर्मः प्रकीर्त्तित इति देवीभगवतम् ॥ सचवर्णाश्रमादिधर्मरूपः । युथोक्तंभविष्यपुराणे । वर्णधर्मःस्मृतस्त्वेकआश्रमाणामतःपरम् । वर्णाश्रमस्तृतीयस्तुगौणोनैमित्तिकस्तथेति ॥ तत्रवर्णधर्मोनित्यमदंब्राह्मणोवर्जयेदित्यादिः । आश्रमधर्मोऽग्नीन्धनभैक्ष्यब्रह्मचर्यादिः । वर्णाश्रमधर्मः पालाशोदण्डो ब्राह्मणस्येत्येवमादिः । गुणधर्मः शास्त्रीयाभिषेकादिगुणयुक्तस्यराज्ञः प्रजापालनादिः । निमित्तधर्मो विहि

ताकरणप्रतिषिद्धसेवननिमित्तंप्रा-
यश्चित्तम् ॥ * ॥ साधारणधर्मो
पि । सत्याहिंसादिः । न हिंस्यात्
सर्वाभूतानीत्याचाण्डालं साधारणो
धर्मः ॥ * ॥ मनुस्तु । विद्वद्भिः सेवि
तः सद्भिर्नित्यमद्वेषरागिभिः । हृद
येनाभ्यनुज्ञातो यो धर्म्मस्तं निवोध
तेत्याह । अस्यव्याख्यायां कुल्लूकभट्ट
प्रणीताःश्लोकाः । यथा । वेदविद्भि
र्ज्ञात इति प्रयुञ्जानो विशेषणम् ।
वेदादेवपरिज्ञातो धर्म इत्युक्तवान्
मनुः ॥ हृदयेनाभिमुख्येन ज्ञातइ-
त्यपिनिर्दिशन् । श्रेयःसाधनमित्या
ह तत्त्वभिमुखं मनः ॥ वेदप्रमाण
कः श्रेयःसाधनं धर्मइत्यतः । मनू
क्तमेवमुनयःप्रणिन्युर्धर्मलक्षणमिति
॥ अदृष्टार्थे । चोदनालक्षणे । वेदोक्ते
भ्युदयनिःश्रेयसहेतौ ॥ तत्रयागदा
नाद्यनुष्ठानजनितो धर्मो ऽभ्युदयहे
तुः । अष्टाङ्गयोगानुष्ठानजनितस्तु निः
श्रेयसहेतुर्भवति ॥ वेदविहिते प्रा
णिना मभ्युदयनिःश्रेयससाधने प्रवृ
त्तिनिवृत्तिलक्षणे ॥ वर्णाश्रमतदा
चारव्यङ्ग्ये ॥ विहितक्रियया साध्यो
धर्मः पुंसां गुणो मतः । प्रतिषिद्ध
क्रियासाध्यःसगुणो ऽधर्म उच्यते ॥
धर्मस्त्वाचरणंकार्यंपुरुषेण विजानता ।

सन्नियम्येन्द्रियवर्गं वैयग्र्यमनरकं व्रजे
त् ॥ मानुष्यं दुर्लभं मातः खण्डेस्मिन्
भारते शुभे । आहारादिसुखं नूनंभवे
त् सर्वासुयोनिषु ॥ प्राप्य तं मानुषं दे
हं कर्त्तव्यं धर्म्मसाधनम् । स्वर्गमोक्षप्रदं
नृणां दुर्लभं चान्ययोनिषु ॥ इतिश्री
देवीभागवते ३ स्कन्धे २५ ऽध्यायः
॥ धर्म्मस्य चत्वारः पादायथा । धर्म
स्य प्रथमः पादः सत्यमेतत्कृते युगे च
। द्वितीयस्तु तथाशौचं दयापादस्तृ-
तीयकः ॥ दानंपादश्चतुर्थश्च पुराण
ज्ञावदन्तिवैइति ॥ चतुष्पात् सकलो
धर्मइतिमनुः । तत्रापिसत्यंवरवत्स
पः खञ्जंदयापिच । सत्यपादेकृते
लोपेधर्मलोपः प्रजायत इत्यागमः ॥
* ॥ आत्मनि ॥ कल्पितस्य सर्वस्य-
स्वस्मिन् धारणात् ॥ जीवे ॥ देहस्य
धारणात् ॥ आचारे ॥ स्वभावे ॥ उ
पमायाम् ॥ क्रतौ ॥ अहिंसायाम् ॥
उपनिषदि ॥ न्याये ॥ षण्मात्रस्याद्या
दशप्रभेदे (ऽ॥।) ॥ पुं । धनुषि ॥
यमे ॥ सोमपे ॥ सत्सङ्गे ॥ अर्हति
॥ ब्रह्मणोदक्षिणस्तनाज्जाते देवता
विशेषे ॥ न्यूनदेशवृत्तौ ॥ * ॥ न ।
दानादौ ॥ धर्मंशनैः सञ्चिनुया द्व-
ल्मीकमिवपुत्तिका । परलोक सहा
यार्थं भास्वन्तं खशरीरिणाम् ॥ धर्म

मति र्भवतु वः सततोत्थितानां स ह्येक एवपरलोकगतस्य बन्धुः । अर्थाः स्त्रियश्च निपुणैरपि सेव्यमाना नैवात्मभाव मपियान्ति नचस्थिरत्त्वम् ॥ सदाचारस्य स्थाने ॥ धरतिविश्वम् ध्रियतेवाधारयतिवा । धृञ्० । अर्त्ति स्तुसुहुसृधृक्षि क्षुभायावापदियक्षि नीभ्योमन्निति मन् ॥

धर्म्मकर्म्म । न । धर्म्मकार्य्ये । शुभादृष्टप्रतिपादकक्रियायाम् ॥ वेदप्रणिहितं धर्म्मकर्म्म तन्मङ्गलं परमिति ब्रह्मवैवर्त्त पुराणम् ॥

धर्म्मकथादरिद्रः । त्रि । भारतेकलिजन्मनिमानवे ॥ इतिहेमाद्रिः ॥

धर्म्मकायः । पुं । बुद्धे ॥ इतित्रिकाण्डशेषः ॥ धर्म्माय कायोयस्य ॥

धर्म्मकीलः । पुं । राजशासने ॥ इ०त्रि० ॥

धर्म्मकीलकः । पुं । ब्रह्मशासने ॥ इतिशब्दरत्नावली ॥

धर्म्मकेतुः । पुं । बुद्धे ॥

धर्म्मक्षेत्रम् । न । धर्म्मभूमौ । धर्म्मस्य पूर्वं मविद्यमानस्योत्पत्ते र्विद्यमानस्यचवृद्धे र्निमित्ते ॥ धर्म्मस्यक्षेत्रम् ॥ कुरुक्षेत्रे ॥ यथा । ब्रह्मवेदिः कुरुक्षेत्र पञ्च रामहृदान्तरम् । धर्म्मक्षेत्रं कुरुक्षेत्रं द्वादशयोजनावधि ॥ * ॥ अपिच । तरन्तुकारन्तुकयो र्यदन्तरं रामहृदानाञ्च मचक्रुकस्यच । एतत् कुरुक्षेत्र समन्तपञ्चकं प्रजापते रुत्तरवेदिरुच्यते ॥ त्रि । धर्म्माधारे ॥

धर्म्मगुप् । त्रि । धर्म्मरक्षके ॥ धर्म्मं गोपायति । गुपू० । क्विप् ॥

धर्म्मघटः । पुं । सौरवैशाखे प्रत्यहदातव्ये सुगन्धोदकपूर्णकलसे ॥

धर्म्मचक्रः । पुं । बुद्धे ॥

धर्म्मचक्रभृत् । पुं । जिने ॥ इतिध० ॥

धर्म्मचारिणी । स्त्री । भार्य्यायाम् ॥

धर्म्मचिन्तनम् । न । धर्म्मचिन्तायाम् । पुण्यभावनायाम् ॥

धर्म्मचिन्ता । स्त्री । उपाधौ । धर्म्मचिन्तने ॥ धर्म्मस्यचिन्ता ॥

धर्म्मजीवनः । पुं । ब्राह्मणविशेषे । याजनप्रतिग्रहादिना परस्य धर्म्ममुत्पाद्य यो ब्राह्मणो जीवति तस्मिन् ॥

धर्म्मज्ञः । त्रि । धर्म्मज्ञानविशिष्टे ॥

धर्म्मणः । पुं । वृक्षभेदे । धामिनिया' इति गौडभाषाप्रसिद्धे ॥ सर्पप्रभेदे । ढेमना इतिगौडभाषा ॥

धर्म्मतीर्थम् । न । तीर्थविशेषे ॥

धर्म्मत्वम् । न । वृत्तिमत्त्वे । आधेयत्त्व इतियावत् ॥ यथा । गगनादे र्वृत्तिमत्त्वलक्षणधर्म्मत्त्वाभा वादिति जगदीशः ॥

धर्म्मदानम् । न । प्रयोजनमनपेक्ष्यके

वत्सधर्मवृद्ध्यापात्रेभ्योदाने ॥ यथा हरिवंश: । पात्रेभ्योदीयते नित्य-मनपेक्ष्य प्रयोजनम् । केवलं धर्म-बुद्ध्यायत् धर्मदानं प्रचक्षत इति ॥

धर्म्मदुघा । स्त्री । हविर्दोग्ध्याम् ॥ धर्मान् दोग्धीतिविग्रहे दुहे:कप् घश्चाऽन्तादेश: ॥

धर्म्मद्रवा । स्त्री । } गङ्गायाम् । सिद्धु
धर्म्मद्रवी । स्त्री । } सिन्धौ ॥ यथा । विष्णुपादार्घसम्भूते गङ्गे त्रिपथगामिनि । धर्मद्रवीतिविख्याते पापंमेहर जाह्नवीति ॥

धर्म्मधातु: । पुं । सुगते । बुद्धे ॥

धर्म्मध्वजी । त्रि । जीविकार्थं जटादि-धारिणि । लिङ्गवृत्तौ ॥ यो बहुज-नसमक्षं धर्ममाचरति स्वत: परत श्चलोके ख्यापयति तस्य धर्मो ध्वजं चिह्नमिवेति धर्मध्वजी । धर्मस्यध्व जश्चिह्नम् । धर्मोध्वजइववा ॥ धर्मध्व जोऽस्यास्ति । अतइनि: ॥

धर्म्मनैपुण्यकाम: । त्रि । गृहीतवेदा-ध्ययननियमजन्यादृष्टेच्छौ ॥

धर्म्मपत्तनम् । न । मरिचे ॥ धर्मपत्तने जातम् । तत्रजातइत्यण् । संज्ञापूर्वक त्वान्नवृद्धि: ॥ आवन्त्याम् । धर्मपुर्याम् ॥

धर्म्मपत्नी । स्त्री । प्रथमोढायां सवर्णायाम् ॥ कीर्त्तौ ॥ श्रियि ॥ वाचि ॥

स्मृतौ ॥ मेधायाम् ॥ धृतौ ॥ क्षमायाम् ॥ नारीणां मध्ये कीर्त्याद्या: सप्तधर्मपत्न्यो भगवद्विभूतय: । या सामाभासमात्रसम्बन्धेनापि जन:-सर्वलोकादरणीयो भवति तासां सर्वस्त्रीषूत्तमत्त्वमतिप्रसिद्धमेव ॥

धर्म्मपत्रम् । न । यज्ञोदुम्बरे ॥ धर्मार्थं पत्रे ॥

धर्म्मपाल: । पुं । वर्णाश्रमधर्मपालके ॥ धर्मम् पालयति । पाल० । कर्मण्यण् ॥

धर्म्मपुत्र: । पुं । युधिष्ठिरेन्नृपे । अजातशत्रौ ॥ धर्मस्यपुत्र: ॥ नरनारायणयोर्ऋष्यो: ॥ धर्मत:कृतेपुत्रे । धरम् वेटा इति भाषा ॥

धर्म्मप्रधान: । पुं । धार्मिके ॥ धर्म:प्रधानोयस्य ॥

धर्म्मभाणक: । पुं । भारतादिपाठके ॥

धर्म्ममूलम् । न । अद्रोहादिषु ॥ यथा अद्रोहश्चाप्यलोभश्च दमोभूतदया तप: । ब्रह्मचर्यं तत: सत्यमनुक्रोश:क्षमाधृति: । सनातनस्यधर्मस्यमूलमेतद्दुरासदमिति मत० पु० ॥

धर्म्ममेघ: । पुं । असम्प्रज्ञातसमाधौ ॥ सर्वतो विरक्तस्य समाधिफलमपि-सुख मनपेक्ष्यमाणस्य योगिनोदृढ भूमि: सन् धर्ममेघ इत्युच्यते । उ

त्तात्व । प्रसङ्ख्यानेप्यकुसीदस्य सर्वथाविवेकख्यातेर्धर्ममेघःसमाधिस्ततः क्लेशकर्मनिवृत्तिरिति ॥

धर्म्मयुक्तः । त्रि । नित्यनैमित्तिकस्वधर्माभ्यासिनि ॥

धर्म्मयुक् । त्रि । धार्मिके । धर्मयुक्ते ॥

धर्म्मयूपः । पुं । श्रीहरौ ॥ यूपे पशुवत् भगवत्समाराधनात्मका धर्मास्तत्रबध्यन्ते ऽतो धर्मांणांयूपः ॥ यथायूपः पशूनांनियोजनस्थानमेवं विष्णुःस्वसमाराधनात्मकानां धर्मांणां स्थानमित्यर्थः ॥

धर्म्मराजः । पुं । यमे ॥ बुद्धे ॥ युधिष्ठिरनृपे ॥ धर्मेणराजते । राजृ० । पचाद्यच् ॥ धर्मस्यराजा वा । राजाहःसखिभ्यष्टच् ॥ धर्मश्चासौराजाचेति वा ॥

धर्म्मराजपरीक्षा । स्त्री । धर्म्माधर्मपरीक्षणे ॥ यथाह बृहस्पतिः । पत्रद्वये लेखनीयौ धर्म्माधर्म्मौ सितासितौ । । जीवदानादिकैर्मन्त्रै र्गायत्र्याद्यैश्च सामभिः ॥ आराजन्यपूजयेद्गन्धैः कुसुमैश्चसितासितैः । अभ्युक्ष्य पञ्चगव्येन मृत्पिण्डान्तरितौ ततः ॥ समौकृत्वा नवेकुम्भे स्थाप्यौ चानुपलक्षितौ । ततःकुम्भात् पिण्डमेकं गृह्णीयादविलम्बितः ॥ धर्मेगृहीतेशुद्धःस्यात् सम्पूज्यश्चपरीक्षकैरिति ॥ जीवदानमन्त्रादिकं शारदायां द्रष्टव्यतत्त्वेचद्रष्टव्यम् ॥

धर्म्मलक्षणम् । न । धर्मस्वरूपे ॥ धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः । धी र्विद्या सत्य मक्रोधो दशकं धर्मलक्षणम् ॥ इति मनुः ॥ अपि च । पात्रेदानं मतिःकृष्णे मातापित्रोश्चपूजनम् । श्रद्धा बलि र्गवांग्रासः षड्विधं धर्मलक्षणम् ॥

धर्म्मवाणिजिकः । पुं । पुण्यकर्म्मफलकामिनि ॥

धर्म्मवान् । त्रि । पुण्यवति । धर्मविशिष्टे ॥ धर्मोस्त्यस्यास्मिन् वा । मतुप् ॥

धर्म्मवर्ग्गः । पुं । चतुर्वर्गे ॥ धर्मघटितो वर्गः ॥

धर्म्मवासरः । पुं । पूर्णिमायाम् ॥

धर्म्मवाहनः । पुं । श्रीसदाशिवे ॥ धर्मोवाहनमस्य ॥ न । धर्मस्ययाने ॥

धर्म्मवित् । त्रि । धर्मज्ञे ॥

धर्म्मविप्लवः । पुं । धर्म्मव्यतिक्रमे । अधर्मे ॥

धर्म्मवैतंसिकः । पुं । पापकर्मणा धनमासाद्यात्मनो धार्म्मिकत्वख्यापनाय दानकर्त्तरि ॥

धर्म्मव्याधः । पुं । पापपुरुषविशेषे ॥

धर्म्मशास्त्रम् । न । मन्वाद्युक्तस्मृतौ । धर्मसंहितायाम् ॥ धर्मप्रतिपादकं शास्त्रम् ॥ धर्मशास्त्रप्रयोजका यथा

। मन्वत्रिविष्णुहारीतयाज्ञवल्क्योश नोऽङ्गिराः । यमापस्तम्बसंवर्त्ताःका त्यायनबृहस्पती ॥ पराशरव्यासश ङ्खलिखिता दक्षगौतमौ । शाता तपो वशिष्ठश्च धर्मशास्त्र प्रयोजकाः इतियाज्ञवल्क्यः ॥ उशनश्शब्दपर्य न्तो द्वन्द्वैकवद्भावः । नेयं परिसङ्ख्या किन्तु प्रदर्शनार्थमेतत् । अतोबौधा यनादेरपि धर्मशास्त्रत्वमविरुद्धम् । एतेषां प्रत्येकं प्रामाण्येपि साकाङ्क्षाणां साकाङ्क्षापरिपूरणं मन्यतः क्रियते । विरोधेतु विकल्पः ॥

धर्म्मशीलः । त्रि । धर्मयुक्ते । धार्मिके ॥ धर्मःशीलमस्य ॥

धर्म्मशुद्धिः । स्त्री । अधर्मान्निष्कृत्यनिर्द्धा रणे ॥

धर्म्मसंस्थापनम् । न । वेदमार्गपरिरक्ष णे ॥ धर्मस्य सम्यक् अधर्मनिवारणेन स्थापनम् ॥

धर्म्मसंहिता । स्त्री । मन्वाद्युक्तस्मृतौ ॥ धर्मबोधार्थं रचिता । सम्पूर्वोद्दधा तेःकर्मणिक्त दधातेर्हिः ॥

धर्म्मसम्मूढचेताः । त्रि । धर्मे विषये- निर्णायकप्रमाणादर्शनात् संशयैर्व्या सचित्ते ॥ धर्मे सम्मूढं चेतोऽस्य ॥

धर्म्मसावर्णिः । पुं । एकादशमनौ ॥

धर्म्मसुतः । पुं । युधिष्ठिरे ॥ धर्मस्यसुतः॥

धर्म्मसूः । पुं । कलिङ्गे । धूम्याटपक्षिणि॥

धर्म्मस्थः । पुं । प्राड्विवाके ॥ धर्मेतिष्ठ ति । ष्ठा० । कः ॥

धर्म्मस्थानम् । न । धर्माध्यक्षसभवने ॥

धर्म्माङ्गम् । न । ब्रह्मचर्यादिदशसु ॥ यथा । ब्रह्मचर्येणसत्त्येनतपसाच प्र वर्त्तते । दानेन नियमेनापि क्षमा शौचेनवल्लभ ॥ अहिंसयासुशान्त्या च अस्तेयेनापिवर्त्तते। एतैर्दशभिर ङ्गैस्तुधर्ममेवप्रसूचयेदितिपा० भू०॥

धर्म्मात्मजः । पुं । युधिष्ठिरे ॥

धर्म्मात्मा । पुं । धर्मस्वभावे । धर्मानुगत चित्ते ॥ धर्मआत्मायस्य ॥ मुनिवि शेषे ॥

धर्म्माधर्म्मपरीक्षणम् । न । मिताक्षरो क्तपरीक्षाविशेषे ॥

धर्म्माधर्म्मवित् । पुं । मीमांसके ॥ धर्मा ऽधर्मौ विधिनिषेधचोदनागम्यौपर मार्थौविति मीमांसकस्यकल्पनामा त्रम् । देशकालादिषु धर्मा ऽधर्मयो र्विप्रतिपत्तिदर्शनात् ॥

धर्म्माधिकरणः । पुं । धर्माध्यक्षे ॥ तल्ल क्षणं यथा । समःशत्रौचमित्रेच सर्व शास्त्रविशारदः । विप्रमुख्यःकुली नश्च धर्माधिकरणो भवेत् ॥ इतिम त० पु० ॥ न । राज्ञोविचारस्थाने ॥ यथा । धर्मशास्त्रानुसारेण अर्थशास्त्र

निरूपणम् । यत्राधिक्रियते स्थाने धर्माधिकरणं हितत् ॥ इति वी० मि० ॥ पुरुषान्तरतत्त्वज्ञाः प्राशव स्त्राप्यलोलुपाः । धर्माधिकरणे कार्या जनाह्वानकरानराः ॥ इति मत्स्य पु० ॥

धर्म्माधिकरणी । पुं । धर्माधिकरणविशिष्टे । धर्माध्यक्षे । प्राड्विवाके ॥

धर्म्माध्यक्षः । पुं । धर्माधिकरणि ॥ कुलशीलगुणोपेतः सर्वकर्मपरायणः । प्रवीणः प्रेषणाध्यक्षो धर्माध्यक्षो विधीयते ॥ परमेश्वरे ॥ धर्मपदंलक्षणयाधर्माधर्मप्रतिपादकम् । तथाच धर्माधर्मौ फलदानाय अध्यक्षावस्येति तौ अध्यक्षयतीतिवा ॥

धर्म्माभासः । पुं । श्रुतिस्मृतीतरशास्त्रोक्ते सुकृते ॥ यथा । श्रुतिस्मृतिभ्यामुदितं यत् स धर्मः प्रकीर्त्तितः । अन्यशास्त्रेषु यः प्रोक्तो धर्माभासःसउच्यत इति देवीगीता ॥

धर्म्मारण्यम् । न । पुण्यवनविशेषे ॥ तीर्थविशेषे ॥

धर्म्मासनम् । न । राज्ञोधर्मदर्शनार्थमासने । विचारासने । व्यवहारासने ॥

धर्म्मास्तिकायः । पुं । पुद्गलास्तिकायादन्यस्मिन्नभ्युदयहेतौ ॥

धर्म्मिणी । स्त्री । रेणुकायाम् ॥

धर्म्मी । त्रि । पुण्ययुते । धर्मवति ॥ धर्मो विद्यतेऽस्य । इनिः ॥ अधिकदे शवृत्तौ ॥ धर्मो यागादिरूपाः श्रौताः स्मार्त्तास्तान्त्रिकाश्च भगवत्समाराधनरूपाःग्राह्यत्वेनस्थाप्यत्वेनचसन्त्यस्येतिधर्मी । इनिः ॥ धर्म्यंशे सर्वमभ्रान्तं प्रकारेतु विपर्ययः ॥

धर्म्मिष्ठः । त्रि । धार्मिके ॥

धर्मोत्तरः । त्रि । धर्मप्रधाने ॥

धर्म्मोपदेशकः । पुं । श्रीगुरौ ॥

धर्म्यम् । त्रि । धर्मयुक्ते ॥ धर्मादनपेतम् । धर्मपथ्यर्थन्यायादनपेत इति यत् ॥ धर्मेणप्राप्ये ॥ नौवयोधर्मेत्यादिनायत् ॥

धर्म्यविवाहः । पुं । ब्राह्मदैवार्षगान्धर्वप्राजापत्यरूपे विवाहविशेषे ॥

धर्षः । पुं । प्रागल्भ्ये ॥ अमर्षे ॥ शक्तिबन्धने ॥ संहतौ ॥ हिंसायाम् ॥ धर्षणम् । धृषेर्भावे घञ् ॥

धर्षकः । त्रि । अभिभवकर्त्तरि ॥ नटे ॥

धर्षकारिणी । स्त्री । दूषितायां कन्यायाम् ॥

धर्षणम् । न । परिभवे ॥ रते ॥ धृषे ल्युट् ॥ धर्षशब्दार्थे ॥

धर्षणी । स्त्री । अभिसारिकायाम् । असत्याम् ॥ धर्षति । ञिधृषा० । ल्युट् । ङीप् ॥

धर्षणीयः। त्रि। अभिभवनीये। धृष्ये॥

धर्षिणी। स्त्री। पुंश्चल्याम्॥

धर्षितम्। न। रतौ। मैथुने॥ इति त्रिकाण्डशेषः॥ त्रि। कृतधर्षणे। परिभूते। तिरस्कृते॥ धृषेः क्तः। इड्गुणौ॥

धर्षिता। स्त्री। असत्याम्॥ तिरस्कृतायाम्॥

धलखण्डः। पुं। द्रढकण्टकवृत्ते। धलआँकडा इति गौड भाषा॥

धलखण्डकः। पुं। धलखण्डे॥

धवः। पुं। नरे॥ धूर्ते॥ पत्यौ॥ स्वनाम्नैव ख्याते वृक्षे। मधुरत्वचे। पीतफले। गौरे। शुष्कवृक्षे॥ अस्य गुणाः। धवः शीतः प्रमेहार्शःपाण्डुपित्तकफापहः। मधुरस्तुवरस्तस्य फलञ्च मधुरं मनागिति भावप्रकाशः॥ धवति धुवति धुनोति धुनाति वा। धूञ् धुञ् कम्पने धविधूनने वा। पचाद्यच॥ यद्वा। धूयते। ऋदोरप्॥

धवलः। पुं। वृषश्रेष्ठे। महोक्षे॥ चीनकर्पूरे॥ धववृक्षे॥ रागविशेषे॥ वीरवृक्षे॥ पाण्डुप्रभेदे खगे। धौला इति भाषा॥ धवलः पाण्डुरुद्दिष्टो रक्तपित्तहरो हिमः। रसे पाके च मधुरः सङ्ग्राही वातशान्तिकृत्॥ न। श्वेतमरिचे॥ छन्दोभेदे॥ यथा। द्विजवरगणयुगसनगणनगणयुगकलं विमलवलयमपि च कलयसकलजनसुखम्। फणिपतिवरभणितममलधवलमिह हितं विमलकविसुहृदिव ललितमिति भुवि विदितम्॥ यथा॥ उपगतइह सुरभिसमय इतिसुमुखि गते निधुवनमधिपिब सह मधुजहि विषमपदे। कमलनयन मनुसरसखि तवरभसपरं प्रियतमगृहगमनमुचितमनुचितमपरम्॥ त्रि। शुक्ले। सितवर्णाढ्ये॥ सुन्दरे॥ धाञ्०। बाहुलकात् कलः धातोर्ह्रस्वश्च॥

धवलपक्षः। पुं। हंसे॥ शुक्लपक्षे॥

धवलपाटली। स्त्री। सितपाटलिकायाम्॥

धवलमृत्तिका। स्त्री। खटिकायाम्॥

धवलयावनालः। पुं। यावनालविशेषे। तारतण्डुले। पाण्डुरे॥

धवला। स्त्री। शुक्लवर्णायाङ्गवि॥ धवलवर्णयोगात् अनुदात्तत्वाभावान्ङीष्॥

धवलाङ्कः। पुं। प्रतापसे॥ धवलश्चासावर्कश्च॥

धवली। स्त्री। धवलवर्णायाङ्गवि। धवलायाम्॥ गौरादित्वान् ङीष्॥

धातुः

धवलोत्पलम् । न । कुमुदे ॥

धवाणकः । पुं । समीरणे । वायौ ॥ धुनाति । धूञ्० । आणकोलू धूशिक्षि धाञ्भ्यः ॥

धविचम् । न । यज्ञव्यजनव्यालनव्यजने । अग्नेः सन्धुक्षणायमृगत्वचारचिते व्यजने ॥ धूयते ऽनेन । धूञ्० । अर्त्तिलू धूसूइति इत्रः ॥

धाः । पुं । ब्रह्मणि ॥ धारके ॥ वृहस्पतौ ॥

धाकः । पुं । वृषे ॥ भोजने । आहारे ॥ आधारे ॥ दधाति । डुधाञ्० । कृदाधारार्चिकलिभ्यः कः । इतिकः ॥

धाटी । स्त्री । अभ्यवस्कन्दे । प्रपाते । शत्रोः सम्मुखगमने ॥

धाणकः । पुं । दीनारभागे । स्वर्णभूषाभागे ॥ दधाति । डुधाञ्० । आणकोलू धूशिक्षिधाञ्भ्यः ॥

धातकी । स्त्री । मद्यपुष्पायाम् । धातृपुष्प्याम् । धाइ इतिप्रसिद्धे गुल्मे ॥ धातकी कटुका शीता मदकृत् तुवरा लघुः । तृष्णातीसारपित्तास्रविषक्रिमिविसर्पजित् ॥ अस्याः पुष्पाणि ग्राह्याणि ॥ धातुं करोति । तत्करोतीतिणिच् । टिलोपः । कुन् । पिप्पल्यादित्वात् ङीष् ॥

धातुः । पुं । इन्द्रियेषु ॥ शब्दयोनौ । भ्वेधस्पर्द्धादौ ॥ अत्रार्थनिर्णयार्थं भूत्वं यथा । क्रियावाचित्व माख्यातुं प्रसिद्धोर्थः प्रदर्शितः । प्रयोगतो ऽन्ये मन्तव्या अनेकार्था हि धातवइति ॥ सकर्मकाकर्मकभेदेन धातवो द्विविधाः । तथाहि । सत्ताजीवनदर्पभीतिशयनक्रीडानिवासक्षयाव्यक्तध्वाननभोगतिस्थितिजराखज्जाप्रमादोदये । मोहेखेटनवेगयुद्धदहन ख्यातिक्षरोन्मादकेशुद्धिस्वेदपलायनभ्रमणकेशाल्तौस्तुतौमज्जने ॥ इत्तौजागरशोषवक्रगमनोत्साहेमृतौ संशयेच्छानैमन्दगतौवन्दत्त्यपतनेचेष्टाक्रुधौरोदने । इद्धौहावकृतौच सिद्धिविरतौहर्षोपवेशेश्वलेकम्पोद्वेगनिमेषभङ्गयतनाद्ये धातवो ऽकर्मकाः ॥ दौर्बल्यादिषु चार्थेषु वर्त्तमानास्तु धातवः । वाचकाभावमानत्व यतस्तस्मादकर्मकाः ॥ कौटिल्यादिषु चार्थेषु प्रोक्तायेतेतु धातवः । तदद्भावे ऽकर्मकाः स्युस्तदत् क्र्यांसकर्मकाइति ॥*॥ आकाशादिमहाभूतेषु ॥ शब्दाद्याकाशादिगुणेषु ॥ रसादिषु । रसासृङ्मांसमेदोस्थिमज्जाशुक्राणि धातव इत्युक्तेषु ॥ गैरिकमनःशिलाद्यश्मविकारे ॥ श्लेष्मादौ ॥ तेधातवोपिविद्वद्भिर्गदिता देहधारणात् । अत्राहसुश्रुतः । विसर्गादानविक्षे-

यैःसोमसूर्यानिलाः यथा। धारयन्ति जगद्देहंकफपित्तानिलास्तथेति॥ अस्थि॥ स्वर्णादौ॥ सुवर्णरूप्यताम्रा णिहरितालंमनःशिला। गैरिकाञ्जनकासीससीसलोहाः सहिङ्गुलाः। गन्धकोऽभ्रकमित्याद्या धातवोगिरिसम्भवाः॥ *॥ नवधातवोयथा। हेमतारारनागाश्च ताम्रङ्गेच तीक्ष्णकम्। कांस्यकं कान्तलोहश्च धातवो नव कीर्त्तिताः॥ *॥ अष्टधातवोयथा। हिरण्यं रजतं कांस्यं ताम्रं सीसकमेवच। रङ्ग मायसरैत्यच्च धातवोष्टौप्रकीर्त्तिता इतिदानसागरः॥ अपिच। सुवर्णं रजतं ताम्रं लोहं कुप्यञ्च पारदम्। वङ्गञ्च सीसक ञ्चैवइत्यष्टौदेवसम्भवा इतिवैद्यकम्॥ *॥ सप्तधातवो यथा। स्वर्णं रूप्यञ्च ताम्रञ्च रङ्गं यसदमेवच। सीसं लोहञ्च सप्तैते धातवो गिरिसम्भवाः इतिभावप्रकाशः॥ *॥ वलीपलितखालित्यकार्श्यावल्यजरामयान्। निशार्य्यदेहंदधतिन्वर्णांस्तद्धातवोमताः॥ *॥ सप्तोपधातवो यथा। माचिकंतुत्थिकाभ्रेचनीलाञ्जनशिलाऽलकाः। रसकश्चेतिविज्ञेयाएतेसप्तोपधातवः॥*॥ शरीरस्थसप्तधातुभवसप्तोपधातवो यथा। स्तन्यं रजश्च नारीणां कालेभवति गच्छति। शुद्धमांसभवःस्नेहो यःसा सङ्कीर्त्त्यतेवसा। स्वेदोदन्तास्तथाकेशा स्तथैवोजश्चसप्तमम्। इतिधातुभवाज्ञेयाएतेसप्तोपधातवः॥ इतिसुखबोधः॥ *॥ लोकेषु॥ वस्तुनि॥ धीयते सर्वैर्निःचिप्यते सुप्यादावस्मिन्नितिव्युत्पत्त्या आत्मनि॥ दधाति शोभां धीयते वा। डुधाञ्०। सितनिगमिमसीतितुन्॥ शरीरदूषणाद्दोषा मलिनी करणान्मलाः। धारणाद्धातव स्तेस्यु र्वातपित्तकफास्त्रयः॥*॥ हरितालं हरेर्वीर्यंलक्ष्मीवीर्यं मनःशिला। पारदं शिववीर्यंस्याद्गन्धकं पार्वतीरजः॥

धातुकाशीशम्। न। } द्रव्यविशेषे। धातुकासीसम्। न। } कासीसे॥

धातुघ्नम्। न। काञ्जिके॥

धातुद्रावकम्। न। टङ्कणे॥

धातुनाशनम्। न। काञ्जिके॥

धातुपः। पुं। शरीरस्थप्रथमधातौ। रसइतिख्याते॥

धातुपुष्पिका। स्त्री। धातुपुष्प्याम्। धाइफूल इतिभाषा॥

धातुपुष्पी। स्त्री। धातुपुष्पिकायाम्। धातक्याम्॥

धातुभृत्। पुं। पर्वते॥ त्रि। धातुपो

षके ॥

धातुमाक्षिकम् । न । माक्षिके । पीतके ॥

धातुमारिणी । स्त्री । सर्जिकायाम् ॥

धातुराजकम् । न । रेतसि ॥

धातुवल्लभम् । न । टङ्कणे ॥

धातुवादी । पुं । कारन्धमिनि । धातुवादरते ॥

धातुवैरी । पुं । गन्धके ॥ इति शब्दचं० ॥

धातुशेखरम् । न । कासीसे ॥

धातूपलः । पुं । कठिनिकायाम् ॥

धाता । पुं । अजयोनौ । ब्रह्मणि ॥ उपादानत्वात् सर्वस्य कर्म्मफलजातस्य विचित्रतया प्राणिभ्योविभक्तरि । पोषयितरि । कर्मफलविधातॄणां मध्ये विश्वतोमुखोधाता सर्वकर्मफलदातेश्वरविभूतिः ॥ धातुर्गतिर्विचित्रेयं दुर्ज्ञेयाभुवनत्रये ॥ विष्णौ । अीपत्नौ ॥ अनन्तादिरूपेण विश्वं दधाति धारयति । दधाते स्तृच् ॥ भृगुसुनेः पुत्रे ॥ दशमेवत्सरे ॥ यथा । निष्पत्तिः सर्वशस्यानां मध्याधातरिकीर्त्तिता । इक्षुक्षीरगुडादीनां प्रबलत्वंवरानने ॥ षष्ठमावत्ताष्टमेभेदे (।।।ऽ।) ॥ त्रि । पालके ॥ धारणपोषणसामर्थ्ययुक्ते ॥ धारके ॥ दधाति । डुधाञ्० । तृच् ॥

धातृपुत्रः । पुं । सनत्कुमारे ॥ ब्रह्मणः सुतमात्रे ॥

धातृपुष्पिका । स्त्री । धातक्याम् ॥ धातृपुष्पमस्याः । शैषिकः कप् ॥

धातृपुष्पी । स्त्री । धातक्याम् ॥ धातृपुष्पमस्याः । पाक्षिकःकवभावः ॥

धात्रिका । स्त्री । आमलक्याम् ॥

धात्री । स्त्री । जनन्याम् । मातरि ॥ आमलक्याम् ॥ वसुमत्याम् । भुवि ॥ उपमातरि ॥ धीयते । धेट्० । धः कर्मणिष्ट्रन् ॥ दधातिवा । डुधाञ्० । सर्वधातुभ्यःष्ट्रन् । षित्वान् ङीष् ॥

धात्रीपत्रम् । न । आमलकीदले ॥ तालीशपत्रे ॥

धात्रीपुत्रः । पुं । नटे ॥ उपमातुः सुते ॥ धात्र्याः पुत्रः ॥

धात्रीफलम् । न । आमलकीफले । आंवला इतिभाषा ॥ धात्र्याःफलम् ॥ हरीतकीसमंधात्रीफलं किन्तु विशेषतः । रक्तपित्तप्रमेहघ्नं परं वृष्यं रसायनम् ॥ हन्ति वातं तदम्लत्वात् पित्तं माधुर्यशैत्यतः । कफंरूक्षकषायत्वात् फलंधात्र्यास्त्रिदोषजित् ॥ अङ्गारपाकमृदुयत्नसुपाचितानि सिन्धूत्थहिङ्गुमरिचादिसमन्वितानि । तप्तेघृतेपुनरपिप्रतिभर्जितानि धात्रीफलानि जनयन्ति हिजाठरा-

त्रिम् ॥

धात्रेयिका । स्त्री । धात्र्याम् । धाय इति भाषा ॥ यथा । पठेद्धात्रेयिकावाक्यं प्राङ्मुखो वाप्युदङ्मुख इति ॥

धात्रेयी । स्त्री । धात्रेयिकायाम् ॥

धानम् । न । पोषणे ॥ निधाने ॥ धीयते ऽस्मिन् । ल्युट् ॥

धानकम् । न । धन्याके ॥

धाना । स्त्री । । बहुरी इतिभाषाप्रसिद्धे भृष्टयवे॥ धन्याके ॥ अभिनवोद्भिन्ने । अङ्कुरे ॥ चूर्णसक्तुषु ॥ धानाः । स्त्री । धाना भृष्टयवे स्त्रिय इतिबहुवचननिर्देशात् बहुवचनान्तोपि ॥ यवास्तुनिस्तुषाभृष्टाः स्मृताधाना इतिस्त्रियाम् । धानाः स्यु दुर्जरा रूक्षास्तृट्प्रदा गुरवश्च ताः॥ तथामेदः कफच्छर्द्दिनाशिन्यः सम्प्रकीर्त्तिताः ॥ दधाति दधति वा । डुधाञ्० । धापृवस्यज्यतिभ्योनः । टाप् ॥

धानाकाः । स्त्री । धानासु ॥ नित्यंबहुवचनान्तोयमितशब्दरत्नावली ॥

धानाचूर्णम् । न । भृष्टयवचूर्णे । सक्तुषु ॥

धानी । स्त्री । पीलुवृक्षे ॥ आधारे ॥ यथा । राजधानीततःसाभूत् सर्वेषां द्वबभूभुजामिति ॥ धीयते ऽस्याम् ॥ करणा ऽधिकरणयोश्चेतिल्युट् । ङीप् ॥

धानुष्कः । त्रि । धनुर्द्धरे । धन्विनि ॥ धनुः प्रहरणमस्य। तदस्येत्यधिकृत्य प्रहरणमिति ठक् । इसुसुक्तान्तात्कः ॥ यद्वा । धनुषाजीवति । वेत० ठञ् ॥ लग्नात् तृतीयभवने ॥

धानुष्का । स्त्री । अपामार्गे ॥

धानुष्यः । पुं । वंशे ॥ इति राजनि० ॥

धानेयम् । न । } धन्याके । धनिञा-
धानेयकम् । न । } इति भाषा ॥

धान्या । स्त्री । एलायाम् । पृथ्वीकायाम् । एलायची इति भाषा इतिशब्दचन्द्रिका ॥

धान्यम् । न । धन्याके॥ परिपेले ॥ चतुस्तिलपरिमाणे ॥ पूर्वद्वारगृहे ॥ व्रीहिसामान्ये नीवारादौ ॥ धान इति भाषाप्रसिद्धे सतुषतण्डलादौ । ओगार्हे । अन्ने ॥ धान्यं त्रिविधम् आशु षष्टिकशालिभेदात् । तत्रप्रावृट्कालभवमाशुः । ग्रीष्मजं षष्टिकः । हेमन्तोद्भवं शालिः ॥ * ॥ धान्यं सर्वं नवं स्वादु गुरु श्लेष्मकरं स्मृतम् । तत्तुवर्षोषितं पथ्यं यतो लघुतरं हितम् ॥ वर्षोषितंसर्वधान्यं गौरवं परिमुञ्चति । न तु त्यजति वीर्यत्वं क्रमान्मुञ्चत्यतः परम् ॥ एतेषु यवगोधूमतिलमाषा नवा हिताः । पुराणा

विरसा हृद्या न तथागुणकारिणः ॥ पुराणावर्षद्वयादुपरिस्थिताः । य ादयेनवा स्वस्थानमतिहिताः । पथ्याशिनान्तुपुराणाहिताः । पुराणयवगोधूमचौद्रजाङ्गलशूल्यभुगितिवसन्ते वाग्भटेनोक्तत्वात् ॥ धाने पोषणे साधु । तत्रसाधुरितियत् ॥ यद्वा । दधाति । डुधाञ् । दधाते येन् नुट्चेति यन्नुटौ ॥

धान्यकम् । न । धान्याके ॥ इ०रानि०॥

धान्यकोष्ठकम् । न । धान्यरक्षार्थगृहे । गोला इतिभाषा ॥

धान्यचमसः । पुं । चिपिटके ॥

धान्यत्वक् । स्त्री । तुषे ॥ धान्यस्यत्वक् ॥

धान्यधेनुः । स्त्री । दानार्थं धान्यनिर्मितधेनौ ॥

धान्यपञ्चकम् । न । शालिधान्यादिपञ्चसु ॥ यथा । शालिधान्यं व्रीहिधान्यं शूकधान्यं तृतीयकम् । शिम्बिधान्यं चुद्रधान्यमित्युक्तंधान्यपञ्चकम् ॥ शालयोरक्तशाल्याद्या व्रीहयः षष्टिकादयः । यवादिकं शूकधान्यंमुद्गाद्यंशिम्बिधान्यकम् ॥ कङ्ग्वादि चुद्रधान्यं स्यात्तृणधान्यञ्चतत्स्मृतमिति ॥ अतीसारेपाचनविशेषे ॥ यथा । धान्यवालकबिल्वाब्दनागरैः पाचितंजलम् । आमशूलविबन्धघ्नंपा

चनंनित्यसेवितमितिभावमिश्रः ॥

धान्यमायः । पुं । धान्यविक्रयिणि ॥

धान्यराजः । पुं । यवे ॥

धान्यवर्द्धनम् । न । वार्द्धुष्ये । धान्यवृद्धौ ॥

धान्यवीजम् । न । धन्याके ॥

धान्यवीरः । पुं । माषे ॥

धान्यवृद्धिः । स्त्री । धान्यवर्द्धने । मह्यमेतावद्धान्यंदेहि ततोमासानन्तरं वर्षानन्तरंवा सपादं सार्द्धं द्विगुणंवा दास्यामीत्येवंरूपायां वृद्धौ ॥

धान्यशीर्षकम् । न । धान्यमञ्जर्याम् ॥

धान्याकम् । न । धन्याके । कुस्तुम्बुरुणि ॥ धान्याकं तुवरं स्निग्ध मवृष्यं मूत्रलं लघु । तिक्तं कटूष्णवीर्यञ्च दीपनं पाचनं स्मृतम् ॥ ज्वरघ्नं रोचनं ग्राहि स्वादुपाके त्रिदोषनुत् । तृष्णादाहवमिश्वासकासामार्शः कृमिप्रणुत् ॥ आर्द्रन्तुतद्गुणं स्वादुविशेषात्पित्तनाशनम् ॥ धान्य मकति । अककुटिलायाङ्गतौ । अण् ॥

धान्याम्रम् । न । व्रीहिमञ्जर्याम् ॥

धान्याचलः । पुं । दानार्थंधान्यनिर्मिते पर्वते ॥

धान्याभ्रम् । न । अभ्रकमारणोपयोगिवस्तुनि ॥ पादांशशालिसंयुक्तमभ्रं वद्धाय कम्बले । त्रिरात्रं स्थापयेन्नीरे तत्क्लिन्नं मर्दयेत्करैः ॥ क

म्बलादगालितं सूक्ष्मं वालुकारहितञ्चयत् । तद्धान्याम्लमितिप्रोक्तम भ्रमारणसिद्धये इतिभावप्रकाशः ॥

धान्याम्लम् । न । काञ्जिके ॥ धान्याम्लं शालिचूर्णाच्छकोद्रवादिकृतं भवेत् । धान्याम्लं धान्ययोनित्वात् प्रीणनं लघुदीपनम् । अरुचौ वातरोगेषु सर्वेष्वास्थापनेहितम् ॥ धान्येष्वभिषुतमम्लम् । शाकपार्थिवादि ॥

धान्यारिः । पुं । मूषिके ॥

धान्योत्तमः । पुं । शालिधान्ये ॥

धामकः । पुं । माषकपरिमाणे ॥ इति वैद्यकपरिभाषा ॥

धाम । न । देहे ॥ गृहे ॥ रश्मौ ॥ स्थाने । आश्रये ॥ जन्मनि ॥ प्रभावे ॥ त्विषि ॥ ज्योतिषि । स्वयम्प्रकाशे । स्वस्वरूपे ॥ दधाति धीयते वा । डुधाञ्० । मनिन् ॥

धामनिधिः । पुं । सूर्ये ॥ धाम्नांनिधिः ॥

धामनी । स्त्री । धमन्याम् ॥

धामवान् । त्रि । तेजस्विनि ॥

धामार्गवः । पुं । अपामार्गे ॥ घोषके । तोरञ्जी इतिप्रसिद्धे शाके ॥ नेनुवाँख्ये । पीतघोषाख्येपि ॥ धाम्नोर्गः । धामार्गं वाति । वा० । आतोनुपेति कः ॥ यद्वा । धामऋच्छति । ऋ० । अन्येभ्योपि । धामार्द्वासैगौश्च ।

गोरतद्धितलुकीति टच् ॥

धायः । त्रि । धारणकर्त्तरि ॥

धायाः । त्रि । धारणकर्त्तरि ॥ पोषणकर्त्तरि ॥ यथाविश्वस्य धायाइति ॥

धाय्यः । पुं । पुरोहिते ॥

धाय्या । स्त्री । वह्निप्रज्वालनार्थायामृचि । सामिधेन्याम् ॥ धीयते पुष्यते ऽग्निरनया धीयते ऽनया इन्धिरितिवा । पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीष्विति धाञोण्यत् युगागमश्च ॥

धारः । पुं । जलधारासारवर्षणे ॥ ग्रावान्तरे ॥ ऋणे ॥ प्रान्ते ॥ गम्भीरे ॥

धारम् । न । दिव्यपानीयप्रभेदे ॥ धाराभिः पतितं तोयं गृहीतं स्फीतवाससा । शिलायांवसुधायांवा धौतायां पतितञ्चयत् ॥ सौवर्णे राजते ताम्रे स्फाटिके काचनिर्मिते । भाजने मृन्मयेवापि स्थापितं धार मुच्यते ॥ धारं नीरं त्रिदोषघ्नमनिर्देश्यरसं लघु । सौम्यं रसायनं वल्यं तर्पणं ह्लादि जीवनम् ॥ पाचनं मतिकृन्मूर्च्छातन्द्रादाहभ्रमक्लमान् । तृष्णां हरति तत्पथ्यं विशेषात् प्राबृषिस्मृतम् ॥ * ॥ धाराजलञ्चद्विविधंगाङ्गसामुद्रभेदतः ॥ यदाश्वा दाश्विनेमासि सूर्यः स्वातीविशाखयोः

। तदाम्बु जलदैर्मुक्तं गाङ्गमुक्तं मनीषिभिः ॥ अन्यदाश्वयुग्मासादिनक्षत्रेषु यदाम्बुदैः । अभिवृष्टमिदं तोयं सामुद्रमितिसंज्ञितम् ॥ * ॥ गाङ्गं जलं स्वादु सुशीतलञ्च रुचिप्रदं पित्तकफापहञ्च । निर्दोषमिष्टं लघु तच्च नित्यं गुणाधिकं व्योमनिगदितमाहुः ॥ सामुद्रसलिलं शीतं कफवातकरं गुरु । चिरायाश्विने तच्च गुणाढ्यं गाङ्गवद्भवेत् ॥ पतितं भुवि तत्तोयं गाङ्गं सामुद्रमेव वा । स्वस्वाश्रयवशाद् गच्छेदन्यदन्यद्रसादिकम् ॥ इति राजनिर्घण्टः ॥

धारकः । पुं । कलसे ॥ त्रि । धारणकर्त्तरि ॥

धारणः । पुं । सम्मते ॥ नीरे ॥ स्वर्लोके ॥ परमेष्ठिनि ॥ धृतौ ॥ न । विधारणे । धरणा इति भाषा ॥ धारयति । धृञ् । नन्द्यादित्वाल्युः ॥

धारणा । स्त्री । योगाङ्गे ॥ देशबन्धश्चित्तस्य धारणा ॥ १ ॥ देशे नाभिचक्रनासाग्रादौ चित्तस्य बन्धो विषयान्तरपरिहारेण यत्स्थिरीकरणं सा चित्तस्य धारणेत्युच्यते । अयमर्थः । मैत्र्यादिचित्तपरिकर्मवासितान्तःकरणेन यमनियमवता जितासनेन परिहृतप्राणविक्षेपेण प्रत्याहृतेन्द्रियग्रामेण निर्बाधे प्रदेशे ऋजुकायेन जितद्वन्द्वेन योगिना नासाग्रादौ सम्प्रज्ञातस्य समाधेरभ्यासाय चेतसः स्थिरीकरणं कर्त्तव्यमिति ॥ * ॥ यमादिगुणसंयुक्ते मनसः स्थितिरात्मनि । धारणा प्रोच्यते सद्भिर्योगशास्त्रविशारदैः ॥ तस्मात् समस्तशक्तीनामाधारे तत्र चेतसः । कुर्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणेति वि० पु० ॥ ध्येये चित्तस्य स्थिरबन्धने ॥ अद्वितीयवस्तुन्यन्तरिन्द्रियरक्षिधारणे ॥ यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात् । मनसो धारणञ्चैव धारणा सा परा मता ॥ मर्यादायाम् । संस्थायाम् । न्याय्यपथस्थितौ ॥ बुद्धौ ॥ निश्चये ॥ धारयति धर्मम् । धृञ् । नं० ल्युः ॥ युच्वा ॥

धारणी । स्त्री । नाडिकायाम् ॥ बुद्धोक्तमन्त्रविशेषे ॥ श्रेण्याम् । पङ्क्तौ ॥

धारणीयः । त्रि । धार्य्ये । धारयितुं शक्य ॥ धृञो ऽनीयर् ॥

धारणीया । स्त्री । धरणीकन्दे ॥

धारयित्री । स्त्री । धरित्र्याम् ॥ त्रि । धारयितरि ॥

धारा । स्त्री । सैन्याग्रिमस्कन्धे ॥ घटादिच्छिद्रे ॥ सन्ततौ ॥ द्रवद्रव्यस्य प्रपाते ॥ खड्गादेर्निशितमुखे ॥ इति

मे० ॥ उत्कर्षे ॥ इति हेमचन्द्रः ॥ य शसि ॥ अतिवृष्टौ ॥ समूहे ॥ घना सारवर्षणे ॥ सदृशे ॥ इति विश्वः ॥ पुरीविशेषे ॥ तुरङ्गगतिपञ्चके- ॥ अश्वानान्तुगति धारा विभिन्ना सा च पञ्चधा । आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् ॥ धौरितंवल्गितं धाराप्लुतमुत्तेजितंक्रमात् । उत्तेरितञ्चेति पञ्चशिक्षयेत् तुरगं गतीः ॥ उत्तेरितेऽतिवेगाच्चो नशृणोति न पश्यति । धौरितंगतिमात्रे यत्तोजितं वल्गितंपुरः ॥ अग्रकायः समुल्लासाकुञ्चिताख्यंनतत् चिकम् । उत्तेजितं मध्यवेगं योजनंस्वश्रल्पाया ॥ पूर्वापरोन्नमनतः क्रमादुत्तारणं प्लुतम् ॥ अश्वशास्त्रेतु संज्ञान्तरेणोक्ताः । गतिः पुलाचतुष्काचतदन्मध्यजवापरा । पूर्णवेगातथाचान्या पञ्च धाराः प्रकीर्त्तिताः ॥ एकैका त्रिविधा धारा हयशिक्षाविधौमता । लघ्वी मध्या तथादीर्घाचाश्वेतायोजयेत् क्रमादिति ॥ धार्यन्ते अश्वा अचा ऽनयावा । धृञ्० । ण्यन्तः । भि०अङ् । कट शोडोतितिगुणेनिपातनाद्दीर्घोवा ॥

धाराकदम्बः । पुं । केलिकदम्ब इति गौडभाषा प्रसिद्धे कदम्बविशेषे । प्रावृषेण्ये । मेघाभे ॥

धाराङ्कुरः । पुं । नाशीरे ॥ शीकरे ॥ घनोपले ॥ इति मेदिनी ॥

धाराङ्गः । पुं । असौ । खड्गे ॥ तीर्थे ॥ इति हेमचन्द्रः ॥

धाराटः । पुं । चातके ॥ अश्वे ॥ मेघे ॥ मत्तमातङ्गे । मत्तगजे ॥ इति शब्दरत्नावली ॥

धाराधरः । पुं । जलधरे । मेघे ॥ धारायां धरः ॥ खड्गे ॥

धारापूपः । पुं । अपूपविशेषे ॥ घृतमिश्रा कनिक्या या दुग्धेनालोडितातुसा । धाराख्या पूपकं स्वाज्ये पक्वं खण्डेन योजयेत् ॥ आपूपकं सुमधुरं रुच्यं शिशक्षरंपरम् । सुस्निग्धं-रोचनं हृद्यमच्यर्थं वातनाशनम् ॥

धाराफलः । पुं । मदनवृक्षे ॥

धारावनिः । पुं । वायौ ॥ इतित्रिकाण्डशेषः ॥

धाराविषः । पुं । खड्गे ॥ इतित्रिकाण्डशेषः ॥

धारासम्पातः । पुं । आसारे । महावृष्टौ ॥ धारायां सम्पातः सम्भूयपतनम् । पतेर्भावे घञ् ॥

धारासुन्दी । स्त्री । त्रिधारसुह्याम् ॥

धारिणी । स्त्री । धरायाम् ॥ शाल्मलिद्रुमे ॥

धारितः । त्रि । धृते ॥

धारी । पुं । पीलुवृक्षे ॥ त्रि । धारविशिष्टे ॥

धारुः । त्रि । पानकर्त्तरि ॥ धयति तच्छीलः । धेट्० । दाधेट् सिशदसदोरुः ॥

धारेश्वरी । स्त्री । देवीविशेषे ॥

धारोष्णम् । न । दोहनेनोष्णधारया सद्यः पतिते दुग्धे ॥ धारोष्णन्त्वमृतं पयोभ्रमहरं निद्राकरं कान्तिदं वृष्यं वृंहण मग्निवर्द्धनमतिस्वादु त्रिदोषापहमिति राज निर्घण्टः ॥

धार्त्तः । त्रि । धूर्त्ते । द्यूतकृति ॥ धावनम् । धाव्० । सं० क्विप् । वाहुलकात् वलोपः । धा धावने आर्त्तिः । धार्त्तिरस्यास्ति । ज्यो० अण् ॥ यद्वा । धा धावनेन आर्त्तः ॥

धार्त्तराष्ट्रः । पुं । असिताल्लाङ्‌घ्यसितच्छदे हंसविशेषे । कृष्णैश्चञ्चुचरणैरुपलक्षिते हंसे । गेंडिहाँस इति गौडभाषा ॥ सर्पविशेषे । अहौ ॥ कौरवे । धृतराष्ट्रापत्येषु दुर्योधनादिषु ॥ धृतराष्ट्रसम्बन्धिभीष्मद्रोणादौ ॥ धृतराष्ट्रे भवः । तत्रभव इत्यण् । तस्येदमितिवा ॥

धार्त्तराष्ट्रपदी । स्त्री । हंसपदाम् ॥

धार्त्ता । पुं । धारके । धारणकर्त्तरि ॥ आगमजस्यानित्यत्वात् आर्द्धधातुकस्येड्वलादेरितिनेडागमः ॥

धार्म्मिकः । त्रि । देवयौ । धर्मशीले ॥ धर्मयुक्ते ॥ धर्म्ममधीते वेदवा । धर्म्मञ्चरतिवा । उ० ठक् । चरतिरिह आसेवायाम् नत्वनुष्ठानमात्रे । तेन दैववशाद्धर्मे प्रवृत्तोऽपि दुर्वृत्तो धार्मिक इति नोच्यते ॥

धार्य्यः । त्रि । धारणीये ॥

धार्ष्ट्यम् । न । सामर्थ्ये ॥ प्रागल्भ्ये ॥ धृष्टस्य कर्म भावोवा । ष्यञ् ॥

धावकः । पुं । रजके ॥ स्मृतौतु भिन्नावेतौ ॥ त्रि । धावनकर्त्तरि । शीघ्रगामिनि । धाउडिया इति भाषा ॥ धावति । धाव्० । ण्वुल् ॥

धावन् । त्रि । द्रुतंगच्छति ॥ धाव्० । शतृ ॥

धावनम् । न । गमने ॥ शुद्धौ ॥ धावु गतिशुद्ध्योः । ल्युट् ॥

धावनिः । स्त्री । पृश्निपर्ण्याम् । धावति । धावु गतिशुद्ध्योः । वाहुलकादनिः ॥ कण्टकार्याम् ॥

धावनिका । स्त्री । कण्टकारिकायाम् ॥

धावनी । स्त्री । पृश्निपर्ण्याम् ॥ कण्टकार्य्याम् ॥ कृदिकारादितिङीष् ॥ धातक्याम् ॥

धावितः । त्रि । गते ॥ मार्जिते ॥ धोया इति भाषा ॥

धिक् । अ । अपकारशब्दैर्भयोत्पादने । निर्भर्त्सने ॥ निन्दायाम् ॥ यथा । धिक् भस्मरहितंभालं धिक्ग्राममशिवालयम् । धिगनीशार्चनंजन्म धिग्विद्यामशिवाश्रयामिति ॥ धक्कयति । धक्कनाशने । बाहुलकाट्डिकप्रत्ययः । दधातेर्वा ॥

धिक्कार: । पुं । निकारे । तिरस्कारे ॥ धिक्करणम् । कृञ्० । घञ् ॥

धिक्कृत: । त्रि । अपध्वस्ते ॥ निन्दिते ॥ धिगितिकृत: । धिगकारिवा । क्त: ॥

धिक्क्रिया । स्त्री । निन्दायाम् ॥ इति हेमचन्द्र: ॥

धिग्वण: । पुं । शूद्रेण वैश्याया मुत्पन्न आयोगवी तस्यांब्राह्मणा दुत्पन्नेसङ्कीर्णजातिविशेषे ॥ तस्यचर्मकार्यम् ॥

धियाम्पति: । पुं । मञ्जुघोषे । पूर्वजिनविशेषे ॥ इतित्रि० । आत्मनि ॥

धिषण: । पुं । त्रिदशाचार्ये । बृहस्पतौ ॥ प्रशस्ता धिषणा अस्य ॥ धृष्णोति । ञिधृषा० । धृषेर्डिष् चसंज्ञायामिति क्युर्वा ॥

धिषणा । स्त्री । बुद्धौ । मनीषायाम् ॥ धृष्णुवन्त्यनया । ञिधृषा० । क्यु: । टाप् ॥

धिष्ण्य: । पुं । अग्निविशेषे ॥ शुक्रे ॥ न । स्थाने ॥ अग्निसामान्ये ॥ सद्मनि ॥ शक्तौ ॥ ऋक्षे । उडुनि ॥ धिष्यते धृष्णोति वा । धिषशब्दे ञिधृषा०वा । सानसिवर्णसिपर्णसीति साधु । धृषेर्हकारस्येकारोरपरत्वाभावोण्यप्रत्ययश्चतेनैव निपातनात् ॥

धी: । स्त्री । प्रज्ञायाम् । मतौ ॥ शास्त्रादितत्त्वज्ञाने ॥ ज्ञानभेदे ॥ ध्यायन्त्यनया । ध्यै० । ध्यायते:सम्प्रसारणञ्चेतिक्विप् । हलश्चेतिदीर्घ: ॥

धीगुण: । पुं । शुश्रूषाद्यष्टसु ॥ तेयथा । शुश्रूषा श्रवणञ्चैव ग्रहणं धारणंतथा । ऊहापोहार्थविज्ञानं तत्त्वज्ञानञ्च धीगुणा इति ॥ धियोगुण: ॥

धीत: । त्रि । पीते । पीया इतिभाषा ॥

धीति: । स्त्री । पिपासायाम् ॥ इतिहेमचन्द्र: ॥

धीदा । स्त्री । कन्यायाम् ॥ बुद्धौ । मनीषायाम् ॥ धियं ददाति । डुदाञ्० । क: । टाप् ॥

धीन्द्रियम् । न । ज्ञानेन्द्रियेषु । मनआदिषु समस्तेषु व्यस्तेषु च ॥ मन: कर्णौ तथानेत्रे रसनाचत्वचासह । नासिकेचेति षट्तानि धीन्द्रियाणिप्रचक्षते ॥ धीसाधकमिन्द्रियम् ॥

धीमान् । पुं । बृहस्पतौ ॥ त्रि । पण्डि

ते ॥ धीर्विद्यते यस्य । मतुप् ॥ ऊहापोहकुशले ॥

धीमती । स्त्री । बुद्धिमत्याम् । प्रशस्तबुद्धियुक्तायाम् ॥ धीरस्त्यस्याः । मतुप् । उगित्त्वान्ङीप् ॥

धीरः । पुं । ऋषभौषधे ॥ बलिराजे ॥ धियमीरयतीतिव्युत्पत्त्या चिदाभासद्वारा धीतादात्म्याध्यासेन धीप्रेरके । धीसाक्षिणि ॥ न । कुङ्कुमे ॥ त्रि । धैर्यान्विते ॥ स्वैरे ॥ पण्डिते ॥ मन्दे ॥ विनीते ॥ बलयुते ॥ विवेकिनि ॥ धियंराति । रा० । आतोनुपेतिकः ॥ धियमीरयति । ईर० । अण् ॥ दधति धीयते वा । डुधाञ्० । सुसूधागृधिभ्यः क्रन् । घुमास्थेतीत्त्वम् ॥ दधात्यापत्सु चित्तमिति वा ॥ स्त्रीसन्निकर्षात् धीरोपि विक्रियां भजते खलु ॥*॥ विकारहेतावपि विक्रियन्ते येषां न चेतांसि त एव धीराः ॥*॥ गतस्वार्थमिमं लोकं विमुक्तो मुक्तबन्धनः । अविज्ञातगतिर्जह्यात् स वै धीर उदाहृतः ॥ धीरो ह्यर्थवद्वचो ब्रूते ॥

धीरत्वम् । न । धीरतायाम् ॥ यथा । प्रागल्भ्यौदार्यमाधुर्यशोभाधीरत्वकान्तयः । दीप्तिश्चायत्नजाभावहावहेलाः स्त्रियोऽङ्गजाः ॥ इति हेमचन्द्रः ॥

धीरपत्री । स्त्री । धरणीकन्दे ॥

धीरस्कन्धः । पुं । महिषे ॥ इति हेमचन्द्रः ॥

धीराः । पुं । ज्ञानदे गुरौ ॥ धियंराति ददाति । रा० । क्विप् चेति क्विप् ॥

धीरा । स्त्री । नायिकाप्रभेदे ॥ पण्डितायाम् ॥ काकोल्याम् ॥ महाज्योतिष्मत्याम् ॥ स्थिरायां चित्तोन्नतौ ॥ श्रवणतुल्यायाम् ॥

धीराधीरा । स्त्री । नायिकाप्रभेदे ॥

धीलटिः । स्त्री । दुहितायाम् ॥ इति हारावली ॥

धीवा । पुं । कर्मकरे । धीवरे ॥ ध्यायति । ध्यै चिन्तायाम् । ध्याप्योः सम्प्रसारणञ्चेति क्वनिप् ॥

धीवरः । पुं । दासजातौ । कैवर्त्ते ॥ दधाति मत्स्यान् । डुधाञ्० । छित्वरछत्वरधीवरेत्यादिना ष्वरजन्तो निपातितः ॥

धीवरी । स्त्री । धीवरभार्यायाम् ॥ धीवरशब्दात् स्त्रियां षित्त्वान्ङीष् । दधातेः क्वनिपि वनोरचेति ङीब्रौ वा ॥

धीव्याप्यता । स्त्री । वृत्तिव्याप्यत्वे ॥

धीशक्तिः । स्त्री । निष्क्रमे । बुद्धिसामर्थ्ये । शुश्रूषाद्यष्टविधधीगुणेषु ॥ धियः शक्तिः ॥

धीसखः । पुं । अमात्ये । मन्त्रिणि ॥ इ

तिहेमचन्द्रः ॥ धियःसखा । टच् ॥
धीसचिवः । पुं । धीसखे ॥ इत्यमरः
॥ धिया धियां वा सचिवः सहायः । धी
प्रधानःसचिवोवा ॥
धुः । स्त्री । कम्पने ॥ इत्येकाक्षरकोषः ॥
धुतः । त्रि । त्यक्ते ॥ कम्पिते । विधूते
॥ धुयतेस्म । धुञ्कम्पने । क्तः ॥
धुनानः । त्रि । कम्पयति ॥ धुनोतेः क
र्त्तरि शानच् ॥
धुनिः । स्त्री । नदीमात्रे ॥
धुनी । स्त्री । नदीमात्रे ॥ धुनोति वेत
सादीन् । धुञ्० । क्विप् । पृषोदरा
दित्वात् नक् । नान्तत्वात् ङीप् ॥
धुनीनाथः । पुं । समुद्रे ॥ धुनीनां-
सरितांनाथः ॥
धुन्धुमारः । पुं । शक्रगोपे ॥ गृहधूमे
॥ पद्मालिके ॥ कुवलयाश्वे । राज्ञो
वृहदश्वसुपुत्रे ॥
धुन्धुरी । स्त्री । वाद्यप्रभेदे ॥
धूः । स्त्री । भारे ॥ चिन्तायाम् ॥ रथा
द्यग्रभागे । यानमुखे ॥ धूर्वति । धु
र्वीहिंसायाम् । भ्राजभासेति क्विप् ।
र्वोरितिदीर्घः ॥
धुरन्धरः । पुं । धवद्रुमे ॥ त्रि । धुर्वहे ।
धुर्ये । भारवोढरिवृषादौ ॥ धुरंधा
रयति । संज्ञायां भृतवृजिधारीति
खच् । इति स्वामी ॥ वाचंयमपुरन्द
रौचेति चकारस्यानुक्तसमुच्चयार्थ
त्वात्सः इति नव्याः । खचि ह्रस्वः ।
अरुर्द्विषदितिमुम् ॥
धुरा । स्त्री । भारे ॥
धुरीणः । त्रि । श्रेष्ठे ॥ धुर्ये । धौरेये ॥
॥ धुरंवहति । खः सर्वधुरादित्यत्र ख
इतियोगविभागात्खः ॥
धुरीयः । पुं । अनडुहि ॥ इतिराजनि० ॥
धुर्य्यः । त्रि । श्रेष्ठे ॥ भारवोढरि । धौ
रेये ॥ कार्यनिर्वाहके ॥ धुरंवहति
। धुरोयड्ढकावितियत् ॥ पुं । अन
डुहि ॥ ऋषभौषधौ ॥
धुर्वहः । त्रि । भारवोढरि वृषे । धुर्ये ॥
वहतीति वहः । अच् । धुरोवहः ॥
धुवका । स्त्री । ध्रुवकायाम् । धुया इति
गौड भाषा ॥ धूञ्० । कः । ततोज्ञा
तादौकः । क्षिपकादित्वान्नेत्त्वम् ॥
धुवनः । पुं । वह्नौ ॥ धुनोति धुनाति
वा । धुञ्० धूञ्० वा । भूसूधूभ्रस्जि
भ्यश्छन्दसीतिक्युन् ॥
धुवित्रम् । न । वह्नेः सन्धुक्षणाय मृगत्व
चारचिते याज्ञिकानां व्यजने ॥ धुवि
त्रंतालवृन्तं स्यादुत्क्षेपव्यजनञ्च
तत् ॥ धूयते ऽनेन । धूविधूनने । अ
र्त्तिलूधूसू इति इत्रः । कुटादित्वेन
ङित्वाद्गुणाभावादुवङ् ॥
धुस्तुरः । पुं । धुस्तूरे ॥

धुस्तूरः । पुं । धतूरा इतिप्रसिद्धे चुपे । उन्मत्ते । काहलापुष्पे । धूस्तूरे ॥

धूः । स्त्री । धूनने ॥ इति मेदिनी ॥

धूकः । पुं । पवने । वायौ ॥ धुनोति धुनातिवा । धुञ्० धूञ् वा । अजियुधूनीभ्योदीर्घश्चेतिकन् ॥

धूतः । त्रि । त्यक्ते ॥ कम्पिते ॥ भर्त्सिते ॥ तर्किते ॥ धूयतेस्म । धूविधूनने । धूञ्० वा । क्तः ॥

धूनकः । पुं । यक्षधूपे । राले । वह्निवल्लभे ॥ इति त्रिकाण्डशेषः ॥

धूननम् । न । कम्पने । कंपाना इति-भाषा ॥ धूञोण्यन्ताल्ल्युट् । धूञ् प्रीञोर्नुग्वक्तव्य इतिनुक् ॥

धूपः । पुं । गुग्गुल्वादि गन्धद्रव्यविशेषोत्थधूमे तद्वर्त्तिकायाञ्च । गन्धपिशाचिकायाम् ॥ सचषडङ्गदशाङ्गादिभेदभिन्नो ऽनेकप्रकारः ॥ विषघ्नधूपो यथा । सक्तुः सर्ज्जरसोपेतः सर्षपा एलवालुकैः । सुवर्णातस्करतरोः कुसुमैरर्जुनस्यतु ॥ धूपोवासगृहे हन्तिविषंस्थावरजङ्गमम् । नतत्रकीटा नविषं न दर्दुरसरीसृपाः ॥ नकृत्या कर्मणास्तन्नधूपोयं यत्रदह्यते ॥ * ॥ सर्पनिर्मोचनधूपोयथा । कार्पासास्थिभुजङ्गस्य तथा निर्मोचनं भवेत् । सर्पनिर्मोचनोधूपः प्रशस्तः सततं गृहे ॥ इति मत्० पु० ॥ अष्टाङ्ग धूपोयथा । गुग्गुल्वगुरुकं तेजपत्रं मलयसम्भवम् । कर्पूरं वालकं कुष्ठंनूतनं कुङ्कुमंतथा ॥ अष्टाङ्गः कथितोधूपो गोविन्दप्रीतिदोमत इति ॥ * ॥ पञ्चाङ्गोयथा । चन्दनं-कुङ्कुमं नूतंकर्पूरोगुग्गुलो ऽगुरु । धूपोयं घृतसंयुक्तः पञ्चाङ्गः समुदाहृत इति ॥ * ॥ अदत्त्वागन्धमाल्यानि यो मेधूपं प्रयच्छति । कुणपोजायते भूमे यातुधानो न संशयइति भूमिं प्रतिवराहवाक्यम् ॥ * ॥ रोगनाशकोधूपोयथा । कूर्ममत्स्याखुमार्ज्जारगोमृगालाश्ववानराः । विडालबर्हिकाकाश्च वराहोलूककुक्कुटाः ॥ हंस एषाञ्च विण्मूत्रं मांसंवारोमशोणितम् । धूपंदद्याज्ज्वरार्त्ताय उन्मत्तेभ्यश्च शान्तये ॥ एतान्यौषधजातानि धूपितानि महेश्वर । निघ्नन्तिरोगजातानि वृत्रमिन्द्राशनिर्यथेतिगारुडे १९९ अध्यायः ॥

धूपनः । पुं । शालवृक्षस्य निर्यासे । शालवेष्टे । सर्जरसे । राल इतिभा ॥ न । धूपे ॥

धूपवृक्षः । पुं । सरलद्रुमे ॥

धूपागुरु । न । दाहागुरुणि ॥

धूपाङ्गः । पुं । श्रीवेष्टे । सरलरसे ॥

धूपायितः । त्रि । अध्वादिनाश्रान्ते । सन्तप्ते ॥ दत्तधूपगृहादौ ॥ धूप्यतेस्म । धूपसन्तापे । आयादय इतिवाआयः । क्तः । अकर्मकत्वात् कर्त्तरिवा क्तः ॥

धूपार्हम् । न । कृष्णागुरुणि ॥ त्रि । धूपयोग्ये ॥

धूपितः । त्रि । दत्तधूपे ॥ सन्तापिते । अध्वादिनाश्रान्ते ॥ धूप्यतेस्म । धूप० । क्तः । इट् । अकर्मकत्वात् कर्त्तरिवा क्तः ॥

धूमः । पुं । आर्द्रेन्धनप्रभवे । मेघाञ्जनयोर्जनके । अग्निध्वजे । भस्मे । धूँवाँ इतिभाषा ॥ सहजमलिनवक्रभावभाजां भवति भवः प्रभवात्मनाशहेतुः । जलधरपदवी मवाप्य धूमोज्वलनविनाश मनु प्रयाति नाशमिति श्रीकृष्णमिश्रः ॥ धुनोते । धूञ० । इषियुधीतिमक् ॥

धूमकेतनः । पुं । केतुग्रहे ॥ हुताशे ॥

धूमकेतुः । पुं । उत्पातविशेषे ॥ वह्नौ ॥ ग्रहप्रभेदे ॥ धूमः केतुश्चिह्नमस्य ॥

धूमगन्धिकम् । न । रोहिषतृणे ॥

धूमजाङ्गजम् । न । वज्रक्षारे ॥

धूमध्वजः । पुं । अग्नौ ॥

धूमप्रभा । स्त्री । धूमान्धकारनरके ॥

धूममहिषी । स्त्री । कुज्झटिकायाम् ॥

धूमयोनिः । पुं । मेघे ॥ धूमो योनिरस्य । उक्तञ्चाभ्राणां धूमकार्यत्वं पौराणिकैः । यज्ञधूमोद्भवंत्वभ्रं द्विजानाञ्चहितंसदा । दावाग्निधूमसम्भूतमभ्रंवनहितं स्मृतम् ॥ मृतधूमोद्भवंत्वभ्रमशुभायभविष्यति । अभिचाराग्नि धूमोत्थंभूतनाशायवैद्विजाः ॥ इति ॥ मुस्तके ॥

धूमलः । पुं । कृष्णलोहितवर्णे ॥ त्रि । तद्विशिष्टे ॥ धूमंलाति । ला० । कः ॥

धूमसी । स्त्री । धुवाँस इतिप्रसिद्धे माषाणांचूर्णे ॥ यथा । माषाणां दालय स्तोये स्थापिता स्त्यक्तकञ्चुकाः । आतपेशोषितायन्त्रे पिष्टा स्ता धूमसीस्मृता ॥ इतिभावप्रकाशः ॥

धूमाग्निः । पुं । अर्कनिष्कासनोपयोगिन्यग्निविशेषे ॥ विज्वालो यो धूमशिखो धूमाग्निः स उदाहृतः ॥

धूम्राभः । त्रि । धूम्रवर्णे ॥

धूमावती । स्त्री । दशमहाविद्यान्तर्गतविद्याविशेषे ॥ तीर्थविशेषे ॥

धूमिका । स्त्री । कुज्झटिकायाम् ॥

धूमितः । त्रि । सञ्जातधूमे ॥

धूमोत्थम् । न । वज्रक्षारे ॥

धूमोर्णा । स्त्री । यमपत्न्याम् ॥ इति त्रिकाण्डशेषः ॥

धूमोर्णापतिः । पुं । यमे ॥ इतिहारा

वल्ली ॥

धूम्या । स्त्री । धूमसमूहे ॥ धूमानां समूहः । पाशादिभ्यो यः ॥

धूम्याटः । पुं । पक्षिविशेषे । कलिङ्गे । भृङ्गे । फिङ्गा इति गौडभाषा ॥ धूम्या इव अटति । अट० । अच् ॥

धूम्रः । पुं । कृष्णरक्तमिश्रितवर्णे । धूमले । खरलोमनिभे वर्णे ॥ तुरुष्के । सिह्लके ॥ त्रि । तद्वति ॥ धूमं राति । रा० । कः । पृषोदरादिः ॥

धूम्रकः । पुं । उष्ट्रे ॥

धूम्रकेशः । पुं । असुरविशेषे

धूम्रधीः । त्रि । मलिनबुद्धौ ॥ धूम्रा धीर्यस्य ॥

धूम्रपत्रा । स्त्री । क्षुपविशेषे । धूम्राह्वायाम् । स्वयम्भुवायाम् ॥

धूम्रमूलिका । स्त्री । मूलीतृणे ॥

धूम्रलोचनः । पुं । शुम्भासुरस्य सेनापतौ ॥ कपोते ॥

धूम्रवर्णः । पुं । तुरुष्के । सिह्लके ॥ श्यामरक्तमिश्रितवर्णे । धूमले ॥ त्रि । तद्वर्णविशिष्टे ॥

धूम्रवर्णा । स्त्री । वह्नेर्जिह्वाविशेषे ॥ धूम्रो वर्णोऽस्याः ॥

धूम्रा । स्त्री । शशाण्डुल्याम् ॥

धूम्रिका । स्त्री । शिंशपावृक्षे ॥

धूर्ज्जटिः । पुं । शिवे । गङ्गाधरे ॥ धूर्भारभूता जटिर्यस्य ॥ यद्वा । जटति । जट० । सर्वधातुभ्य इतीन् । धूर्गङ्गा जटिष्वस्यति ॥ धुरस्त्रैलोक्यचिन्तायाः जटिः सङ्घातोऽत्रवा ॥

धूर्त्तः । पुं । धूस्तूरे । उन्मत्ते ॥ चोरके ॥ न । खण्डलवणे ॥ लौहकिट्टे ॥ त्रि । विटे ॥ वञ्चके । मायिनि ॥ यथा । स्वर्णकारः स्वर्णवणिक् कायस्थश्च व्रजेश्वर । नरेषु मध्ये ते धूर्त्ताः कृपाहीना महीतले ॥ हृदयं क्षुरधाराभं तेषां च नास्ति सादरम् । शतेषु सज्जनः कोऽपि कायस्थो नेतरौ च तौ ॥ सुबुद्धिः शिवयुक्तिश्च शास्त्रबोधर्ममानसः । न विश्वसेत् तेषु तात स्वात्मकल्याणहेतवे ॥ इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्म ८५ ऽध्यायः ॥ द्यूतकृति ॥ धूर्वति । धुर्वी० । हसिमृग्रिण्वितितन् । राल्लोपः । हलिचेति दीर्घः ॥ धूर्व्यते स्म । कर्मणि क्तो वा ॥ धूर्वति । मतिबुद्धिपूजार्थेभ्यश्चेति चकारात् कर्त्तरि वा क्तः ॥ यद्वा । धूर्वनम् । भावे क्तः ॥ तदस्यास्तीत्यर्श आद्यच् वा ॥

धूर्त्तकः । पुं । धूर्त्ते ॥ शृगाले ॥

धूर्त्तकृत् । पुं । धूस्तूरे ॥

धूर्त्तजन्तुः । पुं । मानुषे ॥ इति शब्दचन्द्रिका ॥

धूर्त्तमानुषा । स्त्री । रास्नायाम् ॥ इ० शब्दं ।

धूर्वहः । त्रि । धुरन्धरे । भारवोढरि ॥

धूर्वी । स्त्री । रथाग्रभागे । यानमुखे ॥

धूलकम् । न । विषे ॥ इतिशब्दचन्द्रिका ॥

धूलिः । स्त्री । रजसि । रेणौ । पांशौ । धूल इतिभाषा ॥ धुवति धूयते वा । धूविधूनने । वाहुलकात्लिः ॥ धवनम् । धूञ्० । सं० क्विप् । धुवा लीयते । इकृकृष्यादिभ्यः ॥ संख्याविशेषे ॥

धूलिका । स्त्री । कुज्झटिकायाम् ॥

धूलिकेदारः । पुं । चेचे । वप्रे ॥ इतित्रिकाण्डशेषः ॥

धूलिगुच्छः । पुं । } फल्गुचूर्णे ।
धूलिगुच्छकः । पुं । } पटवासके ॥
इतित्रिकाण्डशेषः ॥

धूलिध्वजः । पुं । पवने ॥ इतित्रिकाण्डशेषः ॥

धूलिपुष्पिका । स्त्री । केतक्याम् ॥

धूली । स्त्री । धूलौ । पांशौ ॥ ङीप् ॥

धूलीकदम्बः । पुं । तिनिशे ॥ नीपे ॥ वरुणपादपे ॥

धूलीपटलः । पुं । उड्डीयमानधूलीसमूहे ॥

धूसरः । पुं । गर्दभे । खरे ॥ उष्ट्रे ॥ कपोते ॥ तैलकारे ॥ ईषत्पाण्डुरवर्णे । शुक्लपीतमिश्रितवर्णे ॥ कृष्णश्वेतवर्णे ॥ त्रि । तद्वर्णविशिष्टे ॥ धुनाति । धूञ्० । कृधूमदिभ्यः किदितिसरः ॥

धूसरच्छदा । स्त्री । श्वेतवुह्नायाम् ॥

धूसरपत्रिका । स्त्री । हस्तिशुण्डीक्षुपे ॥

धूसरा । स्त्री । पाण्डुफलीवृक्षे ॥

धूसरी । स्त्री । किन्नरीभेदे ॥

धूस्तुरः । पुं । धूस्तूरे । कितवे । धतूरा इतिभाषा ॥ धूसयति । धूसकान्तिकरणे । क्विप् । तुतोर्त्ति । तुर त्वरणे । इगुपधज्ञाप्रीकिरः कः । धूस्त्वैतु रश्च ॥

धूस्तूरः । पुं । उन्मत्तवृक्षे । धत्तूरे । काञ्चनाह्वये ॥ धूसयति । धूस० । क्विप् । तूर्यति । तूरीगतित्वरणहिंसयोः । इगुपधत्वात्कः । धूश्चासौतूरश्च ॥ धूस्तूर धूर्त्त तवशेन्दुनिवासयोग्यस्थाने पिशाचपतिना विनिवेशितोसि । किंकैरवाणि विकसन्ति तमः प्रयाति किं वार्द्धि रुल्लसति किं द्रवदः स्रवन्ति ॥

धृतः । त्रि । गृहीते । कृतधारणे । धरा इतिभाषा ॥ अवलम्बिते । धृञ्० । क्तः ॥

धृतकः । त्रि । भरणायत्तजीवने ॥

धृतराष्ट्रः । पुं । सुराज्ञि ॥ नागभेदे ॥ दुर्योधनस्य पितरि ॥ पक्षिविशेषे ॥ धृतःराष्ट्रोयेन ॥

धृतराष्ट्री । स्त्री । हंसपत्न्याम् ॥

धृतात्मा । पुं । नारायणे ॥ एकरूपेण ज न्मादिषड्भावविकाररहिततया धृतः आत्मा येन । यद्वा । धृङ् अवस्थाने । गत्यर्थाकर्मकेत्यादिना कर्त्तरि क्तः । धृतः एकरूपेणावस्थितः आत्मा स्व रूपमस्येति ॥ त्रि । परमात्मनिनि- हितचित्ते ॥ यथा । किं दुःसहन्तु साधूनां विदुषांकिमपेक्षितम् । कि मकार्यं कदर्याणां दुस्त्यजं किं धृता त्मनामिति ॥

धृतिः । पुं । अध्वरे । इष्टौ ॥ स्त्री । तुष्टौ । सन्तोषे ॥ योगविशेषे ॥ तद्योगजातफ लंयथा । धृतियोगसमुत्पन्नः प्राज्ञः स न्तुष्टमानसः । वावदूकः सभायाञ्च सु शीलो विनयान्वित इति ॥ सुखे ॥ धा रणायाम् ॥ धैर्ये । अखिन्नतायाम् । अवसादेपिशरीरेन्द्रियसङ्घा- ते स्तम्भनशक्तौ ॥ अवसन्नानां देहे न्द्रियाणा मवष्टम्भहेतुभूतप्रयत्ने । देहेन्द्रियेषु अवसादं प्राप्तेषु तदुत्त म्भके प्रयत्नविशेषे । येनोत्तम्भितानि करणानि शरीरञ्च नावसीदन्ति ॥ साचकपिलपत्नी । यथा । धृतिः क पिलपत्नीच सर्वैः सर्वत्र पूजिता । स र्वलोकाअधैर्याश्चजगत्सुचयया वि नेतिदेवीभागवतम् ॥ ज्ञानस्य भा र्यायामपि ॥ ज्ञानस्यतिस्रोभार्यास्बु द्धिर्मेधाधृतिस्तथेतिदेवीभागवतम् ॥ उच्छृङ्खलप्रवृत्तिकारणेन चापल प्राप्तौ तन्निवर्त्तनशक्तौ ॥ * ॥ सत्त्वा दिगुणभेदाद्धृतिस्त्रिविधा । यथा । धृ त्यायया धारयते मनः प्राणेन्द्रियक्रि याः । योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥ ययातुधर्मका मार्थान् धृत्या धारयतेर्जुन । प्रसङ्गे नफलाकाङ्क्षी धृतिः सापार्थराज- सी ॥ ययास्वप्नं भयंशोकं विषादं म दमेवच । नविमुञ्चति दुर्मेधा धृतिः सापार्थतामसीति ॥ महत्यामपिवि पदि देहेन्द्रियसङ्घातस्यानवसादे ॥ अष्टादशाक्षरायां वृत्तौ ॥ अष्टादशा ङ्के ॥ धरणम् । धृञ्० । क्तिन् ॥ पाञ्च भौतिके मनसिधृत्यंशोभमेगुणः ॥

धृतिमत् । न । सुपार्श्वाख्यविष्कम्भशैल मूले उद्याने ॥ त्रि । सुखदुःखयोरे करूपे ॥ धृति रस्यास्ति । मतुप् ॥

धृत्वा । पुं । धर्मे ॥ विष्णौ ॥ ध्रियन्तेस्मि न् भूतानि । धृङ्अवस्थाने । धरति वा । धृञ्० । शीङ्क्रुशी त्यादिनाक्त्वि निप् । तुक् ॥ अन्तरीक्षे ॥ विप्रे ॥ समुद्रे ॥ मेधाविनि ॥

धृत्वरी । स्त्री । भुवि ॥

धृषुः । त्रि । दक्षे ॥ प्रगल्भे ॥ पुं । सङ्घा ते ॥ धृष्णोति । ञिधृषा० । पृभिदि

ञ्यधिगृधिधृषिभ्य इतिक्नुः ॥

धृष्टः । त्रि । वियाते । निर्लज्जे ॥ प्रगल्भे ॥ निर्दये ॥ नायकप्रभेदे ॥ व्यक्ताङ्गोनिर्भयोधृष्ट इत्यस्य लक्षणम् । भूयोनिः शङ्कः कृतदोषोपिभूयोनिवारितोपि भूयःप्रश्रयपरायणो धृष्ट इतिच॥ धृष्णोतिस्म। ञिधृषा० । गत्यर्थेतिक्तः। धृषिशसीतीड भावः॥

धृष्टद्युम्नः । पुं । द्रुपदपुत्रे । पाण्डवानां सेनापतौ ॥ धृष्टंद्युम्नंबलमस्य ॥

धृष्टा । स्त्री । असत्याम् । वन्ध्यकाम् ॥

धृष्णक् । त्रि । धृष्टे । वियाते ॥ धृष्णोति । धृषेश्चेतिनजिङ् ॥

धृष्णिः । पुं । किरणे ॥ धृष्णोति । ञिधृषा प्रागल्भ्ये । बाहुलकात् निप्रत्ययोगुणा भावश्च ॥

धृष्णुः । पुं । कञ्चिकायाम् ॥ त्रि । धृष्टे॥ धृष्णोति । ञिधृषा० । त्रसिगृधिधृषिक्षिपेःक्नुः ॥

धेनः । पुं । समुद्रे ॥ नदे ॥ धयन्तियम् । धेट् पाने । धेटइच्चेतिनन् धातोरिदादेशः ॥

धेना । स्त्री । नद्याम् ॥ भारतीप्रभेदे ॥

धेनिका । स्त्री । }
धेनी । स्त्री । } धन्याके ॥

धेनुः । स्त्री । गोमात्रे ॥ गवांजातीस्तु वक्ष्यामिशृणुष्वैकमना द्विज । प्रथमा गौरकपिला द्वितीया गौरपिङ्गला । तृतीया रक्तकपिला चतुर्थीनीलपिङ्गला ॥ पञ्चमीशुक्लपिङ्गाक्षी षष्ठीतु शुक्लपिङ्गला । सप्तमी चित्रपिङ्गाक्षी अष्टमी बभ्रुरोहिणी ॥ नवमीश्वेतपिङ्गाक्षी दशमीश्वेतपिङ्गला । तादृशास्त्वप्यनड्वाहः कपिलास्तु प्रकीर्त्तिता इति वृहद्धर्मपुराणे उत्तरखण्डे १५ अध्यायः ॥ नवप्रसूतायांमाहेय्याम् । नवसूतिकायाम् ॥ धयतिसुताम् । धीयते वा। धेट्० । धेटइच्चेतिनुः ॥ दानीया दशधेनवो यथा । यास्तु पापविनाशिन्यः पठ्यन्ते दशधेनवः । तासां स्वरूपं वक्ष्यामिनामानिच धनाधिप ॥ प्रथमा गुडधेनुः स्यात् घृतधेनुरथापिवा । तिलधेनुस्तृतीयाच चतुर्थीजलसंज्ञिका ॥ क्षीरधेनुश्चविख्यातामधुधेनुरथापिवा । सप्तमीशर्कराधेनुर्दधिधेनुरथाष्टमी ॥ रसधेनुश्चनवमी दशमी स्यात्स्वरूपतः ॥ कुम्भाःस्युर्द्रवधेनूनामितरासान्तु राशयः । सुवर्णधेनुमप्यत्रकेचिदिच्छन्तिमानवाः ॥

धेनुकः । पुं । असुरविशेषे ॥ धेनुरिव । इवेप्रतिकृता वितिकन् ॥ रतिबन्धविशेषे । तल्लक्षणंयथा । न्यस्तह

स्तयुगला निजे पदे योषिदेतिकटि रूढवल्लभा। अग्रतो यदि शनै रधोमुखी धेनुकं हयवदुन्नतेप्रिये ॥ अपरञ्च। सुप्ताङ्घ्रिं समालिङ्ग्य स्वयं सुप्तोरमेत् पुनः। लघुलिङ्गं चालयेद्योवन्ध्योयं धेनुकः स्मृतः॥ इति रतिमञ्जरी ॥

धेनुकसूदनः। पुं। श्रीकृष्णे ॥ धेनुकं सूदयति। सूद०। ल्युः॥

धेनुका। स्त्री। करिण्याम्। हस्तिन्याम्॥ धेनौ। गवि॥ धेनुरिव। इवेतिकन्। धेनुरेव। स्वार्थे कन्वा॥

धेनुकारिः। पुं। श्रीकृष्णे॥ धेनुकस्य अरिः॥

धेनुकासुरसूदनः। पुं। श्रीकृष्णे॥

धेनुदुग्धम्। न। गोक्षीरे॥ चिर्भिटे॥

धेनुदुग्धकरः। पुं। गर्ज्जरे॥

धेनुष्या। स्त्री। बन्धकेस्थितायां क्षीरभेय्याम्॥ संज्ञायां धेनुष्येति धेनुशब्दस्य षुगागमोयत् प्रत्ययश्च स्वार्थे निपात्यते संज्ञायाम्। ऋणप्रत्यर्पणाय याधेनुर्दोहनार्थं मुत्तमर्णाय दीयते तस्याःसंज्ञेयम्॥

धेयः। त्रि। विधेये। प्रयोज्ये॥

धैनुकम्। न। स्त्रीणां करणे॥ धेनूनां संहतौ॥ अचित्तहस्तिधेनोष्ठगिति-धेनुशब्दात् समूहार्थेठक्। इसुसुक्तान्तात्कः॥

धैर्य्यम्। न। धृतौ। धीरतायाम्॥ स्थिरा चित्तोन्नति र्यातु तद्धैर्यमिति संज्ञितमितिभूपालकोषः॥ अप्रमादे। अव्याकुलत्वे॥ विघ्नाद्युपस्थितात्रपि प्रारब्धापरित्यागहेतावन्तःकरणवृत्तिविशेषे॥ निर्विकारचित्तत्वे॥ मनसोनिर्विकारत्वं धैर्यं सत्स्वपि हेतुषु। इतिरसिकाः॥ धीरस्य कर्मभावोवा। ष्यञ्॥

धैवतः। पुं। तन्त्रीकण्ठोत्थितस्वरविशेषे॥ सप्तस्वरान्तर्गतषष्ठस्वरे॥ अश्वस्तुधैवतं रौति॥ गत्वा नाभेरधोभागं वस्तिं प्राप्योर्द्धगःपुनः। धावन्निव च यो याति कण्ठदेशं सधैवतः॥ धीमतामग्रंधैवतः। पृ०॥

धैवत्यम्। न। धीवरोभावे॥ ष्यञ्। दाण्डिनायनेतिनिपातनात्तकारादेशः॥

धोडः। पुं। डुण्डुभे। राजिले। धोडासाँप इतिगौडभाषा॥

धोरणम्। न। हस्त्यश्वरथदोलादौ वाहनमात्रे॥ धोरति अनेन वा। धोरयति वा। धोर्ऋगतिचातुर्ये। ल्युः ल्युट्वा॥ अश्वस्यप्रथमगतौ। धोरिते॥

धोरणिः। स्त्री। परम्परायाम्॥

धोरितम् । न । अश्वप्रथमगतौ । धोरणे । धौरितके ॥ धोरितं गतिमात्रं यद्योजितं वल्गितं पुरः । अग्रकायः समुल्लासाकुञ्चिताख्यं नतत्रिकम् ॥ धोरणम् । धोर्ऋ० । भावे क्तः ॥

धोरितकम् । न । अश्वगतिभेदे । धौरितके ॥ स्वार्थे कन् ॥

धौतः । त्रि । मार्जिते । मृष्टे । निर्णिक्ते । प्रक्षालिते । धोया इतिभाषा ॥ धाव्यतेस्म । धावु० । क्तः ॥ उत्तेजिते ॥ शुभ्रे ॥ ईषद्धौतं स्त्रियाधौतं यद्धौतं रजकेनच । अधौतं तद्विजानीयादितिकर्मलोचनः ॥ न । रूप्ये ॥

धौतकटः । पुं । स्योने । प्रसेवके । सूत्रनिर्मितभाण्डे । धोकडा इतिगौडभाषा ॥

धौतकोषजम् । न । पत्रोर्णे ॥

धौतकौशेयम् । न । पत्रोर्णे । मुकुटा इतिभाषाप्रसिद्धे वस्त्रे ॥ धौतञ्चतत् कौशेयञ्च ॥

धौतशिलम् । न । स्फाटिके । शालिपिष्टे ॥

धौम्यः । पुं । देवलस्यर्षेःकनिष्ठभ्रातरि । पाण्डवानांपुरोहिते ॥

धौम्रः । पुं । धूम्रवर्णे ॥ न । धूम्रत्वे ॥ वास्तुस्थानभेदे ॥

धौरः । पुं । धवरत्वे ॥ इ०भा०प्र० ॥

धौरितम् । न । धौरितके ॥ धोरणम् । धोर्ऋ० । भावेक्तः । इट् । प्रज्ञादित्वादण् ॥

धौरितकम् । न । तुरङ्गगतिचातुर्ये ॥ धौरितमेव । स्वार्थे कन् ॥

धौरेयः । त्रि । भारवाहे । धुर्य्यरूपे ॥ धुरंवहति । धुरोयड्ढकाविति ढक् ॥ पुं । अनडुहि ॥

धौर्य्यम् । न । धोरिते । अश्वस्यप्रथमगतौ ॥

ध्माकारः । पुं । लोहकारके ॥ इतिहलायुधः ॥

ध्मातः । त्रि । सन्धुक्षिते । धमाया इति भाषा ॥ श्वासभूयिष्ठतयादीर्घइवलक्ष्यतेयोवर्णःसध्मातइत्युते ॥

ध्मापनम् । न । दंहने ॥

ध्मापितः । त्रि । दंहिते ॥

ध्यातः । त्रि । ध्यानविषयीकृते । चिन्तिते ॥ ध्यैचिन्तायाम् । क्तः । नध्याख्येति न तस्य नत्वम् ॥

ध्यानम् । न । चिन्तने ॥ अद्वितीयवस्तुनि विच्छिद्यविच्छिद्यान्तरिन्द्रियवृत्तिप्रवाहे ॥ शास्त्रोक्तदेवताद्यालम्बनेष्वचलो भिन्नजातीयैरनन्तरितःप्रत्ययसन्तान एकाग्रतेतियमाहुरितिभाष्यम् ॥ ध्येयप्रत्ययैकतानतायाम् ॥ एकत्रधृतस्यचित्तस्य भगव

दाकारवृत्तिप्रवाहोऽन्तरान्तराऽन्याकारप्रत्ययाव्यवहितो निदिध्यासनसंज्ञः ॥ चित्तस्यात्माकारप्रत्ययावृत्तौ ॥ ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः । ध्यानशब्देन विख्याता परमानन्ददायिनी ॥ परमात्मचिन्तने ॥ धारणानिरुद्धस्य चित्तस्य विजेचपञ्चवक्त्राद्याकारविषयायां चिन्तायाम् ॥ चिन्तातद्विषया ध्यानमित्युक्तेः ॥ तत्र प्रत्ययैकतानता ध्यानम् ॥ तत्र तस्मिन् देशे यत्र चित्तं धृतं तत्र प्रत्ययस्य ज्ञानस्य एकतानता विसदृशपरिणामपरिहारेण यदेव धारणायामवलम्बनीकृतं तदालम्बनतयैव निरन्तरमुत्पत्तिः सा ध्यानमुच्यते ॥ ध्यानपदार्थमुक्तं तन्त्रे । यथा । ध्यै चिन्तायां स्मृतो धातुश्चिन्तातत्त्वेन निश्चला । एतद्ध्यानमिह प्रोक्तं सगुणं निर्गुणं द्विधा ॥ सगुणं मन्त्रभेदेन निर्गुणं केवलं स्मृतमिति ॥ अपि च । ध्यानं तु द्विविधं प्रोक्तं स्वरूपारूपभेदतः । अरूपं तव यद्ध्यानमवाङ्मनसगोचरम् ॥ अव्यक्तं सर्वतोव्याप्तमिदमित्थंविवर्जितम् । अगम्यं योगिभिर्गम्यं कृच्छ्रैर्बहुसमाधिभिः ॥ मनसो धारणार्थाय शीघ्रं स्वाभीष्टसिद्धये । सूक्ष्मध्यानप्रबोधाय स्थूलध्यानं वदामि ते ॥ अरूपायाः कालिकायाः कालमातुर्महाद्युतेः । गुणक्रियानुसारेण क्रियते रूपकल्पनेति श्रीमहानिर्वाणतन्त्रे पञ्चमोल्लासः ॥ ध्यायते यत् । ध्यै० । बाहुलकात् करणे ल्युट् ॥

ध्याननिष्ठः । त्रि । ध्यायिनि ॥

ध्यानयोगः । पुं । ध्यानरूपयोगे ॥ यथा । विविक्तसेवी लघ्वाशी यतवाक्कायमानसः । ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ इति श्रीभगवद्गीता ॥ ध्यानयोगश्च परशक्तिसाक्षात्कारहेतुः श्वेताश्वतरशाखायामुक्तः । ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढामिति ॥

ध्यामम् । न । दमनकवृक्षे ॥ गन्धतृणे ॥ त्रि । श्यामले । दग्धसमानवर्णे ॥ ध्यायते पशुभिः । ध्यै० । बाहुलकान्मक् ॥

ध्यामकम् । न । रोहिषतृणे ॥

ध्यामा । पुं । परिणामे ॥ न । चिन्तायाम् ॥ तेजसि ॥ ध्यायति । ध्यै० । नामन्सीमन्निति साधुः ॥

ध्यायी । पुं । योगिनि ॥

ध्येयः । त्रि । उपास्ये । चिन्तनीये । ध्यातव्ये ॥ ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् । भृत्यार्तिहं प्रणतपाल

भवाब्धिपोतं वन्देमहापुरुष ते चरणारविन्दम् ॥

ध्राजिः । स्त्री । वातसंहतौ ॥

ध्राडिः । पुं । पुष्पचये ॥

ध्रुवः । पुं । शङ्कौ ॥ हरे ॥ विष्णौ ॥ वटे ॥ उत्तानपादजे । प्रसिद्धेनक्षत्रविशेषे ॥ वसुभेदे ॥ योगविशेषे ॥ तत्रजातस्य फलम् । नरीनर्त्ति वाणी सदा वक्त्रपद्मे चरीकर्त्ति काव्यं वरीभर्त्ति बन्धून् । ध्रुवाख्ये प्रसूति र्ध्रुवा तस्य कीर्त्ति र्दिगन्ते नितान्तं भवे चारुमूर्त्तिरिति ॥ * ॥ नासाग्रे ॥ स्थाणौ ॥ ध्रुवके ॥ शरारिपक्षिणि ॥ न । निश्चिते ॥ तर्के ॥ खे । आकाशे ॥ षण्मात्रस्यैकादशभेदे (ऽऽ॥।) ॥ त्रि । सन्तते ॥ शाश्वते ॥ अपरिणामिनित्ये ॥ स्थिरे ॥ निश्चिते ॥ यो ध्रुवाणि परित्यज्य अध्रुवाणिचसेवते । ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेवच ॥ पुं । ऊर्द्धमुखग्रहे ॥ न । उत्तरात्रयरोहिणीनक्षत्रेषु ॥ ध्रुवति स्थिरो भवति । ध्रुगतिस्थैर्य्ययोः । अच् । कु० ङित्त्वम् । उवङ् ॥ ध्रुवति । ध्रुवस्थैर्य्ये । इगुपधेतिकोवा ॥ गाने ॥ यदाह । ध्रुवाह्विनाच्यस्यप्रयमेप्राणादिति ॥ पुं । आवर्त्ते । आवर्त्तसाम्याद्रोमसंस्थाने ॥ तदुक्तम् । आवर्त्तसाम्या दावर्त्तो रोमसंस्थान माङ्गनामिति ॥ तेचदशयथा । द्वा वुरस्यौ शिरस्यौ द्वौ द्वौ द्वौ रन्ध्रोपरन्ध्रयोः । एकोभाले ह्यपानेच दशावर्त्ताध्रुवाः स्मृताइति ॥

ध्रुवकः । पुं । स्थाणौ ॥ गीताङ्गविशेषे ॥ सचोक्तः सङ्गीतदामोदरे । उत्तमःषट्पदःप्रोक्तोमध्यमः पञ्चमःस्मृतः । कनिष्ठश्च चतुर्भिःस्याद्ध्रुवकोयं मयोदितः ॥ उक्तंद्विखण्डमुद्ग्राहे-द्विखण्डं ध्रुवके मतम् । ततोद्विखण्डमाभोगेतालमानरसैःसह ॥ आभोगेकविनामस्यात्तथानायकनामच । उद्ग्राहं प्रथमं गीत्वाध्रुवंगायेत्ततः परम् ॥ ततोऽन्तराध्रुवस्तस्मादाभोगध्रुवकौततः । उद्ग्राहःप्रथमःपादःकथितःपूर्व्वसूरिभिः ॥ गीत्वापूर्व्वपदंन्यासोयत्र स ध्रुवको मतः । यत्रैव कविनामस्यात्सआभोगइतीरितः ॥ ध्रुवकादिषुसर्व्वेषुभवेदेवं विधःक्रमः । सतुषोडशविधोयथा । जयन्तःशेखरोत्साहौमधुरोनिर्म्मलस्तथा । कुन्तलःकमलश्चैव सानन्दश्चन्द्रशेखरः ॥ सुखदःकुमुदोजायीकन्दर्पो जयमङ्गलः । तिलकोललितश्चेतिध्रुवकाःषोडशस्मृताः ॥ एकादशाक्षरपदादेकैकाक्षरवर्द्धितैः । खण्डैर्ध्रुवाःषोडश-

सुः षड्विंशत्त्यचराावधिः ॥ द्विगुणैश्चरैरेव पदमेकमिहेष्यते । उद्ग्राह्यध्रुवकाभोगैरित्थं षट्पदनिर्णयः ॥ पञ्चपादे तु ध्रुवकेपदेनैकेनतद्ध्रुवः । चतुष्पादेतु ध्रुवकेपृथङ् नास्त्येवतद्ध्रुवइति ॥

ध्रुवका । स्त्री । आख्यायाम् ॥ ध्रुवकायाम् ॥ ध्रुवति । ध्रुव० । इगुपधज्ञेति कः । ततोऽज्ञातार्थेकः । क्षिपकादित्वान् नेत्त्वम् ॥

ध्रुवा । स्त्री । मूर्वायाम् ॥ आख्याम् । शालिपर्णिश ॥ शालपर्ण्याम् ॥ ध्रुवा इतिगौडभाषाप्रसिद्धे स्रुग्भेदे । वटपत्राकृतियज्ञपात्रे । जुह्वाम् ॥ वैकङ्कती ध्रुवेत्यमरः ॥ ध्रुवति । ध्रुव० । इगुपधेतिकः । ध्रु० । अचिकुशादित्वान् ङित्त्वम् । उवङ् ॥ साध्वग्राम् ॥ गीतभेदे ॥

ध्रौव्यम् । न । स्थैर्य्ये ॥

ध्वंसः । पुं । विनाशे । जन्याभावत्वे ॥ जगद्योनाशुपसंहारे ॥

ध्वंसनम् । न । अधःपतने ॥ गमने ॥ ध्वंसे ॥

ध्वंसितः । त्रि । खण्डिते ॥

ध्वंसी । पुं । गिरिजपीलौ ॥ त्रि । ध्वंसविशिष्टे ॥

ध्वंसी । स्त्री । त्रसरेणुपरिमाणे ॥ यथा । जालान्तरगते सूर्यकरे ध्वंसीविलोक्यते । त्रसरेणुस्तुविज्ञेयस्त्रिंशताप रमाणुभिरितिवैद्यकपरिभाषा ॥

ध्वजः । पुं । शौण्डिके ॥ गर्वे । दर्पे ॥ पुं । न । पताकायाम् ॥ खट्वाङ्गे ॥ मेढे ॥ चिह्ने ॥ पूर्वदिशोगृहे ॥ ध्वजति । ध्वजगतौ । अन्तर्भावितण्यर्थो वा । पचाद्यच् ॥ वहुपटविरचिता पताका ध्वजः ॥ तत्रविशेषःश्रीमत्कालिकापुराणे सर्वोपलक्षणात्तत्रैवनिर्वाणतन्त्रेययथा । पताकाध्वजदाने न देवप्रीतिःशतं समाः । ध्वजदण्डस्तुकर्त्तव्योदाविंशद्धस्तसम्मितः ॥ सुदृढश्छिद्ररहितः सरलःशुभदर्शनः । वेष्टितोरक्तवस्त्रेणकोटौचक्रसमन्वितः ॥ पताकातत्रसंयोज्यातत्तद्वाहनचिह्निता । प्रशस्तमूल्याम्लानाशादिव्यवस्त्रविनिर्मिता । शोभमानाध्वजाग्रेयापताकासाप्रकीर्त्तितेति ॥ * ॥ सेनाचिह्नंचितौशानां दण्डोध्वजइति स्मृतः । सपताकोनिष्पताकः सचद्वेयो द्विविधोबुधैरित्यादिविशेषोयुक्तिकल्पतरौमत्स्यादिपुराणेषुचद्रष्टव्यः ॥

ध्वजद्रुमः । पुं । तालवृक्षे ॥ माडवृक्षे ॥

ध्वजप्रहरणः । पुं । वायौ ॥

ध्वजभङ्गः । पुं । क्लीवत्वजनकेरोगविशेषे ॥

ध्वजवान् । त्रि । केतनयुक्ते । सपताके ॥

ध्वजाहृतः । पुं । सङ्ग्रामे स्वामिसका शाज्जिते दासविशेषे ॥ न । अवि-भाज्यधनविशेषे ॥ सङ्ग्रामादाहृतं यत्तु विजित्य द्विषताङ्कुलम् । स्वाम्यर्थं जीवितं त्यक्त्वा तद्ध्वजाहृतमुच्यते ॥

ध्वजी । पुं । पृथिवीधरे ॥ रथे ॥ ब्राह्मणे ॥ भुजङ्गमे ॥ तुरङ्गे ॥ मद्यविक्रयजीविनि । शौण्डिके ॥ मयूरे ॥

ध्वजिनी । स्त्री । सेनायाम् ॥ ध्वजाः सन्त्यस्याम् । अतइनिठनाविति इनिः ॥

ध्वजिनीपतिः । पुं । सेनापतौ ॥

ध्वजोत्थानम् । न । इन्द्रमहोत्सवे । भाद्रशुक्लद्वादश्यां विधीयमाने शक्रोत्सवे ॥

ध्वनः । पुं । शब्दे ॥ इतिद्विरूपकोषः ॥

ध्वनमोदी । पुं । षट्पदे । भ्रमरे ॥

ध्वनिः । पुं । शब्दमात्रे ॥ ध्वननम् । ध्वनशब्दे । खनिकष्यज्यसीति इः ॥ कोयं ध्वनिर्नाम येदूरादाकर्णयतो वर्णविवेकमप्रतिपद्यमानस्य कर्णपथमवतरति प्रत्यासीदतश्च पटुमृदुत्वादिभेदं वर्णेष्वासञ्जयतीति शारीरकभाष्यम् ॥ स्त्री । शङ्कुकर्णस्थानस्थायां देव्याम् ॥

ध्वनिग्रहः । पुं । कर्णे । श्रोत्रे ॥ ध्वनिं गृह्णाति । ग्रह० । विभाषा ग्रहइति पचेऽप् ॥

ध्वनितः । त्रि । शब्दिते । कृतस्वनमृदङ्गादौ । स्वनिते ॥ स्तनिते ॥ ध्वन्यतेस्म । ध्वन० । क्तः ॥

ध्वनिनाला । स्त्री । वीणायाम् ॥ वेणौ ॥ काहलायाम् । काहलीति हिमवत्प्रान्तप्रसिद्धे धत्तूरपुष्पसदृशे वाद्यविशेषे ॥

ध्वनिविकारः । पुं । काक्वाम् । शोकभयादिना शब्दविकृतौ ॥

ध्वस्तः । त्रि । स्रस्ते । गलिते । च्युते । ध्वस्यतेस्म । ध्वंसु अवस्रंसने । क्तः । गत्यर्थाकर्मकेति कर्त्तरि क्तोवा ॥

ध्वाङ्क्षः । पुं । काके ॥ मत्स्यात्खगे । बके ॥ तक्षके ॥ भिक्षुके । अर्थिनि ॥ गृहे ॥ ध्वाङ्क्षति । ध्वाक्षिघोरवासितेच । चात्काङ्क्षायाम् । पचाद्यच् ॥

ध्वाङ्क्षजङ्घा । स्त्री । काकजङ्घायाम् ॥

ध्वाङ्क्षजम्बूः । स्त्री । काकजम्ब्वाम् ॥

ध्वाङ्क्षतुण्डी । स्त्री । काकनासायाम् ॥

ध्वाङ्क्षदन्ती । स्त्री । } काकतुण्ड्याम् ॥
ध्वाङ्क्षनखी । स्त्री । }

ध्वाङ्क्षनाम्नी । स्त्री । काकोदुम्बरिकायाम् ॥

ध्वाङ्क्षनाशिनी । स्त्री । हपुषायाम् ॥

ध्वाङ्क्षनासा । स्त्री । } काकनासा-
ध्वाङ्क्षनासिका । स्त्री । }

याम् ॥

ध्वाङ्क्षपुष्टः । पुं । कोकिले ॥

ध्वाङ्क्षमाची । स्त्री । काकमाच्याम् ॥

ध्वाङ्क्षवल्ली । स्त्री । काकनासायाम् ॥

ध्वाङ्क्षाङ्गी । स्त्री । काकतुण्ड्याम् ॥

ध्वाङ्क्षारातिः । पुं । पेचके । उलूके ॥

ध्वाङ्क्षी । स्त्री । काकोलिकायाम् ॥ रवेःसङ्क्रान्तिविशेषे ॥ लघाविन्दुवारेभवेद्ध्वाङ्क्षनाम्नी तदाख्यत्तसौख्यं लभेदेववैश्यः ॥

ध्वाङ्क्षोली । स्त्री । काकोल्याम् ॥

ध्वान । पुं । शब्दे ॥ ध्वननम् । ध्वन० । भावेघञ् ॥

ध्वान्तम् । न । अन्धकारे ॥ ध्वन्यते । ध्वन० । क्तः । क्षुब्धस्वान्तेतिनिपातितम् ॥ नरकविशेषे ॥

ध्वान्तवित्तः । पुं । खद्योते ॥

ध्वान्तशत्रुः । पुं । ध्वान्तशात्रवे ॥

ध्वान्तशात्रवः । पुं । अर्के ॥ चन्द्रे ॥ वह्नौ ॥ श्योनाकवृक्षे ॥ ध्वान्तस्यशात्रवः ॥

ध्वान्तारातिः । पुं । सूर्ये ॥ चन्द्रे ॥ वह्नौ ॥

ध्वान्तोन्मेषः । पुं । खद्योते ॥ ध्वान्तेउन्मेषोऽस्य ॥

न

न । अ । निषेधे ॥ यथा । न मिथ्याभाषणं कुर्यान्न परानिष्टचिन्तनम् । परस्त्रीगमनञ्चैव ब्रह्मचारी विवर्जयेदिति ॥ उपमायाम् ॥ नह्यति । णह बन्धने । डप्रत्ययः ॥

नः । पुं । सुगते ॥ बन्धे ॥ द्विरण्डे ॥ प्रस्तुते ॥ रत्ने ॥ नकारे ॥

नंशुकः । त्रि । नाशके ॥ नश्यत्यल्पेन वायुना । णश अदर्शने । पचिनशोर्णुकन् कनुमौचेतिसाधुः ॥

नंष्टा । त्रि । नाशाश्रये ॥

नःक्षुद्रः । पुं । क्षुद्रनासिके ॥

नकिम् । अ ।
नकिर् । अ ।
नकीम् । अ । } वर्ज्जने ॥

नकुटम् । न । नासिकायाम् ॥

नकुलः । पुं । चतुर्थे पाण्डुसुते ॥ वभ्रौ । सर्पहणि । सूचिवदने ॥ शिवे ॥ त्रि । निष्कुले ॥ नास्तिकुलमस्य । नभ्राण्नपादिति नञ् प्रकृत्या ॥

नकुलाढ्या । स्त्री । गन्धनाकुल्याम् ॥

नकुली । स्त्री । कुकुट्याम् ॥ मांस्याम् ॥ शङ्खिन्याम् ॥ कुङ्कुमे ॥ नकुलभार्यायाम् ॥

नकुलीशः । पुं । कालीपीठस्थभैरवे ॥

नकुलेश्वरी । स्त्री । देवीविशेषे ॥

नकुलेष्टा । स्त्री । रास्नायाम् ॥ नकुलाना मिष्टा ॥ नाँई इति प्रसिद्धे रास्ना

भेदे ॥

नक्तम् । न । निशि । रात्रौ ॥ लक्षणया नक्तव्रतेपि । यथा । उपवासात् परंभैक्षं भिक्षापरमयाचितम् । अयाचितात् परंनक्तं तस्मान्नक्तेनवर्त्तयेत् ॥ देवैस्तुभुक्तं पूर्वाह्णे मध्याह्ने ऋषिभिस्तथा । पराह्णेपितृभिर्भुक्तं सन्ध्यायां गुह्यकादिभिः ॥ सर्ववेलामतिक्रम्य नक्तंभुक्त मभोजनम् । वामाचारोमहादेवो नक्तेनैवोद्धरेन्नरम् ॥ इतिदेवी पु० ॥ अस्यलक्षणाद्युक्तं मात्स्ये । दिवसस्याष्टमे भागेमन्दीभूतेदिवाकरे । नक्तं तच्च विजानीयान्ननक्तं निशि भोजनम् ॥ नक्षत्रदर्शनान्नक्तं गृहस्थेतु विधीयते । यतेर्दिनाष्टमे भागे रात्रौ तस्यनिषेधनमिति ॥

नक्तकः । पुं । लक्तके । कर्पटे । लत्ता इतिभाषा ॥ नजते । ओनजी व्रीडे । बाहुलकात् तन् । स्वार्थे कन् । नक्तं कं सुखमस्माद्वा । पृ० मलोपः ॥

नक्तचारी । पुं । उलूके । पेचके ॥ बिडाले ॥ त्रि । रात्रिचरमात्रे ॥

नक्तञ्चरः । पुं । राक्षसे ॥ चौरे ॥ पेचके ॥ वृषदंशादौ ॥ नक्तं चरति । चर० । चरेष्टः ॥ गुग्गुलौ ॥

नक्तन्दिवम् । अ । अहोरात्रे ॥ नक्तञ्च दिवाच । अचतुरेत्यादिना सप्तम्यर्थयो रव्यययो र्द्वन्द्वेनिपातनादच् समासान्तः ॥

नक्तम् । अ । निशि । रजन्याम् ॥ नजते । ओनजीव्रीडे । तम् प्रत्ययः ॥

नक्तमालः । पुं । करञ्जवृक्षे ॥ नक्तंमालो धारणमस्य । नक्तमा अलति वा । अल० । पचाद्यच् ॥

नक्तमुखा । स्त्री । रात्रौ ॥ इतिहलायुधः ॥

नक्तव्रतम् । न । दिवाभोजनाभावविशिष्टे रात्रिभोजने ॥ हविष्यभोजनंस्नानं सत्य माहारलाघवम् । अग्निकार्यं मधः शय्यां नक्तभोजीषडाचरेत् ॥ इति भविष्यपुराणम् ॥ नक्तं निशायां कुर्वीत गृहस्थोविधिसंयुतः । यतिश्चविधवाचैव कुर्यात् तत् सदिवाकरम् ॥ सदिवाकरन्तु तत् प्रोक्तमन्तिमेघटिकाद्वये । निशानक्तन्तु विज्ञेयं यामार्द्धे प्रथमे सदा ॥ मार्कण्डेयः । एकभक्तेन नक्तेन तथैवायाचितेनच । उपवासेन दानेन नैवाद्वादशिको भवेदिति ॥

नक्ता । स्त्री । कलिकार्याम् ॥

नक्तान्धः । त्रि । राव्यन्धे ॥

नक्तान्ध्यम् । न । राव्यन्धतायाम् ॥

नक्रः । पुं । कुम्भीरे । नाँका इति तंदुआ इतिच भाषाप्रसिद्धेजलजन्तौ ॥ न ।

अग्रदारुणि। जाणकाठ इतिगौड भाषा ॥ नासायाम् ॥ नक्रामतिदूरस्थलम् । क्रम्० । अन्यत्रापीतिडः । नभ्राडितिनलोपेन ॥

नक्रराट् । पुं । } ग्राहे । जलाटके ।
नक्रराजः । पुं । } गाह इतिभाषा प्रसिद्धे यादोविशेषे ॥

नक्रा । स्त्री । नासिकायाम् ॥

नक्षत्रम् । न । कृत्तिकादितारकासु । भे ॥ अत्रलिङ्गस्थानंयथा । हस्तास्वाती श्रवणा क्लीबे मृगशिरा नपुंसिस्यात् । पुंसिपुनर्वसु पुष्यौ मूलन्त्वस्त्री स्त्रियांशेषाः ॥ शेषाः ताराइतिसम्बन्धः ॥ मुक्तायाम् ॥ नक्षदतेछिनत्ति । नक्षदेतिसैात्रोधातुर्हिंसार्थ आत्मनेपदी। ष्ट्रन् । नभ्राण्नपादितिनलोपेन ॥ यद्वा । णक्षगतौ । नक्षति । क्रमिनक्षियजीत्यः ऽत्रन् ॥ नक्षणोति वा । क्षणहिंसायाम् । ष्ट्रन् । वाहुलकान्नलोपः॥ चीयतेः क्षरतेर्वाक्षमिति निपात्यते । नक्षत्रमिति वा । नलोपाभावः पूर्ववत् ॥

नक्षत्रकान्तिविस्तारः । पुं । धवलयावनाले ॥ इतिराजनिर्घण्टः ॥

नक्षत्रचक्रम् । न । मन्त्रग्रहणोक्तषट्चक्रान्तर्गतचक्रे ॥

नक्षत्रनेमिः । पुं । ध्रुवे ॥ चन्द्रे ॥ विष्णौ ॥ स्त्री । रेवत्याम् ॥ इति मेदिनी ॥

नक्षत्रपः । पुं । उडुपे । चन्द्रे ॥

नक्षत्रपदयोगः । पुं । यात्रायोगान्तरे ॥ यथा । मेषगे भास्करे षष्ठे लाभगे स्वोच्चगे यमे । नक्षत्रपदयोगोयं शत्रुमेघानिलो रणे ॥

नक्षत्रपुरुषः । पुं । चैत्रमासस्यसिताष्टम्यां यदा मूलगतः शशी । भगवन्तं सह लक्ष्म्या पूजयेच्च विधानत इत्यादिना वामनपुराणोक्ते व्रतविशेषे ॥

नक्षत्रमाला । स्त्री । सप्तविंशतिमौक्तिकैर्निर्मिते एकावलीहारे ॥ नक्षत्राणांमालेव ॥ नक्षत्रश्रेण्याम् ॥

नक्षत्रविद्या । स्त्री । ज्योतिषे ॥

नक्षत्रशूलः । पुं । ज्येष्ठापूर्वाभाद्रपदारोहिण्युत्तरफाल्गुनी । पूर्वादिषु क्रमाच्छूला यात्रायां मरणप्रदाः ॥

नक्षत्रसूचकः । पुं । निन्दिते ज्योतिर्विदि ॥ यथा । अविदित्वैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते । सपङ्क्तिदूषकः पापोज्ञेयो नक्षत्रसूचकः ॥ अपिच । तिथ्युत्पत्तिं नजानन्ति ग्रहाणां नैवसाधनम् । परवाक्येन वर्त्तन्ते तेवै नक्षत्र सूचकाः ॥

नक्षत्रसूची । पुं । नक्षत्रसूचके ॥ गृहेगृहेगत्वा पृष्टएव नक्षत्राण्यभिन्म्या

दीनि शुभाशुभसूचकानि सूचयतीति तथा ॥

नखनेशः । पुं । चन्द्रे ॥ नखचाणार्मीशः ॥ कर्पूरे ॥

नखः । पुं । न । पुनर्भवे । कररुहे ॥ पुं । खण्डे ॥ इतिहेमचन्द्रः ॥ न । व्याघ्रनखाख्येगन्धद्रव्ये । शुक्तौ । कोलदले ॥ द्विधा शङ्खनखाख्या ऽन्याशुक्त्याख्याबदरीछदा इतिरत्नमाला ॥ नखद्वयंग्रहश्लेष्मवातास्रज्वरकुष्ठहृत् । लघूष्णंशुक्रलंवर्ण्यंस्वादुव्रणविषापहम् ॥ अलक्ष्मीमुखदौर्गन्ध्यहृत्पाकरसयोःकटुः ॥ न खनति खन्यते वा । खनुअवदारणे । अन्ये०डः ॥ नखसर्त्तीति वा । नभ्राडितिसाधुः ॥ यद्वा । नह्यति । णह बन्धने । नहेर्हलोपश्चेति खः ॥ स्वल्पपत्रस्त्वसौ शुक्ति र्नखरी बदरच्छदा । महाँस्त्वसौ शङ्खनखः शङ्खाख्यो गन्धसारणः ॥

नखकुट्टः । पुं । नापिते ॥ इतित्रिकाण्डशेषः ॥

नखनिकृन्तनम् । न । नखच्छेदनार्थनापितशस्त्रविशेषे । नहेर्ना इतिभाषा ॥

नखनिष्पावः । पुं । निष्पावीभेदे । अङ्कुलिफलायाम् । ग्राम्यायाम् ॥

नखपर्णी । स्त्री । वृश्चिकाक्षुपे ॥

नखपुष्पी । स्त्री । पृक्कायाम् ॥

नखमुचम् । न । धनुषि ॥

नखम्पचा । स्त्री । यवाग्वाम् ॥ नखम्पचतीतिविग्रहे मितनखेचेति नखकर्मोपपदात्पचेःकर्त्तरि खश् । अरुर्द्विषदितिमुम् । पचिस्त्वात्र तापवाची ॥

नखरः । पुं । नखे । करकण्टके । कररुहे ॥ नखंराति । रा० । कः ॥

नखरञ्जनी । स्त्री । ओषधिविशेषे ॥ तस्याःफले ॥ हरीतक्यादिभ्यश्चेति फलप्रत्ययस्यलुप् ॥ नखच्छेदनास्त्रविशेषे । नहेर्ना इतिभाषा ॥ यथा । अनन्तचरणोपान्तचारिणी मलहारिणी । पुनर्भवच्छेदकरीगङ्गेव नखरञ्जनीति ॥

नखरायुधः । पुं । कुक्कुटे ॥ व्याघ्रे ॥ सिंहे ॥

नखराह्वः । पुं । करवारवृक्षे ॥ इति राजनिर्घण्टः ॥

नखरी । स्त्री । नख्याम् ॥ क्षुद्रनख्याम् ॥

नखविष्किरः । पुं । पक्षिविशेषेषु ॥ नखै र्विकीर्य्य ये भक्षयन्ति । ते च श्येनादयः ॥

नखवृक्षः । पुं । नीलवृक्षे ॥

नखशङ्खः । पुं । शम्बूके । क्षुद्रशङ्खे ॥

नखाघातः । पुं । रतिक्रीडायांस्थानवि

शेषेषु नखपाते ॥ स्थानानियथा । नखाघातः प्रदातव्यो यथास्थानानि कर्मसु । पार्श्वयो स्तनयोश्चैव ऊरौ चैव नितम्बके ॥ कक्षस्थलेचकर्णान्तेकपालेबाहुमूलके । ग्रीवायां कण्ठदेशेच नखाघातंसमाचरेत् ॥ तथा सर्वशरीरेषु नखं दद्याच्छनैः शनैरितिकामशास्त्रम् ॥

नखाङ्कः । पुं । न । व्याघ्रनख्याम् ॥

नखायुधः । पुं । व्याघ्रे ॥ सिंहे ॥ कुक्कुरे ॥

नखालिः । पुं । क्षुद्रशङ्खे ॥ नखपङ्क्तौ ॥

नखालुः । पुं । नीलवृक्षे ॥

नखाशी । पुं । पेचके ॥ त्रि । नखभक्षके ॥

नखी । पुं । सिंहे ॥ विदारणक्षमनखयुक्तपशुमात्रे ॥

नखी । स्त्री । नखनामगन्धद्रव्ये । शुक्तौ ॥ बह्वादित्वान् ङीष् ॥

नगः । पुं । पर्वते ॥ वृक्षे ॥ नगच्छति । गम्लृ० । अन्येभ्योपीति अन्येष्वपीति वा डः । नगोप्राणिष्वितिनञ्वा प्रकृत्या ॥ तीर्थविशेषे ॥ भास्करे ॥ पवनाशने ॥

नगजः । त्रि । पर्वतजातवस्तुमात्रे ॥

नगजा । स्त्री । क्षुद्रपाषाणभेदायाम् ॥

नगणः । पुं । त्रिलघौ (।।।) ॥

नगणा । स्त्री । पारावतपद्याम् । नयाफट्की इतिगौडभाषाप्रसिद्धलतायाम् । माखकाँगणीतिभाषा ॥

नगतीर्थम् । न । पुण्यक्षेत्रविशेषे ॥ नगस्य नगानां वा तीर्थम् ॥

नगनन्दिनी । स्त्री । पार्वत्याम् ॥

नगपतिः । पुं । हिमालये । गिरीन्द्रे ॥ नगानाम् पतिः ॥

नगभिद्-त् । पुं । पाषाणभेदने । इन्द्रे ॥

नगभूः । पुं । क्षुद्रपाषाणभेदायाम् ॥ त्रि । पर्वतजाते ॥

नगरम् । न । राजस्थितिस्थाने । पुरि । पत्तने ॥ यत्राष्टशतग्रामीयव्यवहारस्थानं मध्यवर्त्तितन्नगरम् । पण्यक्रियादिनिपुणै श्चातुर्वर्ण्यजनै र्युतम् । अनेकजातिसम्बन्धं नैकशिल्पिसमाकुलम् । सर्वदैवतसम्बन्धंनगरन्त्वभिधीयते ॥ नगाः वृक्षाः पर्वता वा सन्त्यस्मिन् । नगपांशुपाण्डुभ्यश्चेति रः । पक्षेक्षीबत्वम् ॥ नगाइवप्रासादादयःसन्त्यत्रवा ॥

नगरघातः । पुं । हस्तिविशेषे ॥ नगरं हन्ति । हन० । कृत्यल्युटोबहुलमिति अण् ॥

नगरन्ध्रकरः । पुं । क्रौञ्चदारणे ॥ रन्ध्रं करोतीतिरन्ध्रकरोरन्ध्रहेतुः । कृञो हेतुताच्छील्यानुलोम्येष्विति कृञष्ट

प्रत्ययः। नगस्य रन्ध्रकरः॥

नगरसम्भवम्। न। सिद्धपीठान्तरे॥

नगरी। स्त्री। पुर्याम्। नगरे॥ जातिलक्षणोङीष्॥

नगरीवकः। पुं। काके॥ इतिचिकाण्डशेषः॥

नगरोत्था। स्त्री। नागरमुस्तायाम्। नागरमोथा इतिभाषा॥

नगरौषधिः। स्त्री। कदल्याम्॥

नगस्वरूपिणी। स्त्री। प्रमाणिकावृत्ते॥

नगाटनः। पुं। वानरे॥ नगेष्वटनंयस्य॥

नगाधिपः। पुं। हिमालये॥ नगानामधिपः॥ सुमेरौ॥

नगाधिराजः। पुं। हिमालये॥

नगानिका। स्त्री। चतुरक्षरावृत्तिप्रभेदे॥ यथा। द्विलूर्यके गुरु र्यदा। नगानिका भवेत्तदा॥ यथा। विलोकये कदा चणम्। हरिं सरोरुहेक्षणमिति॥

नगाश्रयः। पुं। हस्तिकन्दे। हस्तिपचे॥ त्रि। नगवासिनि॥

नगौकाः। पुं। शरभे॥ पक्षिणि॥ पञ्चास्ये॥ काके॥ नगे वृक्षेऽगे वा ओक आश्रयो यस्य॥

नग्नः। पुं। वन्दिनि॥ क्षपणे। निर्ग्रन्थे। भदन्ते॥ त्रि। विवाससि। दिगम्बरे॥ नग्नः काषायवस्त्रः स्यान्नग्नः कौपीनकावृत्तः। इतिकाश्यपाजिनिः॥ नजतेक्त। ओनजीव्रीडे। अकर्मकत्वात्कर्त्तरिक्तः। ओदितश्चेतिनत्वम्॥ द्विकच्छःकच्छशेषश्चमुक्तकच्छस्तथैवच। एकशासाश्चवासाश्चनग्नःपञ्चविधः स्मृतः॥ पारिभाषिकनग्नो यथा। येषां कुले नवेदोस्ति न शास्त्रं नैवच व्रतम्। ते नग्नाः कीर्त्तिताः सद्भि स्तेषा मन्नं विगर्हितम्॥ इतिमार्कण्डेयपुराणम्॥ ऋग्यजुः सामसंज्ञेयं त्रयी वर्णावृतिर्द्विज। एतामुज्झतियो मोहात् सनग्नः पातकीस्मृतः॥ त्रयी समस्तवर्णानां द्विज संवरणं यतः। नग्नो भवत्युज्झितायां मतस्तस्यामसंशयम्॥ यस्तु सन्त्यज्य गार्हस्थ्यं वानप्रस्थो न जायते। परिव्राडपि मैत्रेय सनग्नः पापकृन्नरः॥ इतिविष्णुपुराणम्॥

नग्नकः। पुं। नग्ने॥ नग्नएव। स्वार्थेकन्॥

नग्नजित्। पुं। नाग्नजित्याःपितरि न्टपतिविशेषे॥

नग्नहूः। पुं। नानाद्रव्यकृते सुराबीजे। किण्वे॥ स्नानम् हूयतेवा। ह्वेञ्। सं० क्विप्। नग्नस्यहूः॥

नग्ना। स्त्री। नग्नयोषिति। विवस्त्रायां नार्याम्। कोटव्याम्॥ ननग्नां स्त्रिय

मीक्षेत पुरुषं वा कदाचन। नचमूत्रं पुरीषं वा नवै संस्पृष्टमैथुनमिति कूर्मपुराणम्॥

नग्नाटः। पुं। दिगम्बरे॥

नग्नाटकः। पुं। दिगम्बरयोगिनि॥

नग्निका। स्त्री। अनागतार्त्तवायाम्। अप्राप्तरजस्कायाम्॥ विवस्त्रायाम्॥ नजतेस्म। ओनजी०। गत्यर्थेति क्तः। ओदितश्चेतिनः। स्वार्थेकन्॥

नचेत्। अ। निषेधे॥

नञ्। अ। नञभावे निषेधेच स्वरूपार्थे प्यतिक्रमे। ईषदर्थेच साहश्ये तद्विरुद्धतदन्ययोः॥ इतिमेदिनी॥ अपिच। तत् साहृश्य मभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः॥ साहृश्ये यथा। अब्राह्मणः॥ अभावे। यथा। अपापम्॥ अन्यत्त्वे यथा। अघटःपटः॥ अल्पत्त्वे यथा। अनुदरा कन्या॥ अप्राशस्त्ये यथा। अकेशी॥ विरोधेयथा। असुरः॥ नकारो न लोपोनञिति विशेषणार्थः॥ द्वौनञौ प्रकृतमर्थं गमयतः। यथा। नाविष्णुः कीर्त्तयेद्विष्णुं नाविष्णु र्विष्णुमर्चयेत्। नाविष्णुः संस्मरे द्विष्णुंनाविष्णु र्विष्णु मामुयादिति महाभारतम्॥

नटः। पुं। शैलूषे। कृशाश्विनि। नव रसाभिनयचतुरे नर्त्तकविशेषे। जायाजीविनि॥ वर्णसङ्करजातिविशेषे यथा। शौचिक्यां शौण्डिका ज्जातो नटो वरुड एवचेति पराशरपद्धतिः॥ ब्रात्त्यायांचक्षत्रियाज्जात इति मनुः॥ अशोकवृक्षे॥ श्योनाक वृक्षे॥ नले। किष्कुपर्वणि॥ गोदन्तहरिताले॥ ब्रात्त्यात् क्षत्रियात् सवर्णाया मुत्पन्न जात्त्यन्तरे। जल्ले॥ नटति। नटनृत्तौ। पचाद्यच्॥ यद्वा। नमति। णम०। जनिदेश्त्यादिनानमेर्डटः। डित्त्वाट्टिलोपः॥

नटनम्। न। नर्त्तने। नाट्ये। नृत्ये॥ नट अवस्कन्दने। ल्युट्॥ आचरणे॥

नटनारायणः। पुं। रागविशेषे॥

नटभूषणम्। न। } हरिताले॥
नटमण्डनम्। न। }

नटवरः। पुं। नटश्रेष्ठे॥

नटसञ्ज्ञकः। पुं। गोदन्तहरिताले॥ नटे॥

नटान्तिका। स्त्री। लज्जायाम्॥ इति हारावली॥

नटी। स्त्री। नल्यौषधौ॥ वेश्यायाम्॥ नटयोषायाम्॥ गौरादित्त्वात् ङीष्॥

नटेश्वरः। पुं। शिवे॥ इतिहेमचन्द्रः॥

नट्या। स्त्री। नटसमूहे॥ पाशा०यः॥

नडः। पुं। नलतृणे। पोटगले॥ नडति। नडगहने। अच्॥

नडकीयः। त्रि। नड्वले॥ नडाः सन्त्यस्मिन्। नडादीनां कुक् चेतिछः॥

नडप्रायः। त्रि। नडबहुलदेशे। नड्वति॥

नडसंहतिः। स्त्री। नड्यायाम्॥ नडानां संहतिः॥

नडहः। त्रि। कान्ते। ललिते॥ इति भूरिप्रयोगः॥

नडहा। स्त्री। विलासिन्याम्॥

नड्या। स्त्री। नडसंहतौ॥ नडानां समूहः। पाशादिभ्यो यः॥

नड्वान्। त्रि। नडप्रायदेशे॥ नडाः प्रायाश्च। कुमुदनडवेतसेभ्योड्मतुप्। जय इति मादुपधाया इति वा वत्वम्॥

नड्वलः। त्रि। नडप्रायदेशे॥ नडाः सन्त्यस्मिन्। नडशादाड्ड्वलच्॥

नड्वाभूः। स्त्री। गृहविशेषे। कुट्टिमे॥ इति भूरिप्रयोगः॥

नतः। पुं। जन्मनाडिकाविशेषे॥ न। तगरपादाम्। तगरमूले॥ त्रि। कुटिले॥ नम्रे॥ नमति स्म। क्तः॥

नतद्रुमः। पुं। लताशाले॥ इतिरत्न०॥

नतनासिकः। त्रि। चिपिटनासे। अवटीटे॥ नता नम्रा नासिका ऽस्य॥

नताङ्गी। स्त्री। नार्याम्॥ इतिराजनि०॥

नतिः। स्त्री। नमस्कारे॥ नमने॥ त्रिन्॥ अथ सप्त प्रकाराणानतेर्लक्षणानि। त्रिकोणमथषट्कोणमर्द्धचन्द्रं प्रदक्षिणम्। दण्डमष्टाङ्गमुग्रञ्च सप्तधानतिलक्षणम्॥ ऐशानीवाथ कौवेरीदिक् कामाख्या प्रपूजने। प्रशस्ता स्थण्डिलादौच सर्वमूर्त्तिषुसर्वतः॥ त्रिकोणादिव्यवस्थाञ्च यदि पूर्वमुखोयजेत्। पश्चिमाच्छाम्भवीं गत्वा व्यवस्थां निर्दिशेत् तदा॥ यदोत्तरामुखः कुर्यात् साधकोदेवपूजनम्। तदायाम्यात्तु वायव्यांगत्वाकुर्यात्तु संस्थितिम्॥ दक्षिणाद्वायवीं गत्वादिशं तस्मात्शाम्भवीम्। ततोऽपिदक्षिणं गत्वा नमस्कार त्रिकोणवत्॥ त्रिकोणो यो नमस्कार त्रिपुराप्रीतिदायकः॥ १॥ दक्षिणाद्वायवीं गत्वा वायव्याच्छाम्भवींततः। ततोपिदक्षिणां गत्वा तांत्यक्त्वाग्नौ प्रविश्यच॥ अग्नितो राक्षसीं गत्वा ततश्चाप्युत्तरांदिशम्। उत्तराच्च तथाग्नेयीं भ्रमणं द्वित्रिकोणवत्॥ षट्कोणोयो नमस्कारः प्रीतिदःशिवदुर्गयोः॥ २॥ दक्षिणाद् वायवींगत्वातस्माद्याहृत्य दक्षिणम्। गत्वा यो ऽसौनमस्कारः सोऽर्द्धचन्द्रः प्रकीर्त्तितः॥ ३॥ सकृत् प्रदक्षिणं कृत्वा

वर्त्तुलाकृतिसाधकः । नमस्कारः कथ्यतेऽसौ प्रदक्षिणा इति द्विजैः ॥ ४ ॥ त्यक्त्वा स्व मानन स्थानं पश्चाद्गत्वा नमस्कृतिः । प्रदक्षिणं विनायातु निपत्यभुविदण्डवत् ॥ दण्डइत्युच्यते देवैःसर्वदेवौघमोददः ॥ ५ ॥ पूर्ववद् दण्डवद् भूमौनिपत्यहृदयेनतु । चिवुकेनमुखेनाथनासयाल्लिकेनच ॥ ब्रह्मरन्ध्रेण कर्णाभ्यां यद्भूमिस्पर्शनं क्रमात् । तदष्टाङ्ग इतिप्रोक्तो नमस्कारो मनीषिभिः ॥ ६ ॥ प्रदक्षिणत्रयं कृत्वासाधको वर्त्तुलाकृतिः । ब्रह्मरन्ध्रेण संस्पर्शःचितेर्यः स्यान्नमस्कृतौ ॥ सउग्र इतिदेवौघैरुच्यते विष्णुतुष्टिदः ॥ ७ ॥ नदानां सागरो यादृग् द्विपदां ब्राह्मणो यथा । नदीनां जाह्नवी यादृग् देवानामिव चक्रधृक् ॥ नमस्कारेषु सर्वेषु तथैवोग्रः प्रशस्यते । त्रिकोणाद्यैर्नमस्कारैः कृतैरेवतु भक्तितः । चतुर्वर्गं लभेद्भक्तानचिरादेवसाधकः ॥ नमस्कारोमहायज्ञः प्रीतिदः सर्वदासदा । सर्वेषामपिदेवानामन्येषामपि भैरव ॥ येसामुग्रोनमस्कारःप्रीतिदःसततं हरेः । महामायाप्रीतिकरःसनमस्कारयोत्तमः ॥ इतिकालीपुराणम् ॥

नदः । पुं । पुनर्वहे । भिद्य । शोणसिन्धुभैरवदामोदरब्रह्मपुत्रादौ ॥ अब्धौ ॥ निनदे ॥ नदति । णद० । पचाद्यच् ॥

नदनुः । पुं । मेघे ॥ सिंहे ॥ नदति । णदअव्यक्तेशब्दे । अनुङ्नदेश्चेति अनुङ् ॥

नदी । स्त्री । सरिति । तरङ्गिण्याम् । तटिन्याम् ॥ अस्यालक्षणम् । धनुःसहस्राण्यष्टौच गतिर्यासांनविद्यते । न ता नदीशब्दवहा गर्त्ता स्ताः परिकीर्त्तिताः इति ॥ सर्वा गुर्वीप्राङ्मुखी वाहिनीस्या लघ्वी पश्चाद्वाहिनी निश्चयेन । देशेदेशे तद्गुणा सा विशेषा न्वैवाधत्ते गौरवंलाघवञ्च ॥ प्रायो मृदुवहा गुर्व्यो लघ्व्यः शीघ्रवहाः स्मृताः । नद्यः पाषाणसिकतावाहिन्यो विमलोदकाः ॥ हिमवत्प्रभवायाश्च तासांतास्वमृतोपमम् । विन्ध्यात् प्राचीप्राच्यवाचीप्रतीची याचोदीची स्यान्नदी सा क्रमेण । वातारोपं श्लेष्मपित्तार्त्तिलोपं पित्तोद्रेकं पथ्यपाकञ्चधत्ते ॥ पारिपात्रभवा याश्च विन्ध्याख्यप्रभवाश्च याः । शिरोहृद्रोगकुष्ठानां ता हेतुःश्लीपदस्यचेतिराजनिर्घण्टः ॥ पचादिषु नदट् इतिटित्त्वनिपातनात्-

टिड्ढेतिङीप् ॥ नदीनाञ्चविशेषोयः सवराद्ये निरूपितः । तथामत्स्यपुराणादौ द्रष्टव्योवेत्तुमिच्छुभिः ॥

नदीकदम्बः । पुं । महाश्रावणिकायाम् । मुण्ड्याम् ॥ न । नदीसमूहे ॥

नदीकान्तः । पुं । समुद्रे ॥ नद्यःकान्ता यस्य ॥ इज्जले । निचुलद्रुमे ॥ सिन्धुवारके ॥

नदीकान्ता । स्त्री । जंबाम् ॥ काकजङ्घौषधौ ॥ लतायाम् ॥

नदीकूलम् । न । सरित्तटे ॥ नद्याःकूलम् ॥

नदीकूलप्रियः । पुं । अम्बुवेतसे ॥ नदीकूलं प्रियं यस्य ॥

नदीजः । पुं । अर्जुनवृक्षे ॥ यावनालशरे ॥ हिज्जलवृक्षे ॥ न । स्रोतोञ्जने ॥ त्रि । नद्यां जाते ॥

नदीजा । स्त्री । अग्निमन्थवृक्षे ॥

नदीतरस्थलम् । न । } घट्टे ॥ नदी
नदीतरस्थानम् । न । } भिन्नस्थाने ॥

नदीनः । पुं । वरुणे ॥ समुद्रे ॥ नदीना मिनःस्वामी ॥

नदीनिष्पावः । पुं । धान्यप्रभेदे । कटुनिष्पावे । कर्बुरे ॥

नदीमातृकः । त्रि । नद्यम्बुसम्पन्नव्रीहिपालितेदेशे ॥ नदी माता ऽस्य । नद्यृतश्चेतिकप् ॥

नदीवङ्कः । पुं । वङ्कुरे । वाँकइतिभाषा ॥ इतिशब्दमाला ॥

नदीवटः । पुं । वटीवृक्षे ॥

नदीष्णः । त्रि । नदीस्नानकुशले ॥ नद्यांस्नाति । ष्णाशौचे । सुपीतिकः निनदीभ्यामितिषत्वम् ॥ नदीज्ञे ॥ इतिपुरुषोत्तमः ॥

नदीसरऽ । न । इन्द्रक्रीडासरोवरे ॥

नदीसर्ज्जः । पुं । वीरतरौ । अर्जुनवृक्षे ॥

नदेयी । स्त्री । नादेय्याम् । भूमिजंबाम् ॥

नद्धः । त्रि । बद्धे ॥ उद्वृत्ते ॥ नह्यते । णहबन्धने । कर्मणि क्तः । नहोधइतिधत्वम् ॥

नद्ध्री । स्त्री । चर्ममयरज्जौ । बरत्रायाम् ॥ नह्यतेऽनया । णह० । दाम्नीतिष्ट्रन् ॥

नद्याम्रः । पुं । समष्ठिलावृक्षे ॥

नद्यावर्त्तकः । पुं । यात्रायोगान्तरे । नन्द्यावर्त्तके ॥ यथा । स्वराशिगेबुधे लग्ने सिते वा सुरवन्दिते । नद्यावर्त्तकयोगोयं यातुरिष्टार्थसिद्धिदः ॥ अन्योपि । भूसुते स्वोच्चगे लाभे स्वगक्षुम्भगते यमे । नद्यावर्त्तकयोगोयं रणेशचतुराननः ॥

ननन्दा । स्त्री । नन्दिन्याम् । स्वभर्त्तृभगिन्याम् । ननंद इतिभाषा ॥ नन

न्दति कृतायामपिसेवायां न तुष्यति । न नन्दयति भ्रातृजायामिति वा । नञिचनन्देरिति ऋन् ॥

ननान्दा । स्त्री । ननन्दायाम् ॥ न नन्दति नतुष्यति । ननन्दयति भ्रातृजायामिति वा । टुनदि० । नञिचनन्देरिति ऋन् वृद्धिश्चेतिकेचित् ॥

ननु । अ । विनिग्रहे ॥ अनुप्रश्ने ॥ परकृतौ ॥ अधिकारे ॥ संभ्रमे ॥ आमन्त्रणे ॥ अनुनये ॥ प्रश्ने ॥ अनुज्ञायाम् ॥ अवधारणे ॥ दुष्टोक्तौ ॥ सम्यग्वादे ॥ स्तुतौ ॥ वाक्यारम्भे ॥ आक्षेपे ॥ प्रत्युक्तौ ॥ उत्प्रेक्षाऽलङ्कारव्यञ्जके ॥ यथा । मन्ये शङ्के ध्रुवं नूनं किंवा प्रायो नु वेद्मिच । ननु वा नहि जानामि उत्प्रेक्षाव्यञ्जकानिचेतिकाव्यचन्द्रिका ॥ न नुदति । नुद० । मित०डुः ॥

ननुच । अ । विरोधोक्तौ ॥ न नुच च चेतिनिपातद्वयस्य समाहारद्वन्द्वः ॥ प्रश्ने ॥

नन्दः । पुं । गोपविशेषे । श्रीकृष्णस्य पितरि ॥ नृपविशे[illegible] । महानन्दिसुते । क्षत्रियवंशान्ते ॥ [illegible]नन्दे ॥ निधिप्रभेदे ॥ प्राग्दक्षिणद्वारगृहे ॥ वेणुविशेषे ॥ यथा । महानन्दस्तथानन्दोविजयोथजयस्तथा । चत्वारउत्तमावंशामातङ्गमुनिसम्मताः ॥ दशाङ्गुलोमहानन्दोनन्दएकादशाङ्गुलइतिसङ्गीतदामोदरः ॥ त्रि । सर्वाभिरुपपत्तिभिःसमृद्धे ॥ नन्दति इति नन्दः । टुनदि० । पचाद्यच् ॥

नन्दकः । पुं । हरेःखड्गे ॥ भेके ॥ त्रि । हर्षके ॥ कुलपालके ॥ नन्दयति देवान् । टुनदि० । ण्वुल् ॥ नन्दतात् । आशिषिचेति वुन्वा ॥

नन्दकिः । स्त्री । पिप्पल्याम् ॥

नन्दकी । पुं । विष्णौ ॥ विद्यामयो नन्दकाख्योऽसिरस्य । अतइनिठना-वितीनिः ॥

नन्दगोपिता । स्त्री । रास्नायाम् ॥

नन्दथुः । पुं । आनन्दे । सुखे ॥ टुनदि० । द्वितोऽथुच् ॥

नन्दनः । पुं । सुते ॥ भेके ॥ कामाख्यायां पर्वतविशेषे ॥ षड्विंशतितमेवत्सरे । सुभिक्षं क्षेम मारोग्यं शस्यं भवति शोभनम् । बहुक्षीरा स्तथा गावो नन्दनं नन्दने प्रिये ॥ न । इन्द्रस्योद्याने । गन्धमादनमूले गन्धर्वसुरसिद्धाप्सरोरतोद्याने ॥ छतिसंज्ञकच्छन्दःप्रभेदे ॥ यथा । नजभजरैस्तुरेफसहितैः शिवैर्हयैर्नन्दनम् । यथा । तरणिसुतातरङ्गपवनैः सलिलमान्दोलितम् मधुरिपुपादपङ्कजर

जः सुपूतपृथ्वीतलम् । मुरहरचिच चेष्टितकलाकलापसंस्मारकङ् चिन्तितलनन्दनं व्रज सखे सुखायहन्दावनम् ॥ त्रि । हर्षके ॥ आनन्दकारके ॥ नन्दयति । टुनदि० । नं०ल्युः॥

नन्दनजम् । न । हरिचन्दने ॥

नन्दनन्दनः । पुं । श्रीकृष्णे ॥ नन्दस्य नन्दनः ॥

नन्दनन्दिनी । स्त्री । दुर्गायाम् ॥

नन्दनमाला । स्त्री । श्रीकृष्णप्रीतिकृन्मालिकाविशेषे ॥

नन्दना । स्त्री । दुहितरि ॥ इतिजटाधरः ॥

नन्दन्तः । पुं । पुत्रे ॥ नन्द्यात् । टुनदि० । रुहिनन्दिजीविप्राणिभ्यःषिदाशिषीति झच् ॥

नन्दपालः । पुं । वरुणे ॥

नन्दपुत्री । स्त्री । पार्वत्याम् ॥ इतिचिकाण्डशेषः ॥

नन्दयन्तः । त्रि । अर्भके ॥ नन्दयति । टुनदि० । तृभूवहिवसिभासीच्याद्दिनाझच्षित् ॥

नन्दा । स्त्री । गौर्याम् ॥ नन्दते सुरलोकेषु नन्दने वसते ऽथवा । हिमाचले महापुण्ये नन्दादेवी ततःस्मृता ॥ संस्थाप्य नन्दिता यस्मात् तस्मान्नन्दा तु साऽभवत् । इतिचनामकारणम् । संस्थाप्य ब्रह्मादिभिर्हिमगिराविति शेषः ॥ अलिञ्जरे । नाँदइतिभाषा ॥ सम्पदि ॥ तिथिविशेषे ॥ यथा । प्रतिपदेकादशीषष्ठी नन्दा ज्ञेयामनीषिभिः ॥ अर्कसङ्क्रमविशेषे । स्थिरेजीववारेतुनन्देतिसंज्ञा तदाविप्रवर्गःसुखीमासमेकम् ॥ न । नन्दरि ॥ तीर्थविशेषे ॥

नन्दात्मजः । पुं । श्रीकृष्णे ॥ नन्दस्य आत्मजः ॥

नन्दात्मजा । स्त्री । दुर्गायाम् ॥

नन्दिः । पुं । नन्दिकेश्वरे । पिनाकिनः प्रतीहारे ॥ पुं । न । द्यूताङ्गे ॥ आनन्दे ॥ नन्दति । टुनदि० । इन् ॥

नन्दिकः । पुं । नन्दिवृक्षे ॥

नन्दिका । स्त्री । इन्द्रक्रीडास्थाने ॥ अलिञ्जरे ॥

नन्दिकेश्वरः । पुं । शालङ्कायने । ताण्डवतालिके । शिवद्वारपाले ॥ पुराणविशेषे ॥

नन्दिघोषः । पुं । अर्जुनस्यरथे ॥ वन्दिजनस्य घोषे ॥

नन्दितरुः । पुं । धवद्रुमे ॥

नन्दी । पुं । हरप्रतीहारे । गिरिशवेश्मनि ॥ सन्निविधउक्तोवह्निपुराणे ॥ यथा । आद्यः कनकनन्दीच गिरिकाख्यो द्वितीयकः । सोमनन्दी तृती

यस्तु विज्ञेयानन्दिनखयइति ॥ गर्द्दभाण्डे ॥ वटद्रुमे ॥

नन्दिनी । स्त्री । उमायाम् ॥ गङ्गायाम् ॥ ननान्दरि ॥ वशिष्ठधेनौ ॥ वशिष्ठाखण्देव्याम् ॥ व्याडिमातरि॥ रेणुकाख्यौषधौ ॥ तीर्थविशेषे ॥ नन्दयति । टुनदि० । णिनिः । ङीप्॥

नन्दिनीतनयः । पुं । अभिधानविशेषस्य कर्त्तरि । व्याडिमुनौ ॥

नन्दिनीसुतः । पुं । व्याडिमुनौ ॥ नन्दिन्याः सुतः ॥

नन्दिपुराणम् । न । उपपुराणप्रभेदे ॥

नन्दिवर्द्धनः । पुं । भर्गे । शिवे ॥ पक्षान्ते ॥ तनये ॥ मित्रे ॥ त्रि । आनन्दवर्द्धके ॥

नन्दिवृक्षः । पुं । नन्दीद्रुमे ॥ नन्दनम् । टुनदि० । इन् । नन्द्याःवृक्षः ॥

नन्दी । स्त्री । दुर्गायाम् ॥

नन्दीमुखी । स्त्री । पक्षिविशेषे ॥ यथा । स्थूलाकठोरावृत्ताच यस्या श्चञ्चूपरिस्थिता । गुटिका चञ्चुसदृशी ज्ञेया नन्दीमुखीतिसा ॥ तन्द्रायाम्॥ इतिहेमचन्द्रः ॥

नन्दीवर्त्तः । पुं । सामुद्रमत्स्यविशेषे॥

नन्दीवृक्षः । पुं । नन्दिवृक्षे । स्थालीवृक्षे । वेलिआपीपर इति प्रसिद्धे ऽश्वत्थभेदे । कान्तलकादन्योयम् ॥ नन्दीवृक्षो लघुः स्वादु स्तिक्तः स्तुवरउष्णकः । कटुपाकरसोग्राही विषपित्तकफास्रनुत् ॥ अश्वत्थाकारःक्षीरवान् स्वनामप्रसिद्धोवृक्षः इतिभरतः ॥ कोङ्कणदेशप्रसिद्धे सुगन्धिवृक्षविशेषे । तूणीके । पीतके । कुठेरके ॥ तूत इतिभाषाप्रसिद्धे वृक्षविशेषे । तुन्ने । कुबेरके । कान्तलके । नन्दिवृक्षे ॥ गान्धीराख्यतृणे ॥ इतिशब्दाम्बुधिः ॥ नन्दनम् । टुनदि० । इन् । कृदिकारादितिङीष् ॥ नन्द्याः वृक्षः ॥

नन्दीशः । पुं । नन्दिनि । शिवद्वारपाले ॥ भरतोक्ततालप्रभेदे ॥

नन्दीश्वरः । पुं । महादेवे । शिवे ॥ सदाशिवद्वारपाले ॥ नन्दीशाख्येताले ॥ यथा । गोलघुर्गौ लघुः प्लुतस्ताले नन्दीश्वरेमताः इति सङ्गीतदामोदरः ॥

नन्दीसरः । न । इन्द्रसरोवरे ॥

नन्द्यावर्त्तः । पुं । पश्चिमद्वाररहितो नन्द्यावर्त्ताह्वयस्तथेत्युक्तलक्षणे राजवेश्मप्रभेदे ॥ लक्षणान्तरञ्च । दक्षिणानुगतालिन्दत्रयंयत् पश्चिमामुखम् । पूजनीयोत्तरच्छायं नन्द्यावर्त्तं वदन्तितदिति भरतधृतःसाञ्जः ॥ तगरद्रुमे ॥ मत्स्यविशेषे ॥ नद्या

वर्त्तास्वे याषायोगे ॥ नन्दयतीति नन्दी । नन्दी आवर्त्तो ऽच ॥

नपात् । त्रि । अरक्षके ॥ नपाति । न पात् अच्‌न्त: ॥

नपुंसक: । पुं । न । क्लीवे ॥ नस्त्री न पुमानित्यस्य पुंसकभावो नञ्चादि- त्यत्रनिपातनात् ॥ नपुंसकोभवेदि तिभाष्यात् पुंस्यप्ययम् ॥ अस्य लक्ष णं यथा । स्तनकेशवती स्त्री स्याल्लो मश: पुरुष: स्मृत: । उभयो रन्तरं यच्च तदभावेन पुंसकमिति ॥ * ॥ नपुंसकविशेषानाह भावप्रकाश:- । यथा । आसेक्यश्च सुगन्धिश्च कु म्भीक श्चेर्ष्यक स्तथा । अमीसशु- क्रा बोद्धव्या अशुक्रो षण्ढसंज्ञक: ॥ तेषांलक्षणानि यथा । पित्रोरत्यु स्व ल्पवीर्यत्वादासेक्य: पुरुषो भवेत् । सशुक्रं प्राश्यलभते ध्वजोन्नति मसं शयम् ॥ य: पूतियोनौ जायेत स- हि सौगन्धिको भवेत् । स्वेगुदे ऽब्र ह्मचर्य्या य: स्त्रीषुपुंवत् प्रवर्त्तते । स कुम्भीकइतिज्ञेयो गुदयोनिस्तुसस्मृ त: ॥ दृष्ट्वा व्यवाय मन्येषां व्यवाये- य: प्रवर्त्तते । ईर्ष्यक: सतु विज्ञेयो दृष्टियोनिश्च सस्मृत: ॥ यो भार्य्याया मृतौ मोहा दङ्गनेव प्रवर्त्तते । तत स्त्रीचेष्टिताकारो जायते षण्ढ संज्ञ क: ॥ इति भावप्रकाश: ॥

नप्ता । पुं । पौत्रे ॥ दौहित्रे ॥ नपत न्तिपितरो ऽनेन । पतॢ० । नप्तृने ष्ट्रत्वष्टृतिसाधु: । नञ: प्रकृतिभाव: पतेरच्छब्दलोपश्चनिपातनात् ॥

नप्त्री । स्त्री । पौत्र्याम् ॥ दौहित्र्याम् ॥ न पतन्तिपितरो ऽनया नप्तृवत् साधु: । ऋन्नेभ्योङीप् ॥

नभ: । पुं । श्रावणमासे ॥ व्योम्नि ॥ न भते । णभहिंसायाम् । पचाद्यच् ॥

नभ:क्रान्ती । पुं । सिंहे ॥ इतिशब्द- माला ॥

नभ: प्राण: । पुं । पवने ॥ इतित्रिकाण्ड शेष: ॥

नभ:सत् । पुं । निर्जरसि । देवे ॥

नभ:सरित् । स्त्री । मन्दाकिन्याम् ॥

नभ:स्थित: । पुं । नरकविशेषे ॥ त्रि । आकाशस्थिते ॥

नभ:स्पृक् । त्रि । अन्तरीक्षव्यापिनि ॥ नभ: स्पृशति । स्पृश० । क्विप् ॥

नभश्चक्षु: । पुं । सूर्य्ये ॥ इतिशब्दमाला॥

नभश्चमस: । पुं । चन्द्रे ॥ चित्रापूपे ॥ इन्द्रजाले ॥ इतिमेदिनी ॥

नभश्चर: । पुं । विहङ्गमे ॥ विद्याधरे ॥ मेघे ॥ वाते ॥ ग्रहे ॥ देवे ॥ राक्ष से ॥ त्रि । व्योमचारिणि ॥

नभा: । पुं । घने । मेघे ॥ श्रावे ॥ श्रा

वर्षमासे ॥ विरहिणो नभ्यति नभ्नाति नभते वा । णभ० । असुन् ॥ वर्षायाम् ॥ विसतन्तौ ॥ पतद्ग्रहे ॥ त्रि । पलितशीर्षे ॥ नह्यते मेघैः । णहबन्धने । नहेर्दिविभश्चेत्यसुन् भश्चान्तादेशः ॥

नभऽ । न । व्योम्नि । आकाशे ॥ नह्यते मेघैः । णह० । नहेर्दिविभश्चेत्यसुन् भश्चान्तादेशः ॥ न वभक्तिवा । भसदीप्तौ । क्विप् ॥ नभनम् नभ्यतेऽनेनावश ॥

नभसः । पुं । न । व्योम्नि ॥ नभते नभ्नाति वा । अत्यविचमितमीत्यादिना असच् प्रत्ययः ॥

नभसङ्गमः । पुं । खगे ॥ पक्षिणि ॥ नभसं गच्छति । गम्लृ० । गमेःसुपीति खच् ॥

नभस्यः । पुं । भाद्रमासे ॥ नभाःअभ्रम् । तत्रसाधुः । यत् ॥

नभस्वान् । पुं । वायौ ॥ नभोऽस्याश्रयत्वेन अस्ति । मतुप् । तसौमत्वर्थे इतिभत्वाद्रुत्वाभावः । वत्वम् ॥

नभसत् द् । पुं । देवे । सुरे ॥ नभस्याकाशे सीदति गच्छति । सद्लृ० । सत्सूद्विषेत्यादिना क्विप् ॥

नभाकम् । न । तमे ॥ नभ्नाति । णभ० । पिनाकादित्वादाकः ॥

नभोगजः । पुं । वारिदे । मेघे ॥ इति त्रिकाण्डशेषः ॥

नभोगतिः । स्त्री । आकाशगमने । खगतौ ॥ यथा । प्रडीनोड्डीनसण्डीनडयनानिनभोगतौ ॥ त्रि । खचरे ॥ नभसिगतिर्यस्यवा ॥

नभोदुहः । पुं ।
नभोद्वीपः । पुं ।
नभोधूमः । पुं । } वारिदे । मेघे ॥ इतिशब्दमाला ॥

नभोनदी । स्त्री । स्वर्गङ्गायाम् ॥

नभोमणिः । पुं । रवौ । सूर्ये ॥

नभोमण्डलदीपः । पुं । इन्दौ ॥

नभोम्बुपः । पुं । चातकखगे ॥

नभोरजऽ । न । अन्धकारे ॥

नभोरेणुः । स्त्री । कुज्झटिकायाम् ॥

नभोलयः । पुं । धूमे ॥

नभ्यः । पुं । अक्षे ॥ नाभयेहितः । रथाङ्गसच्छिद्रंनाभिः । तदनुप्रविष्टःकाष्ठविशेषोक्षः । सच तदनुगुणत्वात् तस्मैहितः । अञ्जनतैलाभ्यङ्गः तदपिस्नेहनत्वान्नाभयेहितम् । उगवादिभ्योयत् । नाभिनभञ्च ॥ त्रि । नभसम्बन्धिनि ॥

नभ्राट् । पुं । मेघे ॥ नभ्राजते इतितथा । भ्राजृ० । क्विप् । नभ्राण्नपादितिसाधुः ॥

नमत् । त्रि । प्रणते ॥

नमतः । पुं । प्रह्वे ॥ धूमे ॥ नटे ॥ नमति । णम० । भृमृदृशीत्यादिनाऽतच् ॥
नमनम् । न । वाङ्मनःकायप्रणिधाने न प्रह्वीभवने ॥ त्रि । नमयितरि ॥ कर्त्तरिल्युट् ॥
नमयिता । त्रि । नमनकर्त्तरि ॥
नमः ऽ । अ । नतौ ॥ नमनम् । णमप्रह्वत्वेशब्देच । असुन् ॥
नमसः । पुं । अनुकूले ॥ नमति । णम० । अत्यविचमीत्यादिनाऽसच् ॥
नमसितः । त्रि । अर्चिते । पूजिते । कृतनमस्कारे ॥ नमःकृतम् । नमोवरिवश्चित्रङइतिनमसःक्यच् । क्तः । क्यस्यविभाषेतिवायलोपः ॥
नमस्कारः । पुं । नमस्कृतौ । करयोःशिरस्संयोगेन नतिकरणे । स्वापकर्षबोधकव्यापारविशेषे ॥ सर्वैश्चापि नमस्कुर्युःसर्वावस्थासु सर्वदेतिव्यवहारः । नाप्रयतायाप्रयतोऽभिवादयेदिति शङ्खः । देवंविप्रंगुरुंदृष्ट्वान नमेद्यस्तु संभ्रमात् । सकालसूत्रं व्रजति यावच्चन्द्रदिवाकरौ ॥ ब्राह्मणश्चगुरुंदृष्ट्वान नमेद्योनराधमः । यावज्जीवनपर्यन्तमशुचिर्यवनोभवेदिति ब्रह्मवैवर्त्तपुराणम् ॥ देवतायतनंदृष्ट्वादृष्ट्वातु दण्डिनं तथा । नमस्कारं नकुर्याद्यः प्रायश्चित्ती भवेन्नरः ॥ सभायां यज्ञशालायां देवतायतनेषुच । प्रत्येकन्तुनमस्कारोहन्तिपुण्यंपुराकृतम् ॥ उपविश्य नमेच्छूद्रो दीर्घायुर्ब्राह्मणोवदेत् । सशूद्रो नरकंयाति ब्राह्मणोयात्यधोगतिम् ॥ * ॥ अश्वारूढमजानन्तं धावन्तं धनगर्वितम् । जपस्थंजलमध्यस्थं षड्विप्रान्नाभिवादयेत् ॥ * ॥ पुष्पहस्तोवारिहस्तस्तैलाभ्यक्तोजलस्थितः । आशीःकर्त्तानमस्कर्त्ताउभयोर्नरकंभवेदिति कर्मलोचनः ॥ * ॥ मातुःपितुः कनीयांसंननमेद्वयसाधिकः । नमस्कुर्याद् गुरोःपत्नीं भ्रातृजायां विमातरम् ॥ यमः । अभिवादयतःपूर्वमाशिषं न प्रयच्छति । यद्दुष्कृतं भवेत्तस्य तस्माद् भागं प्रयच्छते ॥ स्वस्तीति ब्राह्मणे ब्रूया दायुष्मानिति राजनि । वर्द्धतामितिवैश्ये षुशूद्रेस्वारोग्यमेवचेतिशब्दकल्पद्रुमेमलमासतत्त्वम् ॥ विषभेदे ॥ इतिशब्दचन्द्रिका ॥ नमःकरणम् । कृञ० । घञ् ॥
नमस्कारी । स्त्री । खदिर्याम् । छाया लोडीतिख्यातौषधौ ॥ नमस्कारणीला । सुपीतिणिनिः ॥
नमस्कृतिः । स्त्री । नमस्कारे ॥ नमः

करणम् । नमः क्रियतेऽनयावा । डुकृञ्० । स्त्रियां क्तिन् ॥
नमस्यः । त्रि । नमस्कारार्हे ॥
नमस्यन् । त्रि । कायवाङ्मनोभि र्नमस्कुर्वति ॥
नमस्या । स्त्री । पूजायाम् ॥ नमस्करणम् । नमोवरिवश्चित्रङः क्यच् । अ-प्रत्ययादित्यकारः । टाप् ॥
नमस्यितः । त्रि । पूजिते । अर्चिते । नमसिते ॥ नमः कृतम् । नमोवरिव इति नमसः क्यच् । क्तः ॥
नमितः । त्रि । जातनमस्कारे ॥ ना-मिते ॥
नमुचिः । पुं । शुम्भनिशुम्भाभ्यां कनिष्ठे दैत्यविशेषे ॥ अनङ्गे । कामे ॥ नमुञ्चति । मुच्लृ० । इगुपधात् कि दितीन् । नभ्राण्नपादितिनञ् प्रकृत्या ॥
नमुचिद्विट् । पुं । इन्द्रे । मघोनि ॥ नमुचिं द्वेष्टि । द्विष० । सत्सूद्विषेत्यादि नाक्विप् ॥
नमुचिसूदनः । पुं । इन्द्रे । पाकशासने ॥ नमुञ्चति । मुच्लृ० । इन् । नभ्राडितिनञ् प्रकृत्या । सूदयति । षूदक्षरणे । नं० ल्युः ॥ नमुचेर्दैत्यस्य सूदनः ॥
नमेरुः । पुं । सुरपुन्नागे ॥ रुद्राक्षे ॥
नमोगुरुः । पुं । ब्राह्मणे । भूसुरे ॥ नमस्करणीयोगुरुः ॥
नम्रा । स्त्री । काष्ठादिनिर्मितकूपादिसङ्क्रमे ॥
नम्यः । त्रि । नमस्ये ॥
नम्रः । त्रि । नते । नमनशीले ॥ नमति । तच्छीलः । णम० । नमिकम्पी तिरः ॥
नम्रकः । पुं । वेतसे ॥ त्रि । नते ॥
नयः । पुं । नीतौ । नाये ॥ द्यूतविशेषे ॥ नैगमादिषु ॥ युक्तौ ॥ शास्त्रे ॥ त्रि । न्याय्ये ॥ नेतरि ॥ नयनम् ॥ णीञ्० । वाहुलकात्एरच् ॥ नयते: कर्त्तरि पचाद्यच्वा ॥
नयकः । पुं । नयेकुशले ॥ ण्वा०कन् ॥
नयज्ञः । त्रि । नीतिज्ञे ॥ नयंजानाति ज्ञा० । कः ॥
नयद्रुट् । त्रि । नीतिविरुद्धकारिणि ॥
नयनम् । न । चक्षुषि । लोचने ॥ प्रापणे ॥ नीयतेऽनेन । णीञ्० । ल्युट् ॥
नयनाभिरामः । पुं । चन्द्रे ॥ नयनयोरभिरामः ॥ त्रि । प्रिये ॥
नयनी । स्त्री । कनीनिकायाम् ॥ नीयते स्वविषयोऽनया । णीञ्० । ल्युट् । ङीप् ॥
नयनोत्सवः । पुं । दीपे ॥ दृगुत्सवे ॥

नयनयोः उत्सवो यस्मिन् ॥

नयनोपान्तः । पुं । अपाङ्गे ॥

नयनौषधम् । न पुष्पकासीसे ॥

नयपीठी । स्त्री । द्यूताङ्गे । अष्टकाङ्गे । छक् इतिगौडभाषा ॥

नयवर्त्म । न । षाड्गुण्यप्रयोगे ॥ सन्धि विग्रहयानानि संस्थाप्यासनमेवच । द्वैधीभावश्चविज्ञेयाः षड्गुणानीति वेदिनाम् ॥ नयस्य वर्त्म ॥

नयविशारदः । पुं । नीतिशास्त्रज्ञे ॥

नयशाली । पुं । नीतिसम्पन्ने ॥

नयानुगः । त्रि । नीत्यनुसारिणि ॥

नरम् । न । रामकर्पूरतृणे ॥

नरः । पुं । अजे । अच्युते । विष्णौ ॥ मनुजे ॥ अर्जुने ॥ नरति । न्यणातिवा । नॄनये । अच् ॥ परमात्मनि ॥ नरतीतिनरः प्रोक्तः परमात्मा सनातन इतिव्यासः ॥ शङ्कौ ॥

नरकः । पुं । भूमेर्गर्भेवराहाज्जाते दैत्यविशेषे । भौमे ॥ पापिनां कष्टजनकस्थानविशेषे । निरये । नारके ॥ अयञ्च द्वाविंशद्भेदभिन्नः । यथा । रौरवध्वान्तशीताष्णसन्तापाजमहाम्बुजाः । कालसूत्राष्टमाह्वोते नरकाइतिविश्रुताः ॥ सूच्यास्यकालखड्गाख्यक्षुरधाराम्बरीषकाः । तप्ता ऽङ्गार महादाहसन्तापाश्चेतियेमुने ॥ भ

वन्त्यष्टौसुवीभत्सा महाशब्दपदानुगाः ॥ अथनरकराजाष्टकम् । लाक्षाप्रलेपमांसार्द्रानिरुच्छ्वासनसोच्छ्वसाः । युग्माद्रिशाल्मलीलोहप्रदीप्तक्षुत्पिपासकाः ॥ कृमीशांनिचयश्चेति राजानः परिकीर्त्तिताः ॥ लोहस्तम्भोथविण्मूत्रस्तथा वैतरणीनदी । तामिस्त्रश्चान्धतामिस्त्रः कुम्भीपाकः सरौरवः ॥ महापदानुगोधीचीरा नराजेश्वरेश्वराइति ॥ नरति न्यणातिवा । नॄनये । कृ॰वुन् ॥ पापकृद्याति नरकं प्रायश्चित्तपराङ्मुखः ॥ उदयनाचार्यास्तु नचनरकाण्येवनसन्तीतिक्लीवत्वं प्रयुञ्जते तच्चमूलं मृग्यम् ॥

नरककुण्डम् । न । ब्रह्मवैवर्त्तादिषु प्रसिद्धे षडशीति भेदभिन्ने यातनास्थानविशेषे ॥

नरकजित् । पुं । श्रीहरौ ॥

नरकदेवता । स्त्री । निरयदेव्याम् । अलक्ष्म्याम् ॥

नरकस्थः । त्रि । निरयस्थिते ॥ नरकस्थोपि देहंवै न पुनस्त्यक्तुमिच्छति ॥

नरकस्था । स्त्री । वैतरण्याम् ॥ नरके तिष्ठति । ष्ठा॰ । सुपिस्थ इतिकः ॥

नरकान्तकः । पुं । विष्णौ ॥

नरकामयः । पुं । प्रेते ॥ नरक आमयो ऽस्य ॥

नरकीलकः । पुं । गुरुघ्ने । गुरुहणि ॥

नरगणः । पुं । नवसु नक्षत्रविशेषु ॥ यथा । हस्तास्वातिमृगाश्विनीहरिगुरुः पौष्णानुराधादितिश्चाद्रारोहिणिचोत्तराणि भरणी पूर्वाणि भानित्रयम् । ज्येष्ठाश्लेषविशाखमूलवरुणावस्वग्निचित्रामघाः कथ्यन्ते मुनिभिर्यथा क्रमवशाद्देवानराराक्षसाः ॥ तज्जातजने ॥ तस्यफलम् । मानुष्येमृदुकर्मसङ्गतमनाः श्रीशान्वितो धीयुत इति ॥ नरसमूहे ॥

नरङ्गः । पुं । वरण्डके । नाराङ्गा इति गौड भाषा ॥ न । मेहने । शेफसि॥

नरदेवः । पुं । श्रीरामचन्द्रे ॥ राज्ञि ॥ नराणां देवः ॥

नरनारायणः । पुं । ऋषिऋषभे भगवतोऽवतारविशेषे ॥

नरनारायणौ । पुं । २ । कृष्णार्जुनयोः ॥ नरश्चनारायणश्चतौ ॥

नरपतिः । पुं । राजनि ॥ नराणाम्पतिः॥

नरपुङ्गवः । पुं । नरश्रेष्ठे ॥ नरेषु पुङ्गवः ॥

नरप्रियः । पुं । नीलवृक्षे ॥ त्रि । नरस्य प्रियवस्तुनि ॥

नरवाहः । पुं । मायातौ ॥

नरभूः । स्त्री । भारतवर्षे ॥ नराणांभूः॥

नरभूमिः । स्त्री । भारतवर्षे ॥ नराणां भूमिः ॥

नरमानिका । स्त्री । } श्मश्रुयुक्तना-
नरमानिनी । स्त्री । } र्याम् ॥

नरमाला । स्त्री । मनुष्यमुण्डमालायाम् ॥

नरमालिनी । स्त्री । श्मश्रुयुक्तनार्याम् ॥ इतिहेमचन्द्रः ॥

नरमेधः । पुं । नरवधप्रधाने यज्ञविशेषे ॥ सकलौवर्जनीयः । यथोक्तंरहन्नारदीये । समुद्रयाचास्वीकारः कमण्डलुविधारणम् । द्विजानामसवर्णासु कन्यासूपयमस्तथा ॥ देवरेण सुतोत्पत्ति र्मधुपर्केपशोर्वधः । मांसादनं तथाश्राद्धे वानप्रस्थाश्रमस्तथा ॥ दत्तायाश्चैवकन्यायाः पुनर्दानं वरस्यच । दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ ॥ महाप्रस्थानगमनंगोमेधश्च तथामखः । इमान् धर्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः ॥ इति ॥

नरवाहनः । पुं । पौलस्त्ये । कुवेरे ॥ नरोवाहनमस्य । बहु० नरयानम् ॥ त्रि । पुरुषयानविशिष्टे ॥

नरविष्वणः । पुं । राक्षसे ॥ इतित्रिकाण्डशेषः ॥

नरव्याघ्रः । पुं । पुरुषोत्तमे ॥

नरसिंहः । पुं । हरौ । विष्णौ ॥ नरश्च

सिंहस्य च अवयवा यस्मिंल्लक्ष्यन्ते स नरसिंहः॥ सत्यं विधातुं निजभृत्य भाषितं व्याप्तिञ्च भूतेष्वखिलेषु चात्मनः। अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम्॥ नरश्रेष्ठे॥

नरस्कन्धः। पुं। नराणां समूहे॥ नरकरितुरगाणां स्कन्धम्॥

नरहरिः। पुं। नरसिंहावतारे॥

नराङ्गः। पुं। वरण्डे॥ न। मेढ्रे॥

नराचः। पुं। नराजाख्यवृत्ते॥ यथा। ध्वजेन नायकेन कुण्डलेन यद्विभूषितं पयोधरेण पावना शरेण वीथ्याङ्कितम्। नराचवृत्त मचषोडशाक्षरं समीरितं मनीषिमण्डलीपिहितं फणीन्द्रपिङ्गलोदितम्॥ यथा। निशुम्भशुम्भचण्डमुण्डरक्तवीजघातिनी जुवापरूपदैत्यभूपघातपचपातिनी। नवीनपीनवद्गुजालका चमेघसन्निभा चिरं चरी करोतु मे प्रियं पिनाकिवल्लभेति॥

नराजः। पुं। षोडशाक्षरच्छन्दोविशेषे॥ यथा। भुजङ्गराजभाषितं प्रकीर्णशास्त्रसागरे लघोगुरौ निरन्तरे सतीक्ष्णषोडशाक्षरे। प्रतापतापनिर्जितप्रभाकरप्रकाशहे प्रदत्तदत्तराजकं नराजमेव मन्महे॥

नराधमः। पुं। परमार्थज्ञानहीने ऽसञ्जातवैराग्ये। अकृतकृत्ये पुरुषे॥ यथा। अज्ञानोपहतोबाल्ये यौवने वनिताहृतः। शेषे कलत्रचिन्तार्त्तः किं करोतिनराधमइति॥

नराधिपः। पुं। राजनि। नृपे॥ सच्च नराणां मध्ये भगवतोविभूतिः॥ नराणा मधिपः। नरान् अधिपातिवा। पा०। आतश्चोपसर्गे इतिकः॥

नरान्तकः। पुं। राक्षसविशेषे। रावणात्मजे॥

नरायणः। पुं। माधवे। विष्णौ॥ नराअयनमस्येतिविग्रहः॥ नराणा मयनं यस्मात् तेननरायणः स्मृत इति-ब्रह्मवैवर्त्तपुराणम्॥ नरस्यापत्यवा। नडा०फक्। संज्ञापूर्वकत्वाद्वृद्ध्यभावः॥

नरी। स्त्री। नार्याम्॥ इतिजटाधरः॥

नरेतिका। स्त्री। तीर्थविशेषे॥

नरेन्द्रः। पुं। महीपाले॥ विषवैद्ये॥ वार्त्तिके॥ एकविंशत्यक्षरावृत्ते॥ यथा। चामररत्नरज्जुवरपरिगतविप्रगणाहितशोभः पार्थिवराजिपुष्पयुगविरचितकङ्कणसङ्गतगन्धः। चारुसुवर्णकुण्डलयुगलकृतरोचिरलङ्कृतवर्णः पिङ्गलपन्नगेशवदति निगदतिराजतिवृत्तनरेन्द्रः॥ यथा। पङ्क

अकोषपानपरमधुकरगीतमनोज्ञतडागः पञ्चमनादवादपरपरभृतकाननसत्परभागः । वल्लभविप्रयुक्तकुलवरतनुजीवितदानदुरन्तः किङ्कर वाणि वच्मि मम सहचरि सन्निधिमेति वसन्तः ॥

नरोत्तमः । पुं । कृतकृत्यपुरुषे ॥ यथा । यःस्वकात् परतोवेह जातनिर्वेदआत्मवान् । हृदिकृत्वा हरिं गेहात् प्रव्रजेत् स नरोत्तमः ॥ स्वकात्स्वतएव परतःपरोपदेशाद्वाजातवैराग्यः ॥

नर्कुटकम् । न । नासिकायाम् ॥ इति हेमचन्द्रः ॥

नर्त्तकः । पुं । केलके ॥ पोटगले ॥ चारणे ॥ द्विपे ॥ नटे । सर्ववेशिनि ॥ त्रि । तालाद्यनुसारेणनर्त्तनकृति ॥ अस्यलक्षणंयथा । यादृशं नृत्यपात्रं स्यादृगीतंयोज्यञ्च तादृशम् । नृत्यस्य धारणात् पात्रं नर्त्तकः परिकीर्त्तितः ॥ अपिच । असम्बद्धप्रलापीच सदाभ्रुकुटितत्परः । हासप्रहासचतुरो वाचालो नृत्यकोविद इतिसङ्गीतदामोदरः ॥ नृत्यति । नृतीगात्रविक्षेपे । शिल्पिनिष्वुन्निति कर्त्तरि ष्वुन् ॥

नर्त्तकी । स्त्री । लासिकायाम् । गन्धविन् इति रामजनी इतिचभाषा ॥ करेणवाम् ॥ नलिकानामसुगन्धिद्रव्ये ॥ नृत्यति । नृती० । ष्वुन् । षित्वात् ङीष् ॥

नर्त्तनम् । न । नृत्ये ॥ नृती० । ल्युट् ॥

नर्त्तितम् । त्रि । ताण्डवित्ते ॥

नर्द्दटकम् । न । अत्यष्टिप्रभेदे ॥ तल्लक्षणंयथा । यदिभवतो नजौ भजजला गुरु नर्द्दटकम् । इति ॥ यथा । व्रजवनिताऽसन्तलतिकाविलसन्मधुपं मधुमथनं प्रणम्रजनवाञ्छितकल्पतरुम् । विभु मभिनौति कोपिसुकृती मुदितेन हृदा रुचिरपदावलीघटितनर्द्दटकेनकविरिति ॥

नर्द्दनम् । न । शब्दे ॥

नर्म्मकीलः । पुं । भर्त्तरि । पत्यौ ॥ इतित्रिकाण्डशेषः ॥

नर्म्मठः । पुं । चिबुके ॥ षिड्गे ॥ चूचुके ॥ परिहासके ॥ इतिश०र० ॥

नर्म्मदः । पुं । केलिसचिवे ॥ त्रि । हर्षदे ॥ नर्मददाति । डुदाञ्० । यातिवा । दो० । आतोनुपेतिकः ॥

नर्म्मदा । स्त्री । रेवायाम् । सोमोद्भवायाम् । मेकलकन्यकायाम् ॥ अस्याःस्मरणेन सर्पविषनाशोभवति । नर्मदायैनमःप्रात र्नर्मदायैनमोनिशि

। नमोऽस्तु नर्मदे तुभ्यं त्राहि मां विष सर्पत इति विष्णुपुराणम् ॥ स्त्रियाम् ॥ टाप् ॥

नर्मदाप्रभव: । पुं । तीर्थविशेषे ॥

नर्म्म । न । परिहासवाक्ये ॥ नरयम् । नृनये । मनिन् ॥

नर्म्मरा । स्त्री । दर्याम् ॥ भस्त्रायाम् ॥ सरलायाम् ॥ निष्कलाम् ॥ इत्यङ्कितो मेदिनिकर: ॥

नल: । पुं । नडे । पोटगले ॥ नलस्तु मधुरस्तिक्त: कषाय: कफरक्तजित् । उष्णो हृद्वस्तियोन्यर्त्तिदाहपित्तविसर्पजित् ॥ नृपतिविशेषे । सूर्य वंशीयनिषधराजपुत्रे ॥ यथा । अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मज: । नलस्तु नैषधस्तस्माद् नभस्तस्मादजायत ॥ * ॥ वीरसेन नृपते: पुत्रे ॥ यथा । नलौ द्वावेव विख्यातौ वंशे कश्यपसम्भवे । वीरसेनसुतस्तद्वन्नैषधश्च नराधिप: इतिमात्स्ये १२ अध्याय: ॥ * ॥ चन्द्रवंशीयनिषधराजपुत्रे । दमयन्तीपतौ ॥ यथा । कर्कोटकस्य नागस्य दमयन्त्या नलस्य च । ऋतुपर्णस्य राजर्षे: कीर्त्तनं कलिनाशनमिति महाभारतम् ॥ पितृदेवे ॥ विश्वकर्मण: पुत्रे कपीश्वरे ॥ दैत्यविशेषे ॥ न । पद्मे ॥

नलकम् । न । शाखास्थि । नाडीवत् सरन्ध्रेऽस्थिपर्वणि ॥ इतिहेमचन्द्र: ॥

नलकिनी । स्त्री । जङ्घायाम् ॥

नलकील: । पुं ॥जानुनि ॥

नलकूबर: । पुं । कुबेरपुत्रे ॥ नल: कूबरो युगन्धरोऽस्य ॥

नलदम् । न । पुष्परसे ॥ उशीरे ॥ जटामांस्याम् ॥ इतिमेदिनी ॥

नलदम्बु: । पुं । निम्बवृक्षे ॥ इतिभूरिप्रयोग: ॥

नलदा । स्त्री । मांस्याम् ॥ इतिहेमचन्द्र: ॥

नलपट्टिका । स्त्री । तलाच्याम् । दरमा इति गौडभाषाप्रसिद्धे कटविशेषे ॥

नलमीन: । पुं । चिल्लिचिममत्स्ये । नलवनचारिणि मत्स्ये ॥ नलवनस्थो मीन: नलाभो मीन इति वा ॥

नलसेतु: । पुं । रामायणप्रसिद्धे सामुद्रे सेतौ ॥ नलेन वानरविशेषेण निर्मित: सेतु: ॥

नलिका । स्त्री । काण्डनाले ॥ नाड्याम् ॥ गौडभाषया नली इतिप्रसिद्धे सुगन्धिद्रव्यभेदे । विद्रुमलतिकायाम् । कपोतचरणायाम् । इयञ्चोत्तरापथे प्रसिद्धा सुगन्धा प्रवालाकृति: पचारी इति पँठारी इतिक्कचित् प्रसिद्धा

॥ नलिका शीतला लघ्वी चक्षुष्या कफपित्तहृत्। कृच्छ्राश्मवाततृष्णास्रकुष्ठकण्डूज्वरापहा ॥

नलितः। पुं। नालिता इति गौडभाषाप्रसिद्धे शाकविशेषे ॥

नलिनः। पुं। प्राचीनामलके। पानी आमला इति गौडभाषा ॥ सारसपक्षिणि ॥ न। अम्बुजे। पद्मे ॥ तोये ॥ नीलिकायाम् ॥ नलति। णल गन्धे। इनन् ॥

नलिनी। स्त्री। पद्मिन्याम्। विसिन्याम् ॥ व्योमनिम्नगायाम् ॥ कमलाकरे ॥ नारिकेलजे ॥ नलिकायाम् ॥ पद्मयुक्तदेशे ॥ नडाःसन्त्यत्र। पुष्करादिभ्य इति इनिः। डलयोरैक्यम् ॥ यद्वा नलानांसमूहः। खलादिभ्य इति इनिः ॥

नलिनीखण्डम्। न। नलिनीनांसमूहे ॥ कमलादिभ्यःखण्डः ॥

नलिनीरुहम्। न। मृणाले ॥

नलिनेशयः। पुं। विष्णौ ॥ इति चि० ॥

नली। स्त्री। मनःशिलायाम्। कुनट्याम् ॥ नलिकायाम्। विद्रुमलतायाम्। शुषिरायाम् ॥ नलति। णल०। अच्। गौ० ङीष् ॥

नलोत्तमः। पुं। देवनले ॥

नल्वः। पुं। किष्कुचतुश्शते। चतुःशतहस्तपरिमितेदेशे ॥ किष्कूणां हस्तानां चतुः शतम्। चतुर्गुणंशतम्। शा० ॥ नल्यते। णलबन्धने। उल्वादित्वात् वः ॥ कात्यस्तुनल्वं हस्तशतमित्याह ॥

नल्ववर्त्मगा। स्त्री। काकाङ्ग्याम् ॥ त्रि। नल्वपरिमितपथगामिनि ॥

नवः। पुं। स्तुतौ ॥ रक्तपुनर्नवायाम् ॥ त्रि। नव्ये। नूतने ॥ नूयते। णुस्तुतौ। ऋदोरप् ॥ अपूर्वे ॥

नवकारिका। स्त्री। नवोढायाम् ॥ इति शब्दमाला ॥ नवीनकार्य्याम् ॥ नवीने विवरणश्लोके ॥

नवकालिका। स्त्री। नवीने ॥ इति हारावली ॥

नवखम्। न। देहे ॥ नव खानि यस्य यस्मिन्वा ॥

नवग्रहाः। पुं। सूर्यादिनवसु ॥ ते यथा। सूर्यश्चन्द्रो मङ्गलश्च बुधश्चापि बृहस्पतिः। शुक्रः शनैश्चरो राहुः केतुश्चेति नवग्रहाः ॥ नवग्रहमखं कृत्वाततः कर्मसमारभेत्। अन्यथा फलदं पुंसां न काम्यं जायतेक्वचित् ॥

नवच्छात्रः। पुं। क्रियाकारे। प्रथममध्ययने प्रवृत्ते नवीने विद्यार्थिनि ॥

नवतः। पुं। करिकम्बले। कुथे। नम्दा इतिभाषा ॥ इतिहेमचन्द्रः ॥

नवतरः । त्रि । नव्ये ॥

नवतिः । स्त्री । सङ्ख्याविशेषे । ९० नब्बे इति भाषा ॥ सङ्ख्येये ॥ नवदशतः परिमाणमस्य । पङ्क्तिविंशतित्रिंशच्चत्वारिंश दित्यादिनानिपातनात् प्रकृतेर्नवभावस्तिप्रत्ययश्च ॥

नवतिका । स्त्री । तूलिकायाम् ॥

नवदण्डम् । न । नृपाणां छत्रविशेषे ॥

नवदलम् । न । संवर्त्तिकायाम् । पद्मस्यकिञ्जल्कसमीपस्थदले ॥ नवञ्चतद्दलञ्च ॥ सामान्यतो नूतने पत्रे ॥

नवदीधितिः । पुं । महीसुते । भौमग्रहे ॥ नवादीधितिर्यस्य ॥

नवदुर्गा । स्त्री । नवपत्रिकायाम् ॥ शैलपुत्र्यादिषु ॥ यथा । प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी । तृतीयं चन्द्रघण्टेति कुष्माण्डेति चतुर्थकम् ॥ पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च । सप्तमं कालरात्रिश्च महागौरीतिचाष्टमम् ॥ नवमं सिद्धदाप्रोक्ता नवदुर्गाः प्रकीर्त्तिताः । उक्तान्येतानिनामानि ब्रह्मणैवमहात्मना ॥ अग्निनादह्यमानस्तु शत्रुमध्येगतो रणे । विषमे दुर्गमे चैवभयार्त्ताःशरणंगताः ॥ न तेषांजायते किञ्चिदशुभं रणसङ्कटे । नापदं तस्यपश्यामिशोकदुःखभयं नहि ॥ ये तु भक्त्यास्मृतानूनं तेषांसिद्धिःप्रजायते ॥ इति मार्कण्डेयपुराणम् ॥

नवदोला । स्त्री । नवीनप्रेङ्खायाम् ॥

नवद्वारपुरम् । न । शरीरे । मनुष्यदेहे ॥ अत्रदेशोचे द्वेचक्षुषी द्वेनासिके वाणैकेतिशिरसिसप्त द्वेपायूपस्थाख्येअधः इति नवद्वाराणिसन्ति ॥ नवद्वाराणि यस्मिन् तत् नवद्वारम् । तच्चतत् पुरञ्चेतिविग्रहः ॥

नवधा । अ । नवप्रकारे ॥ यथा । आचारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम् । निष्ठा वृत्ति स्तपो दानं नवधा कुललक्षणम् ॥

नवधातवः । पुं । हेमादिनवसु ॥ यथा । हेमतारारनागाश्च ताम्ररङ्गे च तीक्ष्णकम् । कांस्यकं कान्तलोहश्च धातवो नवकीर्त्तिताः ॥

नव । त्रि । सङ्ख्याविशेषे । ९ नौ इति भाषा ॥

नवनवत्वम् । न । नवप्रकारत्वे ॥ प्रकारेद्विर्भावः । कर्मधारयवद्भावात् सुपोलुक् ॥

नवनी । स्त्री । नवनीते । नौनी इति भाषा ॥ इति पुराणम् ॥

नवनीतम् । न । नवोद्धृते । ऋकृताग्निसंयोगमन्यजे । नैणीइति माखन इतिच भाषा ॥ नोतं यदि नवनीतं

नीतं नीतं किमेतेन । आतपतापितभूमौ माधव मा धाव मा धाव ॥ नवञ्चतत् नीतञ्च । विशेषणमिति समासः ॥ नवनीतं हितं गव्यं वृष्यं वर्णबलाग्निकृत् । सङ्ग्राहि वातपित्तासृक्क्षयार्शोऽर्दितकासहृत् ॥ तद्धितं बालके वृद्धे विशेषादमृतं शिशोः ॥ * ॥ नवनीतं माहिष्यास्तु वातश्लेष्मकरं गुरु । दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनम् ॥ * ॥ दुग्धोत्थं नवनीतन्तु चक्षुष्यं रक्तपित्तनुत् । वृष्यं बल्य मतिस्निग्धं मधुरं ग्राहि शीतलम् ॥ * ॥ नवनीतन्तु सद्यस्कं स्वादु ग्राहि हिमं लघु । मेध्यं किञ्चित् कषायाम्ल मीषत्तक्रांशसङ्क्रमात् ॥ * ॥ सक्षारकटुकाम्लत्वाच्छर्द्यर्शः कुष्ठकारकम् । श्लेष्मलं गुरु मेदस्यं नवनीतं चिरन्तनम् ॥ * ॥ शीतं तच्यनवोद्धृतं सुमधुरं वृष्यञ्च वातापहं कासघ्नं क्रिमिनाशनं कफहरं सङ्ग्राहि शूलापहम् । बल्यं पुष्टिकरं तृषार्त्तिशमनं सन्तापविच्छेदनं चक्षुष्यं श्रमहारि तर्पणकरं दध्युद्भवं पित्तजित् ॥ * ॥ एकाहाध्युषितं प्रोक्तमुत्तरोत्तरगन्धदम् । अरुच्यं सर्वरोगाढ्यं दधिजं तद्धितं नहि ॥ इति राजनिर्घण्टः ॥

नवनीतकम् । न । घृते ॥

नवनीतधेनुः । स्त्री । दानार्थकृत नवनीतमयधेनुविशेषे ॥

नवपत्रिका । स्त्री । कदल्यादिषु ॥ कदली दाडिमी धान्यं हरिद्रामानकं कचुः । बिल्वो ऽशोकोजयन्तीच विज्ञेया नवपत्रिकेति दुर्गोत्सवतत्त्वम् ॥

नवपदम् । न । मात्रावृत्तान्तरे ॥ यथा । प्रथममुपनयराम कलवितयमहिगणेन सह दण्ड मिति पदानि विषमाणिसन्विनु । समपदेचषट्पञ्च सप्तषष्टिकलमेतदातनु । एवं पञ्च पदानि कुरु दोहा मग्रेदेहि । भुजराजपिङ्गलभणितनवपदमेतदवेहि ॥ यथा । विहर मानिनि मान मपहाय रमय रमण मतिशयितकपटकलहरति किमुदिनश्यसि यौवन मिद मतिचपल मचल नदीजलगति न पश्यसि । अनुभव हरिपरिरम्भसुख मिति वक्ता वद कोपि । मुग्धे माधव मधिसपदि कुरु कारुण्य मितोपीति ॥ नवपदानि यस्मिन् तत् ॥

नवपाठकः । पुं । नवीनाध्यापके ॥ नवो नूतनः पाठकः । पूर्वकालैकेति समासः ॥

नलफलिका । स्त्री । नवे । नव्ये ॥ नव

जातरजोङ्गनायाम् । नवरजः स्त्रियाम् ॥

नववधूः । स्त्री । नूतनपरिणीतायाम् । नवोढायाम् । नयी वहू इतिभाषा ॥

नववध्वागमनम् । न । नूतनपरिणीतायाः प्रथमतः क्रियमाणे भर्तृगृहागमने । गौनाइतिभाषा ॥

नवमः । त्रि । नवानाम् पूरणे ॥ तस्य पूरणेडट् ॥ ङीपि नवमी ॥

नवमल्लिका । स्त्री । नवमालिकायाम् । नेयालि इति नेओयार इतिच गौड भाषा प्रसिद्धे पुष्पे ॥

नवमल्ली । स्त्री । नवमालिकायाम् ॥ नवा स्तुत्या मल्ली ॥

नवमालिका । स्त्री । नवमल्लिकायाम् । ग्रीष्मोद्भवायाम् । सप्तलायाम् । नेवारा इति नेवारी इतिच भाषा ॥ नवा स्तुत्या मालिका ॥

नवमी । स्त्री । शुक्लकृष्णपक्षयोस्तिथिविशेषे । इयं चन्द्रस्य नवमकलाक्रियारूपा दुर्गाया स्तिथिः ॥ अस्यांजातस्यफलम् । विरोधकर्त्तासुजने रगम्यः परोपकारार्थमतिः कुशीलः । आचारहीनः कृपणः कठोरः प्रसूतिकाले नवमी यदि स्यादिति ॥

नवयौवना । स्त्री । युवतौ । तरुण्याम् । दिक्कयाम् । अतिक्रान्तमुग्धभावायाम् ॥ नवंयौवनंतारुण्यंयस्याःसा ॥

नवरत्नम् । न । नवप्रकारमणिषु ॥ यथा । मुक्तामाणिक्यवैदूर्यगोमेदान् वज्रविद्रुमौ । पद्मरागं मरकतं नीलञ्चेति यथा क्रमादिति तन्त्रसारः ॥ नवानांरत्नानां समाहारः ॥ * ॥ नवग्रहदोषशान्त्यै धार्याणि नवरत्नानि यथा । वैदूर्यं धारयेत्सूर्ये नीलञ्च मृगलाञ्छने । आवनेयेपिमाणिक्यं पद्मरागं शशाङ्कजे ॥ गुरौमुक्तां भृगौवज्रं शनौनीलं विदुर्बुधाः । राहौ गोमेदकं धार्यं केतौ मरकतं तथेतिदीपिका ॥

नवरात्रम् । न । आश्विनाद्युक्तमासेषु शुक्लप्रतिपदादिनवमीपर्य्यन्तनवदिनकर्त्तव्ये दुर्गाव्रतविशेषे ॥ नवरात्र चतुष्टयमुक्तं देवीभागवते । चैत्रे ऽश्विनेतथाषाढे माघेकार्यामहोत्सवः । नवरात्रे महाराजपूजाकार्या विशेषत इति ॥ नवानांरात्रीणां समाहारः ॥

नवरात्रिकम् । न । नवरात्रे ॥

नववरिका । स्त्री । नवोढायाम् ॥

नववल्लभम् । न । दाहागुरुणि ॥ त्रि । नवीनप्रिये ॥

नववस्त्रम् । न । नवाम्बरे । अनाहते ॥

नवशायकः । पुं । नवशाक इति गौड

भाषाप्रसिद्धे नवविधे गोपादिजातिविशेषे ॥ यथा । गोपो मालीत थातैली तन्त्री मोदकवारजी । कुलाल: कर्मकारश्च नापितो नवशायका: ॥ इतिपराशरसंहिता ॥

नवश्राद्धम् । न । एकादशाहादिश्राद्धे ॥

नवसार: । पुं । न । नवसादरे ॥ तच्छुद्धिर्यथा । नवसारो भवेच्छुद्ध श्चूर्णितो येविपाचित:। दोलायंचेण यत्नेन भिषग्भिर्योगसिद्धये इतिसारचन्द्रिका ॥

नवसादरम् । न । नौसादर इतिभाषाप्रसिद्धे द्रव्ये ॥ प्रतिश्यायेषु शिरस: पीडासु नवसादरम् ॥

नवसूतिका । स्त्री । अचिरप्रसूतायां धेनौ ॥ नवंसूतं प्रसवो ऽस्या: । शेषादितिकप् । प्रत्ययस्थादितीत्वम् ॥

नवा । स्त्री । नवीनायाम् ॥

नवांश: । पुं । नवमांशे । मेषादिद्वादशलग्नानां नवमे भागे ॥ यथा । मेषाद्या मकराद्याश्च तुलाद्या: कर्कटादय: । क्रमान्नवांशा राशीनां स्वांशावर्गोत्तमा: स्मृता: ॥ यथा । मेषे प्रथमनवांशेकांशोमेषस्य । द्वितीयांशोवृषस्य । तृतीयांशोमिथुनस्य । चतुर्थांश: कर्कटस्य । पञ्चमांश: सिंहस्य । षष्ठांश: कन्याया: । सप्तमांशस्तुलाया: । अष्टमांशो वृश्चिकस्य । नवमांशोधनुष: ॥ * ॥ एवं वृषे प्रथमांशो मकरस्य । २ कुम्भस्य । ३ मीनस्य । ४ मेषस्य । ५ वृषस्य । ६ मिथुनस्य । ७ कर्कस्य । ८ सिंहस्य । ९ कन्याया: ॥ * ॥ तथा मिथुने १ तुलाया: । २ वृश्चिकस्य । ३ धनुष: । ४ मकरस्य । ५ कुम्भस्य । ६ मीनस्य । ७ मेषस्य । ८ वृषस्य । ९ मिथुनस्य ॥ * ॥ एवं कर्के १ कर्कस्य । २ सिंहस्य । ३ कन्याया: । ४ तुलाया: । ५ वृश्चिकस्य । ६ धनुष: । ७ मकरस्य । ८ कुम्भस्य । ९ मीनस्य ॥ एवं सिंहे मेषाद्या: ॥ कन्यायां मकराद्या: ॥ तुलायां तुलाद्या: ॥ वृश्चिके कर्कटाद्या: ॥ एवमेव धनुषिमेषाद्या: ॥ मकरे मकराद्या: ॥ कुम्भेतुलाद्या: ॥ मीने कर्काद्या: क्रमान्नवांशाज्ञेया: ॥ उक्तञ्च । मेषे नवांशा मेषाद्या: वृषेच मकरादिका: । मिथुनेच तुलाद्या: स्यु: कर्कटे कर्कटादिका इति ॥

नवांशक: । पुं । नवांशे ॥

नवाङ्गम् । न । पाचनविशेषे ॥ यथा । विश्वामृताब्दभूनिम्बै: पञ्चमूली समन्वितै: । कृत: कषायोहन्त्याशुवातपित्तोद्भवं ज्वरम् ॥

नवाङ्गा । स्त्री । कर्कटशृङ्ग्याम् ॥

नवान्नम् । न । नवीनान्ने ॥ तन्निमि

तस्माद्धे ॥

नवापयस्था । स्त्री । नूतनायां चौरवि दार्य्याम् ॥

नवाभोगः । त्रि । अभिनवप्रयत्ने । महोत्साहे ॥ नवश्चाभोगोयत्नोयस्य ॥

नवाम्बरम् । न । अनाहते । नवीनवस्त्रे ॥ नवञ्चतदम्बरञ्च ॥

नवार्च्चिः । पुं । मङ्गलग्रहे ॥ इति त्रिकाण्डशेषः ॥

नवाली । स्त्री । नवमालिकायाम् ॥

नवाहः । पुं । न । नवतिथौ । नवदिने ॥ प्रतिपत्तिथौ ॥

नवीनः । त्रि । नव्ये । नूतने ॥ नव एव । नवस्यनप्तनप्ख्नाश्चप्रत्ययाः पूरादेशश्च ॥

नवीयस् । त्रि । नवतरे ॥

नवेदस् । पुं । अक्षे ॥ नवेत्ति । विद० । असुन् ॥

नवोढा । स्त्री । नववध्वाम् । जन्याम् । नववरिकायाम् ॥ मुग्धानायिकाभेदे ॥ यथा । वक्रान्नीतापार्श्वं मुखमनुमुखं नैवकुरुते धुनानामूर्द्धानं क्षिपति वदनं चुम्बनविधौ । हृदिन्यस्तं हस्तं क्षिपति गमनारोपितमना नवोढा वोढारं रमयतिच सन्तापयतिचेतिरसमञ्जरी ॥ नवानूतनाचासौ ऊढाविवाहिताचेतिविग्रहः ॥

नवोद्धृतम् । न । नवनीते ॥ नवञ्चतत् उद्धृतञ्च । विशेषणसमासः ॥

नव्यः । त्रि । नवीने । नूतने ॥ नूयते । स्तुतौ । अचोयत् ॥ पुं । रक्तपुनर्नवायाम् ॥

नश् । न । नशने ॥ वाश० । आवेक्किप् । नश्यति कर्त्तरिवाक्किप् । षड्गकाः यथा विधिकर्त्तव्याः ॥

नशाकः । पुं । काकविशेषे ॥

नशिता । त्रि । नाशाश्रये ॥ नशेस्तृन् ॥

नश्यत्प्रसूतिका । स्त्री । मृतवत्सायाम् । मृतपुत्रिकायाम् ॥

नश्वरः । त्रि । अशाश्वते । नाशप्रतियोगिनि ॥ नश्यति तच्छीलः । वाश० । इण्नशजिसर्त्तिभ्यः क्वरप् ॥ टिड्ढेति ङीपि । नश्वरी ॥

नष्टः । त्रि । तिरोहिते । अदर्शनविशिष्टे ॥ नाशाश्रये ॥ नश्यतिस्म । णश अदर्शने । गत्यर्थेति कर्त्तरि क्तः ॥ भावक्तान्तादर्शआद्यच्वा ॥

नष्टचन्द्रः । पुं । भाद्रस्योभयपक्षे चतुर्थ्यामुदितेचन्द्रे ॥ यथा । नष्टश्चन्द्रो न दृश्यश्च भाद्रेमासि सितासिते । चतुर्थ्यामुदितोऽशुद्धः प्रतिषिद्धोमनीषिभिः ॥ चन्द्रस्तारापहरणं कलङ्कमतिदुष्करम् । तस्मै द

दाति हेनन्द कामतो यदि पश्यति ॥ अकामतो नरो दृष्ट्वा मन्त्रपूतं जलं पिबेत् । तदा शुद्धो भवेत् सद्यो निष्कलङ्की महीतले ॥ सिंहः प्रसेनमवधीत् सिंहो जाम्बवताहतः । सुकुमारक मारोदी स्तव ह्येष स्यमन्तकः ॥ इति मन्त्रेणपूतञ्च जलंसाधुःपिबेद्ध्रुवम् ॥ इति ब्रह्मवैवर्त्तपुराणम् ॥

नष्टचेष्टता । स्त्री । प्रलये । शोकादिभिर्निष्पन्दनाशे । हर्षशोकादिभिः सकलचेष्टानाशे मूर्च्छापरपर्याये सात्विकभावे ॥ नष्टाचेष्टायस्य । तस्य भावः । तल् ॥

नष्टाग्निः । पुं । प्रमादादिना कारणान्तरवशेनवा त्यक्तवैतानिके । वीरहणि ॥ नष्टोऽग्निर्यस्य ॥

नष्टाजीव्यः । त्रि । गतजीविकासाधने ॥

नष्टासिहूचम् । न । लोप्त्रे । किञ्चित्प्रासचौरनीतद्रव्ये ॥ इति हारावली ॥

नष्टेन्दुकला । स्त्री । कुहूनाम ॥ नष्टा इन्दुकलायस्याम् ॥

नसा । स्त्री । नासिकायाम् ॥ इतिचिकाण्डशेषः ॥

नसः । पुं । नासिकायाम् ॥ इतिशब्दमाला ॥ न । नस्ये ॥ इति रत्नमाला ॥ पञ्चविधं नस्तकर्म यथा । प्रतिमर्षो

ऽवपीडश्च नस्यं प्रधमनं तथा । शिरोविरेचनञ्चैव नस्तकर्मतु पञ्चधेति ॥

नस्ता । स्त्री । नासाकृतच्छिद्रे ॥

नस्तितः । पुं । नस्योतो । रज्जुनास्यूत नासे गवादौ । नाथाबैल इति भाषा ॥ नसनम् । णसकौटिल्ये । क्तः । नस्तं कृतमस्य । प्रातिपदिकाद्धात्वर्थ इतिणिच् । ततः कर्मणिक्तः ॥

नस्तोतः । पुं । नस्योते ॥ नस्यतेस्म । णस० । कर्मणि क्तः । नस्तयाउतः ॥

नस्यम् । न । नस्ये । लावणे । नासिकादेयचूर्णादौ ॥ यथा । सिद्धार्थकवचाहिङ्गुकरञ्जं देवदारुच । मञ्जिष्ठाचिफला श्वेताशिरीषो रजनीद्वयम् ॥ प्रियङ्गुनिम्बचिकटु गोमूत्रेणावघर्षितम् । नस्यमालेपनञ्चैवस्नानमुद्वर्त्तनं तथा ॥ अपस्मारविषोन्मादशोषालक्ष्मी ज्वरापहम् । भूतेभ्यश्च भयं हन्तिराजद्वारेचशासनमितिगारुडे १९९ अध्यायः ॥

नस्या । स्त्री । नासिकायाम् ॥ नासारज्वाम् । नकेलइति नाथ इतिच भाषा ॥ त्रि । नासिकायां भवे ॥ नासिकायां भवा । नासिकायै हिता वा । शरीरावयवाद्यत् । नसनासिकाया यत्तसक्षुद्रेष्विति नसादेशः ॥

नस्योतः । त्रि । नस्तिते । नासारज्जुयुक्तेरषादौ ॥ नस्यया नासारज्ज्वा उतः ॥

नह । अ । प्रत्यारम्भे ॥ नच इच ॥

नहि । अ । निषेधे ॥ नह्यति । णह्‌ब न्धने । इन् ॥

नहिकिम् । अ । निषेधे ॥

नहुषः । पुं । नागविशेषे ॥ सोमवंशभवेन्द्रपतिविशेषे ॥ सचपुरूरवसोज्येष्ठात्मजस्यायुषस्तनय इति पुराणम् ॥ न । तगरे ॥ नह्यति । णह० । पृनहिकलिभ्यउषच् ॥

नहुषाख्यम् । न । तगरपुष्पे ॥

नहुषात्मजः । पुं । ययातिन्टपे ॥

ना । अ । निषेधे ॥ नह्यति । णह्‌ब न्धने । डा ॥

नाकः । पुं । स्वर्गे ॥ अकंदुःखम् नास्त्यत्र अकमिति नाकः । नभ्राण्नपान्नवेदेति नलोपाभावः ॥ को ब्रह्मा तदभावेनाचेतिवा ॥ न । ब्रह्मलोके ॥

नाकनाथः । पुं । इन्द्रे ॥

नाकनायकः । पुं । इन्द्रे ॥

नाकनायकपुरोहितः । पुं । बृहस्पतौ ॥

नाकपृष्ठः । पुं । स्वर्गे ॥

नाकी । पुं । सुरे । देवतायाम् ॥ नाकः स्वर्गोस्त्यस्य । इनिः ॥

नाकुः । पुं । मुनिविशेषे ॥ पृथ्वीधरे ॥ वल्मीके ॥ न अकति । अक० । वाहुलकादुः ॥ यदा । नम्यते भूरनेन । णम० । फलिपाटिनमिमनिजनांगुक्पटिनाकिधतश्चेत्युणनाकिरादेशश्च । इकारउच्चारणार्थः ॥

नाकुलः । पुं । नकुलपुत्रे ॥ त्रि । नकुलसम्बन्धिनि ॥ न । नकुलेश्वरीदेव्याः स्थाने ॥ स्वायम्भुव्यपिनाकुले ॥

नाकुली । स्त्री । कुक्कुटीकन्दे ॥ चविके ॥ रास्नायाम् ॥ नाई इति भाषाप्रसिद्धे कन्दविशेषे ॥ नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत् । भोगिलूतावृश्चिकाखुविषज्वरकृमिव्रणान् ॥ यवतिक्तायाम् ॥ श्वेतकण्टकार्याम् ॥ नकुलानामियम् प्रियत्वात् । तस्येदमित्यण् ॥ न आकुलत्वं यया वा ॥

नाक्षत्रः । पुं । मासविशेषे ॥ सचद्विविधः । सप्तविंशतिनक्षत्रात्मक एकः । यथा । सर्वर्क्षपरिवर्त्तैश्चनाक्षत्रइह चोच्यते इति ॥ सर्वनक्षत्रभुक्त्यात्तु नाक्षत्रोमास इष्यते इतिच ॥ अस्य प्रयोजनम् । नक्षत्रसत्राण्ययनानि चेन्दोर्मासेन कुर्याद्गणात्मकेन । सप्तविंशतिनक्षत्रात्मकेन ॥ अन्यनक्षत्रे शनिभौमवारयोगे मनोदुःखदानम् । यथोक्तं दीपिकायाम् । [illegible]

न्यर्चे यदि स्यातां वारौ भौमशनैश्चरौ । स मासः कल्मषो नाम मनोदुःखप्रदायकः ॥ इति ॥ * ॥ द्वितीयः षष्टिदण्डात्मकनक्षत्रभोगकालरूपदिनत्रिंशदात्मकः । यथोक्तं सूर्य्यसिद्धान्ते । नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रचक्षते । तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथेति ॥ अस्य प्रयोजनमायुर्गणनायाम् । यथा । आयुर्दायेऽस्मृतं प्राज्ञै र्नाक्षत्रं षष्टिनाडिकमिति ॥ त्रि । नक्षत्रसम्बन्धिनि ॥ तस्येदमित्यण् ॥

नाक्षत्रिकः । पुं । नाक्षत्रमासे ॥ नक्षत्रगणनेनैव नाक्षत्रिक उदाहृतः ॥ त्रि । नक्षत्रसम्बन्धिनि ॥

नाक्षत्रिकी । स्त्री । नक्षत्रदशायाम् ॥ कलौ नाक्षत्रिकी दशेति ज्योतिषम् ॥

नागः । पुं । वासुक्यादिपन्नगे । काद्रवेये । बहुफणे सर्पे । मनुष्याकारे फणालाङ्गूलयुक्ते सर्पे ॥ मातङ्गे । हस्तिनि ॥ क्रूराचारिणि ॥ तोयदे । मेघे ॥ नागकेसरे ॥ पुन्नागे ॥ नागदन्तके ॥ मुस्तके ॥ देहानिलप्रभेदे ॥ उद्गारे नाग इत्युक्तो नीलजीमूतसन्निभः ॥ उत्तरस्थितः श्रेष्ठे ॥ नगे भवः । तत्र भव इत्यण् ॥ यद्वा । न गच्छतीति अगः । न अगः । सुप्सुपेति स० । अनञ्त्वान्न नलोपः ॥ न । रङ्गे ॥ सीसके ॥ करणविशेषे ॥ अत्र जातस्य फलम् । नागोद्भवो नागधनाभिलाषी वक्रोक्तिजालो निरताङ्कुशीलः । क्रोधाग्निसन्तापितबन्धुवर्गो भर्गोपमः स्यात् किल रङ्गभूमौ ॥ रङ्गे सीसके च पुंलिङ्गोऽपीति वैद्याः ॥ अस्योत्पत्तिर्यथा । दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु मुमोच यत् । वीर्य्यं जातस्ततो नागः सर्व्वरोगापहो नृणाम् ॥ सीसं रङ्गगुणं ज्ञेयं विशेषान्मेहनाशनम् ॥ नागस्तु नागशततुल्यबलं ददाति व्याधिं विनाशयति जीवनमातनोति । वह्निं प्रदीपयति कामबलं करोति मृत्युञ्च नाशयति सन्ततसेवितः सः ॥ * ॥ तयोः पाकहीनयोर्दोषो यथा । पाकेन हीनौ किल वङ्गनागौ कुष्ठानि गुल्मांश्च तथातिकष्टान् । पाण्डुप्रमेहानलमान्द्यशोथभगन्दरादीन् कुरुतः प्रभुक्तौ ॥ * ॥ तयोर्मारणं यथा । अश्वत्थचिञ्चात्वक्चूर्णं चतुर्थांशेन निःक्षिपेत् । मृत्पात्रे विद्रुतो नागो लौहदर्व्या च चालितः ॥ यामैकेन भवेद्भस्म तत्तुल्या स्यान्मनःशिला । काञ्जिकेन स्वयं पिष्ट्वा पचेद्दृढपुटेन च ॥ स्वाङ्गशीतं पुनः पिष्ट्वा शिलया

काञ्जिकेनच । पुनः पुटेच्छरावाभ्या मेवंषड्भिः पुटैर्म्मृतिः ॥ * ॥ नागः सिन्दूरवर्णाभो म्रियते सर्वकार्यकृत् । सतिक्तमधुरो नागो मृतो भवति भस्मसात् ॥ आयुः कीर्त्तिं वीर्यवृद्धिं करोति सेवनात्सदा । रोगान्ह-न्तिमृतो नागो वङ्गवद्गुणकारकः ॥

नागकन्दः । पुं । हस्तिकन्दे ॥

नागकर्णः । पुं । रक्तैरण्डे ॥

नागकिञ्जल्कः । पुं । नागकेशरपुष्पे ॥

नागकुमारिका । स्त्री । गुडूच्याम् ॥ मञ्जिष्ठायाम् ॥

नागकेशरः । पुं । नागकेसरवृक्षे ॥

नागकेसरः । पुं । काञ्चनाह्वये । चाम्पेये । नागपुष्पे ॥ नागाख्यःकेसरः ॥

नागगन्धा । स्त्री । नाकुलीकन्दे ॥

नागगर्भम् । न । सिन्दूरे ॥

नागच्छत्रा । स्त्री । नागदन्त्याम् ॥

नागजम् । न । सिन्दूरे ॥ रङ्गे ॥ त्रि । नागजाते ॥ नागाज्जातम् । जनी० डः ॥

नागजिह्वा । स्त्री । अनन्तमूलायाम् ॥ मनश्शिलायाम् ॥ नागानांजिह्वेव ॥

नानजिह्विका । स्त्री । नागजिह्वार्थे ॥ स्वार्थेकः ॥

नागजीवनम् । न । वङ्गे ॥ इति हेमचन्द्रः ॥

नागदन्तः । पुं । हस्तिदन्ते ॥ गृहान्निर्गतदारुणि । खूंटीइति दांतिया इति चभाषा ॥

नागदन्तकः । पुं । भित्तिस्थदारुणि । निर्यूहे ॥ नागदन्तएव । स्वा० कः ॥

नागदन्तिका । स्त्री । वृश्चिकाल्याम् । बिछिटी इति गौड भाषा ॥ रामदूत्याम् ॥

नागदन्ती । स्त्री । श्रीहस्तिन्याम् । हस्तिकर्णपलाशाम् । भूरुण्ड्याम् ॥ कुम्भाख्यभेषजे । नागकुलीति प्रसिद्धौषधौ ॥

नागदमनी । स्त्री । क्षुद्रक्षुपविशेषे जम्बाम् । दुःसहायाम् । मलघ्न्याम् ॥

नागदलोपमम् । न । परूषफले । फालसा इति भाषा ॥

नागद्रुः । पुं । स्नुह्याम् । समन्तदुग्धायाम् ॥

नागद्वीपः । पुं । भारतवर्षस्थो पद्वीपविशेषे ॥

नागनामा । पुं । सीसके ॥

नागनिर्य्यूहः । पुं । नागदन्तके ॥

नागपत्रा । स्त्री । नागदमन्याम् ॥

नागपत्री । स्त्री । लक्ष्मणाख्यौषधौ ।

नागपदः । पुं । रतिबन्धविशेषे ॥ अबा । पादौ स्कन्धे तथाहस्तौ क्षिपेत्स्त्रीभगे लघु । कामयेत् कामुको नारीं

ह्यो नागपदोमतः ॥ इति रति० ॥

नागपाशः । पुं । स्त्रीणां करणे ॥ वरुणस्यायुधे ॥ ग्रन्थिविशेषे । साईदया वर्त्तनात्तु नागपाश इति स्मृतः ॥ ब्रह्मग्रन्थिसयोदहान्नागपाश मथा [illegible] ॥

नागपाशकः । पुं । रतिबन्धविशेषे । यथा । स्वजङ्घाद्वयमध्यस्थां हस्ताभ्यां धारयेत् कुचौ । रमे निःशङ्कितः कामी बन्धोयं नागपाशकः ॥ इति रतिमञ्जरी ॥

नागपुरम् । न । पाण्ड्यदेशे ऽनेन नाम्ना प्रसिद्धे नगरे । उरगपुरे ॥ हस्तिनापुरे ॥ कल्किपुराणोक्ते गङ्गावतरणप्रस्तावप्रसिद्धे देशविशेषे ॥

नागपुष्पः । पुं । पुन्नागवृक्षे ॥ नागकेसरे ॥ नागपुष्पः कषायोष्णो रूक्षो लघ्वामपाचनः । ज्वरकण्डूतृषास्वास्रच्छर्दिहृल्लासनाशनः । दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहः ॥ चम्पके ॥

नागपुष्पफला । स्त्री । कुष्माण्ड्याम् ॥

नागपुष्पिका । स्त्री । स्वर्णयूथ्याम् ॥

नागपुष्पी । स्त्री । गजपुष्प्यां लतायाम् ॥ नागिन्याम् ॥ नागदमन्याम् ॥

नागफणः । पुं । पटोले ॥

नागबन्धु । पुं । अश्वत्थवृक्षे ॥ नागानाम् बान्धवे ॥

नागबलः । पुं । भीमसेने ॥ त्रि । हस्तितुल्यपराक्रमे ॥

नागबला । स्त्री । गाङ्गेरुक्याम् । गोरखचाकुलिया इति गौडभाषा ॥ नागानां हस्तिनां बला ॥

नागभृत् । पुं । डुण्डुसर्पे ॥ इति त्रिकाण्डशेषः ॥

नागमल्लः । पुं । ऐरावते । शक्रगजे ॥

नागमाता । स्त्री । कद्रुाम् ॥ मनसादेव्याम् ॥ मनःशिलायाम् ॥

नागमारः । पुं । केशराजे । भृङ्गराजे ॥ त्रि । हस्तिमारके ॥

नागयष्टिः । स्त्री । पुष्करिण्यादिस्थितकाष्ठविशेषे । नागाख्यलतायाम् । रङ्काठ इति गौड भाषा । जाखन इति भाषा ॥

नागयष्टिका । स्त्री । खातस्थकाष्ठविशेषे । नागाख्यलतायाम् । जाखन इति भाषा ॥

नागरः । पुं । देवरे ॥ नागरङ्गे ॥ न । मुस्तके ॥ शुण्ठ्याम् ॥ रतबन्धे ॥ त्रि । विदग्धे ॥ नगरोद्भवे ॥ नगरेभवः । तत्रभवइत्यण् ॥ यद्वा । अगं राति । रा० । कः । न अगरः । नकारेण सुप्सुपेतिसमासः ॥

नागरकः । पुं । चोरे ॥ चित्रलेखका

दिशिस्थिनि ॥ नगरे भवः । नगरात्कुत्सनप्रावीण्ययोरिति वुञ् ॥ रतिबन्धविशेषे । यथा । ऊरुमूले परिस्थित्वा योषिदूरुद्वयं यदि । ग्रीवांधृत्वाकराभ्याञ्च बन्धो नागरकोमत इतिरतिमञ्जरी ॥

नागरक्तम् । न । सिन्दूरे ॥ नागस्यशोणिते ॥

नागरघनः । पुं । नागरमुस्तायाम् ॥

नागरङ्गः । पुं । जम्बीरविशेषे । ऐरावते । नारङ्गे । नरङ्गी इति भाषाप्रसिद्धे फलवृक्षे ॥ नागा रञ्जन्त्यत्र । रञ्ज० । हलश्चेतिघञ् ॥ नागस्यसिन्दूरस्येवरङ्गोऽस्येति वा ॥

नागरमुस्तकम् । न । भद्रमुस्तके ॥

नागरमुस्ता । स्त्री । मुस्ताप्रभेदे । चक्राङ्गायाम् । नादेय्याम् । चूडालायाम् । नागरमोथा इतिभाषा ॥

नागराजः । पुं । अनन्ते । शेषे ॥ नागानां राजा । राजाहःसखिभ्यष्टच् ॥ पिङ्गलनागे ॥ ऐरावते ॥

नागराह्वम् । न । शुण्ठ्याम् ॥

नागरी । स्त्री । स्नुहीवृक्षे ॥ विदग्धनार्याम् ॥ नागरभार्यायाम् ॥

नागरीटः । पुं । नागरीगणैःकृतेमङ्गलशब्दे ॥ षिड्गे ॥

नागरुकः । पुं । नागरङ्गे ॥

नागरेणुः । पुं । सिन्दूरे ॥

नागरेयकः । त्रि । नगर्यां भवादौ ॥ कत्र्यादित्वाट्ढकञ् ॥

नागलता । स्त्री । मेहने । शेफसि ॥ इतित्रिकाण्डशेषः ॥ ताम्बूल्याम् ॥

नागलोकः । पुं । पाताले ॥ नागानां-लोकः ॥

नागवल्लरी । स्त्री । नागवल्ल्याम् ॥

नागवल्लिका । स्त्री । नागवल्ल्याम् ॥

नागवल्ली । स्त्री । ताम्बूल्याम् । पानकी वेल इतिभाषा ॥ नागलोकस्यवल्ली । शा० ॥ इयञ्चश्रीवाटाम्लवाटादिनानाग्रामस्थस्थानभेदादेवभिन्ना । एकाप्येषा देशस्तत्साविशेषा न्नानाकारं याति काये गुणेच । यथा । श्रीवाटीमधुरा तीक्ष्णा वातपित्तकफापहा । रसाढ्याचरसारुच्या विपाके शिशिरास्मृता ॥ स्यादम्लवाटी कटुकाम्लतिक्ता तीक्ष्णा तथोष्णामुखपाककर्त्री । विदाहपित्तास्रविकोपनीच विष्टम्भदा वातनिबर्हणीच ॥ सप्तमीमधुरा तीक्ष्णा कटु कष्णाच पाचनी । गुल्मोदराध्मानहरा रुचिकृद्दीपनीपरा ॥ * ॥ अन्यच्च । गुवागरेसप्तशिराप्रसिद्धा तत्पर्णचूर्णाति रसातिरुच्या । सुगन्धितीक्ष्णा मधुरातिहृद्या सन्दीपनीपुंस्त्वकराचद-

ल्या ॥ विरेचनीवक्रसुगन्धिकारिणीति ॥ * ॥ नागायाम्लसरासुतीक्ष्णामधुराक्ष्याहिमादाहनुत्पित्तोद्रेकहरासुदीपनकरीवल्यामुखामेदिनी । स्त्रीसौभाग्यविवर्द्धिनीमदकरीचेयासदावल्लभागुल्माध्मानविदन्धजिच्चकथितासामाल्लवेतुस्थिता॥ अन्यिपुष्पकलिकानामकषायोष्णाकटुस्तथा । मलापकर्षाकारश्लपित्तहृद्दातनाशिनी ॥ देषिणीयाकटुस्तीक्ष्णाहृद्यादीर्घदलाचसा । कफवातहराहृद्याकटुर्दीपनपाचनीतिराजनिर्घण्टः ॥

नागवारिकः । पुं । राजकुञ्जरहस्तिपे॥ गणस्थराजे ॥ गरुडे ॥ चित्रमेखले । मयूरे ॥

नागवीटः । पुं । ध्याकरा इतिगौडभाषाप्रसिद्धे । टाङ्करे ॥ इतित्रिकाण्डशेषः ॥

नागवीथी । स्त्री । अश्विन्यादिनक्षत्रत्रयघटितग्रहस्थानत्रयान्तर्गतोत्तरस्थानस्थपथविशेषे ॥ यथा । सर्वग्रहाणां त्रीण्येव स्थानानि द्विजसत्तमाः । स्थानंजारद्गवंमध्यं तथैरावतमुत्तरम् ॥ वैश्वानरंदक्षिणतोनिर्दिष्टमिहतत्त्वतः । तदेवमध्यमोत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथीत्रैधाविधाभिद्यते । तथाहि । त्रिभिस्त्रिभिरश्विन्यादिनक्षत्रै नागवीथी गजवीथी ऐरावती चेत्युत्तरमार्गे वीथीत्रयम् । तथा चोक्तम् । अश्विनी कृत्तिकायाम्या नागवीथीतिशब्दिता । इति विष्णुपुराणम् ॥ कश्यपापत्यविशेषे ॥

नागवृक्षः । पुं । नागकेसरे ॥

नागशुण्डी । स्त्री । डङ्गरीफले ॥

नागसम्भवम् । न । सिन्दूरे ॥ नागंसीसंसम्भवो ऽस्य ॥

नागसुगन्धा । स्त्री । भुजङ्गाक्ष्याम् ॥

नागस्तोककम् । न । वत्सनाभे ॥

नागस्फोता । स्त्री । दन्त्याम् ॥ नागदन्त्याम् ॥

नागहनुः । पुं । नखनामगन्धद्रव्ये ॥

नागहन्त्री । स्त्री । वन्ध्याकर्कोटक्याम्॥

नागाह्वः । पुं । नागकेसरे॥ न । हस्तिनापुरे ॥

नागाङ्गना । स्त्री । नागपत्न्याम् ॥ नागयष्टौ ॥ इति मेदिनी ॥ द्विरदस्य शुण्डे ॥ इति हेमचन्द्रः ॥

नागाञ्चला । स्त्री । नागयष्ट्याम् ॥

नागाधिपः । पुं । अनन्ते ॥ हस्तिराजे ॥

नागाननः । पुं । श्रीगणेशे ॥ नागस्यान नमस्य । समुदायशब्दा अवयवेपिवर्त्तन्त इति नागमुखपरो नागशब्दः॥

नागान्तकः । पुं । गरुडे ॥ नागानामन्तकः ॥

नागारातिः । पुं । वन्ध्याकर्कोटक्याम् ॥

नागालाबुः । स्त्री । कुम्भतुम्ब्याम् ॥

नागाशनः । पुं । गरुडे ॥ नागान् अश्नाति । अश० । ल्युः ॥ नागा अशनं यस्येति वा ॥

नागाह्वम् । न । हस्तिनापुरे ॥

नागाह्वा । स्त्री । लक्ष्मणाकन्दे ॥

नागिनी । स्त्री । नागपुष्प्याम् ॥ नागदन्त्याम् ॥ नागिनी रोचनी तिक्ता तीक्ष्णोष्णा कफपित्तजित् । विनिहन्ति विषं शूलं योनिदोषवमिक्रमीन् ॥

नागी । स्त्री । उभयोषायाम् । स्त्रीयांगजयोःषति ॥ नागशब्दाज्जातिपदेति स्त्रीत्वेर्थे ङीष् ॥

नागोदम् । न । उदरत्राणे ॥ इतिहेमचन्द्रः ॥

नागोदरम् । न । उरस्त्राणे ॥ इतिहारावली

नाचिकेतः । पुं । अनले ॥ नचिकेतसाप्राप्ते वैदिकोपाख्यानविशेषे ॥

नाचिकेतुः । पुं । अग्नौ ॥ इतिचिकाण्डशेषः ॥

नाटः । पुं । नृत्ये ॥ कर्नाट इति प्रसिद्धेदेशे ॥

नाटकः । पुं । कामाख्यायां पर्वतविशेषे ॥ यथा । ऐशान्यां नाटकेशैलेश-ङ्करस्य महाश्रमम् । निव्यंवसति तन्नेशस्तद्धीनातु पार्वतीति कालिकापुराणम् ॥

नाटकम् । न । लहारूपके । गद्यपद्यप्राकृतभाषामये ग्रन्थविशेषे ॥ देवतादर्शनान्तञ्च कर्त्तव्यं नाटकं बुधैः । राजर्षिदर्शनान्तं वाहेपिदेवैः समामताः ॥ त्रि । नर्त्तके ॥ नाटयति । नाटेर्ण्वुल् ॥

नाटकशैलः । पुं । अद्रिविशेषे ॥ यथा । अस्ति नाटकशैले तु सरोमानससंन्निभम् । यत्र सार्द्धं शैलपुत्र्या जलक्रीडां सदाहरः ॥ कुरुते नरशार्दूल स्वर्णपङ्कजशोभिते । तस्य पश्चात् मध्यपर्वभागे भस्मसरित्त्वयम् ॥ अवतीर्णा प्रयात्येव दक्षिणं सागरं प्रति । इति कालिका पुराणे ८२ अध्यायः॥

नाटकसन्धिः । पुं । मुखप्रतिमुखगर्भावमर्शनिर्वहणाख्यपञ्चभेदभिन्ने ॥ यथा । मुखं प्रतिमुखंचैव गर्भोविमर्श एवच । तथा निर्वहणञ्चेति नाटके पञ्चसन्धय इति ॥

नाटकीयम् । न । नाटकवर्ण्ये ॥ नाटके भवम् । वृद्धाच्छः ॥

नाटाम्रः । पुं । तरम्बुजे । लतापनसे ॥

नाटारः । पुं । नटतनये ॥ नटस्या पत्यम् । आरगुदीचामित्यारक् ॥

नाटिका । स्त्री । नाटकविशेषे ॥

नाटेयः । पुं । नट्या अपत्ये ॥

नाटेरः । पुं । नटीसुते ॥ इति हेमचन्द्रः ॥

नाट्यम् । न । तौर्यत्रिके । नृत्यगीतवाद्यात्मके ॥ लास्ये । नर्त्तने ॥ वाक्यार्थाभिनये ॥ नटस्येदम् । छन्दोगौक्थिकेति ञ्यः ॥ यो यस्य दयितो भावः स तं नाट्ये निरीक्षते । अतः सर्वमनोहारि नाट्यं कस्य न रञ्जकम् ॥ अस्योत्पत्तिर्यथा । इदानु श्रूयते ब्रह्मा शक्रेणाभ्यर्थितः पुरा । चकारात् कृष्य वेदेभ्यो नाट्यवेदन्तु पञ्चमम् ॥ उपवेदाश्च वेदानां चत्वारः कथिताः स्मृतौ । तत्रोपवेदो गान्धर्वः शिवेनोक्तः स्वयम्भुवे ॥ तेनापि भरता देशात्तेन मर्त्ये प्रचारितः । शिवाज्ञयाभिसन्ततः तस्मादस्य प्रयोजकाः इति सङ्गीतदामोदरः ॥ नटानाङ्कर्म । ष्यञ् ॥

नाट्यधर्म्मिका । स्त्री । दर्शनार्थं प्रख्यातनाट्ये ॥ यथा । गीतवाद्यनृत्यत्रयं नाट्यं तौर्यत्रिकञ्च तत् । सङ्गीतं प्रेक्षणार्थेऽस्मिन् शास्त्रोक्ते नाट्यधर्म्मिकेति हेमचन्द्रः ॥

नाट्यप्रियः । पुं । शिवे ॥

नाट्यशाला । स्त्री । प्रासादद्वारसमीपगृहे । नाट्यमण्डप इति भाषा ॥ यथा । नाट्यशालाञ्च कर्त्तव्या द्वारदेशसमाश्रयेति गरुडपुराणम् ॥

नाट्यालङ्कारः । पुं । सङ्गीतप्रसिद्धे अष्टषष्टिप्रकारे नाट्यभूषणहेतौ ॥ स च प्रकारः सङ्गीतदामोदरादिभ्यो ज्ञातव्यः ॥

नाट्योक्तिः । स्त्री । नाटकविषयकवचसि ॥ नाट्ये उक्तिः ॥ सा यथा । आर्य्येति ब्राह्मणे । महाराजेति च नृपे । हलेति सख्यौ । हण्डे इति नीचे । हञ्जे इति चेट्याम् । आर्य्यपुत्रेति स्वामिनि ॥ राष्ट्रियेति राजश्याले । हंहो इति समाने । देवेति राजनि । भट्टेति सार्वभौमे । आवुत्तेति भगिनीपतौ । अज्जुका इति गणिकायाम् । भाव इति विदुषि । आवुक इति जनके । कुमारो भर्त्तृदारक इति च कुमारे । देवो भट्टारक इति च राजनि । भर्त्तृदारिकेति राजसुतायाम् । देवी इति कृताभिषेकायां नृपस्त्रियाम् । भट्टिनी इति इतरासु राज्ञीषु । अत्र ह्मपद्मभिन्नवध्योक्तौ । अम्बेति मातरि । बाल इति बालायाम् । मारिष इति आर्य्ये । अत्तिके इति ज्येष्ठायां भ

गिन्याम् । निर्ग्रन्थणमितिनिष्ठायाम् ॥ इत्यमरः ॥

नाडिः । स्त्री । नाड्याम् ॥

नाडिकम् । न । कालशाके ॥ इतिभावप्रकाशः ॥

नाडिका । स्त्री । घटिकायाम् । घडी इतिभाषा ॥

नाडिकेलः । पुं । नारिकेले ॥

नाडिचीरम् । न । निर्वेष्टने । नली इतिगौडभाषा ॥ इतिहारावली ॥

नाडिन्धमः । पुं । स्वर्णकारे ॥ नाडीं वंशनलीं धमति । ध्माशब्दाग्निसंयोगयोः । नाडीमुष्ट्योश्चेतिकर्त्तरिखश् । पाघ्रेतिधमादेशः । खित्यनव्ययस्येतिह्रस्वः ॥

नाडिन्धयः । पुं । नाडीपानकर्त्तरि ॥ नाडीं धयति । धेट्० । नाडीमुष्ट्योश्चेतिखश् । ह्रस्वः ॥

नाडिपत्रम् । न । नाडीचशाके ॥

नाडी । स्त्री । शिरायाम् ॥ तत्रकायनाडी त्रिविधा । तत्रैकावायुवहा । अन्या मूत्रविडस्थिरसवाहिनी । अपरा आहारवाहिनीतिकश्चिद्भरतः ॥ * ॥ अथनाडीक्रमः । सार्द्धत्रिकोट्योनाड्यो हिस्थूलाःसूक्ष्माश्चदेहिनाम् । नाभिकन्दनिबद्धास्तास्तिर्यगूर्द्धमधः स्थिताः ॥ द्विसप्ततिःसहस्राणि तासांस्थूलाःप्रकीर्त्तिताः । देहे धमन्योधन्यास्ताः पञ्चेन्द्रियगुणावहाः ॥ तासाञ्च सूक्ष्मशुषिराणि शतानि सप्तस्युस्तानियैरसकृदन्नरसं वहद्भिः । आप्यायते वपुरिदं हि नृणां मनीषामस्ताःस्रवद्भिरिवसिन्धुशतैःसमुद्रः ॥ आपादतःप्रततगात्र मशेषमेषा आमस्तकादपिच नाभिपुरःस्थितेन । एतन्मृदङ्गइवचर्मचयेन नद्धं कायं नृणामिह शिराशतसप्तकेन ॥ * ॥ सप्तशतानां मध्येचतुरधिकाविंशतिः स्फुटास्तासाम् । एकापरीक्षणीया इतिमुनिवरचरणविन्यस्ता ॥ चतुरधिकेत्यत्रोक्तम् । तिर्यक्कूर्म्मोदेहिनां नाभिदेशे वामे वक्त्रं तस्यपुच्छञ्चयाम्ये । ऊर्द्धभागेहस्तपादौच वामौ तस्याधस्तात् संस्थितौ दक्षिणौ तौ ॥ वक्त्रे नाडीद्वयंतस्यपुच्छे नाडीद्वयंतथा । पञ्चपञ्चकरे पादे वामदक्षिणभागयोः ॥ तासां मध्ये एकेति । एकस्या एव पादादूर्द्धगमनात् दक्षिणेति प्राधान्येपुरुषाश्रया । उक्तम् । वामे भागे स्त्रियायोज्या नाडी पुंसस्तु दक्षिणे । इतिप्रोक्ता भयादेषिसर्वदेहेषु देहिनाम् ॥ * ॥ नपुंसकस्यतुस्त्रीपुंसयो रन्यतराकारप्रकटता मपेक्ष्य परीक्षा । साम्य-

न्तुनस्यादेव । कूचिमस्तुप्रकृतिस्थ ता । चरणेति वामस्यतु दक्षिणग्र न्थिपश्चातपार्श्वस्था । दक्षिणस्यतु वामग्रन्थिपश्चात्पार्श्वस्थैव सदुपदे शात् । करस्यातवच्यते ॥ * ॥ प रीक्षाप्रकारमाह । सव्येन रोग धृतिकूर्परभागभाजा पीड्याथ दक्षि णकराङ्गुलिकाचयेण । अङ्गुष्ठमूलम धि पश्चिमभागमध्ये नाडीं प्रभञ्ज नगतिं सततं परीक्षेत् ॥ सव्येन क रेण । रोगधृतिर्गदधारण मित्यर्था पीडने हेतुः । रोगाणां वातादि पि शुनवायूनां धारणं यथा स्यात् तथा पीड्येति कश्चित् । भागइति समुद्दि तकफोणिपरम् भाजेति परीक्षा कालेपि तत्र हस्तस्थितये । आपी- ड्येत्यर्थान् नाडीम् एतच्चापीडनंवा तादि पौर्वापर्य्यायबोधनाय । अथे त्या पीडनानन्तरम् नतु परीक्षा- कालेप्यापीडनस्थितिः । दक्षिणेति प्रायिकम् स्वपरीक्षाया मन्यथात्वा त् । चयेति योग्यतया तर्जनीमध्य मानामिकाग्रहणम् । पश्चिमेत्य ङ्गुष्ठस्याधोभागः । मूलेति तदुक्तम् । अङ्गुष्ठस्यतु मूलेया धमनी जीवसा क्षिणी । तस्या गतिवशाद्विद्यात् सु खं दुःखञ्च देहिनाम् ॥ प्रभञ्जनग

तिर्य्यचेति नाड्यन्तरनिरासः । सतत मिति सुस्थतादशायामपि । तदुक्त म् । भाविरोगाभिबोधाय सुस्थनाडी परीक्षणमिति ॥ * ॥ परीक्षणीय माह । वातं पित्तं कफं द्वन्द्वं सन्निपा तं तथैवच । साध्या साध्यविवेकञ्च सर्वं नाडी प्रकाशयेत् ॥ सन्निपात मिति सामान्यतः । साध्यासाध्यमि ति विशेषतश्चेत्यर्थः । सर्वमित्येत दन्यच्चरोगादिक मित्युपसंहारः ॥ इति नाडीप्रकाशे प्रथमोद्योतः ॥ * ॥ अथ नाडीज्ञानसमय माह । प्रातः कृतसमाचारः कृताचारपरिग्रहम् । सुखासीनः सुखासीनं परीक्षार्थं मुपाचरेत् ॥ प्रातरिति प्रायिकम् म ध्याह्ने उष्णता इत्युक्तेः ॥ * ॥ नि षिद्धकालमाह । सद्यः स्नातस्य भुक्त स्य क्षुत्तृष्णातपसेविनः । व्याया माक्रान्तदेहस्य सम्यङ् नाडीन वुध्य ते ॥ तैलाभ्यङ्गेच सुप्तेचतथाचभो जनान्तरे । तथा न ज्ञायते नाडी य था दुर्गतरा नदी ॥ सुप्ते निद्राकाले । भोजनान्तरे भोजनमध्ये भोजना वसानमात्रेच । वातमूर्च्छादिक्षणि करोगे नायंविधिः ॥ * ॥ अथ वाता दिस्वभावक्रममाह । आदौच वहते वातो मध्येपित्तं तथैवच । अन्तेच

वहते श्लेष्मा नाडिकाचयलक्षणम् ॥ आदाविति। कफोऽपिपीडितदिती यक्षणे। ननु तर्जनीनिवेशस्थलेस्थानभेदस्य कुत्राप्यवक्ष्यमाणत्वात् ॥ * ॥ सुस्थताज्ञानार्थ माह। भूलताग मनप्राया स्वच्छा स्वास्थ्यमयीशिरा। ।प्रायेति बाहुल्येन। स्वच्छा परिता जाड्यरहिता। स्वास्थ्यमयी सुस्थता व्यञ्जिकाच। तथा। प्रातःस्निग्धमयी नाडी मध्याह्ने चोष्णतान्विता। सायाह्ने धावमानाच चिराद्रोगविवर्जिता ॥ चिरादिति। अतीतानागतयोर्द्वयोरप्युक्तिः पथ्याशितानामेव ॥ * ॥ वातादीनां क्रमेण गति माह। वाताद् वक्रगता नाडी चपला पित्तवाहिनी। स्थिरा श्लेष्मवती ज्ञेयामिश्रिते मिश्रिता भवेत् ॥ वक्रेति। वायोस्तिर्यग्गमनात् तिरोवहन्तीति। एवं तत्प्रकोपादिना वार्त्तादिगतिरपि ज्ञातव्या। चपलेति। वह्नेरूर्द्ध्वज्वलनादूर्द्ध्वचञ्चला। स्थिरेति जलस्यनीचगमनादनुल्वणा। मिश्रितेमिश्रितचिह्नाभवति। तेन द्विदोषजेउभयचिह्ना। सर्वजे सर्वचिह्नेति। चपलतास्थिरतयोः समयभेदेनाविरोधः ॥ *॥ उक्तवक्रादिसामान्यस्य विशेषमाह। सर्पजलौकादि गतिं वदन्ति विबुधाः प्रभञ्जनेन नाडीम्। पित्ते च काकलावकभेकादि गतिं विदुः सुधियः ॥ राजहंसमयूराणां पारावतकपोतयोः। कुक्कुटादिगतिं धत्ते धमनी कफसंवृता ॥ आदिना वाते वृश्चिकगति र्लीलायिता। आदिशब्देन पित्ते कलिङ्गकलविङ्कादिगतिः। कफे गजवराङ्गनादिगतिः ॥ * ॥ द्वन्द्वजस्यापि क्रमेणैव भेदानाह। मुहुः सर्पगतिं नाडीं मुहुर्भेकगतिं तथा। वातपित्तद्वयोद्भूतां प्रवदन्ति विचक्षणाः ॥ भुजगादिगतिञ्चैव राजहंसगतिं धराम्। वातश्लेष्मसमुद्भूतां भाषन्ते तद्विदो जनाः ॥ मण्डूकादिगतिं नाडीं मयूरादिगतिं तथा। पित्तश्लेष्मसमुद्भूतां प्रवदन्ति महाधियः ॥ * ॥ त्रिदोषजा मप्याह। उरगादिलावकादिहंसादीनाञ्च बिभ्रती गमनम्। वातादीनाञ्च समं धमनीसम्बन्ध माधत्ते ॥ सममिति-न्यूनाधिकता निरासः। क्रमगत्त्यात् नासाध्यत्वम्। तथा। वातितित्तिरिवार्त्ताकगमनं सन्निपाततः। कदाचिन्मन्दगा नाडी कदाचित् शीघ्रगा भवेत् ॥ त्रिदोषप्रभवे रोगे विज्ञेया हि भिषग्वरैः। पित्तक्रमतया कृच्छ्रसाध्यत्व मसाध्यत्वञ्च ॥ * ॥ सा

मान्वतः सुखसाध्यत्वमाह । यदा
यं धातुमाप्नोति तदा नाडी तथा
गतिः । तथाहि सुखसाध्यत्वं नाडी
ज्ञानेन बुध्यते ॥ अयमर्थः । अपरा
ह्णादौ नाडी वातोल्वणा प्रथमं वा
तगत्यैव वहति ततो यथायथंपि
त्तादिगत्या न तु पित्तोल्वणत्वे वा
तादिगत्या तदा सुखसाध्यत्वं व्यति
रेकेण व्यतिरेकः । तदुक्तं मन्वैः । ना
डी यथाकालगति स्वयाणां प्रकोपशा
न्त्यादिभिरेव भूयः ॥ * ॥ अथासाध्य
रूपमाह । मन्दं मन्दं शिथिलशिथिलं
व्याकुलं व्याकुलंवा स्थित्वा स्थित्वा वह
ति धमनी याति नाशञ्च सूक्ष्मा । नि
त्यं स्थानात्स्खलति पुनरप्यङ्गुलिं सं
स्पृशेद्वाभावैरेवंबहुविधविधैः सन्नि
पातादसाध्या ॥ मन्दं मन्दं मृदुतरमु
त्कटमप्रखरमिति यावत् । शिथिले
गति स्खलदिति रूपम् । व्याकुलेति च
त्वरितत्वलः । वाशब्दः समुच्चये ।
स्थित्वा स्थित्वेत्यावृत्त्या च तद्रूपैव ग
तिः । नाशमदर्शनम् । गच्छति कदा
चिन्नाडी स्पन्दोऽपि न सम्भाव्यत इत्य
र्थः । सूक्ष्मेति यदि लभ्यते तदा तथै
वानित्यं प्रायः स्थानमङ्गुष्ठमूलं तस्मा
त्स्खलति कदापि तत्र न स्पन्दत इ
त्यर्थः । तदुक्तम् । हन्ति च स्थानवि

नाडी

च्युतेति किञ्चित्स्फुरतीति कुत्रा-
पि । पुनरपीति कियद्विलम्बेन अ
ङ्गुली मङ्गुलीमूलमेवमित्येवंरूपै
र्बहुभिर्भावैर्धर्मैः । उक्तञ्चान्यच ।
महातापेऽपि शीतत्वं शीतत्वे तापि
ता शिरा । नानाविधगतिर्यस्य तस्य मृ
त्युर्न संशयः ॥ महेत्याशयाकृष्टपि
त्तादिकृततापनिरासः । शीतत्वद्व-
यञ्चापि महेति सम्बध्यते । तथा ।
त्रिदोषे स्पन्दते नाडी मृत्युकालेपि
निश्चला । निश्चला स्पन्दसामान्याभा
ववती । अतीसारादौ हस्तपादादि
स्वेदादिना स्पन्दोपलम्भात् ॥ तथा
। पूर्वं पित्तगतिं प्रभञ्जनगतिं श्लेष्मा
णमाबिभ्रतीं स्वस्थानभ्रमणं मुहुर्वि
दधतीं चक्राधिरूढामिव । तीव्रत्वं
दधतीं कलापिगतिकां सूक्ष्मत्वमा
तन्वतीं नो साध्यां धमनीं वदन्ति
सुधियो नाडीगतिज्ञानिनः ॥ अय
मर्थः । पूर्वमिति क्रमविपर्यये पित्ता
दिगतिमतीं वारंवारमेवं क्रमेण च
क्रोपरि भ्राम्यमाणामिव । तथा तीव्र
त्वमतिशयवेगम् एवञ्च कदाचिन्म
यूरवद्गमनाम् । तयोरुत्तरोत्तरं कृ
शतामापादयन्तीति विशिष्टो हेतुः
। तथा चान्यच । या स्युश्चाथ स्थिरा
त्यन्ता याचेयं मांसवाहिनी । याच

सूक्ष्माच वक्राच तामसाख्या विदुर्बुधाः ॥ अस्युचा सहजतोप्युच्चतरा पृथगिनोन्नतावा। कश्चिदिति स्थिरा प्रणिधानेनैव गम्यमानस्पन्दा च। मांसवाहिनी मांसाहारइव गतिमतीलगुडप्रायेति। तदुक्तम्। मांसेन लगुडाकृतिः। मांसेनसमं वहतीति नयुक्तं तद्रूपपरिज्ञापकप्रकारस्यानुक्तत्वात्। द्वयमपिविशिष्टबोधनाय। याचसूक्ष्माचवक्राचेति पृथगिववाक्यान्तरमिति ॥ * ॥ असाध्यत्वापवादमाह। भारप्रवाहमूर्च्छाभयशोकप्रमुखकारणान्नाडी। सम्मूर्च्छितापिगाढं पुनरपिसाञ्जीवितं धत्ते ॥ चिरतरवहुलभारोद्वहनेनवा विषवेगधारावाहिरुधिरदर्शनादिजनितमूर्च्छयावा राक्षसादिसन्दर्शनादिभयेनवा पुत्रादिविरहजनितशोकातिरेकेणवा सम्मूर्च्छितापि अतिनिस्पन्दापि। गाढमिति सुतरां काश्यादियोगेपीत्यर्थः। पुनरितिसाध्यतां यातीत्यर्थः। भावानां रत्यादीनां प्रवाहइति न युक्तम् भयशोकयोः पृथग्विधानात्। प्रमुखेत्यनेन हेत्वन्तराभिधानम्। तदुक्तम्। पतितः सन्धितो भेदी नष्टशुक्रस्य योनरः। शाम्यते विस्मय स्तस्य न कि

ञ्चिन्मृत्युकारणम् ॥ पतित उच्चादितः सन्धितोऽस्थ्यादिसन्धानेन संहितः। भेदी अतीसारवान्। नष्टशुक्रो यक्ष्मादिनातिरमणेनवा शुक्रक्षयवान्। विस्मयोऽसाध्यत्वानुमानं शाम्यति नावतरति। कारणं प्रागुक्तमत्रैव। अन्यत्रापि। तथाभूताभिषङ्गेपित्रिदोषवदुपस्थिता। सम्पन्ना वहते नाडी तथाच न क्रमंगता ॥ अपमृत्युर्नरोगाज्ञा नाडी ततसन्निपातवत्। भूताभिषङ्गे तथा भूतसामान्याभिषङ्गेच देवजुष्टादौ नाडी सन्निपातधर्मशालिनी उपस्थिता। सा पातत एव भवति नतु तत् फलप्रदा। भेदमाह। समेति। वातपित्तकफस्वभावक्रमवती तथाक्रमं व्यतिक्रम्य नगता। तस्मादेव अपमृत्युः अपगतो मृत्यु र्यस्याः सा तथा। परमार्थतःसन्निपातवदपि सन्निपातजन्या न स्यादिति। तदुक्तम्। स्वस्थानहीने शोकेच हिमाक्रान्तेच निर्गदाः। भवन्ति निस्पृहा नाड्यो न किञ्चित्तत्र दूषणमिति ॥ स्वस्थानहीन उच्चादितः पतने। अङ्गुष्ठमूलतश्च्यवणइति तुल्यार्थः। निर्गदा इत्यसङ्गतिः निर्गदा अपिनिस्पृहा भवन्ति। दूषणमसाध्यत्वलक्षणः। अन्ये

त्वाहुः । स्तोकं वातकफं जुष्टं पित्तं वहति दारुणम् । पित्तस्थानं विजानीयात् भेषजं तस्य कारयेदिति ॥ अयमर्थः । वातकफाभ्यां नाडी किञ्चिद्वहति दुष्टं क्षीणत्वाधिकत्वाभ्यामपि विशेषा दुल्वणं पित्तं विषमवेगेन वहति तदातत् प्रतीकारार्थं भेषजं कुर्यात् । असाध्यतान स्यादिति यावत् । अत्रकश्चित् । स्वस्थानच्यवनं यावद्धमन्या नोपजायते । तावच्चिकित्सासत्त्वेपिनासाध्यत्वमितिस्थितिरिति ॥ तच्चप्रायिकं वहुधाव्यभिचारदर्शनात् । हन्ति स्वस्थानविच्युतेत्यत्र चकारस्यायोगव्यवच्छेदकत्व मित्यर्थः ॥ * ॥ प्रसङ्गात् कालनिर्णयमाह । भूलताभुजगाकारा नाडीदेहस्य सङ्क्रमात् । विशीर्णा क्षीणतां याति मासान्ते मरणं भवेत् ॥ कदाचित् मही लतावत् कृशा तन्नतिभ्रदतिमन्दगावक्रगमनाच । कदाचित् सर्पवत् परिपुष्टा तन्नतिवद्वलवत्तरवक्रगमनाचेति वैशिष्ट्येन सुखदशातो भेदः । इत्थञ्च कदाचिद्लक्ष्यता मतिकृशताञ्च यदागच्छति । देहेति देहक्रम मपेक्ष्य तेन देहोपि यदा स्थूलः शोथादिना कदाचिच्च कृशःस्यात् तदाद्वितीयेमासिम्रियत इति ।

तथा । क्षणाद् गच्छति वेगेन शान्ततांलभते क्षणात् । सप्ताहात् मरणं तस्य यद्यङ्गे शोथवर्जितः ॥ क्षणादिति द्रुतं नतु कदाचिदिति । शान्ततामनुपलभ्यमानत्वम् । शोथेति तन्मात्रसम्बन्धे तुना चिरं मरणाय चिरमेवेत्यर्थः । तथा । हिमवद् विशदा नाडी ज्वरदाहेनतापिनाम् । त्रिदोषस्पर्शभजतां तदा मृत्युर्दिनत्रयात् ॥ यदानिरन्तरं ज्वरदाहतापौ भवेत्यश्च नाड्याः । त्रिदोषेति सन्निपातलक्षणसत्त्व एव भवति । तदा । निरीक्ष्यादक्षिणे पादेतदाचैवाविशेषतः । मुखे नाडी वहेन्नित्यं ततस्तु दिनतुर्यकम् ॥ गतिन्तुभ्रमरस्येव वहेदेकदिनेनतु । कन्देनस्पन्दते नित्यं पुनर्लगति चाङ्गुलौ ॥ मध्ये द्वादशयामानां मृत्युर्भवति निश्चितम् ॥ दक्षिण इतिपुंसः । स्त्रियास्तु वाम एव । तथेति करस्येव विशेषतो विशेषज्ञानार्थम् । यदिचोभयनाड्यपि मुखेपुरोभागे नित्यं सदा वहति तदा दिनचतुष्ट्यं प्राप्य भ्रमरस्य परिभ्रमणरूप गमन मिव मुख एव यदिवहति तदैकदिनेन । कन्दे मूलेस्पन्दनस्याभावे कदाचिन

न स्पन्दते स्वल्पं स्पन्दत इति सम्भा
व्यते । निश्चयं प्रायः पुनश्चाङ्गुलौ तन्मू
ले कदापि लगति तदा तस्मादार
भ्य द्वादशप्रहरमध्यएव मृत्युरि-
ति । तथा । स्थित्वा नाडी मुखे य
स्य विद्युद्द्योति रिवेच्यते । दिनैकं
जीवितं तस्य द्वितीये म्रियते ध्रुवम्
॥ स्थित्वेत्या वृत्त्या स्थित्वा स्थित्वा
विद्युत् स्फुरणमिवलक्ष्यते द्वितीय
इत्यष्टप्रहरादूर्द्ध मित्यर्थः । तथा
। स्वस्थानविच्युता नाडी यदा वह
ति वा नवा । ज्वालाच हृदये तीव्रा
तदा ज्वालावधिस्थितिः ॥ न वेति
स्थित्वा स्थित्वे त्यर्थः। इत्यन्य यद
साध्यलक्षण मुक्त मवस्थाना दपवा
दविरहेसति तस्यार्थप्रवेशो यथा
यथ मार्यमतिभिरवगन्तव्य इतिनेह
प्रतन्यते ग्रन्थगौरवभयात् । मन्दं
मन्दमिति अनेनच भूलतागमना
कारेति विरुध्यते तस्य तावत्कालि
कमरणविषयत्वात्। सर्व मिदं सर्व
रोग एव वेदितव्यं ज्वरमात्रेतु भ्रम
एवेति ॥ * ॥ इतिनाडीप्रकाशे द्वि
तीयोद्योतः ॥ * ॥ अथरोगेषु नि
रूपणीयेषु प्रधानतया प्रथमं ज्वर
निरूपण माह । तत्र ज्वरपूर्वरूपे ।
अङ्गग्रहेण नाडीनां भवन्ति सर्वदाः

सवा: । सवः प्रवस्ततांयाति ज्वरदाहो
भिभूतये ॥ सान्निपातिकरूपेण भ
वन्ति सर्ववेदनाः ॥ * ॥ ज्वररूपमा
ह । ज्वरकोपेच धमनी सोष्णा वे
गवती भवेत् । उष्मा पित्तादृते ना
स्ति ज्वरो नास्त्युष्मणा विना ॥ उष्णा
वेगधरा नाडी ज्वरकोपे प्रजायते ॥
अन्यत्रच । ज्वरेच वक्राधावन्ती त
थाच मरुतः स्रवे । रक्तशान्ते निशि
प्रातस्तथा दीपशिखा यथा ॥ * ॥ त
त्रापि विशेषमाह । सौम्यासूक्ष्यास्थि
रामन्दा नाडी सहजवातजा । स्थू
लाचं कठिनाशीघ्रा स्पन्दते तीव्रमा
रुते ॥ द्रुताच सरला शीघ्रा दीर्घा
पित्तज्वरे भवेत् । शीघ्र माहननं ना
ड्याः काठिन्याच्च चलतथा ॥ मन्दा
शीर्णा नातितरां स्पन्दनञ्च प्रकीर्त्ति
तम् । नाडीतन्तुसमामन्दा शीतला
श्लेष्मदोषजा ॥ * ॥ द्वन्द्वजमाह ।
चञ्चला तरला स्थूला कठिना वात
पित्तजा । ईषच्च दृश्यते तूर्णामन्दा
स्याच्छ्लेष्मवातजा ॥ निरन्तरं खरं
रूक्षं मन्दश्लेष्मातिवाततम् । रूक्षं
वातभवे तस्य नाडी स्यात् पित्तस
न्निभा ॥ रूक्षा शीता स्थिरा नाडी
पित्तश्लेष्मसमुद्भवा ॥ प्रसङ्गादाह ।
मध्येकरेवहेन्नाडी यदि सन्निपात

ध्रुवम् । तदानूनं मनुष्यस्य रुधिरा
पूरिता मला: ॥ * ॥ आगन्तुकरूप
भेदमाह । भूतज्वरे भेकद्ववातिवेगा
धावन्ति नाड्योहि यथाब्धिगामा: ।
तथा । एकाहिकेन क्वचन प्रदूरेच
शान्तगामा विषमज्वरेण । द्वितीय
केवापितृतीयतुर्ये गच्छन्तितप्ता भ्र
मिवत् क्रमेण ॥ * ॥ अन्यत्रापि ।
उष्णा वेगधरा नाडी ज्वरकोपे प्रजा
यते । उद्वेगक्रोधकामेषु भयचिन्ता
श्रमेषु च ॥ भवेत् क्षीणगति नाडी
ज्ञातव्या वैद्यसत्तमै: ॥ प्रसङ्गादाह
। व्यायामे भ्रमणे चैवचिन्तायां श्रम
शोकत: । नानाप्रभावगमना शिरा
गच्छति विज्वरे ॥ * ॥ अजीर्णरूप
माह । अजीर्णेतु भवेन् नाडीकठिना
परितोजडा । प्रसन्नाचद्रुताशुद्धात्वरि
ताचप्रवर्त्तते ॥ * ॥ तत्रविशेषमाह
। पक्वाजीर्णे पुष्टिहीना मन्दं मन्दं
वहेज्जडा । असृक्पूर्णाभवेत् को
ष्णागुर्वीसामा गरीयसी ॥ * ॥ प्र-
सङ्गाद् भक्षणज्ञानमाह । पुष्टिस्तैल
गुडाहारे मांसे चलगुडाकृति: । क्षी
रेचस्तिमितावेगा मधुरे भेकवद्ग
ति: ॥ रम्भागुडवटाहारे रूक्षशुष्का
दिभोजने । वातपित्तार्त्तिरूपेण ना
डीवहति निष्क्रमम् ॥ * ॥ अथरस

ज्ञानम् । मधुरे बर्हिगमनातिक्तेस्या
द्भूलता गति: । अम्लेकोष्णा प्लवग
ति: कटुके भृङ्गसन्निभा ॥ कषाये
कठिनाम्लावालवणे सरला द्रुता । ए
वं द्वित्रिचतुर्योगे नाना धर्मवतीध
रा ॥ तथा । द्रवेऽतिकठिना नाडी
कोमला कठिनाशने । द्रवद्रव्यस्यका
ठिन्येकोमला कठिनापिच ॥ क्षौद्रे
पृथग् ग्रन्थिलेपपिष्टे पुष्टैव जायते ॥
* ॥ अग्निमान्द्यधातुक्षयलक्षण मा
ह । मन्दाग्ने: क्षीणधातोश्च नाडी
मन्दतरा भवेत् । तदुक्तम् । क्षीण
धातौच मन्दाग्नौ नाडी क्षीणतमा
ध्रुवम् । तथा । मन्देऽग्नौ क्षीणतां
याति नाडी हंसाकृतिस्तथेति । अ
न्यत्र तु । आमाश्रमे पुष्टिविवर्द्धनेन भ
वन्ति नाड्योऽग्रभुजाभिवृत्ता: । आ
हारमान्द्या दुपवासतो वा तथैव ना
ड्यो भुजगाग्रमाना: ॥ * ॥ प्रसङ्गाद्
दीप्ताग्निज्ञानमाह । लघ्वी भवति
दीप्ताग्ने स्तथा वेगवती मता ॥ * ॥
प्रसङ्गाद् ग्रहणी मप्याह । पादेच
हंसगमना करे मण्डूकसंश्रवा । त
स्याग्ने र्मन्दता देहे त्वथवा ग्रहणी
गदे ॥ तथा । भेदेन शान्ता ग्रहणी
गदेननिर्वीर्यरूपा त्वतिसारभेदे ।
विलम्बिकायां प्लवगा कदाचि दामा

तिसारे पृथुता जडा च ॥ * ॥ अथ विसूचिकाज्ञानम् । निरोधे मूत्रशकृतोर्विड्ग्रहे स्थितराश्रिताः । विसूचिकाभिभूते च भवन्ति भेकवत् क्रमाः ॥ * ॥ प्रसङ्गादानाहमूत्रकृच्छ्रज्ञानमाह । आनाहे मूत्रकृच्छ्रे च भवेन्नाडी गरिष्ठता ॥ * ॥ शूलज्ञानमाह । वातेन शूलेन मरुत्प्रवेन सदैव वक्रा हि शिरावहन्ती । ज्वालामयी पित्तविचेष्टितेन साध्या न शूलेन च पुष्टरूपा ॥ * ॥ अथ प्रमेहज्ञानम् ॥ प्रमेहे ग्रन्थिरूपा सा सुतप्ता त्वामदूषणे ॥ * ॥ विषविष्टम्भगुल्मज्ञानमाह । उत्पित्तुरूपा विषरिष्टिकायां विष्टम्भगुल्मेन च वक्ररूपा । अत्यर्थवातेन अधःस्फुरन्ती उत्तानभेदिन्यसमाप्तकाले ॥ * ॥ गुल्मे विशेषमाह कश्चित् । गुल्मेन कम्पाऽथ पराक्रमेण पारावतस्येव गतिङ्करोति ॥ * ॥ अथ भगन्दरज्ञानम् । व्रणार्थं कठिने देहे प्रयाति पैत्तिकं क्रमम् । भगन्दरानुरूपेण नाडीव्रणनिवेदने ॥ प्रयाति वातिकं रूपं नाडी पावकरूपिणी ॥ * ॥ अथ वान्तादिज्ञानम् । वान्तस्य शल्याभिहतस्य जन्तोर्वेगावरोधाकुलितस्य भूयः । गतिं

विधत्ते धमनी गजेन्द्रमरालमानेव कफोल्वणेन ॥ * ॥ स्त्रीरोगादिकमपि रक्तादिज्ञानक्रमेण ज्ञातव्यम् ॥ क्वचित् प्रकरणोल्लेखात् क्वचिदौचित्यमात्रतः । क्वचिद्देशात् क्वचित् कालात् सङ्कीर्णगदनिर्णयः ॥ नाडीपरिचयज्ञानं प्रायशो नैव दृश्यते । तेन धाष्टर्येन मयोक्तं यत् तत् समाधेयमुत्तमैः ॥ * ॥ इति शङ्करसेनकविराजकृतौ नाडीप्रकाशे तृतीयोद्योतः ॥ * ॥ * ॥ * ॥ अथ भावमिश्रोक्ता नाडीपरीक्षा । पुंसो दक्षिणहस्तस्य स्त्रियो वामकरस्य तु । अङ्गुष्ठमूलगां नाडीं परीक्षेत भिषग्वरः ॥ अङ्गुलीभिस्तिसृभिर्नाडीमवहितः स्पृशेत् । तच्चेष्टया सुखं दुःखं जानीयात् कुशलोऽखिलम् ॥ सद्यः स्नातस्य सुप्तस्य क्षुत्तृष्णातपशीलिनः । व्यायामश्रान्तदेहस्य सम्यङ् नाडी न बुध्यते ॥ वातेऽधिके भवेन्नाडी प्रव्यक्ता तर्जनीतले । पित्ते व्यक्ता मध्यमायां तृतीयाङ्गुलिगा कफे ॥ तर्ज्जनीमध्यमामध्ये वातपित्तेऽधिके स्फुटा । अनामिकायां तर्ज्जन्यां व्यक्ता वातकफे भवेत् ॥ मध्यमानामिकामध्ये स्फुटा पित्तकफेऽधिके । अङ्गुलि

चितयेपि स्यात् प्रव्यक्ता सन्निपाति
नः ॥ वातात् वक्रगति नाडी पित्ता
दुत्प्लुत्यगामिनी । कफान् मन्दग
तिर्ज्ञेया सन्निपाताद् द्रुतिद्रुता ॥ वक्र
मुत्प्लुत्य चलति धमनी वातपित्त
तः । वहेद् वक्रञ्च मन्दञ्च वातश्लेष्मा
धिकेऽत्वतः ॥ उत्प्लुत्य मन्दं चलति
नाडी पित्तकफेऽधिके । कामात्
क्रोधाद् वेगवहा क्षीणा चिन्ताभयप्लु
ता ॥ स्थित्वास्थित्वाचलेद् या सा ह
न्ति स्थानच्युता तथा । अतिक्षीणा
च शीताच प्राणान् हन्ति न संशयः ॥
ज्वरकोपेन धमनी सोष्णा वेगवती
भवेत् । मन्दाग्नेः क्षीणधातो श्च सै
व मन्दतरा मता ॥ चपला क्षुधित
स्य स्यात् तृप्तस्य भवति स्थिरा । सु
खिनोऽपि स्थिरा ज्ञेया तथा बलवती
मता ॥ इति ॥ * ॥ * ॥ * ॥ प्रस
ङ्गाद् योगिना मुपकाराय इडादिना
डीनां निरूपणम् । दक्षिणांशः स्मृतः
सूर्यो वामभागो निशाकरः । नाडी
देश विदु स्तासु मुख्या स्तिस्रः प्रकी
र्त्तिताः ॥ इडा वामेतनोर्मध्ये सुषु
म्णा पिङ्गला परे । मध्या तास्वपि
नाडी स्यादग्नीषोमस्वरूपिणी ॥
अथेडा वाममुष्काधः स्याधनुर्वक्रा वा
मनासापर्यन्तंगता । एवं पिङ्गला द

क्षिणाण्डाधः स्या धनुर्वक्रा दक्षिण
नासान्तंगता । पृष्ठवंशान्तर्गता सुषु
म्णे त्यर्थः । इतिसारदातिलकम् ॥
* ॥ नाडीनां संवहोदेवि कन्दयो-
निः खगाण्डवत् । तत्र नाड्यः सम्
त्पन्नाः सहस्राणां द्विसप्ततिः ॥ कन्द
स्य पद्मस्य योनि रुत्पत्ति स्थानं शा
लूकमितियावत् ॥ प्रधानाः प्राणवा
हिन्यो भूयस्तत्र दश स्मृताः । इडा
चपिङ्गला चैव सुषुम्णा च तृतीयि
का ॥ गान्धारी हस्तिजिह्वाच पूषा
चैवयशस्विनी । अलम्बुषाकुहूश्चैव
शङ्खिनीच दशस्मृताः ॥ एवं नाडी
मयं चक्रं विज्ञेयं शक्तिचक्रके । इडा
याः पिङ्गलायाश्च मध्ये याता सुषुम्
णिका ॥ इयञ्च त्रिगुणा ज्ञेया ब्रह्मवि
ष्णुशिवात्मिका । रजोगुणाच वज्रा
ख्या चित्रिणी सत्त्वसंयुता ॥ तमोगुणा
ब्रह्मनाडी कार्यभेदक्रमेणचेति नि
रुत्तरतन्त्रे प्रथमः पटलः ॥ * ॥ इ
डापिङ्गलयोः स्वरूपंयथा । इडाच
शङ्खचन्द्राभा तस्या वामे व्यवस्थि
ता । पिङ्गला सितरक्ताभा दक्षिणं
पार्श्वमाश्रितेति योगार्णवः ॥ इडा
यां संश्रितश्चन्द्रः पिङ्गलायां दिवाक
र इति तन्त्रान्तरम् ॥ गुच्छस्य काण्डे
। नाले ॥ ग्रन्थान्तरे ॥ गण्डदूर्वायाम् ॥

॥ कुट्टनचर्यायाम् ॥ षट्चणकाले। घटिकायाम् । षष्टिपलात्मककाले ॥ तृणान्तरे ॥ वेष्टितस्तम्बस्याधारभेदे ॥ नालयति नलत्यनेनवा । नलगन्धे । पचाद्यच् । हलश्चेति घञ् वा । डलयोरेकत्वम् । गौरादित्वात् ङीष् ॥ यद्वा । नाडयति नाड्यते वा । नडभ्रंशे । चुरादिः । अचड़ः । ङीष् ॥

नाडीकः । पुं । पट्टशाके । पटुआ इति भाषा ॥ नाडीकोरक्तपित्तघ्नो विष्टम्भी वातकोपन इतिभावप्रकाशः ॥

नाडीकलापकः । पुं । सर्पाक्ष्याम् ॥

नाडीकेलः । पुं । नारिकेले ॥ इतिशब्दरत्नावली ॥

नाडीचः । पुं । शाकविशेषे । केचुके । बिम्बरोचने ॥ नाडीचशाकं द्विविधं तिक्तं मधुरमेवच । रक्तपित्तहरंतिक्तं कृमिकुष्ठविनाशनम् ॥ मधुरंपिच्छिलंशीतंविष्टम्भिकफवातकृत् ॥ इतिराजवल्लभः ॥

नाडीचक्रम् । न । नाभिमण्डलस्थेचक्रविशेषे ॥ नाभिमण्डलमासाद्यकुकुटाण्डमिवस्थितम् । नाडीचक्रमितिप्राहुस्तस्मान्नाड्यः समुद्गताः ॥

नाडीचरणः । पुं । खगे । पक्षिणि ॥

नाडीजङ्घः । पुं । काके ॥ब्रह्मणोदयितेबकविशेषे ॥ मुनिविशेषे ॥

नाडीतरङ्गः । पुं । काकोले ॥ हिण्डके ॥ रतहिण्डके ॥ इतिमेदिनी ॥

नाडीतिक्तः । पुं । नेपालनिम्बे ॥

नाडीदेहः । पुं । भृङ्गिनाम्नि शिवस्य द्वारपाले ॥

नाडीनक्षत्रम् । न । जन्मनक्षत्रे ॥

नाडीविग्रहः । पुं । भृङ्गिणि । शिवद्वारपालविशेषे ॥

नाडीव्रणः । पुं । सदामलद्व्रणे । नाडीस्रवइति नसूर इतिचभाषा ॥ नाड्यांव्रणः ॥ विडङ्गत्रिफलाकृष्णाचूर्णलीढंसमाक्षिकम् । हन्तिकुष्ठंकृमीन्मेहनाडीव्रणभगन्दरान् ॥ इतिगरुडपुराणम् ॥

नाडीशाकः । पुं । नाडीके ॥

नाडीस्वेदः । पुं । भृङ्गिणि । शिवद्वास्थे ॥

नाडीहिङ्गु । न । हिङ्गुप्रभेदे । पत्राशाके । रामठ्याम् ॥

नाणकः । त्रि । प्रशस्ते ॥ अणकःकुत्सितः ॥ तद्विरुद्धः ॥ न । मुद्राचिह्नितनिष्कादौ ॥ यथा । तुलाशासनमानानां कूटकृन्नाणकस्यच । एभिश्चव्यवहर्त्ताय: स दाप्योदण्डमुत्तममिति याज्ञवल्क्यः ॥

नातिमानिता । स्त्री । अतिमानित्वाभावे । पूज्येषु नम्रतायाम् ॥

नाथः । पुं । । कुलगुरौ ॥ कुलपरम्परागतस्वामिनि ॥ नासारज्जौ ॥ ऐश्वर्ययुक्ते । अधिपे । आर्थे । स्वामिनि ॥ त्रि । प्रार्थनीये ॥

नाथमानः । त्रि । उपतप्यमाने ॥ याचमाने ॥

नाथवान् । त्रि । परायत्ते । परतन्त्रे ॥ नाथोऽस्यास्ति । तदस्यास्तीतिमतुप् ॥

नाथहरिः । पुं । पशौ ॥ नाथं हरतीतिविग्रहे हरतेर्दृतिनाथयोः पशाविति नाथकर्मोपपदाद्धरते रिन् प्रत्ययः ॥

नादः । पुं । ध्वनौ । शब्दे ॥ वर्णे ॥ अर्द्धेन्दौ । अर्द्धमात्रायाम् ॥ णद० । घञ् ॥ ब्रह्मस्वरूपे घोषविशेषे ॥ यथा । सच्चिदानन्दविभवात् सकलात् परमेश्वरात् । आसीच्छक्तिस्ततोनादस्तस्माद्बिन्दुसमुद्भवः ॥ नादो बिन्दुश्च बीजञ्च स एव त्रिविधो मतः । भिद्यमानात् पराद्बिन्दोरुभयात्मा रवो भवत् ॥ स रवः श्रुतिसम्पन्नः शब्दो ब्रह्माभवत्परमिति ॥ सकलात् मूर्त्तात् । नादो घोषः । बिन्दुः प्रणवः सचबीजञ्च सर्ववर्णप्रभवत्वात् ॥ * ॥ नाभेरूर्द्ध्वं हृदिस्थानान्मारुतः प्राणसंज्ञकः । नदति ब्रह्मरंध्रान्ते तेन नादः प्रकीर्त्तितः ॥ अपिच । आकाशाग्निमरुज्जातो नाभेरूर्द्ध्वं समुच्चरन् । मुखेऽभिव्यक्तमायाति यः स नादइतीरितः ॥ सचप्राणिभवोऽप्राणिभवश्चोभयसम्भवः । आद्यः कायभवो वीणादिभवस्तु द्वितीयकः ॥ तृतीयोपिच वंशादिभव इत्थंत्रिधा मतः । यदुक्तं ब्रह्मणः स्थानं ब्रह्मग्रन्थिश्चयोमतः ॥ तन्मध्ये संस्थितः प्राणः प्राणाद्वह्निसमुद्भवः । वह्निमारुतसंयोगान्नादः समुपजायते ॥ न नादेन विनागीतं ननादेन विना स्वरः । न नादेन विना रागस्तस्मान्नादात्मकंजगत् ॥ न नादेनविनाज्ञानं न नादेन विनाशिवः ॥ नादरूपं परंज्योति र्नादरूपी परं हरिः ॥ इतिसङ्गीतदामोदरः ॥

नादेयम् । न । सैन्धवलवणे ॥ सौवीराञ्जने ॥ नदीनदसम्बन्धिजले ॥ शैषिकेऽर्थे पुनद्यादिभ्योढक् ॥ नद्या नदस्यवा नीरं नादेयमितिकीर्त्तितम् । नादेय मुदकं रूक्षं वातलं लघु दीपनम् ॥ अनभिष्यन्दि विशदं कटुकं कफपित्तनुत् ॥ नद्यःशीघ्रवहा लघ्व्यः सर्वायाश्चामलोदकाः । गुर्व्यः शैवलसञ्छन्ना मन्दगाःकलुषाश्चयाः ॥ नदीसरस्तडागस्थेकूपप्रस्र

वर्णादिजे। उदके देशभेदेन गुणा न्दोषांश्चलक्षयेत्॥ पुं। काशतृणे॥ वानीरवृक्षे॥ त्रि। नदीनदसम्बन्धिजलादौ॥ नदीभवे॥ अग्राह्ये॥ अवश्यदेये॥ यथा। नादेयंनादेयं शरदि वसन्तेच नाऽऽदेयमिति। अस्यार्थः। नदीभवं नादेयं जलं शरदि न अदेयम्। अपितु देयं दातव्यमिति। वसन्तेच पुनस्तदेव नादेयं नग्राह्यमिति॥

नादेयिका। स्त्री। नादेय्याम्॥ नादेय्येव। स्वार्थेकः। ह्रस्वः॥

नादेयी। स्त्री। नागरङ्गे॥ जयायाम्। पताकाविशेषे। वैजयन्तिकायाम्॥ अम्बुवेतसे॥ भूमिजम्बाम्॥ जवायाम्॥ व्यङ्गुष्ठे॥ अग्निमन्थे॥ काकजंबाम्॥ नद्यांभवा। नद्यादिभ्यो ढक्। टिड्ढेतिङीप्॥

नाना। अ। विनार्थे॥ नाना नारीं निष्फला लोकयात्रेतियथा॥ अनेकार्थे॥ यथा। नानाविधं देहभृतां समाजम्॥ उभयार्थे॥ नेति नाना। विनञ्भ्यांनानाञौनसहेति नञो-नाञ्प्रत्ययः॥

नानाकन्दः। पुं। पिण्डालौ॥ बहुविधमूले॥

नानात्वम्। न। अनेकभावे। द्वैतद र्शने॥ यथा। जीवात्मनोरनन्यत्वमभेदेन प्रशस्यते। नानात्वं निन्द्यते यच्चतदेवंहि समञ्जसमिति गौडपादाः॥ द्वैतंहि सर्वप्राणिसाधारणं स्वाभाविकं शास्त्रबहिष्कृतैः कुतार्किकैर्विरचितं नानात्वंदर्शनं नतुतद्वितीयमस्तीत्यादिश्रुत्यानिन्द्यते यावेदबाह्याः स्मृतय इत्यादिस्मृत्याच॥

नानाध्वनिः। पुं। वीणावेणुकाहलादिशब्देषु॥ इति हारावली॥

नानाननः। त्रि। अनेकविधास्ये॥ नानाप्रकाराणि आननानि यस्य॥

नानारूपः। त्रि। बहुविधे। विविधे। अनेकप्रकारे॥ नाना रूपं यस्य॥

नानार्थः। त्रि। अनेकार्थे॥ भिन्नप्रयोजने॥

नानावर्णः। पुं। बहुविधशुक्लादिवर्णे। चित्रे। कर्बुरे॥ त्रि। तद्वति॥

नानावादानुरोधः। त्रि। भगवति परमेश्वरे॥ अस्ति नास्ति सर्वज्ञः अल्पज्ञः बद्धः मुक्तः एकः अनेक इत्यादीन् नानावादान् अनुरुणद्धि माययानुवर्त्ततेय इतिव्याख्यानात्॥

नानाविधः। त्रि। अनेकप्रकारे॥ नानाविधा यस्यसः॥

नानुष्ठेयः। त्रि। अकर्त्तव्ये। अननुष्ठेये॥

नान्तरीयकम्। त्रि। अवश्यम्भाविनि॥

यथा। प्रतिबन्धकाभावे नान्तरीयकी कार्योत्पत्तिः । अवश्यम्भाविनी-त्यर्थः ॥

नान्त्वम् । न । स्तोचे ॥ नमति अनेनवा । णम० । असुजिगमिनमीतिष्ट्रन् इट्टिश्च ॥

नान्दी । स्त्री । समृद्धौ ॥ नाटकादौम ङ्गलश्लोके । मङ्गलपाठे ॥ यथोक्तंभ रतादिभिः। आशीर्वचनसंयुक्ता स्तु तिर्यस्मात्प्रवर्त्तते। देवद्विजनृपादी नां तस्मान्नान्दीति सास्मृता ॥ * ॥ नाटकेविघ्नविघातायादौनान्दीका-र्या । यदाहभरतः । यद्यप्यङ्गानि भू यांसि पूर्वरङ्गस्य नाटके । तथाप्यव-श्यं कर्त्तव्यानान्दीविघ्नप्रशान्तये ॥ दे वद्विजन्नपादीनामाशीर्वादपरायणा- । नन्दन्तिदेवतायस्मात्तस्मान्नान्दीप्र कीर्त्तिता ॥ अन्यच्च । देवद्विजन्नपा-दीना माशीर्वन्दनपूर्विका । नान्दी कार्याबुधै र्यत्नान्नमस्कारेणसंयुता ॥ गङ्गानागपतिः सोमः सुधानन्दाजया शिषः । एभिर्नामपदैः कार्या नान्दी धाराभिरङ्किता ॥ प्रशस्तपदविन्यासा चन्द्रसङ्कीर्त्तनान्विता। आशीर्वादप रानान्दीयोज्ज्येयं मङ्गलात्मिका ॥ का चिद्दशपदानान्दी काचिदष्टपदा त था । सूत्रधारः पठेन्नान्दीं मध्यम

स्वरमाश्रितः ॥ इतिमालतीमाध वटीका ॥

नान्दीकः । पुं । तोरणस्तम्भे ॥

नान्दीकरः । चि । नान्दीवादिनि । ना न्दीपाठकारिणि ॥ नान्दी माशीर्नम स्क्रियादिरूपं मङ्गलं करोति वदति । दिवाविभेतिटः ॥ भेरी प्राया ना-न्दीतद्वादनशीले इति केचित् ॥ अ चवदिकृशौवादनार्था विच्याहुः ॥

नान्दीपटः । पुं । वीनाहे । कूपादीनां मुखबन्धने ॥ इतिहेमचन्द्रः ॥

नान्दीमुखः । पुं । कूपादिमुखबन्धने। नान्दीपटे ॥ वृद्धिश्राद्धभुजि पितृग-णे ॥ यथा । नान्दीमुखं पितृगणं पूज येत् प्रयतो गृहीति विष्णु पुराणम् । सचगणः पित्रादिचिकम् मातास हादिचिकञ्चेति ॥ न । वृद्धिश्राद्धे ॥

नान्दीमुखी । स्त्री । सामगेतरवृद्धिश्रा द्धभुक्मातृगणे ॥ शर्करीछन्दोभेदे ॥ स्वरभिद्वियदिनौतौ चनान्दीमुखी गौ । यथा । सरसखगकुलालापना न्दीमुखीयं लहरिभुजलताचारुफे नस्मितश्रीः । मुरहरकलयासक्ति मासाद्यकिन्त प्रमुदितहृदया भानु जान्वत्यतीह ॥

नान्दीवादी । चि । नान्दीश्लोकपाठका रिणि । नान्दीकरे ॥ नान्दीवदनशी

लः। सुपीतिवदे्शिनिः॥ नाटकादौ मङ्गलार्थं भेर्यादिवादके॥

नापितः। पुं। नाई इतिख्याते वर्णसङ्करजातिविशेषे। अन्तावसायिनि। चुरिणि। पट्टिकायांकुवेरिणो जाते। इति प॰ प॰॥ शूद्रायां चत्रिया ज्जातोयमिति विवादार्णवसे तुः॥

नापितशालिका। स्त्री। नापितशालायाम्। खरकुट्याम्॥

नाभकः। पुं। वनतिक्ते॥

नाभागः। पुं। नभगात्मजे॥ नभगस्यापत्यम्। अण्॥

नाभिः। पुं। मुख्यनृपे। अग्नीध्रापत्ये॥ चक्रमध्ये। रथचक्रस्यपिण्ड्याम्॥ चत्रिये॥ स्त्री। मृगमदे॥ पुं। स्त्री। प्राण्यङ्गविशेषे। उदरावर्त्ते। तुन्दकूप्याम्॥ संडीइति भाषा॥ त्रि। प्रधाने। मुख्ये॥ नह्यन्ते अराश्च। णह॰। नहोभश्चेति इञ्॥ नभ्यते अचोयनम्यते ऽनया ऽस्यां वा। णभ॰। इञजादिभ्यः॥ यद्वानाभयति। स्वार्थण्यन्तादचइः॥

नाभिकण्टकः। पुं। गर्भण्डे॥ आवर्त्ते॥ इतिशब्दरत्नावली॥

नाभिका। स्त्री। कटभीवृक्षे॥

नाभिगुडकः। पुं। गर्भण्डे। गोण्डे। फूलीसुंडी इतिटूंडीइ तिचभाषा॥

नाभिगोलकः। पुं। स्फीतनाभौ। नाभिकण्टके। गर्भण्डे॥ नाभेर्गोलकः॥

नाभिजः। पुं। ब्रह्मणि। कमलासने॥

नाभिजन्मा। पुं। ब्रह्मणि। स्रष्टरि। विधातरि॥ नाभौजन्मास्य॥

नाभिनाला। स्त्री। अमरायाम्। नाभिसम्बन्धिन्यां नाड्याम्॥

नाभिभूः। पुं। अजयोनौ। ब्रह्मणि॥

नाभिवर्षः। पुं। भारतवर्षे॥

नाभी। स्त्री। नाभौ॥ मृगमदे॥ कृदिकारादितिङीष्॥

नाभीलम्। न। नार्याःवङ्क्षणे॥ नाभिगाम्भीर्ये॥ कृच्छ्रे॥ गर्भण्डे। नाभिगोलके॥

नाभ्यम्। त्रि। नाभिहिते॥ नाभयेहितम्। शरीरावयवाद्यत्। नाभिनभञ्चेतिनाभेर्नभादेशस्तु न भवति। तस्यगवादित्वात्सन्नियोगशिष्टत्वेन रथनाभावेवप्रवृत्तेः॥ नाभिसम्बन्धिनि॥

नाम। अ। कोपे॥ अभ्युपगमे॥ विस्मये॥ स्मरणे॥ सम्भाव्ये। सम्भावनायाम्॥ कुत्सायाम्॥ प्राकाश्ये॥ विकल्पे॥ अलीके॥ इत्येतदर्थे॥ नाशयति नाम्यते वा। णमप्रह्वत्वे। अन्येभ्योपीतिडः॥

नामकरणम्। न। संस्कारविशेषे॥

नाम्नःकरणम् । तच्चनाम शर्म्मवर्म्मा
द्युपपदान्तत्वेनकर्त्तव्यम् । यथा । त
तस्तुनामकुर्वीतपितैवदशमेऽहनि
। देवपूर्व्वं नराख्यंहिशर्मवर्म्मादिसंयु
तम् ॥ शर्म्मेतिब्राह्मणस्योक्तं वर्म्मेति
क्षत्रसंश्रयम् । गुप्तदासात्मकंनामप्र
शस्तं वैश्यशूद्रयोः ॥ नार्थहीनंनचा
शस्तंनापशब्दयुतंतथा । नामाङ्गल्यं
जुगुप्स्यं वानामकुर्य्यात्समाक्षरम् ॥
नातिदीर्घंनातिह्रस्वं नातिगुर्व्वक्षरा
न्वितम् । सुखोच्चार्य्याक्षरंनामकुर्य्या
द्यत्प्रवणाक्षरम् ॥ प्रवणाक्षरंलघूत्त
राक्षरम् । इतिविष्णुपुराणम् ॥ * ॥
अयुग्मकदान्तंतथास्त्रीणा मितिगो-
भिलः । अयुग्मक मयुगक्षरम् । दा
न्तं दकारान्तम् । यथा । यशोदाधन
देत्यादि ॥ * ॥ अत्रमहाभाष्यंयथा
। दशम्यां पुत्रस्य । याज्ञिकाःपठन्ति-
दशम्युत्तरकालं पुत्रस्य जातस्य नाम
विदध्यात् घोषवदाद्यन्तरन्तस्थमव
द्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम् त
द्धिप्रतिष्ठिततमं भवति द्व्यक्षरं चतु
रक्षरंवा नाम कृतं कुर्य्या न्न तद्धित-
मिति । नचान्तरेण व्याकरणं कृत
स्तद्धिता दाशक्यादिज्ञातु मिति ॥ द
शम्या उत्तर इतिपञ्चमीतियोगविभा
गात् समासः । ततःकालशब्देनबहु
व्रीहिः । क्रियाविशेषणंचैतत् । दश
दिनान्याशौचं भवतीतिदशम्युत्तर-
कालमित्युक्तम् । यदपिगृह्यकाराः
पठन्ति दशम्यां पुत्रस्येति तैरपि दश
म्यामितिसामीपिकमधिकरणं व्या-
ख्येयम् । घोषवन्तो ये वर्णाःशिक्षा
यांप्रदर्शितास्तदादि । अन्तरन्तस्थ-
मिति । मध्ये यरलवा यस्यतदित्य
र्थः । त्रिपुरुषानूकमिति । नामकर
णे योधिकारीपितातस्य ये त्रयःपुरु
षास्ताननुकायत्यभिधत्तइतित्रिपुरु
षानूकम् अन्येषामपिदृश्यतइतिदी
र्घइतिकैयटः ॥ तस्य श्रीपूर्व्वकत्वंय
था । देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधि
देवताम् । सिद्धंसिद्धाधिकारांश्चश्री
पूर्व्वंसमुदीरयेत् ॥ स्वर्गकामित्वादि
नासिद्धोऽधिकारोयेषां नराणामि
त्यनेनजीवतां श्रीशब्दादित्वंनाम्नो
न मृतानांतथेतिशिष्टाचारः ॥

नामद्वादशी । स्त्री । व्रतविशेषे ॥

नामधेयम् । न । नामनि ॥ नामैव ।
भागरूपनामभ्योधेयः इतिस्वार्थेधे
यः ॥ नामधेयानाञ्च विधेयार्थपरि
च्छेदकतयार्थवत्त्वम् । तथाहि । उ
द्भिदायजेतपशुकामइत्यत्रोद्भि च्छ
ब्दोयागनामधेयम् । तेनचविधेया
र्थपरिच्छेदःक्रियते ॥

नाम । न । आकाशादिदेशान्ते संज्ञा विशेषे । सत्त्वप्रधाने नामधेये । वाचकशब्दे । अख्यायाम् । आह्वायाम् । पर्य्याये ॥ नम्यते ऽभिधीयते ऽर्थोनेन । मन० । नामन्सीमन्निति निपातितः ॥ यद्वा । नायते । अभ्यस्यते । म्ना० । नामन्नित्यादिना निपातनान्म लोपः ॥ न नामग्रहणं कुर्य्यात्कृपणस्य गुरोस्तथा । भार्य्याया अभिशस्तस्य जनकस्य विशेषतः ॥ आत्मनाम गुरोर्नाम नामातिकृपणस्य च । श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः ॥ न न त्वाख्यातार्थं प्रतिविशेषणीभवतीति व्युत्पत्त्या त्वादिविभक्त्यर्थे शब्दे ॥ यथा । उणाद्यन्तं कृदन्तञ्च तद्धितान्तं समासजम् । शब्दानुकरणञ्चैव नाम पञ्चविधं स्मृतम् ॥ सर्वाण्येतानि नामानि परस्य ब्रह्मणोनघ । सर्वान् कामानवाप्नोति समाराध्य जगद्गुरुम् ॥ तन्मयत्वेन गोविन्दमित्यस्य तद्वान् भ्यनान्यथा । तन्मयो वाञ्छितान् कामान् यद्वाप्नोति मानवः ॥ इति विष्णुधर्म्मवचनम् ॥ चक्रायुधस्य नामानि सदा सर्वत्र कीर्त्तयेत् । नाशौचं कीर्त्तनेतस्य स पवित्रकरो यतः इति पुराणम् ॥ भगवन् सर्वधर्म्मज्ञ सर्वशास्त्रविशारद । कलावधर्म्म बहुले नराणां का गतिर्भवेत् । यद्यस्ति तदुपायोऽपि दयया तं वदस्व मे । इति जन्मेजयप्रश्ने व्यास उवाच । एक एव महाराज तत्रोपायोऽस्ति नापरः । सर्वदोषनिरासार्थं ध्यायेद्देवीपदाम्बुजम् ॥ न सन्त्यघानि तावन्ति यावती शक्तिरस्ति हि । नाम्नि देव्याः पापदाहे तस्माद्भीतिः कुतो नृप ॥ अवशेनापि यन्नाम लीलयोच्चारितं यदि । किं किं ददाति तज्जन्तुं समर्थानत्वरादयः ॥ प्रायश्चित्तन्तु पापानां श्रीदेवीनाम संस्मृतिः । तस्मात्कलिभयाद्राजन् पुण्यक्षेत्रे वसन्नरः ॥ निरन्तरं पराम्बा या नाम संस्मरणं चरेत् । छित्त्वा भित्त्वा च भूतानि हत्वा सर्वमिदं जगत् ॥ देवीं नमति भक्त्या यो न स पापैर्विलिप्यते । रहस्यं सर्वशास्त्राणां मया राजन्नुदीरितम् ॥ विमृश्यैतदशेषेण भज देवीपदाम्बुजम् । अजपां नाम गायत्रीं जपन्ति निखिला जनाः ॥ महिमानं न जानन्ति मायाया वैभवं महत् । गायत्रीं ब्राह्मणाः सर्वे जपन्ति हृदयान्तरे ॥ महिमानं न जानन्ति मायाया वैभवं महत् ॥ एतत् सर्वं समाख्यातं यत् पृष्टन्तु त्वया नृप । युगधर्म्मव्यवस्थायां किं भूयः श्रोतुमिच्छसि ॥ इति श्रीदेवीभागवते महापुराणे ६ स्क

न्थे ११ ध्यायः ॥

नामयज्ञः । पुं । दीक्षितःसोमयाजीत्यादिनाममात्रसम्पादकेऽध्वरे ॥ नाम्ने यज्ञः ॥

नामशेषः । त्रि । मृते ॥ इतिहेमचन्द्रः ॥

नामापराधः । पुं । पाद्मोत्तरखण्डप्रसिद्धे साधुनिन्दादिरूपदुरदृष्टजनकव्यापारविशेषे ॥

नामापराधी । त्रि । नामापराधकृति ॥

नायः । पुं । नये । नीतौ ॥ नयनम् । णीञ्० । श्रिणीभुवोऽनुपसर्गइतिघञ्० ॥ नयति । दुन्योरनुपसर्गइति णो वा ॥

नायकः । त्रि । नेतरि ॥ श्रेष्ठे । प्रधाने ॥ पुं । हारमध्यमणौ ॥ भर्त्तरि ॥ सेनापतौ ॥ शृङ्गारसाधके ॥ नयति । णीञ्० । ण्वुल् ॥

नायकाधिपः । पुं । नरेन्द्रे । राजनि ॥

नायिका । स्त्री । दुर्गायाउग्रचण्डाद्यष्टशक्तिषु ॥ शृङ्गाररसालम्बनविभावरूपायांनार्याम् ॥ कस्तूरीविशेषे ॥ यथा । चूर्णाकृतिस्तुखरिका तिलकातिलाभा कोलत्थबीजसदृशीचकुलत्थिकाख्या । स्थूलाततःकियदियं-किलपिण्डिकास्यात् तस्याश्चकिञ्चिदधिकापिचनायिकैषा ॥ इतिराजनि

घण्टः ॥

नारः । पुं । तर्णके ॥ नीरे । जले ॥ न । नराणां समूहे ॥ त्रि । परमात्मसम्बन्धिनि ॥ नरसम्बन्धिनि ॥ नरात्समूहेऽण् ॥ नरस्यायम् । तस्येदमित्यण् ॥ मलमूत्रपुरीषास्थिनिर्गतंह्यशुचिस्मृतम् । नारंस्पृष्ट्वातुसस्नेहंसचेलोजलमाविशेदितिस्मृतिः ॥

नारकः । पुं । नरके ॥ नरति न्यणाति वा । नॄ० । कृञादित्वात्वुन् । ततः प्रज्ञाद्यण् ॥ त्रि । नरकस्थे ॥ नरकेभवः । तत्रभवइत्यण् ॥

नारकी । त्रि । नरकस्थे ॥ यथा । परेणाविहितंकर्म स्वकर्मेतिवदेच्चयः । स उच्यतेब्रह्मघाती महानारकिनारकी ॥ इतिवृहद्धर्मपुराणम् ॥

नारकीटः । पुं । अश्मकीटे । कुक्कुरकीटे । ढग्गोइतिभाषा ॥ त्रि । स्वदत्ताशाविहन्तरि ॥ इतिमेदिनी ॥

नारङ्गः । पुं । पिप्पलीरसे । कणारसे ॥ यमजप्राणिनि ॥ विटे ॥ नारङ्गीतिख्याते । नागरङ्गे ॥ नारङ्गं मधुराम्लंस्याद्रोचनंवातनाशनम् । अपरन्त्वम्लमत्युष्णंदुर्जरंवातहृत्सरम् ॥ * ॥ क्षुद्बोधकवस्त्वन्तरे ॥ यथा । नारङ्गकेसरमपाकृतबीजपूरं योऽश्नाति खण्डमरिचोद्भवचूर्णमिश्रम् । अन्नं गले

विंशतितस्य नरस्य तूर्णं संकृष्यमाण इवराहुग्रहेण चन्द्रः ॥ नारङ्गन्तु परं रुच्यं सुगन्धमतिचारुणम् । वातघ्नं कफलं किञ्चित् पित्तघ्नं विशदं स्मृतमिति ॥ न । गर्जरे ॥

नारङ्गक्षीरिणी । स्त्री । क्षीरिकाप्रभेदे ॥ छिन्नानारङ्गमज्जांबे पचेत् सर्पिषि तापिते । तच खण्डं विनिःक्षिप्य पक्वं मत्वावतारयेत् ॥ शीतभूते विनिःक्षिप्य मात्रयार्द्धं श्रितं पयः । नारङ्गक्षीरिणी चैषा सुगन्धिसुरभीकृता ॥ विष्टम्भिनो हरेद्वातं पित्तञ्च गुरुपाचिका ॥

नारङ्गवर्णकम् । न । गाजरे । गृञ्जने ॥

नारदः । पुं । देवर्षिप्रवरे । देवर्षीणां मध्येभगवतो विभूतौ ॥ नरस्य धर्म्यम् । नराच्चेतिवक्तव्यमित्यञ् । नारं ददाति । आतोनुपेति कः ॥ नारं पानीयमित्युक्तं तत् पितृभ्यः सदा भवान् । ददाति तेन ते नाम नारदेति भविष्यति इत्यागमः ॥ नारं नरसमूहं द्यति कलहेनेतिवा । नुरिदं नारम् ज्ञानम् । तत् द्यति ज्ञानोपदेशेनेतिवा । दोअवखण्डने । कः ॥ नराणां परमात्मसम्बन्धिनां परमात्मविषयकं ज्ञानं ददाति उपदिशतीति वा ॥ न । पञ्चविंशति सहस्रश्लोकात्मके महापुराणविशेषे ॥

नारदीयम् । न । उपपुराणविशेषे ॥ त्रि । नारदसम्बन्धिनि ॥

नारसिंहम् । न । उपपुराणविशेषे ॥ त्रि । नृसिंहसम्बन्धिनि ॥

नारसिंहवपुः । पुं । विष्णौ ॥ नरस्य सिंहस्य चावयवा यस्मिन् वपुषि लक्ष्यन्ते तद्वपुर्यस्य सः । नरश्च सिंहश्च नरसिंहौ तयोरवयवाः अवयवेच प्राग्दीषधिवृक्षेभ्य इत्यण् । नारसिंहा नरसिंहयोरवयवा अस्मिन् सन्तीत्यणन्तात् नारसिंहशब्दान्मत्वर्थीयोऽर्श आद्यच् । तथाच नारसिंहः नरसिंहावयववत् वपुर्यस्य सतथा ॥

नारा । स्त्री । जले । नीरे ॥ इतिशब्द० ॥

नाराचः । पुं । सर्वलोहमयेवाणे । प्रक्ष्वेडने ॥ नरान् आचामति । चमु० । अन्ये०डः । ततः प्रज्ञाद्यण् ॥ यद्वा । नराणां समूहो नारम् । नारमाचामति । डः ॥ अम्बुहस्तिनि ॥ दुर्द्दिने ॥ * ॥ धृतिच्छन्दःप्रभेदे । इह ननरचतुष्कहष्टन्तु नाराचमाचक्षते । यथा । दिनकरतनयातटीकानने चारुसञ्चारिणी श्रवणनिकटकृष्टमेणेक्षणा कृष्णराधात्वयि । ननु-विकिरतिनेत्रनाराचमेषाति हृच्छेदनं तदिह मदनविभ्रमोद्भ्रान्तचित्ता

मवत्त्वं द्रुतम् ॥

नाराचिका । स्त्री । नाराच्याम् ॥

नाराची । स्त्री । एषणिकायाम् । स्वर्णकारादीनां लौहतुलाविशेषे । कांटा इति नारजा इति च भाषा ॥ गौरादित्वात् ङीष् ॥ स्वल्पो नाराचो वाणभेदो नाराचीति कश्चित् ॥

नारायणः । पुं । अच्युते । भगवति । वासुदेवे ॥ निरुक्तिर्यथा । आपो नारा इति प्रोक्ता आपो वै नरसूनवः । ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥ इति मनुः ॥ यच्च किञ्चिज्जगत् सर्वं दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः ॥ इति मन्त्रवर्णः । नारायणाय नम इत्ययमेव सत्यं संसारघोरविषसंहरणाय मन्त्रम् । शृण्वन्तु भव्यमतयो यतयोऽस्तरागा उच्चैस्तरामुपदिशाम्यहमूर्द्धबाहुरिति नृसिंहपुराणम् ॥ शाब्दिकनिरुक्तिस्तु नाराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः । तान्येव चायनं तस्य तेन नारायणः स्मृतः ॥ नराणां समूहो नारम् । तस्य समूह इत्यण् । तदयनमस्य । पूर्वपदादिति णत्वम् ॥ यद्वा । नराज्जाताः नाराः आपः । ता अयनं यस्य ॥ क्वचिन्मन्वन्तरे नरस्य धर्मस्य पुत्रत्वमुपगत इति । नरस्यापत्यम् । नडादिभ्यः फक् इति नारायणः ॥ श्रीकृष्णे ॥ नारायणस्त्वं न हि सर्वदेहिनामात्मास्यधीशोखिललोकसाक्षी । नारायणोऽङ्गं नरभूजलायनात् तच्चापि सत्यं न तवैव माया ॥ श्रीकृष्णस्य सेनाविशेषे ॥ धर्मपुत्रर्षिविशेषे ॥ सन्न्यासिनि । परिव्राजके ॥ दण्डग्रहणमात्रेण नरो नारायणो भवेदिति स्मृतेः ॥

नारायणक्षेत्रम् । न । गङ्गाप्रवाहावधिहस्तचतुष्टयमिते नारायणस्वामिके स्थाने ॥ यथा । प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयम् । अत्र नारायणः स्वामी नान्यः स्वामी कदाचनेति ॥

नारायणतैलम् । न । औषधपक्वतैलविशेषे ॥ तत् त्रिविधम् । स्वल्पं बृहन्महच्चेति भेदात् ॥ यथा । बिल्वाग्निमन्थश्योनाकपाटलापारिभद्रकाः । प्रसारण्यश्वगन्धा च बृहती कण्टकारिका ॥ बला चातिबला चैव श्वदंष्ट्रा सपुनर्नवा । एषां दशपलान् भागान् चतुर्द्रोणेऽम्भसः पचेत् ॥ पादशेषं परिस्राव्य तैलपात्रं प्रदापयेत् । शतपुष्पा देवदारु मांसी शैलेयकं वचा ॥ चन्दनं तगरं कुष्ठं एलापर्णी चतुष्टयम् । रास्ना तुरगगन्धा च सैन्धवं सपुनर्नवम् ॥ एषां द्विपलिकान् भागान्

पेषयित्वाविनि: क्षिपेत् । शतावरी
रसञ्चैव तैलतुल्यं प्रदापयेत् ॥ आ
जंवायद्विशागव्यक्षीरंदत्त्वा चतुर्गुण
म् । * । पाने वस्तौतथाभ्यङ्गेभोज्ये
चैवप्रशस्यते ॥ अश्वोवावातसम्भग्नो
गजोवाथद्विवानर: । पङ्गुल: पीठस
र्पीचतैलेनानेनसिध्यति ॥ अधोभा
गेचयेवाता: शिरोमध्यगताश्चये ।
दन्तशूलेहनुस्तम्भेमन्यास्तम्भेगलग्र-
हे ॥ यस्यशुष्यति चैकाङ्गंगतिर्यस्यच
विह्वला । क्षीणेन्द्रियानष्टशुक्राज्ज्वर
क्षीणाश्चयेनरा: ॥ वधिरालल्लजिह्वा
श्च मन्दमेधसएवच । अल्पप्रजाचया
नारीयाच गर्भंनविन्दति ॥ वातार्त्तौ
वृषणौयेषामन्त्रवृद्धिश्चदारुणा । एत
त् तैलवरंतेषांनाम्नानारायणंस्मृत
मितिस्वल्पनारायणतैलम् ॥ * ॥ श
तावरीचांशुमतीपृश्निपर्णीशटीवला
। एरण्डस्यचमूलानि वृहत्यो: पूति
कस्यच ॥ गवेधुकस्य मूलानितथास
हचरस्यच । एषांदशपलान् भागा
न् जलद्रोणे विपाचयेत् ॥ पादशेषं
रसे पूते गर्भं चैनं समावपेत् । पुनर्न
वावचादारुशताङ्काचन्दनागुरु ॥ शै
लेयंतगरं कुष्ठमेलामांसी स्थिराव-
ला । अश्वाह्वासैन्धवंरास्नापलार्द्धानि
चपेषयेत् ॥ गव्याजपयस: प्रस्थौद्वौ

द्वावत्र प्रदापयेत् । शतावरीरसप्र-
स्थं तैलप्रस्थंविपाचयेत् ॥ * ॥ अस्य
तैलस्य सिद्धस्य शृणुवीर्यमत: परम्
। अश्वानांवातभग्नानां कुञ्जराणांत
थान्नृणाम् ॥ तैलमेतत् प्रयोक्तव्यं
सर्ववातनिवारणम् । आयुष्मांश्च न
र: पीत्वानिश्चयेन दृढोभवेत् ॥ ग
र्भमश्वतरीविन्द्यात् किम्पुनर्मानुषी
तथा । हृच्छूलंपार्श्वशूलञ्च तथैवा
र्द्धावभेदकम् ॥ अपचींगण्डमालाञ्च
वातरक्तं हनुग्रहम् । कामलां पाण्डु
रोगञ्चअश्मरीञ्चापिनाशयेत् ॥ तै
लमेतद्भगवता विष्णुनापरिकीर्त्ति
तम् । नारायणमितिख्यातंवातान्त
करणंशुभमितिवृहन्नारायणतैलम्
॥ * ॥ विल्वाश्वगन्धावृहतीश्वदंष्ट्राश्यो
नाकवाट्यालकपारिभद्रम् । क्षुद्राक
ठिल्लातिवलाग्निमन्थं मूलानिचैषां
सरलायुतानाम् ॥ मूलंविदध्यादथपा
टलीनां प्रत्येकमेषां प्रवदन्तितज्
ज्ञा: ॥ सपादप्रस्थं विधिनोद्धृताश्चद्रो
णे रपामष्टभिरेवपक्वा ॥ पादावशे-
षेणरसेनतेन तैलाढकाभ्यां सममे
वदुग्धम् । छागस्यमांसद्रवमेव तुल्य
मेकत्रसम्यक्विपचेत् सुबुद्धि: ॥ दद्या
द्रसञ्चैवशतावरीणां तैलेन तुल्यं पु
नरेवतत्र । रास्नाश्वगन्धाद्रुमदारुका

ष्टं पर्णीचतुष्कागुरुकेशराणि ॥ सिन्धूत्थमांसीरजनीद्वयञ्च शैलेयकं चन्दनपुष्कराणि । एलासयष्टीतगराब्दपद्मम् भृङ्गाह्वगोस्तुवचापलाशम् ॥ स्थौणेयवृश्चीरकचोरकाख्यमेभिः-समस्तैर्द्विपलप्रमाणैः । कर्पूरकाश्मीरमृगाण्डजानां दद्यात् सुगन्धाय च दक्षिकेचित् ॥ प्रस्वेददौर्गन्ध्यनिवारणार्थं चूर्णीकृतानां द्विपलप्रमाणम् । आलोड्यसम्यग्विधिवद्विपक्वं नारायणं नाम महच्चतैलम् ॥ * ॥ सर्वैःप्रकारैर्विधिवत् प्रयोज्यमश्वस्य पुंसां पवनार्दितानाम् । ये पङ्गवः पीठविसर्पणाश्च एकाङ्गहीनार्दितवेपमानाः । बाधिर्यशुक्रक्षयपीडिताश्च मन्याहनुस्तम्भशिरोगदार्त्ताः । मुक्तानरास्ते बलवीर्ययुक्ताः संसेव्यतैलं सहलाभवन्ति ॥ वन्ध्याचनारीलभतेच पुत्रंवीरोपमं सर्वगुणोपपन्नम् । शाखाश्रितेकोष्ठगतेचवाते वृद्धौविधेयं पवनार्दितानाम् ॥ जिह्वानिलेदन्तगतेचशूले औन्मादकौब्जज्वरकर्षितानाम् । प्राप्नोति लक्ष्मीं प्रमदाप्रियत्वंजीवेच्चिरंचापिभवेद्युवेव ॥ देवासुरेयुद्धवरे समीक्ष्यसाध्वश्विभग्नानसुरैःसुरांश्च । नारायणेना पिस्वयं हयार्थं स्वनामतैलं विहितन्तु तेषाम् ॥ इति सुखबोधे महानारायणतैलम् ॥

नारायणप्रियः । पुं । शिवे ॥

नारायणबलिः । पुं । मृतपतितादीनां प्रायश्चित्तात्मके कर्मविशेषे ॥

नारायणस्थानम् । न । तीर्थविशेषे ॥

नारायणाश्रमः । पुं । बदर्याश्रमे ॥

नारायणाख्यम् । न । विष्णोरस्त्रभेदे ॥

नारायणी । स्त्री । लक्ष्म्याम् । श्रियि ॥ उमायाम् । पार्वत्याम् । दुर्गायाम् ॥ नारायणाज्जाता । नारायणस्य विष्णोःशक्तिः ॥ यद्वा । नारस्य जीवराशेरयनी स्थानभूता ततस्वरूपेत्यर्थः ॥ नरायना नराधारा समुद्रशयनाऽपिया । नारायणीसमाख्याता नरनारीप्रवर्त्तिका ॥ वसत्यट्टहासवैष्णभूतेष्वर्न्हितायतः । देव्या व्याप्तमिदंसर्वंजगत्स्थावरजङ्गममिति देवीपुराणम् ॥ गङ्गायाम् ॥ मुद्गलमुनेःपत्न्याम् ॥ शतावर्य्याम् । अभीरौ ॥

नारिकेरः । पुं । नालिकेरे ॥ रलयोरभेदः ॥

नारिकेलः । पुं । नालिकेरे ॥ नलति नल्यते वा । वालगन्धे । वाहुलकादिण् । केनवायुना इलति चलति । इलगतौ । अच् । नालिश्चासौकेलश्च

। रलयोरभेदः ॥

नारिकेलचीरी । स्त्री । चीरिकाप्रभेदे ॥ यथा । नारिकेलं तनूकृत्य-च्छिन्नं पयसि गोः क्षिपेत् । सिताग व्याज्यसंयुक्तं तत्पचेन्मृदुनाग्निना ॥ नारिकेलोद्भवा चीरी स्निग्धा शीता ऽतिपुष्टिदा । गुर्वी सुमधुरा वृष्या रक्तपित्तानिलापहेतिभावप्रकाशः ॥

नारिकेलिः । पुं । स्त्री । } शिरःफले ।
नारिकेली । स्त्री । } सदापुष्पे । सदाफले ॥

नारी । स्त्री । स्त्रियाम् । योषिति । प्रतीपदर्शिन्याम् ॥ नृनरयोर्वृद्धिश्चेति शार्ङ्गरवादिगणपाठात् ङीन् जातिलक्षणङीषो ऽपवादो ङीन् तत्सन्नियोगेनवृद्धिश्च ॥ यद्वा । नुर्नरस्यवा धर्म्या । ऋतो ऽञिति नराच्चेतिवार्त्तिकाच्चाञ् । ङीन् ॥ अस्याश्चतस्रोजातयो भवन्ति । तथाहि । पद्मिनीचित्रिणीचैवशङ्खिनीहस्तिनीतथा । चतस्रोजातयोनार्यारतौज्ञेयाविशेषतइतिरतिमञ्जरी ॥ मध्याख्यच्छन्दोभेदे । सोमरी ॥ यथा । गोपानां नारीभिः । श्लिष्टोव्यात् कृष्णोवः ॥ विलधुनि [॥।] ॥

नारीकवचः । पुं । सूर्यवंशीयमूलकराजे । अश्मकपुत्रे ॥ यो ऽसौनिःचत्रे च्मातले ऽस्मिन्क्रियमाणे विवस्त्राभिःस्त्रीभिःपरिवार्यरक्षितः । ततस्तं नारीकवचमुदाहरन्तीतिविष्णुपुराणे ४ अंशे ४ अध्यायः ॥

नारीकेलः । पुं । नारिकेरे ॥ इतिशब्दचन्द्रिका ॥

नारीकेली । स्त्री । नारिकेले ॥ नारिकेलजमद्ये ॥

नारीचम् । न । नालिता इतिगौडभाषाप्रसिद्धशाकविशेषे ॥ तत्ते शुभाज्ये वहुजीरकान्विते सुस्वेदितं नारिचसंज्ञशाकम् । ससैन्धवं तक्रविलोड्य पाचितं सम्प्रापितं प्राकृतभाग्यकेन ॥ रुच्यं वातहरं वल्यं कफकृद्रोगनाशनम् । रूक्षं पित्तहरं किञ्चिच्छाकंनारीचसंज्ञकम् ॥

नारीतरङ्गः । पुं । }
नारीतरङ्गकः । पुं । } षिङ्गे । कामुके ॥

नारीदुग्धम् । न । स्त्रियाःचीरे ॥ नार्या लघु पयः शीतं दीपनं वातपित्तजित् । चक्षुःशूलाभिघातघ्नं नस्याश्चोतनयोर्वरम् ॥

नारीदूषणम् । न । स्त्रीणांदोषोत्पादके ॥ यथा । पानंदुर्जनसंसर्गःपत्त्या चविरहो ऽटनम् । स्वप्नोन्यगेहवासश्चनारीणांदूषणानिषट् ॥

नारीष्टा । स्त्री । मल्लिकायाम् ॥

नार्य्यङ्गः । पुं । नागरङ्गे ॥ न । नार्य्या अङ्गे ॥

नालम् । न । काण्डे । नालायाम् । उत्पलादिदण्डे ॥ मृणाले ॥ नलति । गलबन्धे । ज्वलितीतिणः ॥

नालः । पुं । नले । जलनिर्गमे ॥ यतः । प्रणालः ॥ काण्डे ॥ पद्मादिवृन्दे ॥ नलत्यनेन नालयति वा । नलगन्धे । हलश्चेतिघञ्ज्ञा ॥

नालवंशः । पुं । नले ॥

नाला । स्त्री । नाले । अब्जादिदण्डे ॥ नलति । णल० । ज्वलितिकसन्तेभ्योणः ॥

नालिः । स्त्री । नाड्याम् । शिरायाम् ॥ पद्मादिदण्डे । शाकविशेषे ॥

नालिकः । पुं । महिषे ॥ न । पद्मे ॥

नालिका । स्त्री । नालिताभेदे । श्वेतकलंब्याम् ॥ पद्मादिनाले ॥ चर्मकषायाम् ॥ हस्तिनः कर्णबेधन्यास्म् ॥ नाले ॥ काले ॥ चुल्लिरंध्रे ॥ विवरे ॥ वेणुभाजने ॥ नाड्याम् ॥

नालिकेरः । पुं । नारिकेले । नारियर इतिभाषा प्रसिद्धे ॥ नालिकेरफलं शीतं दूर्ज्जरं वस्तिशोधनम् । विष्टम्भि बृंहणं बल्यं वातपित्तास्रदाहनुत् ॥ विशेषतः कोमलनालिकेरं निहन्ति पित्तज्वरपित्तदोषान् । तद्देवजीर्णं गुरुपित्तकारिविदाहि विष्टम्भिमतं भिषग्भिः ॥ तस्याम्भः शीतलंहृद्यं दीपनं शुक्रलंलघु । पिपासापित्तजित् स्वादुवस्तिशुद्धिकरं परम् ॥ * ॥ नालिकेरस्य तालस्य खर्जूरस्यशिरांसितु । कषायस्निग्धमधुरबृंहणानिगुरूणिच ॥ * ॥ प्रथमवयसिदत्तं तोयमल्पं पिबन्तः शिरसि निहितभारा नालिकेरा नराणाम् । सलिलममृतकल्पं दद्युराजीवनान्तं नहि कृतमुपकारं साधवो विस्मरन्ति ॥ अस्यपाको यथा । कुडवं नालिकेरस्यसूक्ष्मं दृषदिपेषितम् । शुद्धखण्डस्य कुडवं गव्यक्षीरे चतुर्गुणे ॥ आलोड्य नालिकेरस्यजलेमृदग्निनापचेत् । धान्यकं पिप्पलीशुण्ठीचातुर्जातंसुचूर्णितम् ॥ शाणप्रमाणंप्रत्येकं शीतीभूतेक्षिपेद्बुधः । नालिकेरखण्डोयंपुंस्त्वनिद्राबलप्रदः ॥ अम्लपित्तं क्षयंकासंशूलंचपरिणामजम् । नाशयेद्रक्तपित्तञ्चशुष्कंदावानलो यथा ॥ अत्रघृतपलेनकुष्माण्डवन्नालिकेरस्य भर्जनंविधेयमिति ॥ बालस्य नालिकेरस्यजलं प्रायोविरेचनमितिवल्लभः ॥ नलति नल्यते वा । णल० । बाहुलकात्इण् । केन वायुना ईर्य्यते । ईर० । घञ् । नालिश्चासौ

केरश्च ॥

नालिकेरकः । पुं । नालिकेरे ॥

नालिकेरचीरिका । स्त्री । नारिकेलचीर्याम् ॥

नालिता । स्त्री । पट्टशाके । नालीचे ॥

नाली । स्त्री । शाककडम्बे । डगल इतिभाषा ॥ स्वतःप्रसिद्धेशाकविशेषे ॥ नालेन रहिता नाली सुस्विन्ना मुष्टिपीडिता । घृते तप्ते परिचिप्ता चिञ्चिणीपत्रसंयुता ॥ नाली सरा लघुः शीता पित्तनुत् कफवातला । ब्रह्मलोककरी ज्ञेया लिप्ता शोथघ्निका मता ॥ हस्तिकर्णवेधन्याम् ॥ घट्याम् ॥ पद्मे ॥ पद्मदण्डे ॥ प्रणाल्याम् ॥ वाद्यविशेषे ॥ नलति अनया वा । णल० । हलश्चेतिघञ् ॥ नालयति वा । पचाद्यच् । गौरादित्वान् ङीष् ॥

नालीकः । पुं । अङ्गे ॥ शरे ॥ शल्ये ॥ मुखमात्रायःसंयुक्तेशरे ॥ न । अब्जषण्डे ॥

नालीकिनी । स्त्री । पद्मसमूहे । पद्मिन्याम् ॥ नालीकानि सन्त्यास्याम् । पुष्करादित्त्वादिनिः ॥

नालीघटी । स्त्री । दण्डबोधिवाद्यभेदे ॥

नालीव्रणः । पुं । नाडीव्रणे ॥

नावनम् । न । नस्ये । नासाग्राह्यौषधे ॥

नावयज्ञिकः । पुं । कालविशेषे ॥ नवयज्ञोऽस्मिन् वर्त्तते । तदस्मिन्वर्त्ततइत्युपसङ्ख्यानाट्ठञ् ॥

नाविकः । पुं । कर्णधारे । नौपृष्ठदण्डधारके ॥ नावा तरति । नौद्व्यचष्ठन्निति ठन् ॥ नौरस्त्यस्य । व्रीह्यादित्वाट्ठन् ॥

नावी । त्रि । नौमति ॥ नौरस्त्यस्य । व्रीह्यादित्वादिनिः ॥

नाव्यम् । त्रि । नौतार्य्यदेशे ॥ न । नौतरणयोग्यजले ॥ नावा तार्यम् । नौवयोधर्मेत्यादिनायत् । वान्तोयी-त्यवादेशः ॥

नाशः । पुं । पलायने ॥ निधने ॥ अनुपलम्भे । अदर्शने ॥ परिध्वस्तौ ॥ नशनम् । णश० । घञ् ॥ कुलनाशकारणंयथा । अनृतात् पारदार्याच्च तथाऽभक्ष्यस्य भक्षणात् । अश्रौतधर्माचरणात् चिप्रं नश्यति वैकुलम् ॥ अश्रोत्रियेवेददानात् वृषलेषु तथैवच । विहिताचारहीनेषु चिप्रंनश्यति वैकुलम् ॥ इतिकूर्मपुराणम् ॥ यावच्चवेदधर्माः स्युर्यावत् स्याच्छङ्कराचनम् । यावत्स्याच्छुचिक्व्यक्त तावन्नाशोभवेन्नहि ॥

नाशनः । त्रि । नाशकर्त्तरि ॥ नाशय

ति । णश० । ल्युः ॥

नाशी । त्रि । नाशविशिष्टे ॥

नासत्यौ । पुं । अश्विनीकुमारयोः ॥ न सत्यं ययोः स्तौ वसत्यौ । न असत्यौ । नभ्राण्नपान्नवेदेति नञः प्रकृतिभावः ॥ * ॥ संज्ञा च सूर्यस्य स्त्री उत्तरकुरौ धृताश्वरूपा तपश्चन्त्यासीत्-सूर्योपितत्सङ्गमेच्छुस्तुरङ्गरूपी समीपमगात् । स च तयान्यपुरुषधिया निरस्तः सन् तन्नासापुटे रेतोऽभ्यषिञ्चत् । तत्रतौ जातावित्युपाऽऽख्यायते । नासांत्यक्तवन्तौ नासत्यौ । अन्येभ्योपीति डः । ङ्यापोरिति ह्रस्वत्वमिति वा ॥

नासा । स्त्री । नासिकायाम् ॥ नास्यते । णासृ शब्दे । गुरोश्चेत्यः ॥ नासतेऽनया वा । अच् । हलश्चेति घञ् वा ॥ अस्याः शुभाशुभलक्षणं यथा । शुकनासः सुखी स्याच्च शुष्कनासेति जीवनम् । छिन्नाग्ररूपनासः स्यादगम्यागमनेरतः ॥ दीर्घनासे च सौभाग्यं चौरस्याकुञ्चितेन्द्रियः । स्त्रीमृत्युश्चिपिटनास ऋजुर्भाग्यवतां भवेत् ॥ अल्पच्छिद्रा सुपुटा च अवक्रा च नृपेश्वरे । क्रूरेद् । च वक्रास्या इनिलांच तुतंस कृत इति गरुडपुराणम् ॥ द्वारोर्द्धस्थितदारुणि । स्तम्भदारस्थकाष्ठे । उपरिभित्तिधारककाष्ठे ॥ वासकवृक्षे ॥

नासाछिन्नी । स्त्री । पूर्णिकापक्षिणि ॥

नासादारु । न । द्वारोर्द्धस्थितकाष्ठे । जानुकाठ इति कपालि इति च गौडभाषा ॥

नासायोनिः । पुं । सौगन्धिकाख्यक्लीबे ॥

नासालुः । पुं । कट्फलवृक्षे ॥

नासासंवेदनः । पुं । काण्डीरलतायाम् ॥

नासास्रावः । पुं । पीनसे ॥

नासिकन्धमः । त्रि । नासिकां शब्दायमानां यः करोति तत्र ॥ नासिकया शब्दकर्त्तरि ॥ नासिकां धमति । नासिकास्तनयोर्ध्माधेटोरिति खश् । मुम् । खित्यनव्ययस्येति ह्रस्वः ॥

नासिकन्धयः । त्रि । नासिकया पानकर्त्तरि ॥ नासिकां धयति । धेट् पाने । नासिकास्तनयोरिति खश् । मुम् । ह्रस्वः ॥

नासिका । स्त्री । नासायाम् । गन्धवहायाम् । घ्राणेन्द्रिये । नांक इति भाषा ॥ नासते । णासृ० । ण्वुल् ॥

नासिकामलम् । न । नासास्थितमले । शिङ्घाणे । सिणक इति रैंट इति च भाषा ॥

नासिकाशब्दः । पुं । घोत्कारे । घराडू इति भाषा ॥ यथा । शयानं रावणं दृष्ट्वा तल्पे मद्यति वानरः । नासा

यूथैस्तु घोरकारैर्विप्रद्विषैर्वायुसेवकै रितिनारसिंहपुराणे ४५ अध्यायः॥

नासिक्यम्। न। नासिकायाम्॥ त्रि। नासायांभवे॥ शरीरावयवाद्यत्॥

नासिक्यौ। पुं। अश्विनीकुमारयोः॥

नासिक्यकम्। न। नासिकायाम्॥

नासीरम्। न। नायकाग्यके। नायकस्याग्रेसारिकायां सेनायाम्॥ सेनामुखे॥ पुं। अग्रेसरे॥

नास्ति। अ। अस्तित्वाभाववति। अविद्यमानतायाम्। नहिं इति भाषा॥ यथा। अतिथिर्बालकश्चैव राजा भार्यातथैवच। अस्तिनास्तिनजानन्ति-देहिदेहि पुनःपुनः॥ इतिचाणक्यम्॥

नास्तिकः। पुं। ईश्वरनास्तित्ववादिनि पाषण्डे। वेदाप्रामाण्यवादिनि। नास्तिपरलोक इतिमतिविशिष्टे। लौकायतिके। वार्हस्पत्ये॥ सचषड्विधः। माध्यमिकः योगाचारः सौत्रान्तिकः वैभाषिकः चार्वाकः दिगम्बरश्चेति भेदात्॥ नास्ति परलोकः इतिमतिरस्य। अस्तिनास्तिदिष्टं मतिरिति नास्तीतिनिपातात् वचनसामर्थ्यान्नास्तीतिनिपाताख्यातसमुदायाद्वा ठक्॥ यद्वा। नास्ति यज्ञफलम् नास्तिच परलोकः इत्येवंकायति। कैशब्दे। डः॥

नास्तिकता। स्त्री। मिथ्यादृष्ट्याम्। परलोकस्तथावुद्धौ। कर्मफलापवादकज्ञाने॥ नास्तिकस्य भावः। तल्॥

नास्तिकवृत्तिः। त्रि। नास्तिपरलोक इति प्रवर्त्तके॥

नास्तिक्यम्। न। शास्त्रीय फलवत्कर्मसु फलाभाववुद्धौ॥ नास्तिकस्य कर्म भावोवा। पुरोहितादित्वात् यक्॥

नास्तिदः। पुं। आम्रवृक्षे॥ इतिशब्दचन्द्रिका॥

नास्यम्। त्रि। वलीवर्द्दादिनासासम्बन्धिन्यां रज्जौ। नाँथइति भाषा॥ नासायां भवम्। शरीरावयवाद्यत्॥

नाहः। पुं। वन्धने॥ कूटे॥

नाहलः। पुं। म्लेच्छजात्यन्तरे॥ इति हेमचन्द्रः॥

नाहुषिः। पुं। ययातिभूपतौ॥ नहुषस्य अपत्यम्। अतइञ्॥

नि। अ। निवेशे॥ भृशार्थे॥ नित्यार्थे॥ संशये॥ क्षेपे॥ कौशले॥ उपरमे॥ सामीप्ये॥ आश्रये॥ दाने॥ मोक्षे॥ अन्तर्भावे॥ वन्धने॥ राशौ॥ अधोभावे॥ विन्यासे॥ निश्चये॥ निषेधेपीति दुर्गादासः॥

निःक्षत्रः। त्रि। क्षत्रिय शून्यदेशादै॥

निःशङ्कः। त्रि। निर्भीके॥

निःशब्दः । त्रि । शब्दरहिते । चुप् इतिभाषा ॥

निःशलाकः । त्रि । निर्जने । रहसि ॥ निर्गता शलाका यस्मात् ॥ शलाका या निर्गतोवा ॥

निःशल्या । स्त्री । दन्तीवृक्षे ॥

निःशूकः । पुं । मुण्डशालौ ॥

निःशेषः । त्रि । निखिले । समस्ते ॥ निःक्रान्तं शेषात् । निरादय इतिसमासः ॥

निःशोकः । त्रि । शोकवर्जिते ॥

निःशोध्यः । त्रि । निर्मले । मृष्टे । शोधिते ॥ अनवस्करे ॥ निष्क्रान्तं शोध्यमस्मात् ॥ शोध्यान्निष्क्रान्तमितिवा ॥

निःश्रयणी । स्त्री ।
निःश्रयिणी । स्त्री । ॥ अधिरोहिण्याम् ॥ इतिशब्दरत्नावली ॥

निःश्रेणिः । स्त्री । वंशकाष्ठादिनिर्मिते सोपाने । अधिरोहिण्याम् । नसेनी इतिसीढी इतिचभाषा ॥ निश्चिता श्रेणिः पङ्क्तिरत्र ॥ खर्जूरीपादपे ॥

निःश्रेणिका । स्त्री । निश्रेणी इतिकोङ्कणप्रसिद्धे तृणवि० । निरसायाम् । वनवल्लर्याम् ॥ निःश्रेण्याम् । अधिरोहिण्याम् ॥ यथा । मानुष्यं दुर्लभं प्राप्य सेविता न महेश्वरी । निःश्रेणिकाग्रात् पतित अधरस्त्वेन विद्म हे ॥ अपिच । आसाद्यजन्म मनुजेषु चिराद्दुरापं तत्रापिपाटवमवाप्यनिजेन्द्रियाणाम् । नाभ्यर्चयन्तिजगतां जनयित्रि ये त्वां निश्रेणिकाग्रमधिरुह्यपुनः पतन्तीति देवीभागवतम् ॥

निःश्रेणी । स्त्री । अधिरोहिण्याम् ॥

निःश्रेयसम् । न । कल्याणे ॥ मोक्षे ॥ विद्यायाम् ॥ अनुभावे ॥ भक्तौ ॥ पुं । शङ्करे । शिवे ॥ निश्चितं नितरां वाश्रेयः निःश्रेयसम् । अचतुरविचतुरेत्यादिनानिपातितम् ॥

निःश्रेयसकरः । पुं । ज्ञानोत्पत्तिहेतुत्वेन मोक्षोपयोगिनि कर्मयोगे । सन्न्यासे ॥ निःश्रेयसं करोति । डुकृञ्० । कृञोहेतुताच्छील्यानुलोम्येष्विति हेत्वर्थेटः ॥

निःश्रेयसकरी । स्त्री । विद्यायाम् ॥ टित्वान्ङीप्

निःश्वासः । पुं । मुखाद्बहिर्निर्गमनशालिनि वायौ ॥ निर्गतः श्वासः ॥ निःश्वसनं वा । श्वस० । घञ् ॥

निःषन्धिः । त्रि । दृढे ॥ सुषा० षत्वम् ॥

निःषमम् । अ । गर्ह्ये । निन्द्यमाचे ॥ निर्गतं समम्च । तिष्ठद्गुप्रभृतीनिचेत्यव्ययीभावत्वम् । सुविनिर्दुर्भ्य इतिषत्वम् ॥

निःसङ्गः । पुं । देहादिसङ्गरहिते पर

मात्मनि ॥ निःसङ्गस्य ससङ्गेन कूटस्थस्य विकारिणा । आत्मनोऽनात्मनायेगो वास्तवो नोपपद्यते ॥ स्वतोवुद्धं स्वतःशुद्धं स्वतोमुक्तं निरात्मिका । अविचारितसंसिद्धि रविद्या लिङ्गते कथम् ॥ त्रि । सविकल्पकानन्दानासक्ते । निरपेक्षे ॥ फलानभिनिवेशवति ॥ मेखलरहिते ॥ यथा । मत्स्यस्य सङ्गा दृभवच्च योमे सुतादिरागो मुषितोऽस्मि तेन । निःसङ्गता मुक्तिपदं यतीनांसङ्गादृशेषाः प्रभवन्ति दोषाइति ॥ निःसङ्गएव मुक्तःस्या द्दोषाः सर्वेपि सङ्गजाः । सङ्गात्पतत्त्यहो ज्ञानी चावश्यंकिमुताल्पविदितिकुलार्णवः ॥

निःसत्त्वः । त्रि । धैर्यशून्ये ॥

निःसन्धिः । त्रि । सन्धिरहिते । दृढे ॥

निःसम्पातः । पुं । अर्द्धरात्रे । निशीथे ॥

निःसरणम् । न । सृत्यौ ॥ उपाये ॥ मोक्षे ॥ निर्गमे ॥ गेहादिमुखे । निर्गमन प्रवेशमार्गे ॥ निस्सरन्त्यनेन । सृगतौ । करणे ल्युट् ॥

निःसहतरः । त्रि । असहतरे ॥ सहेर्निपूर्वात् पचाद्यजन्तात् तरप् ॥

निःसहत्वम् । न । अक्षमत्वे ॥ सहते । षह० । पचाद्यच् । उपसर्गेणसमासेत्वप्रत्ययः ॥

निःसारः । पुं । श्योनाकप्रभेदे ॥ शाखोटवृक्षे ॥ त्रि । साररहिते ॥ यथा । मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम् । यः करोति स सम्मूढो जलवुद्बुदसन्निभे ॥ जगत् सर्वन्तु निःसार मनित्यं दुःखभाजनम् । उत्पद्यते क्षणादेतत् क्षणादेतद्विपद्यते ॥

निःसारकः । पुं । अतीसारभेदे ॥ दध्नाससारेण समाक्षिकेण भुञ्जीत निःसारकपीडित स्तु । सुतप्तकुप्यक्वथितेन चापि क्षीरेण शीतेन मधुप्लुतेन ॥ भुञ्जीतपथ्यमितिशेषः ॥

निःसारणम् । न । गृहादीनां निर्गमादिपथे । निःसरणे ॥ निष्कासने ॥

निःसारा । स्त्री । कदलीवृक्षे ॥

निःसारितः । त्रि । निष्कासिते । वहिष्कृते ॥

निःसीमः । त्रि । अपर्यन्ते ॥

निःसृतः । त्रि । निर्गते ॥

निःस्नेहः । त्रि । स्नेहवर्जिते ॥ निर्गतः स्नेहोयस्मात् ॥

निःस्नेहा । स्त्री । अतस्याम् ॥ निश्चये नस्नेहोऽस्याम् ॥

निःस्रावः । पुं । आचामे । मासरे । मांड इति प्रसिद्धे भक्तरसे ॥

निःस्वः । त्रि । दरिद्रे ॥ अस्यलक्षणं यथा । शूर्पाकारौ विरूक्षौ च वक्रौ पा

दौ शिरालकौ । संशुष्कौ पाण्डुरन खौ निःस्वस्य विरलाङ्गुली ॥ इतिगा रुडे सामुद्रकम् ॥ निर्गतं स्वमस्य । स्वान्निष्क्रान्तोवा ॥

निकटः । त्रि । समीपे । आसन्ने ॥ नि वद्धम् । निवद्धार्थान्नेः सम्प्रोदश्चेति चात् कटच् ॥ निकटति वा । कटे° । पचाद्यच् ॥

निकरः । पुं । निवहे । सङ्घे ॥ सारे ॥ न्यायदातव्यवित्ते ॥ निधौ ॥ निकी र्यते । कृविक्षेपे ॥ ऋदोरप् ॥

निकर्षणम् । न । सन्निवेशे । पुरादौ गृहादिरचनापरिच्छिन्नदेशे ॥ पुरा देर्वहिर्विचरणभूमौ ॥ कर्षणान्निर्ग तम् । निरादय इति समासः ॥

निकषः । पुं । शाणपाषाणे । कषे ॥ नि कषति । कष° । अच् ॥ निकषन्त्य नेनवा । गोचरसञ्चरेत्यः । चकारा त् घोवा ॥

निकषणम् । न । उल्लेखने ॥

निकषा । अ । मध्ये ॥ समीपे । निकटे ॥

निकषा । स्त्री । विश्रवसोभार्यायाम् । राक्षसमातरि ॥ निकषणम् । कष हिंसायाम् । आःसर्वान्निकषि- भ्याम् ॥

निकषात्मजः । पुं । राक्षसे ॥ निकषा या आत्मजः ॥

निकषोपलः । पुं । शाणे । निकषे ॥

निकामम् । न । यथेप्सिते । इष्टानति क्रमे ॥ निकमनम् । कमु° । घञ् ॥

निकायः । पुं । लक्ष्ये ॥ सधर्मिप्राणि सं हतौ ॥ संहतानां समुच्चये ॥ निल ये । सद्मनि ॥ परमात्मनि ॥ निची यते । चिञ्° । सङ्घेचानौत्तरा धर्ये इतिघञ् आदेश्चकः ॥ चि । का यरश्चिते ॥

निकाय्यः । पुं । निलये । गृहे ॥ नि- चीयते ऽस्मिन् धान्यादिकमितिवि ग्रहे चिनोतेरधिकरणे ण्यत् आया देशो धात्वादेः कुत्वञ्च पाय्यसा न्नाय्यनिकाय्यधाय्या इत्यादिनानिपा त्यते ॥

निकारः । पुं । परिभवे ॥ उत्कारे । धा न्यस्योत्क्षेपणे ॥ अपकारे । विप्र कारे ॥ निकृष्टीकरणम् । कृञो घञ् ॥ निकरणम् । कृविक्षेपे । कृ धान्य इति घञ् ॥

निकारणम् । न । वधे । मारणे ॥ ॥ कृञ् । स्वार्थणयन्ताद्भावे ल्युट् ॥

निकारी । त्रि । अपकारिणि ॥

निकाशः । पुं । प्रकाशे ॥ निकाशनम् । निकाशते वा । काशृ° । घञ् अन्वा ॥ समीपे ॥

निकासः । पुं । नीकाशे ॥

निकुच: पुं। कुडवपादे। प्रसृत इति ख्याते ॥ निकुञ्चति। कुञ्च०। अच् ॥

निकुञ्चक:। पुं। निकुञ्चे ॥ स्वार्थे क: ॥ जलवेतसे। वानीरवृक्षे ॥

निकुञ्चितम्। न। सङ्गीतप्रसिद्धे अङ्गहारान्तर्गत शिरोविशेषे ॥

निकुञ्ज:। पुं। न। कुञ्जे। लतादिपिहितस्थले ॥ कौजायते। कावजनि वा। जनी०। सप्तम्यांजनेर्ड:। पृ०। निरचोपसर्गान्तरनिवृत्त्यर्थ: ॥

निकुञ्जिकाम्ला। स्त्री। कुञ्जवल्ल्याम् ॥ इयङ्गुणै:श्रीवल्लीसदृशी ॥

निकुम्भ:। पुं। कुम्भकर्णस्यतनये ॥ दन्तिकौषधौ ॥

निकुम्भाख्यवीजम्। न। जयपाले ॥

निकुम्भितम्। न। नृत्यविषयकाऽष्टोत्तरशतकरणान्तर्गतकरणविशेषे ॥

निकुम्भिला। स्त्री। लङ्कायाः पश्चिमभागवर्त्तिन्यां शक्तिविशेषे ॥

निकुम्भी। स्त्री। दन्तीवृक्षे ॥

निकुरम्बम्। न। कदम्बके। समूहे ॥ निकुरति। निकुर्यतेवा। कुरच्छेदने। कुरशब्देवा। बाहुलकात्अम्बच् ॥

निकृत:। त्रि। विप्रलब्धे ॥ नीचे ॥ विप्रकृते ॥ अनृजौ ॥ वञ्चिते ॥ दुःखीकृते ॥ न्यकारि। क्त: ॥

निकृति:। स्त्री। भर्त्सने ॥ क्षेपे ॥ शठे ॥ शाठ्ये ॥ अभिभवे ॥ दैन्ये ॥ निकृष्टाकृति: क्रिया परप्रतारणरूपा। यद्वा। पराभीष्टस्यनिकर्त्तनम्। कृती०। इकृकृष्यादिभ्यइतीक् ॥

निकृष्ट:। त्रि। अधमे ॥ निकृष्यतेस्म। कृष०। क्त: ॥ जात्याचारादिभिर्निन्दिते ॥

निकेत:। पुं। निकेतने। आश्रये। वेश्मनि ॥ निकेतनम्। कितनिवासे। घञ् ॥

निकेतनम्। न। गृहे। गेहे ॥ निकेत्यतेऽस्मिन्। कित०। अधिकरणेल्युट् ॥

निकोचक:। पुं। अङ्कोठवृक्षे। टेराइतिभाषा ॥ निकुच्यते। कुचशब्दे तारे। कुलादित्वात्वुन् ॥

निक्वण:। पुं। वीणाया अन्यस्य च किन्नरादे: शब्दे। प्रक्वाणे। क्वाणे। क्वणने ॥ क्वणशब्दे। नाविति अनुपसर्गइतिचानुवर्त्तमाने क्वणोवीणायाञ्चेत्यप् ॥

निक्वाण:। पुं। निक्वणे। क्वाणे ॥ क्वण०। क्वणोवीणायाञ्चेति पक्षेघञ् ॥

निचणम्। न। चुम्बने ॥ णिचचुम्बने। ल्युट् ॥

निक्षिप्तः । त्रि । परिक्षिप्ते । न्यस्ते ॥ स्थापितधनादौ ॥ निक्षिप्यतेस्म । क्षिपप्रेरणे । क्तः ॥

निक्षेपः । पुं । उपनिधौ । न्यासे । स्वधनस्यान्यस्मिन्नर्पणरूपे व्यवहारविशेषे । धरोहर इतिभाषा ॥ यथा । स्वद्रव्यं यत्र विश्रम्भान्निक्षिपत्यविशङ्कितः । निक्षेपो नाम तत् प्रोक्तं व्यवहारपदं बुधैः ॥ असङ्ख्यातमविज्ञातं समुद्रं यन्निधीयते । तज्जानीयादुपनिधिं निक्षेपं गणितं विदुः ॥ निक्षेपं वृद्धिशेषञ्च क्रयं विक्रयमेव च । याच्यमानो न चेद्दद्याद्वर्द्धते पञ्चकंशतमिति नारदः ॥ निक्षिप्यते । क्षिप० । घञ् ॥ शिल्पिहस्ते संस्कर्त्तुमर्पिते भाण्डे ॥

निक्षेपितः । त्रि । प्रयोज्येनान्येन निवेशिते ॥ क्षिपेर्ण्यन्तात् कर्मणि क्तः ॥

निक्षेप्ता । त्रि । निक्षेपस्यकर्त्तरि ॥ निक्षिपति । क्षिप० । तृच् ॥

निखर्व्वः । पुं । न । दशखर्व्वसङ्ख्यायाम् । १००००००००००० ॥ निखर्व्वति । खर्व्वगतौ । पचाद्यच् ॥ त्रि । वामने । बौना इतिभाषा ॥

निखातः । त्रि । खनित्वारोपिते ॥

निखिलः । त्रि । अखिले । निःशेषे । समस्ते ॥ निर्गतं खिलमस्मात् ॥

निगडः । पुं । न । बन्धने । शृङ्खलायाम् । बेडी इतिभाषा ॥ निगतो गडः सेचनमस्मात् कठिनत्वात् ॥ निगलति वा । गलअदने । अच् । डलयोरेकत्वम् ॥ हस्तिनो लोहमये पादबन्धोपकरणे । अन्दुके ॥

निगडितः । त्रि । बद्धे ॥ निगडःसञ्जातोऽस्य । तारकादित्वादितच् ॥

निगणः । पुं । होमधूमे ॥ इतित्रिकाण्डशेषः ॥

निगदः । पुं । भाषणे । कथने । निगादे ॥ निगदनम् । गद० । नैगदेत्यप् वा ॥ निगदस्तुजनैर्वैद्यइत्यागमात् उच्चैर्जपे ॥

निगदितः । त्रि । उक्ते ॥

निगमः । पुं । वाणिजे । वणिजि ॥ निगमे पुर्य्याम् भवः । तत्रभवइत्यण् । संज्ञापूर्वकत्वाद्वृद्ध्यभावः ॥ पुर्य्याम् ॥ कटे ॥ वेदे ॥ वणिक्पथे ॥ निश्चये ॥ अध्वनि ॥ प्रतिज्ञायाम् ॥ पर्य्यायकथनेनवेदार्थबोधकग्रन्थविशेषे ॥ निगम्यतेऽनेनवा । गम्लृ० । गोचरसञ्चरेतिसाधुः ॥

निगमनम् । न । प्रतिकूलप्रमाणाभावसूचकप्रतिज्ञोपसंहारवचने । तस्मात्तथेतिवचने ॥ यथा । असकृदनुचिन्तितानामव्याहततरनिजोप

देशानाम्। प्रामाण्यपरमसीमानि गमन मिदमेव निखिलनिगमानाम्॥ १०३॥ इदमेव आत्मैकत्वमेव॥ हेत्वपदेशात् प्रतिज्ञायाःपुनर्वचनंनिगमनम्। इतिगौतमः॥ ३८॥ हेतोर्व्याप्तिविशिष्टपक्षधर्मस्य अपदेशःकथनं प्रतिज्ञायाःप्रतिज्ञार्थस्य साध्यविशिष्टपक्षस्य वचनंनिगमनम्। तथाच व्याप्तिविशिष्टपक्षधर्म हेतुकथनपूर्वकसाध्यविशिष्टपक्षप्रदर्शकः- व्याप्तपक्षधर्म हेतुज्ञाप्यसाध्यविशिष्टबोधकस्तादृशसाध्यबोधकोवान्यायावयवोनिगमनमिति। अस्यत्वन्वयिव्यतिरेकिभेदान्नभेद इत्याशयः। व्यतिरेकिणितु तस्मान्नतथेत्येवाकारइत्यपरे॥

निगमाचार्य्यवाक्यम्। न। वेदगुरुवचने। उपनिषद्व्याख्यातृउपदेशे॥ निगमस्य आचार्यः तस्यवाक्यम्॥ निगमाचार्ययोर्वा वाक्यम्॥

निगमान्तः। पुं। उपनिषदि॥

निगरः। पुं। भोजने॥

निगरणः। पुं। गले॥ होमधूमे इति शब्दरत्नावली॥ न। भोजने। निगलना इतिभाषा॥

निगादः। पुं। निगदे। कथने॥ निगदनम्। गद०। नौगदेव्यवभावे घञ्॥

निगारः। पुं। भक्षणे। गरणे॥ निगरणम्। गनिगरणे। उन्न्योर्ग्र इतिघञ्॥

निगालः। पुं। अश्वगलदेशे॥ निगलत्यनेन। गलअदने। हलश्चेतिघञ्। संज्ञापूर्वकत्वान्नवृद्धिः॥ निगिरत्यनेनवा। गॄ०। उन्न्योर्ग्र इतिघञ्। अचिविभाषेतिवालः॥ घराटावन्यसमीपस्थो निगालः कीर्त्तितो बुधैः। तस्मिन्नेवमणिर्नाम रोमजः शुभकृन्मतः। इत्यश्वशास्त्रम्॥

निगालवान्। पुं। अश्वे॥ अस्त्यर्थेमतुप्॥

निगीर्णः। त्रि। गिलिते। निगला इति भाषा॥ निगीर्य्यतेस्म। गॄ०। क्तः॥

निगूढः। पुं। वनमुद्गे॥ त्रि। संवृते। गुप्ते॥ यथा। आस्ते विधुः परमनिर्वृत एवमौलौ शम्भो र्लिलि त्रिजगतीजनचित्तवृत्तिः। अन्तर्निगूढनयनानलपुञ्जदाहं जानाति कः स्वयमृते वत शीतरश्मेः॥ आलिङ्गिते॥ नितरांगुह्यते स्म। गुहू०। क्तः। यस्यविभाषेतीडभावः॥

निगूढतत्त्वः। त्रि। संवृतयाथार्थ्ये॥ निगूढं तत्त्वंयस्यसः॥

निगृह्णीता। त्रि। तर्जिते॥ पीडिते॥

निगृहीतचेताः । त्रि । वशीकृतचित्ते ॥
निग्रहः । पुं । भर्त्सने ॥ मर्यादायाम् । सीमायाम् ॥ बन्धने ॥ अनुग्रहाभावे ॥ निराकरणे ॥ चिकित्सायाम् ॥ पराहङ्कृतिखण्डनरूपे निरोधे ॥ निषिद्ध प्रवृत्तितिरस्कारे ॥ मनसोनिरोधे ॥ सचहठनिग्रहरूपः क्रमनिग्रहरूपश्चेतिद्विविधः ॥ मारणे ॥ प्रवृत्तिनिवृत्त्योर्निरोधे ॥ निवृत्तिकतयावस्थितौ ॥ नियमेनग्रहणम् । ग्रह० । ग्रहवृद्धिश्चेप् ॥ निगृह्णातिवा । कर्त्तरि पचाद्यच्वा ॥
निग्रहस्थानम् । न । गौतमोक्तषोडशपदार्थेष्वन्तिमे पदार्थे ॥ यथा । विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ॥ ५९ ॥ निग्रहस्य स्वीकारस्य स्थानंज्ञापकं निग्रहस्थानम् । तच्च विप्रतिपत्तिरप्रतिपत्तिश्च । विप्रतिपत्तिर्विरुद्धाप्रतिपत्तिः अप्रतिपत्तिः प्रकृताज्ञानम् । यद्यप्येतदन्यतरत् परनिष्ठं नोद्भावयितु मर्हम् प्रतिज्ञाहान्यादेर्निग्रहस्थानत्वानुपपत्तिस्तथापि विप्रतिपत्त्यप्रतिपत्त्यन्यतरोन्नायकधर्मवत्त्वंतदर्थः । उद्देश्यानुगुणसम्यक्ज्ञानाभावलिङ्गत्वं प्रतिज्ञाहान्याद्यात्मकत्वंवा लक्षणमित्यपिवदन्ति ॥ प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तर मर्थान्तरं निरर्थक मविज्ञातार्थं मप्राप्तकालं न्यून मधिकं पुनरुक्त मननुभाषण मज्ञान मप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि । अत्रचस्त्वर्थे । तेनैतानि तुनिग्रहस्थानानि न पुनरपस्मारादिना ऽननुभाषणादिकम् । नवाझटितिसंवरणेनतिरोहिताववाणीत्यर्थोलभ्यत इतिप्राञ्चः । नव्यास्तु चकारोनुक्तसमुच्चये तेनदृष्टान्तेसाधनवैकल्यादीनां परिग्रहः ॥
निग्राहः । पुं । शापे ॥ निग्रहणम् । आक्रोशेवन्योर्ग्रहइति घञ् । निग्राहस्ते दृषलभूयात् वधइत्यर्थः ॥ निग्रहे ॥
निघः । पुं । समविस्तारदैर्घ्ये । तुल्यारोहपरिणाहेरच्चादौ ॥ नियतं निर्विशेषेणवा हन्यते ज्ञायते । निघो निमितमितिसाधुः ॥
निघण्टिका । स्त्री । गुलच्चकन्दे ॥
निघण्टुः । पुं । नामसङ्ग्रहे ॥ इतिहेमचन्द्रः ॥
निघर्षः । पुं । घर्षणे ॥
निघसः । पुं । भोजने ॥ न्यदनम् । अद० । नेणवेच्चप् । घञपोश्चेति

घस्तादेश: ॥

निघात: । पुं । अनुदात्ते ॥

निघाति: । स्त्री । लोहघातिन्याम् । - लोहमयदण्डे ॥ निश्चयेन हन्ति । हन० । वसिवपियजिराजिव्रजिसदिह नीश्याहिना इञ् । कुत्वम् ॥

निघुष्टम् । न । घोषणे ॥ निघुष्यते स्म । घुषिरव्यक्तेशब्दे । क्त: ॥

निघृष्ट: । त्रि । घर्षिते । घसा इति भाषा ॥ यथा । सुरासुरशिरोरत्ननिघृष्टचरणोम्बिके ॥

निघृष्व: । पुं । खुरे ॥ निघृष्यते ऽनेन । घृषुसङ्घर्षे । सर्वनिघृष्वरिष्वेति साधु: ॥

निघ्न: । त्रि । आयत्ते । अधीने ॥ निहन्यते निगृह्यते । हन्तेर्घञर्थेक: ॥ गुणिते ॥

निचय: । पुं । समुच्चये । वस्तुसमूहे ॥ यथा । सर्वेक्षयान्तानिचया: पतनान्ता: समुच्छ्रया: । संयोगा विप्रयोगान्ता मरणान्तञ्च जीवितमिति ॥ निचीयते । चिञ्० । कर्मण्येरच् ॥

निचयक: । त्रि । निचये कुशले ॥ आकर्षादिभ्य: कन् ॥

निचयी । त्रि । उपचयवति ॥

निचाय: । पुं । राशीकृते धान्यादौ । ढेर इतिभाषा ॥ निचीयते राशीक्रियते । चीञ् ० । एरचिप्राप्ते परिमाणाख्यायां सर्वेभ्य इति घञ् ॥ यथा । एकस्तण्डुलनिचाय: । अत्रराश्येकत्वेनसमुदायिनां परिच्छित्तिर्गम्यते ॥

निचि: । पुं । गो:कर्णशिरोदेशे ॥ इतिरभस: ॥

निचिकी । स्त्री । उत्तमायां धेनौ । नैचिक्याम् ॥

निचित: । त्रि । सङ्कीर्णे ॥ आचिते ॥ पूरिते । व्याप्ते ॥ निर्मिते ॥

निचुल: । पुं । हिज्जले ॥ निचोले ॥ निचोलति । चुलसमुच्छ्राये । चुरादीनांणिज्वा । इगुपधेतिक: ॥ वेतसवृक्षे ॥

निचुलकम् । न । निचोलके ॥ पुं । कुञ्चिकामत्स्ये ॥

निचूल: । पुं । इज्जलद्रुमे ॥ निचोले ॥

निचोल: । पुं । प्रच्छदपटे । पिछौडा इतिभाषा ॥ येनतूलशय्यादिप्रच्छाद्यते तस्मिन्निति स्वामी ॥ दोलिकाद्यावरणपटइत्येके ॥ स्त्रीपिधानपटे बुरका इतिप्रसिद्धे इत्यपरे ॥ निचोल्यते । चुल० ०। घञ् ॥ यद्वा । चोड्यते । चुडकृतौ । चु०। घञ् । डलयोरेकता ॥

निचोलक: । पुं । भटादेश्चोलाकृतिसन्नाहे । कूर्पासे । वारवाणे ॥ न । कुञ्चिकाख्येमत्स्ये ॥

निचोली । स्त्री । प्रच्छदांशुके ॥

निच्छविः । स्त्री । तीरभुक्तिदेशे । तिरहुत इतिभाषा ॥ इ० चि० ॥

निच्छिविः । पुं । वर्णसङ्करप्रभेदे । व्रात्यात्क्षत्रियात् सवर्णायामुत्पन्नेजातिविशेषे । जल्ले ॥ यथा । झल्लोमल्लश्चराजन्याद्व्रात्यान्निच्छिविरेवच । नटश्चकरणश्चैवखसोद्रविडएवचेतिमनुः ॥

निजः । त्रि । आत्मीये । स्वीये ॥ नित्ये ॥ निजायते । जनी० । उपसर्गेचसंज्ञायामिति डः ॥

निजविभवः । पुं । स्वविभूतौ ॥

निजात्मा । पुं । परात्मनि ॥

निडीनम् । न । खगगतिप्रभेदे । पक्षिणःशनैर्यानि ॥ निडीनंनीचैःपतनमितिमहाभारतम् ॥ भक्ष्य माश्रयं वा पश्यतः पतने ॥

निण्डिका । स्त्री । सतीलायाम् । तिपुद्याम् । कलायभेदे । तेउडा इति गौडभाषा ॥

नितम्बः । पुं । स्त्रियःपश्चात्कटितटे ॥ स्कन्धे ॥ रोधसि ॥ कटेरधोभागे ॥ कटके ॥ कटिमात्रे ॥ नितम्बति नितंग्यतेवा । तम्बगतौ । अच् घञ्वा ॥ यद्वा । निभृतंतम्यते कामुकैः । तमुकांक्षायाम् ॥ ताम्यते सुरतसम्मर्दोवा । तमुग्लानौ । उल्वादयश्चेतिसाधुः ॥

नितम्बिनी । स्त्री । स्त्रीविशेषे ॥ अतिशयितोनितम्बोयस्याः । अतइनिठनाविितीनिः । ङीप् ॥ स्त्रीमात्रेपि ॥

नितराम् । अ । सुतरामर्थे ॥ अतिशयेनेत्यर्थे ॥ किमेत्तिङव्ययेत्यादिना अमुप्रत्ययः ॥

नितलम् । न । पातालविशेषे ॥

नितान्तम् । न । एकान्ते । अत्यन्ते । अतिशये ॥ त्रि । तद्वति ॥ नितान्यतिस्म । तमुकाङ्क्षायाम् । अकर्मकत्वात् कर्त्तरिक्तः । अनुनासिकस्येतिदीर्घः ॥

नितान्तनिर्मलस्वान्तः । त्रि । अत्यन्तशुद्धान्तःकरणे ॥ नितान्तंनिर्मलंस्वान्तं यस्य सः ॥

नित्यम् । न । सतते । अनारते । अजस्रे ॥ नियमेन भवम् । त्यव्नेर्ध्रुवे ॥ नियतम्भवइतिवा ॥ प्रत्यवायजनकीभूताभावप्रतियोगिनि । यथा । एकादश्यामुपोषणंनित्यम् ॥ ध्वंसप्रागभावाप्रतियोगिनि । यथा । गगनंनित्यम् ॥ अहरहर्जायमाने । यथा । नित्यंक्रीडन्तिकुमाराः ॥ अहरहःक्रियमाणत्वेन विधिबोधिते । यथा ॥ स्नानतर्पणादिकंनित्यम् ॥

अनवच्छिन्नपरम्पराके । यथा । वर्णा नित्याः ॥ पुं । समुद्रे ॥ त्रि । शाश्वते । अजन्ये वस्तुनि । कालत्रयव्यापिनि । ध्रुवे । अविनाशिनि । अवाध्यसत्त्वे । आत्मस्वरूपे । ध्वंसाप्रतियोगिनि । उत्पत्तिविनाशरहिते । सर्वदाविद्यमाने । सर्वव्यापके ॥ नित्यवेदबोधितत्वेनाऽनादिपरम्परागते । पूर्वापरकोटिरहिते । सदकारणवति ॥ सहजे ॥ विनाशयोग्यतारूपदोषाभाववत्त्वंनित्यत्वम् ॥

नित्यकर्म्म । न । अकरणे प्रत्यवायसाधनेषु सन्ध्यावन्दनादिषु ॥ प्रत्यवायशब्देनागामिदुःखमुच्यते । येषामकरणे विद्यमाने तत्साध्यते प्राप्यते तानि नित्यानीत्यर्थः । अकरणेप्रत्यवायजनकानि नित्यानीति यावत् ॥ निर्निमित्तमुपात्तदुरितक्षयार्थानि नित्यानीति नित्यकर्मलक्षणम् । नत्वकरणेप्रत्यवायोत्पादकानि नित्यानीति ॥ सन्ध्यावन्दनादी नित्यादिपदात् पञ्चमहायज्ञादिग्रहः ॥ प्रत्यवायजनकाभावप्रतियोगिकार्यंनित्यकर्मेतिस्मृतिः ॥ तद्यथा । नित्यं नैमित्तिकञ्चैव नित्यनैमित्तिकन्तथा । गृहस्थस्य त्रिधा कर्म तन्निबोधमय पुत्रक ॥ पञ्चयज्ञाश्रितं नित्यं यदेतत्कथितंतव । नैमित्तिकंतथाचान्यत् पुत्रजन्मक्रियादिकम् ॥ नित्यनैमित्तिकंज्ञेयं पर्वश्राद्धादिपण्डितैरितिमार्कण्डेयपुराणम् ॥

नित्यकर्म्मफलम् । न । मनःशुद्धौ ॥

नित्यक्षौरम् । न । वैधेतरक्षौरे । रागप्राप्तकेशच्छेदने ॥ यथा । चूडोदिते तिथौ वृक्षे बुधेन्द्रोर्दिवसेनरः । नित्यक्षौरंप्रकुर्वीत जन्ममासे न तु क्वचित् ॥

नित्यगतिः । पुं । वायौ ॥ नित्यंगतिरस्य ॥

नित्यतृप्तः । त्रि । परमानन्दस्वरूपलाभेन सर्वत्र निराकाङ्क्षे ॥ नित्येन निजानन्देन तृप्तः ॥

नित्यत्वम् । न । कालाद्यनवच्छिन्नत्वे । नस्यास्यतीतिलोकागमयोर्व्यवहारायोग्यत्वे ॥

नित्यदा । अ । शश्वदर्थे । सातत्ये ॥

नित्यदानम् । न । प्रतिदिनं दीयमानेदाने ॥ यथा । अहन्यहनि यत् किञ्चिद्दीयतेऽनुपकारिणे । अनुद्दिश्य फलं तत् स्यात् ब्राह्मणाय तु नित्यकमिति गरुडपुराणम् ॥

नित्यनैमित्तिकफलम् । न । मनःशुद्धौ ॥ पितृलोकप्राप्तिर्हि नित्यादीनामवान्तरफलम् । तद्यथा आम्रफ

त्वार्थेनिर्मिते छायागन्धावनूत्पद्येते इति छायागन्धवत्पितृलोकादिफलस्यावान्तरत्त्वमानुषङ्गिकम् । तदुद्देशेननित्यादेरविधानात् । विविदिषासंयोगस्यच विधानाच्छुद्धेरेव महाफलत्वम् ॥

नित्यप्रलय: । पुं । चतुर्विधप्रलयान्तर्गतप्रलयविशेषे ॥ यथा । नित्य: स दैवजातानां ये विनाशो दिवानिशमिति । सदैव दीपज्वालावत् सातत्येन जातानां दिवानिशं ये विनाश: सनित्यप्रलयइत्यर्थ: ॥

नित्यम् । अ । सातत्ये ॥

नित्यमुक्त: । त्रि । कालत्रयेपिवन्धशून्ये परमात्मनि ॥

नित्ययज्ञ: । पुं । फलसंयोगंविना जीवनादिनिमित्तसंयोगेन चोदिते । सर्वाङ्गोपसंहारासम्भवे प्रतिनिध्याद्युपादानेनामुख्यकल्पेनानुष्ठेये ॥ नित्यश्चासैा यज्ञश्च ॥

नित्ययैावना । स्त्री । द्रौपद्याम् ॥ त्रि । स्थिरयैावने ॥

नित्यवैकुण्ठ: । पुं । विष्णो: स्थानविशेषे ॥ यथा । ऊर्द्ध्वं नभसि संविष्टो नित्यवैकुण्ठएवच । आत्माकाशसमोनित्योविस्तृतश्चन्द्रविम्ववत् ॥ ईश्वरेच्छासमुद्भूतो निर्लक्ष्यश्चनिराश्रय: । आकाशवत् सुविस्तारश्चामूल्यरत्ननिर्मित: ॥ तत्रनारायण: श्रीमान् वनमालीचतुर्भुज: । लक्ष्मी सरस्वती गङ्गातुलसीपतिरीश्वर: ॥ सुनन्दनन्दकुमुदपार्षदादिभिरन्वित: । सर्वेश: सर्वसिद्धेशो भक्तानुग्रहकारक इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १५ अध्याय: ॥

नित्यसत्त्वस्थ: । त्रि । सदासत्त्वगुणाऽऽश्रिते । रजस्तमसी अभिभूय सत्त्वमात्रालम्बने ॥ नित्यमचलं यत् सत्त्वं धैर्यापरपर्यायं तस्मिंस्तिष्ठति । ष्ठागतिनिवृत्तौ । क: ॥

नित्यसमास: । पुं । अविग्रहोनित्यसमासइत्युक्ते समासविशेषे ॥ समस्यमानयावत्पदरहितविग्रहश्चनित्यसमास: ॥

नित्या । स्त्री । उमायाम् । पार्वत्याम् । शिवायाम् ॥ प्रकृतौ ॥ शक्ति विशेषे ॥ मनसादेव्याम् ॥ नियमेन भवा । त्यव्नेर्ध्रुवे । टाप् ॥

नित्यानध्याय: । पुं । सर्वथावर्जनीयवेदपाठकालादौ । मन्वादिप्रोक्ते स्वाध्यायाभावनिमित्ते ॥ यथा द्वावेव वर्जये न्नित्य मनध्यायौ प्रयत्नत: । स्वाध्यायभूमिञ्चाशुद्धा मात्मानञ्चाशुचिंद्विजइति ॥ विशेषस्तुइमाम्बि

त्य मनध्याया नधीयानो विवर्जये दित्यादि मनुवचनेषु द्रष्टव्यः ॥

निद्यानित्यवस्तुविवेकः । पुं । ब्रह्मैव नित्यं वस्तु ततोन्यदखिलमनित्य मितिविवेचने ॥ ब्रह्मसत्यंजगन्मिथ्य त्येवंरूपोविनिश्चयः । सोयं नित्या नित्यवस्तुविवेकःसमुदाहृतः ॥ नि त्यञ्च अनित्यञ्च नित्याऽनित्ये तेचते वस्तुनीच नित्यानित्य वस्तु नी । नित्यानित्यवस्तुनोर्विवेकःपृ थगात्मता ॥

नित्यानित्यस्वरूपिणी । स्त्री । मा याशवलब्रह्मरूपिण्याम् भुवनेश्वर्या म् ॥ नित्यंब्रह्म अनित्यंमाया तदु भयरूपिणी । तथाच भगवत्याउभ यात्मकत्वात् कदाचिद्ब्रह्मरूपेणैव वर्णनं कदाचिच्छक्तिरूपेणैववर्णन मिति इच्छाशक्तिरूपत्वेन श्रुत्याग मपुराणादौ वर्णनेपिदोषाभावो-वोध्यः ॥

नित्याभियुक्तः । त्रि । अनवरत माद रेण ध्याने व्यापृते । देहयात्रा मात्रा र्थमप्य प्रयतमाने ॥ नित्यम् अभि युक्तः ॥ सततंतत्परे ॥

नित्योदकः । त्रि । कृतावश्योदकक र्मणि ॥

निदम् । न । विषे ॥ श०श०चं० ॥

निदद्गुः । पुं । मनुष्ये ॥ त्रि । दद्रुग्र स्ते ॥

निदर्शनम् । न । उदाहरणे । दृष्टान्ते ॥ ज्ञापके ॥ दृशिर्० । ल्युट् ॥ य था । आत्माह्याकाशवज्जीवै र्घटा काशैरिवोदितः । घटादिवच्चसङ्घा तैर्जातावेतन्निदर्शनमिति ॥ यदाम न्दबुद्धिप्रतिपिपादयिषया श्रुत्यात्म नोजातिरुच्यते जीवादीनां तदाजा तावुपगम्यमानायामेतन्निदर्शनं दृ ष्टान्तो यथोदित आकाशवदित्या-दीति भाष्यम् ॥

निदर्शना । स्त्री । काव्यालङ्कारविशेषे ॥ तल्लक्षणं यथा । अर्थान्तरप्रवृत्तेन किञ्चित्तत् सदृशंफलम् । सदसत्वा न्निदर्श्येत यदिसा स्यान्निदर्शना ॥ उदाहरणम् । उदयन्नेव सविता प द्मेष्वर्पयतिश्रियम् । विभावयितु मृ द्धीनां फलं सुहृदनुग्रहमितिदण्डी ॥ प्रामाै ॥ यथा । शुभाशुभनिदर्शने तिपुराणम् ॥

निदाघः । पुं । ग्रीष्मकाले । ज्येष्ठाषाढ योः । उष्मोपगमे ॥ उष्णे ॥ स्वेदा म्बुनि । घर्मे ॥ नितरां दह्यते ऽ ना नेनवा । दह० । हलश्चेतिघञ् । न्य ङ्० कुत्वम् ॥ पुलस्त्यतनये ऋभोः शिष्ये वेदान्तविष्णुपुराणयोः प्रसिद्ध

माहात्म्ये परमहंसावधूते ॥

निदाघकरः । पुं । सूर्ये । भानौ ॥ निदाघा उष्णाः करा अस्य ॥

निदाघकालः । पुं । ग्रीष्मर्त्तौ । ज्येष्ठाषाढमासयोः ॥ यथा । प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः सदावगाहक्षमवारिसञ्चयः । दिनान्तरम्योऽभ्युपशान्तमन्मथो निदाघकालः समुपागतः प्रिये ॥

निदानम् । न । कारणे । हेतौ ॥ आदिकारणे ॥ शुद्धौ ॥ तपसः फलयाचने ॥ वत्सदाम्नि ॥ अवसाने ॥ नितरां दीयतेऽसाधारणतया जन्यतेऽनेन । डुदाञ्० । करणेति ल्युट् ॥ रोगविनिर्णये । रोगहेतौ ॥ निदानं पूर्वरूपाणि रूपाण्युपशय स्तथा । सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम् ॥ निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः निदानमाहुः पर्यायैः प्राग्रूपं येन लक्ष्यते ॥ इतिमाधवः ॥

निदिग्धः । त्रि । उपचिते । लेपादिना वर्द्धिते । पुष्टिमापिते ॥ निदिह्यते स्म । दिहउपचये । क्तः ॥

निदिग्धा । स्त्री । एलायाम् ॥

निदिग्धिका । स्त्री । कण्टकारिकायाम् । कटहलीरितिरङ्गिणी इतिचभाषा ॥ निदिह्यतेस्म । दिह० । क्तः । टाप् ॥ स्वार्थेकन् ॥ एलायाम् ॥

निदिद्रासन् । त्रि । निद्रातुमिच्छति ॥ निद्रातेः सन्नन्ताल्लटः शत्रादेशः ॥

निदिध्यासनम् । न । श्रुतस्य मतस्य तथैवध्याने ॥ निरन्तरंविचारोयः श्रुतार्थस्य गुरोर्मुखात् । तन्निदिध्यासनं प्रोक्तं तच्चैकाग्र्येण लभ्यते ॥ अनात्मन्यरुचि श्चित्ते रुचि श्चात्मनि चेद्भवेत् । पुण्यपुञ्जेन शुद्धं तच्चित्तमैकाग्र्यमर्हति ॥ विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुनिसजातीयप्रत्ययप्रवाहे ॥ विजातीयप्रत्ययान्तरितेनसजातीयप्रत्ययप्रवाहेण श्रवणमननफलभूतेनात्मचिन्तने ॥ निदिध्यासनं विचारविशेषात्मकम् । सचविचारविशेषोध्यानात्मासज्ज्ञानरूपं निदिध्यासनम् ॥ ताभ्यांनिर्विचिकित्सेर्थेचेतसःस्थापितस्ययत् । एकतानत्वमेतद्धिनिदिध्यासनमुच्यते ॥ ताभ्यां श्रवणमननाभ्याम् ॥ अपरायत्तबोधे ॥ अपरायत्तबोधोहिनिदिध्यासनमुच्यते इतिवार्त्तिकोक्तेः ॥

निदेशः । पुं । शासने । आज्ञायाम् ॥ कथने । परिभाषणे ॥ उपकण्ठे । उपान्ते ॥ भाजने ॥ निपूर्वाद्दिशेर्घञ् ॥

निदेशिनी । स्त्री । दिशि ॥ इतिराजनिर्घण्टः ॥

निदेष्टा । त्रि । निदेशकर्त्तरि ॥ निदिशति । दिश० । तृन् ॥

निद्रा । स्त्री । शयने । स्वापे । स्वप्ने । संवेशे ॥ निद्राच कालाग्निरुद्रपत्नी । यथा । कालाग्निरुद्रपत्नीच निद्रा सा सिद्धयोगिनी । सर्वेलोकाः समाच्छन्नायया योगेन रात्रिषु इति । रात्रिषु योगेनसम्बन्धेन ॥ तत्त्वाप्रतिबोधे ॥ अभावप्रत्ययालम्बनायांवृत्तौ ॥ चतसृणां वृत्तीना मभावस्य प्रत्ययः कारणं तमोगुण स्तदालम्बनावृत्तिरेवनिद्रा नतुज्ञानाद्यभावमात्रम् ॥ सत्त्वरजउभयविरोधिन्यां तमोगुणालम्बनायां वृत्तौ ॥ * ॥ निद्राभिमानिनीकालीतामसीशक्तिरिष्यते ॥ * ॥ यदातु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः । विषयेभ्यो निवर्त्तन्ते तदा स्वपिति मानवः ॥ कर्मात्मानः उभयविधानीन्द्रियाणि ॥ निद्राणम् । द्राकुत्सायांगतौ । आतश्चोपसर्गे इत्यङ् ॥ निन्दनम् निन्द्यते ऽ नयेतिवा । निन्देर्नलोपश्चेतिरगिति वा ॥ * ॥ सुखंस्वपित्यनृणवान् व्याधिमुक्तश्च यो नरः । सावकाशस्तु यो भुङ्क्ते यस्तु दारै र्नसङ्गतः ॥ कुतोनिद्रादरिद्रस्य परप्रेष्यकरस्य च । परनारीप्रसक्तस्य परद्रव्यहरस्य च ॥ इतिगारुडेनीतिसारः ॥

निद्राणः । त्रि । शयिते । निद्राङ्गते । सुप्ता इतिभाषा ॥ निद्रातिस्म । द्रा० । अकर्मकत्वात्कर्त्तरिक्तः । संयोगादेरितिनः ॥

निद्रालुः । त्रि । शयालौ ॥ निद्राशीलः । द्रा० । स्पृहिगृहीत्यालुच् ॥ स्त्री । वनवर्वरिकायाम् ॥ वार्त्ताक्याम् ॥ नलीनामगन्धद्रव्ये ॥

निद्रावृक्ष । पुं । अन्धकारे ॥ इतिशब्दमाला ॥

निद्रासञ्जनम् । न । श्लेष्मणि ॥

निधनः । पुं । न । कुले ॥ नाशे । मरणे ॥ अत्राहयाज्ञवल्क्यमिश्रः । कणन्तासिध्वान्तः कृतवसतयो यत्रधनिनः । किमर्थं प्राणानां स्थितिमनुविधातुं कथमपि । धनैर्याच्याभ्यैर्नपरिभवोऽस्यर्थनफलं निकारोऽग्रेपश्चाद्धनमहहभोस्तद्धिनिधनमिति ॥ स्वर्णाख्यसमर्थे ॥ अष्टमभवने ॥ निधानम् निधीयतेऽत्र । कृपृवृजीतिक्युः ॥ साम्नोभक्त्यन्तरे ॥ पाञ्चभक्तिकस्य साम्नः पञ्चमभक्तौ ॥ त्रि । धनहीने ॥

निधानम् । न । शङ्खपद्मादिनिधौ ॥

आधारे । आश्रये ॥ निधीयतेनिक्षिप्यते तत्कालभोगायोग्यतया कालान्तरोपभोग्यंवस्त्वस्मिन्निति निधानम् । निडुधाञ्० । ल्युट् ॥ कार्यावसानेप्रवेशस्थाने ॥ यथा । एतन्नानावताराणांनिधानंवीजमव्ययम् ॥

निधापनम् । न । स्थापने ॥

निधिः । पुं । शङ्खपद्मादिसामान्यनिधौ । शेवधौ ॥ महापद्मादिनवविशेषनिधिषु ॥ यथा । महापद्मश्चपद्मश्शङ्खोमकरकच्छपौ । मुकुन्दकुन्दनीलाश्चखर्वश्चनिधयोनवेतिशब्दार्णवः ॥ मार्कण्डेयपुराणोक्ताष्टनिधिषु ॥ यथा । क्रोष्टुकिरुवाच ॥ भगवन्कथितंसर्वं विस्तरेणत्वयामम ॥ स्वरोचिषोद्भुतं जन्म तथास्वारोचिषस्य तु ॥ यातुसापद्मिनीनामविद्याभोगेगोपपादिका ॥ तत्संश्रितायेनिधयस्तान्मेविस्तरतोवद ॥ अष्टौयेनिधयस्तेषांस्वरूपंद्रव्यसंस्थितिम् ॥ भवताभिहितंसम्यक्श्रोतुमिच्छाम्यहंगुरो ॥ मार्कण्डेयउवाच ॥ पद्मिनीनामयाविद्यालक्ष्मीस्तस्याश्चदेवता ॥ तदाधाराश्चनिधयस्तान्मेनिगदतःशृणु ॥ तत्रपद्ममहापद्मौतथामकरकच्छपौ ॥ मुकुन्दकुन्दौनीलश्चशङ्खश्चैवाष्टमोनिधिः ॥ सत्यांवृद्धौभवन्त्येतेसद्भिः

सहभवन्त्यमी ॥ एतेह्यष्टौसमाख्याता निधयस्तवक्रोष्टुके ॥ एभिरालोकितंचित्तंमानुषस्यमहामुने ॥ याद्दक्स्वरूपंभवतितन्मेनिगदतःशृणु ॥ पद्मोनामनिधिःपूर्वःसयस्यभवतिद्विज ॥ सतस्यतत्सुतानांचतत्पुत्राणांचनान्यगः ॥ दाक्षिण्यसारः पुरुषस्तेनवाधिष्ठितोभवेत् ॥ सत्त्वाचारोमहाभोगोयतोसौसात्त्विकोनिधिः ॥ सुवर्णरूप्यताम्रादिधातूनांच परिग्रहम् ॥ करोत्यतितरांसोपितेषांचक्रयविक्रयम् ॥ करोतिच तथायज्ञान् दक्षिणाश्चप्रयच्छति ॥ सम्पादयतिकामांश्च सर्वानेवयथाक्रमम् । सभादेवनिकेतांश्चसकारयतितन्मनाः ॥ १ ॥ * ॥ सत्त्वाधारोनिधिश्चान्यो महापद्मइतिस्मृतः ॥ सत्त्वप्रधानो भवतितेनचाधिष्ठितोनरः ॥ करोतिपद्मरागादिरत्नानांच परिग्रहम् ॥ समौक्तिकप्रवालानांतेषांचक्रयविक्रयं ॥ ददातियोगशीलेभ्यस्तेषामावसथांस्तथा ॥ सकारयतितच्छीलः स्वयमेवचजायते ॥ तत्प्रसूतास्तथाशीलाः पुत्रपौत्रक्रमेणच ॥ पूर्वर्द्धिमानः सप्तासौपुरुषांस्त्वनमुंचति ॥ महापद्मस्तुविप्रर्षाय्यार्थमुपजायते ॥ २ ॥ * ॥ तामसो

मकरोनामनिधिस्तेनावलोकितः॥ पुरुषोयतमः प्रायः सुशीलोपिहिजायते॥ वाणखड्गर्ष्टिधनुषां चर्म्मणांच परिग्रहम्॥ दंशनानांच कुरुतेयातिमैत्रींचराजभिः॥ ददातिशौर्य्यवृत्तीनांभूभुजांयेचतत्प्रियाः॥ क्रयविक्रयशस्त्राणां नान्यत्रप्रीतिमेतिच॥ एकस्यैवभवत्येषनरस्यनसुतानुगः॥द्रव्यार्थंदस्युतोनाशं संग्रामेवापिसव्रजेत्॥३॥*॥ कच्छपाख्योनिधिर्य्योन्योनरस्तेनाभिवीक्षितः॥तमःप्रधानोभवतियतोसौतामसोनिधिः॥ व्यवहारान्नशिष्टैस्सपण्यजातंकरोतिच॥ क्रियाःस्वानिखिलाश्चैवनविश्वसितिकस्यचित्॥ समस्तानियथांगानिनिगृह्यास्तेहिकच्छपः॥ तथावष्टभ्यवित्तानितिष्ठत्याकुलमानसः॥ नददातिनवाभुंक्तेतद्विनाशभयाकुलः॥ निधानमुर्व्यांकुरुतेनिधिःसोसोप्येकपूरुषः॥४॥*॥ रजोगुणमयश्चान्योमुकुन्दोनामयोनिधिः॥ नरोवलोकितस्तेनतद्गुणोभवतिद्विज॥ वीणावेणुमृदंगादिगीतवाद्यपरिग्रहम्॥ करोतिगायतांवित्तंनृत्यतांचमयच्छति॥ वंदिमागधसूतानांविटानांलास्यपाठिनाम्॥ ददात्यहर्निशंभोगानभुंक्तेतैस्तुसमंद्विज॥ कुलटासुरतिश्चास्य भवत्यन्यैश्चतद्विधैः॥ प्रयातिसंगमेकंचसनिधिर्भजतेनरम्॥५॥*॥ रजःसत्त्वमयश्चान्यःकुन्दोनाममहानिधिः॥ उपैतिस्तंभमधिकंनरस्तेनावलोकितः॥ समस्तधातुरत्नानां पण्यधान्यादिकस्यच॥ परिग्रहंकरोत्येषतथैवक्रयविक्रयम्॥ आधारःस्वजनानांचाप्यागताभ्यागतस्यच॥ सहतेनापमानोक्तिंस्वल्पामपिमहामुने॥ स्तूयमानश्चमहतीं प्रीतिंवघ्नातियच्छति॥ यंयमिच्छतिवैकामंमृदुत्वमुपयातिच॥ बह्व्योभार्याभवन्त्यस्यसूतिमत्योतिशोभनाः॥तदन्वयेसप्तनरान्निधिःकुन्दोनुवर्त्तते॥प्रवर्द्धमानोनुनरमष्टभागेनसत्तम॥ दीर्घायुश्चैवसर्वेषांपुरुषाणांप्रयच्छति॥ बन्धूनामेवभरणंयेचदूरादुपागताः॥ तेषांकरोतिवैकुन्दः परलोकेनचादृतः॥ भवत्यस्यनचस्नेहः सहवासिषुजायते॥ पूर्वमित्रैश्चशैथिल्यंप्रीतिमन्यैःकरोतिच॥६॥*॥तथैवसत्त्वतमसीयोविभर्त्तिमहानिधिः॥निधिःसनीलस्तत्संगीनरस्तच्छीलभाग्भवेत्॥ वस्त्रकर्पासधान्यादिफलपुष्पपरिग्रहम्॥ मुक्ताविद्रुमशंखानां शुक्त्यादीनांतथामुने॥ काष्ठादीनांकरोत्येष

यद्वान्यज्जलसंभवम् ॥ क्रयविक्रयम प्येषांनान्यत्तरम तेमनः ॥ तडागान् पुष्करिण्यश्वतथारामान्करोतिच ॥ बंधंचसरितां वृक्षास्तथारोपयतेनरः ॥ अनुलेपनपुष्पादिभोगभोक्ताविजायते ॥ त्रिपूरुषश्चापिनिधिर्नीलोनामेहजायते ॥ ७ ॥ * ॥ रजस्तमोमयश्चान्यः शंखसंज्ञोद्वियोनिधिः ॥ तेनापिनीयते विप्रसद्गुणित्वंनिधीश्वरः । एकस्यैवभवत्येषनरं नान्य मुपैतिच ॥ यस्यशंखोनिधिस्तस्यस्वरूपंक्रोष्टुके शृणु ॥ एकएवात्मनामिष्टमन्नंभुंक्तेतथांवरम् ॥ कदन्नभुक्परिजनोनचशोभनवस्त्रधृक् ॥ नददातिसुहृद्भार्यासुतपुत्रस्नुषादिषु ॥ स्वपोषणपरः शंखीनरोभवतिसर्वदा ॥ ८ ॥ * ॥ इत्येतेनिधयः ख्यातानराणामर्थदेवताः ॥ मिश्रावलोकितःमिश्रस्वभावफलदायिनः ॥ यथाख्यातस्वभावस्तुभवत्येकविलोकनात् ॥ सर्वेषामाधिपत्येच- श्रीरेषाद्विजपद्मिनी ॥ ४५ * ॥ इति श्रीमार्कण्डेयपुराणेनिधिलक्षणं नामषष्टितमोध्यायः ॥ ६० ॥ नितरांधीयते । धाञः किः ॥ नितरां दधाति पोषयत्यनेनपुनर्ग्रहणाय- निधातृभिः निधीयतेवा । धिधारणे । सम्पदादित्वात् क्विप् । आगमशा सनस्यानित्यत्वात् नतुक् ॥ आधारे ॥ यथा । गुणनिधिः ॥ मल्लिकानामगन्धद्रव्ये ॥ समुद्रे ॥ चिरप्रणष्टस्वामिकभूयातधनविशेषे ॥ महाकालादिनिधिशास्त्रे ॥

निधित्सन् । त्रि । निधातुमिच्छति ॥ दधातेः सन्नन्ताल्लटः शत्रादेशः ॥

निधिनाथः । पुं । }
निधीशः । पुं । } कुबेरे । धनदे ॥
निधीश्वरः पुं । }

निधुवनम् । न । कम्पे ॥ सुरते ॥ केलौ । लीलायाम् ॥ नितरां धुवनं हस्तपादादिचालनमत्र ॥

निध्यानम् । न । निर्वर्णने । दर्शने ॥ ध्याने ॥

निध्वानः । पुं । शब्दमात्रे ॥

निनङ्क्षुः । त्रि । नाशयितुमिच्छति ॥

निनदः । पुं । ध्वनौ । शब्दे ॥ निनदनम् । णद० । नौगदनदपठस्वनइति पक्षेअप् ॥ रयस्येत्यनेरणोपे ॥

निनयनम् । न । निष्पादने ॥ निनीयते । णीञ्० । ल्युट् ॥

निनादः । पुं । शब्दे ॥ निनदनम् । णद० नौगदनदेत्यादिनापक्षे घञ् ॥

निनादितः । त्रि । शब्दिते ॥

निनीषुः । त्रि । नेतुमिच्छौ ॥ यथा । उत्तमैस्तत्त्वैर्निर्त्यं सम्बन्धांनाचरे

दुधः । निनीषुः कुलमुत्कर्षमधमान धमाँस्त्यजेदितिमनुः ॥

निन्दकः । त्रि । निन्दाकारके । निन्दा शीले ॥ निन्दति तच्छीलः । णिदि० । निन्दहिंसेतिवुञ् ॥ नभाराः पर्व ताभारा नभाराः सप्तसागराः । निन्दकाहि महाभारा भाराविश्वासघातकाः ॥

निन्दतमः । त्रि । निन्दितहस्ते ॥

निन्दनम् । न । कुत्सने । निन्दायाम् ॥ णिदिकुत्सायाम् । ल्युट् ॥

निन्दा । स्त्री । अपवादे ॥ कुत्सायाम् । गर्हणे ॥ अविद्यमानदोषाभिधानं निंदेतिपरीवादाद्विशेषः । धीराःस्व निन्दामेषसहन्ते न गुरुदेवादिनिन्दाम् ॥ आत्मानं यदि निन्दन्ति स्वात्मानं स्वयमेवहि । शरीरं यदि निन्दन्ति सहायास्तेजनाममः ॥ निन्दावमानावत्यन्तं भूषणं यस्ययोगिनः । धीविक्षेपःकथंतस्यवाच्याद्यैः क्रियतामिह ॥ मन्निन्दयायदिजनःपरितोषमेतिनन्वप्रयत्नसुलभोयमनुग्रहोमे । श्रेयोर्थिनोहिपुरुषाःपरतुष्टिहेतोर्दुःखार्जितान्यपिधनानिपरित्यजन्तीतिशिल्हणमिश्राः ॥ निन्दनम् । णिदि० । गुरोस्मृहणइति भावेस्त्रियाम् ॥ दोषकथने ॥ अ-निष्टबोधनद्वाराविध्यर्थप्रवर्त्तकवचने ॥ नहिनिन्दानिन्द्यंनिन्दितुंप्रवर्त्तते ऽपितुविधेयं स्तोतुमितिन्यायः ॥

निन्दास्तुतिः । स्त्री । व्याजस्तुतौ ॥

निन्दितः । त्रि । गर्हिते । धिक्कृते । निन्दायुक्ते ॥ सर्वंव्यर्थं निन्दितस्येत्युपदेशः ॥

निन्दुः । स्त्री । मृतवत्सायाम् ॥ निन्द्यते ऽप्रजात्वेनासौ । णिदेरौणादिकउः ॥

निन्द्यः । त्रि । गर्ह्ये ॥

निपः । पुं । कदम्बवृक्षे ॥ पुं । न । कलशे ॥ नियतं पिबन्त्यनेन । पा० । घञर्थेकः ॥

निपठः । पुं । पाठे ॥ निपठनम् । पठ० । नौगदनदेत्यवा ॥

निपत्या । स्त्री । पिच्छिलायाम्भूमौ । फिसलन् इतिभाषा ॥ निपतन्त्यस्याम् । पतॢ० । संज्ञायांसमजेतिक्यप् ॥ युद्धभूमौ ॥

निपाकः । पुं । पाके ॥

निपाठः । पुं । पठने । पाठे ॥ निपठनम् । पठ० । नौगदनदेत्यवभावे घञ् ॥

निपातः । पुं । पतने ॥ मृतौ ॥ निकृष्टःपातः ॥ चादिषु ॥ प्रादिषु ॥ निपातानांद्योतकत्वमेव नतुवाचकत्वमित्यभ्युपगमः ॥ निपतनम् ।

पतॢ० । घञ् ॥ उपसर्गातिरिक्तनिपातानां द्योतकत्वश्च वाचकत्वोभयस्वीकारोऽव्ययंविभक्तीतिसूत्रे भाष्ये स्पष्टस्तेनतेषांवाचकत्वमपि ॥ उपसर्गाणांतु द्योतकत्वमेवेति गतिर्गताविन्त्यत्रभाष्ये स्पष्टम् ॥

निपातनम् । न । अधोनयने । अवनाये ॥ पतेः स्वार्थणयन्ताल्ल्युट् ॥ लक्षणानुत्पन्नपदसाधने ॥ यल्लक्षणेनाऽनुत्पन्नंतत् सर्वंनिपातनात् सिद्धम् । निपातनादिष्टसिद्धिरित्युक्तेश्च ॥

निपातितः । त्रि । निक्षिप्ते ॥

निपानम् । न । आहावे । उपकूपजलाशये । कूपोद्धृतजलस्थले । कूपादिसमीपे पशूनां जलपानार्थमुदकाधारे । खेल इतिभाषा ॥ नियतं पिबन्त्यस्मिन् । करणेतिपातेर्ल्युट् ॥ गोदोहनपात्रे । दोहन्याम् ॥

निपीडितः । त्रि । कृतपीडने । निचोडा इति निपीला इतिच भाषा ॥ नितरांपीडितः ॥

निपुणः । त्रि । प्रवीणे । विज्ञे । निष्णाते । कार्यक्षमे । तर्कादिकुशले । शिक्षिते ॥ यथा । निपुणोपि न कर्त्तव्यो वाग्वादश्चक्रमध्यत इत्यागमः ॥ निपुणाति । पुणकर्मणिशुभे । इगुपधेतिकः ॥ कार्येषुसूक्ष्मदृष्टौ ॥

निफला । स्त्री । ज्योतिष्मत्याम् ॥

निफेनम् । न । अफेने ॥ इतिराजनिघण्टः ॥

निबद्धः । त्रि । वशीकृते ॥ निबध्यते स्म । बधबन्धने । क्तः ॥ अनुबद्धे ॥ रचिते ॥

निबन्धः । पुं । आनाहरोगे । मूत्रादिरोधे ॥ ग्रन्थस्यवृत्तौ । सङ्ग्रहविशेषे ॥ प्रतिवर्षम् प्रतिमासादिवादातव्यत्वेन प्रतिश्रुतवस्तुरूपे ॥ निम्बवृक्षे ॥ बन्धे ॥ यथा दैवीसम्पद् विमोक्षाय निबन्धायासुरी मतेति ॥

निबन्धनम् । बन्धबन्धने । घञ् ॥ न । गीते ॥ इति शब्द० ॥

निबन्धनम् । न । बन्धने ॥ हेतौ ॥ वीणातन्त्रीनिबन्धनोर्द्ध्वभागे । उपनाहे ॥ निबध्यतेऽनेनास्मिन्वा । बन्ध० । करणाधिकरणयोश्चेति ल्युट् ॥

निबन्धितः । त्रि । बद्धे ॥ निबन्धः सञ्जातोस्य । तारकादित्वादितच् ॥

निबोधितः । त्रि । उपदिष्टे ॥

निभः । पुं । व्याजे ॥ त्रि । उत्तरपदस्थः सदृशे ॥ यथा । पितृनिभः पुत्रो मातृनिभाकन्येष्टनिभमपथ्यमिति- ॥ नियतं भाति । भा० । आतश्चोपसर्गइतिकः ॥ प्रकाशे ॥

निभालनम् । न । दर्शने ॥

निभूतम् । त्रि । भूतकाले । अतीते ॥ इति राजनिर्घण्टः ॥

निभृत: । त्रि । विनीते ॥ धृते ॥ नितरामभारि । भृञ्० । क्त: ॥ निश्चले ॥ एकाग्रे ॥ नितराम् पोषिते ॥ नितराङ्गुप्ते ॥ निर्ज्जने ॥ यथा । निभृतनिकुञ्जगृहङ्गतया निशि रहसि निलीयवसन्तमिति जयदेव: ॥ खाताद्यवच्छिन्ने ॥ अस्तायोपस्थिते ॥ यथा । नभसानिभृतेन्दुना तुलामितिरघु: ॥

निमग्न: । त्रि । जलादौनितराम् प्रविष्टे ॥

निमज्जथु: । पुं । शयने ॥ यथा । तल्पे कान्तान्तरै: सार्द्धमन्यहंधिङ्निमज्जथुमिति भट्टि: ॥

निमज्जनम् । न । अवगाहने । स्नाने ॥

निमन्त्रणम् । न । नियोजनविशेषे ॥ यस्याकरणे प्रत्यवायस्तन्निमन्त्रणम् । यथा । इहभुञ्जीतभवान् ॥ यस्याकरणे प्रत्यवायोन स्यात् तदामन्त्रणम् । यथा । इहशयीत भवान् । इतिमुग्धबोधटीका ॥

निमन्त्रित: । त्रि । भोजनार्थं नियोजिते ॥

निमय: । पुं । परिवर्त्तने । परिदाने । विनिमये ॥ निमीयते । मीञ् हिंसायाम् । एरच् ॥

निमातव्य: । त्रि । परिवर्त्तनीये ॥ मेञोरूपम् ॥

निमानम् । न । मूल्ये ॥ निमीयते क्रीयते ऽनेन । माङ्० । ल्युट् ॥

निमि: । पुं । इक्ष्वाकुराज: पुत्रे ॥

निमित: । त्रि । समन्तान्मिते ॥

निमित्तम् । न । उत्पत्तिमात्रकारणे । हेतौ ॥ निमित्तं मनश्चक्षुरादिप्रवृत्तौ निरस्ताखिलोपाधि राकाशकल्प: । रवि र्लोकचेष्टानिमित्तं यथा य: सनित्योपलब्धिस्वरूपोहमात्मा ॥ लक्ष्मणि ॥ शरव्ये ॥ शकुने ॥ निमित्तानिचपश्यानि विपरीतानिकेशव ॥ निमित्तान्येव शंसन्ति शुभाशुभफलोदयम् । तस्मा देतानि शास्त्रज्ञोराजा समुपलक्षयेत् ॥ फले ॥ निमेद्यति । ञिमिदा० । ञीत:- क्त: । संज्ञापूर्वकत्वान्ननत्वम् । अनात्मने पदनिमित्तइति निर्द्देशाद्वा ॥

निमित्तकम् । न । चुम्बने ॥ निमित्ते ॥

निमित्तकारणम् । न । समवाय्यसमवाय्युभवभिन्ने कारणे ॥ यथा । तुरीवेमादिकम् पटस्य । यथा वा द्व्यणुकस्येश्वर: । घटम् प्रतिच कुलालदण्डचक्रसलिलसूत्रादिकमिति ॥

निमित्तकृत् । पुं । काके ॥ इतिराजनि० ॥

निमित्तवित् । पुं । दैवज्ञे ॥ इतिहेमचन्द्रः ॥ शकुनज्ञे ॥

निमिषः । पुं । कालप्रभेदे ॥ अक्षिनिमीलने । अक्षिपक्ष्मणोःस्वाभाविकस्योन्मेषस्यसहकारिणि ॥ निमिषति । मिष० । पचाद्यच् । कुटादित्वान्नगुणः ॥ इगुपधत्वात्कोवा ॥

निमिषितम् । न । अक्षिव्यापारे ॥

निमीलम् । न । दीर्घनिद्रायाम् ॥

निमीलनम् । न । मरणे ॥ सङ्कोचने ॥ निमेषे ॥ मीलनिमेषणे । ल्युट् ॥

निमीलिका । स्त्री । व्याजे ॥ निमीलने ॥

निमीलितः । त्रि । मोहिते ॥ कृतनिमीलने ॥

निमेयः । पुं । परिवर्त्ते । नैमेये ॥ निमीयते । माङ्माने । अचोयत् । ईद्यति ॥

निमेषः । पुं । अक्षिनिमीलने । नेत्रपक्ष्मणोःस्वाभाविकस्योन्मेषस्यसहकारिणि । पलकमीचना इतिभाषा ॥ यथा । निमेषोन्मेषाभ्याम् प्रलयमुदयंयातिजगतीति ॥ दृष्टिनिमीलनात्मके । कालप्रभेदे । पक्ष्मस्पन्दनकाले ॥ पुंसोयावत्कालमकृत्रिमनेत्रविकाशानन्तरं पक्ष्माकुञ्चनं जायतेसनिमेषः । इत्यमरटीकायाम्भरतः ॥ अक्षिपक्ष्मपरिक्षेपोनिमेषःपरिकीर्त्तितः । द्वौनिमेषौत्रुटिर्नामद्वेत्रुटीतुलवःस्मृतः । इत्यग्निपुराणम् ॥ लघ्वक्षरोच्चारणमात्रेकाले ॥ लवद्वये ॥ निमिषति । मिषस्पर्धायाम् । इगुपधेतिकः ॥

निमेषकः । पुं । निमेषे ॥

निमेषकृत् । स्त्री । तडिति ॥ निमेषंकरोति । डुकृञ्० । क्विप् ॥

निमेषरुक् । पुं । खद्योते ॥ इतित्रिकाण्डशेषः ॥

निम्नम् । त्रि । गभीरे । नीचा इतिगहरा इतिचभाषा ॥ निम्नति । म्नाअभ्यासे । आतश्चेतिकः ॥ वृक्षादिषुवल्ल्यादिवेष्टनाज्जाते वाढा इतिप्रसिद्धे चिह्ने ॥

निम्नगा । स्त्री । नदीमात्रे ॥ त्रि । नीचगामिनि ॥ निम्नङ्गच्छति । गम्लृ० । अन्येभ्योपीतिडः ॥

निम्नोन्नतम् । त्रि । उन्नतानते । वन्धुरे ॥

निम्बः । पुं । अरिष्टे । सर्वतोभद्रे । पिचुमर्दे । नीम् इतिभाषा ॥ निम्बः शीतो लघु र्ग्राही कटुपाको ग्निवातहृत् । अहृद्यःश्रमतृट्कासज्वरारुचिकृमिप्रणुत् ॥ व्रणपित्तकफच्छर्दिकुष्ठहृल्लासमेहनुत् ॥ * ॥ निम्बप

चंस्मृतं नेत्र्यं कृमिपित्तविषप्रणुत्। वातलं कटुपाकञ्च सर्वारोचककुष्ठनुत् ॥ * ॥ नैम्बं फलं रसे तिक्तं पाके तु कटु भेदनम्। स्निग्धं लघूष्णं कुष्ठघ्नं गुल्मार्शःकृमिमेहनुत् ॥ * ॥ निम्बशाकस्तु। निम्बस्य कोमलदलानि सुयत्नभृष्टान्याज्ये क्षिपेत्तदनु सैन्धवतक्रयुक्तान्। शालीयतण्डुलकणान् सह रामठेन चाघारितादति रोचनमेव लेह्याः ॥ * ॥ निम्बति स्वास्थ्यम्। णिविसेचने। पचाद्यच्। वब-योरैक्यम् ॥ करञ्जनिम्बजफलं कृमिकुष्ठप्रमेहजित् ॥ * ॥ निम्बतैलन्तु कुष्ठघ्नं तिक्तं कृमिहरम् परम्' इति राजवल्लभः ॥ क्वाथे त्वग् ग्राह्या ॥

निम्बकः। पुं। अरिष्टद्रुमे ॥ स्वार्थे कः॥

निम्बतरुः। पुं। मन्दारवृक्षे। वकायन इति भाषाप्रसिद्धे पारिभद्रे ॥ नियमयति। यम उपरमे। पृ०। निंवति वा। णिविसेचने। पचाद्यच्। वबयोरैक्यम्। कर्मणि घञ् वा। निम्बसंज्ञकस्तरुः। शाकपार्थिवादिः ॥

निम्बवीजः। पुं। राजादनीवृक्षे ॥

निम्बुकम्। न। } निम्बूके। कागदी
निम्बूः। स्त्री। } नींबू इति भाषा ॥

निम्बूकम्। न। अम्लजम्बीरे। शोधने। निंब्राम्। दीप्ते ॥ निम्बूकमम्लं वातघ्नं दीपनं पाचनं लघु ॥ * ॥ निम्बुकं कृमिसमूहनाशनं तीक्ष्णमम्लमुदरग्रहापहम्। वातपित्तकफशूलिने हितं कष्टनष्टरुचिरोचनम् परम् ॥ त्रिदोषवह्निक्षयवातरोगनिपीडितानां विषविह्वलानाम्। मलग्रहे बद्धगुदे प्रदेयं विसूचिकायां मुनयो वदन्ति ॥ * ॥ भागैकं निम्बुजं तोयं षड्भागं शर्करोदकम्। लवङ्गमरिचोन्मिश्रं पानकं पानकोत्तमम् ॥ निम्बूफलभवं पानमत्यम्लं वातनाशनम्। वह्निदीप्तिकरं रुच्यं समस्ताहारपाचकम् ॥ इति राजनि० ॥

निम्लोचन्। त्रि। अस्तङ्गच्छति ॥

निम्लोचनम्। न। अस्तङ्गमने ॥

नियतः। त्रि। निश्चिते ॥ नित्ये ॥ आचारनिष्ठे ॥ वशीकृतेन्द्रिये ॥ न। नित्यकर्मणि ॥ नियच्छति। यम०। अकर्मकत्वात् कर्त्तरि क्तः। मलोपः॥ नियततेवा। यती०। पचाद्यच् ॥

नियतात्मा। त्रि। समाहितचित्ते ॥ सुश्चितमनसि ॥ नियतः आत्मा यस्य ॥

नियतिः। स्त्री। नियमे ॥ दैवे। दिष्टे। भागधेये। प्राक्तनशुभाशुभकर्मणि ॥ नियम्यतेऽनया। यम उपरमे। क्तिन् ॥

नियती । स्त्री । दुर्गायाम् ॥

नियतेन्द्रियः । त्रि । इन्द्रियदमनमशीले । संयतेन्द्रिये ॥

नियन्ता । पुं । सारथौ ॥ त्रि । शासितरि ॥ पशुप्रेरके ॥ नियच्छति विशिष्टे विषये स्थापयति । अन्तर्भावितण्यर्थो वा । यम० । तृच् ॥

नियन्त्रितः । त्रि । अनर्गले । अवाधे ॥ इति हेमचन्द्रः ॥ नितरां यन्त्रितः ॥ नियमिते ॥

नियमः । पुं । यन्त्रणे ॥ प्रतिज्ञायाम् । अङ्गीकारे ॥ निश्चये ॥ यथा भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते पञ्च पञ्चनखा भक्ष्या इत्युक्ते गम्यते एतदतोऽन्ये ऽभक्ष्या इति । अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः । तद्यथा । अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकर इत्युक्ते गम्यते एतद् आरण्यो भक्ष्य इति महाभाष्यम् ॥ भक्ष्यनियम इति भक्ष्यानुमतिरूप उपदेश इत्यर्थ इति विवरणम् ॥ * ॥ प्रतिज्ञानिश्चये ॥ इति मेदिनी ॥ व्रते ॥ आगन्तुसाधने ॥ यथा । नियमस्तु स यत्कर्माऽनित्यमागन्तुसाधनम् । यत् कर्म अनित्यम् न तु यावज्जीवं कर्त्तव्यम् आगन्तुभिः कादाचित्कैः कामनया समयविशेषादिभिः साधनैः साध्यमुपवासस्नानजपादि तन्नियम इत्यर्थः ॥ * ॥ नित्यकर्मणि । तत्तदाश्रमविहिताचरणे ॥ * ॥ शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानेषु पञ्चसु ॥ जपोपवासप्रदक्षिणा नमस्कारादिरूपाः पुराणेऽधिका उक्तास्ते एष्वेव पञ्चस्वन्तर्भाव्याः ॥ स्नानमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः । नियमो गुरुशुश्रूषाशौचाक्रोधाप्रमादता: ॥ * ॥ अक्रोधादिषु ॥ अक्रोधो गुरुशुश्रूषा शौ[च]माहारलाघवम् । अप्रमादश्च सततं पञ्चैते नियमाः स्मृताः ॥ * ॥ तपआदिदशसु । यथा । तपःसन्तोष आस्तिक्यं दानं देवस्य पूजनम् । सिद्धान्तश्रवणञ्चैव ह्रीर्मतिश्च जपो हुतम् ॥ दशैते नियमाः प्रोक्ता मया पर्वतनायकेति देवीगीता ॥ नियच्छति अनेन वा नियमनं वा । यम उपरमे । पञ्चाद्यच् । यमः समुपनिविषु च इत्यप् ॥ सजातीयप्रवाहश्च विजातीयतिरस्कृतिः । नियमो हि परानन्दो नियमात् क्रियते बुधैः ॥ वेदशब्दा नियमपूर्वमधीताः फलवन्तो भवन्तीति महाभाष्यम् ॥

नियमनम् । पुं । नियमे ॥ निग्रहे । बन्धे ॥ वलेर्नियमनमिति यथा ॥

नियमविधिः । पुं । नानासाधनसाध्य-

क्रियाया मेकसाधनप्राप्ता वप्राप्तस्य परसाधनस्य प्रापके विधौ ॥ नियमः पाक्षिकेसतीत्युक्तेः । पक्षे ऽप्राप्तस्य प्रापकोविधिर्नियमविधिर्भवति । यथा व्रीहीनवहन्तीत्यादिः । कथम स्यपक्षे ऽप्राप्तप्रापकत्वमितिचेत् इत्थम् । अनेना ऽवघातस्य वैतुष्यार्थत्वं न प्रतिपाद्यते अन्वयव्यतिरेकसिद्धत्वात् किन्तुनियमः। सचाप्राप्तांशपूरणम् । वैतुष्यंहिनानोपायसाध्यत्वात् यदावघातंपरित्यज्योपायान्तरंगृहीतुमारभ्यतेतदा ऽवघातस्या प्राप्तत्वेन तद्विधाननामकमप्राप्तांशपूरणमेवानेनविधिनाक्रियते । अतश्चनियमविधावप्राप्तांशपूरणात्मकोनियमएववाक्यार्थः। पक्षे ऽप्राप्ता वघातविधानमितियावत् ॥

नियमितः । त्रि । कृतनियमे ॥ बद्धे ॥ नियमः सञ्जातोऽस्य । ता॰इतच् ॥

नियामः । पुं । नियमे ॥ नियमनम् । यम॰ । यमः समुपनिविषुचेतिघञ् ॥

नियामकः । पुं । नजिरा इतिप्रसिद्धे गुणवृक्षोपरिस्थिते पोतवाहे ॥ कर्णधारे ॥ नियच्छतिपोतम् । यमनियमने । ण्वुल् ॥ त्रि । नियन्तरि ॥

नियामिका । स्त्री । नियमनकर्त्र्याम् ॥

नियुक्तः । त्रि । अधिकृते ॥ नियोजिते ॥ आज्ञप्ते । प्रेरिते ॥ यथानियुक्तोऽस्मितथा करोमि ॥ नियुज्यतेस्म । युजिर॰ । क्तः ॥ अवधारिते इतिराधाकान्तः ॥

नियुतम् । न । लक्षे । १००००० ॥ इति लीलावती ॥ शतं सहस्रमयुतं नियुतं प्रयुतं मतम् । स्त्रीकोटिरर्बुद मितिक्रमाद्दशगुणोत्तरमिति रत्नकोशः ॥ धेनूनां नियुत प्रादादिप्रेभ्यः समलङ्कृते । इत्यत्रनियुते दशलक्षे इति श्रीधरस्वामी ॥ * ॥ दशलक्षे १०००००० । प्रयुते ॥ यथा । एकं दश शतञ्चैव सहस्र मयुतं तथा । लक्षञ्च नियुतञ्चैवकोटि रर्बुद एवच ॥ वृन्दः खर्वो निखर्वश्च शङ्खपद्मौच सागरः । अन्त्यं मध्यं परार्द्धञ्च दश वृद्ध्या यथोत्तरम् ॥ इतिपुराणम् ॥

नियुद्धम् । न । बाहुयुद्धे ॥ निगृह्य नितरांवा युद्धम् ॥

नियोगः । पुं । अवधारणे ॥ आज्ञायाम् ॥ कार्ये ॥ नियुज्यते ऽस्मिन् । युजिर॰ । घञ् ॥

नियोगी । त्रि । नियुक्ते । कर्मसचिवे । नियोगविशिष्टे ॥ नियोगो ऽस्यास्ति । इनिः ॥

नियोज्यः । त्रि । नियोगार्हे । प्रभौ ॥

नियोजनम् । न । स्थापने ॥ युजिर्० । ल्युट् ॥ नियोगे । प्रेरणे ॥ त्वयैतत् क्रियतामिति क्रियासुनियोजनम्प्रेरणमित्यर्थात् ॥

नियोजितः । त्रि । नियुक्ते ॥

नियोज्यः । त्रि । प्रेष्ये । भृत्ये ॥ नियुज्यते । युजिर्० । नियोक्तुं शक्यइत्यर्थे प्रयोज्यनियोज्यौ शक्यार्थइतिण्यति कवर्गाभावो निपातनात् ॥

नियोद्धा । पुं । कुक्कुटे ॥ इतिराजनिर्घण्टः ॥ बाहुयुद्धकारिणि ॥

निर् । अ । निर्णये ॥ निषेधे ॥ वहिर्भावे ॥ क्रान्ताद्यर्थे ॥ न्ध्याति । नूनये । क्विप् । कृत इत् ॥ निःशेषे ॥

निरंशः । पुं । राशेः प्रथमभागे ॥ त्रि । अंशरहिते ॥ निर्गतोंशात् ॥

निरंशकः । त्रि । निरंश ॥ स्वार्थे तद्धितः ॥ यथा । पतितस्तत्सुतः क्लीबः पङ्गुरुन्मत्तको जडः । अन्धो ऽचिकित्सरोगार्त्तो भर्त्तव्यास्ते निरंशकाः ॥ तेषांपतितवर्जेभ्योभक्तवस्त्रं प्रदीयते ॥

निरंशसूर्य्यः । पुं । राशेः प्रथमभागस्थे भानौ ॥ राशेः प्रथमभागस्थो निरंशःसूर्यउच्यते ॥

निरक्षदेशः । पुं । अक्षदेशे । पलभाशून्यस्थाने ॥ सतुपूर्वेभद्राश्ववर्षेयम कोटिः । दक्षिणे भारतवर्षेलङ्का । पश्चिमे केतुमालवर्षेरोमकः । उत्तरे कुरुवर्षे सिद्धपुरी । एताः भूवृत्तपादविवराः अन्योन्यम् प्रतिष्ठिताः । तासामुपरितो विषुवस्थोदिवाकरोयाति । तासुविषुवच्छाया प्रुवस्योन्नतिश्चनदृश्यते । तत्रदिवामानं रात्रिमानञ्च त्रिंशन्नाडिकाः । इतिसूर्यसिद्धान्तमतमिति राजाराधाकान्तः ॥

निरग्निः । पुं । अग्निसाध्यश्रौतकर्म्मत्यागिनि ॥ निरग्निब्राह्मणाः कलौ ॥

निरङ्कुशः । त्रि । अनिवार्य्ये । अबाधे । बाधाशून्ये ॥ इति जटाधरः ॥

निरञ्जनः । त्रि । अञ्जनशून्ये । धौतकज्जले । निर्मले ॥ अविद्यया अप्रत्यक्षे मनश्चक्षुराद्यविषये परमात्मनि ॥ उपाधि निवर्त्तके ॥ अञ्जनवदञ्जनमज्ञानं मलिनस्वभावत्वात् तन्निर्गतं यस्मात् सः ॥

निरञ्जना । स्त्री । पूर्णिमायाम् ॥ अञ्जनहीनायाम् ॥

निरतः । त्रि । नियुक्ते ॥ यथाषट्कर्मनिरत इति ॥

निरतिशयः । त्रि । अतिशयाभावे ॥ निर्गतः अतिशयो ऽस्मात् ॥

निरत्ययः । त्रि । निर्बाधे ॥ अमायिके ॥ निर्गतो ऽत्ययोयस्य । निष्क्रान्तो ऽ

स्ययाद्वा । निरादय इतिसमासः ॥

निरनुयोज्यानुयोगः । पुं । निग्रहस्थाना भियोगेनिरनुयोज्यानुयोग इति-गौतमलक्षिते अनिग्रहस्थाने ॥ अवसरे यथार्थ निग्रहस्थानोद्भावना तिरिक्तं यन्निग्रहस्थानोद्भावनं तदि त्यर्थः । एतेनानवसरे निग्रहस्थानो द्भावने एकनिग्रहस्थाने निग्रहस्था-नान्तरोद्भावनेच नातिव्याप्तिः । सोयं चतुर्द्धा । छलं जातिराभासोऽनवसरग्रहणञ्च । आभासो व्यभिचारा दावसिद्धाद्युद्भावनम् । अनवसरग्र-हणञ्च अकाले एवोद्भावनम् । यथा त्यक्तसिचेत् प्रतिज्ञाहानिः विशेषय सिचेत् हेत्वन्तरम् । एवमवसरम-तीत्यकथनमपि । यथा । उद्यमा नग्राह्यशापशब्दादेः परिसमाप्तौ । एवमनुक्तग्राह्याचानाद्यननुभाषणा वसरेऽनुद्भाव्यबोधाविष्करणानुभा षणप्रवृत्ते वादिनि तदुद्भावनमि-त्यादिकमूह्यम् ॥ इति ५ध्याये ६५ सूत्रम् ॥

निरन्तरः । त्रि । घने । निविडे । सान्द्रे ॥ निरवधौ ॥ नीरंध्रे ॥ निर्गत मन्तरात् । निर्गतमन्तरमस्मिन्वा ॥

निरन्तराभ्यासः । पुं । स्वाध्याये ॥ सततावर्त्तने ॥ निरन्तरश्चासावभ्या-सश्च ॥

निरपत्रपः । त्रि । धृष्टे । निर्लज्जे ॥ निर्गतोऽपत्रपाया लज्जायाः ॥

निरपेक्षः । त्रि । अपेक्षारहिते । अनपेक्षे ॥ विगतस्पृहे ॥ यथा । निरपेक्षोगृहादियादिति ॥ निर्गताअपेक्षा यस्य ॥ निःसङ्गे ॥

निरयः । पुं । नरके ॥ निर्गतोऽयात् ॥

निरयपतिः । पुं । यमपुरुषे ॥

निरर्गलः । त्रि । अबाधे । अर्गलार-हिते । अनर्गले ॥ निष्क्रान्तमर्गला याः । निरादयइतिसमासः ॥

निरर्थः । त्रि । मोघे ॥

निरर्थकः । त्रि । निष्फले । मोघे ॥ न । निग्रहस्थानविशेषे । निरर्थकंलक्ष यतिगौतमः । वर्णक्रमनिर्देशवन्नि रर्थकम् ॥५१॥ वर्णानां क्रमेण नि र्देशो जवगतेत्यादिप्रयोगस्तत्तुल्यो निर्देशो निरर्थकं निग्रहस्थानम् । अवाचकपदप्रयोगइतिफलितार्थः । वाचकत्वं शक्त्या निरूढलक्षणया शा स्त्रपरिभाषया वा बोध्यम् । समयब न्धव्यतिरेकेणेति विशेषणीयम् । ते न यत्रापभ्रंशेन विचारःकर्त्तव्यइतिस मयबन्धस्तत्रापभ्रंशे नदोषः । जटि तिसंचरणेतु नदोषइत्युतप्रायम् । अस्यसम्भवःप्रमादादित्यवधेयम् ॥

५१ ॥ निर्गतोऽर्थोऽस्मात् ॥

निरवग्रहः । त्रि । स्वच्छन्दे ॥ निष्क्रान्तोऽवग्रहात् नियमनात् । निरादय इति समासः ॥ वृष्टिप्रतिबन्धाभावे ॥

निरवद्यः । त्रि । उत्कृष्टे ॥ वातपित्तादिजन्याध्यात्मिकादितापत्रयरहिते आत्मनि ॥ रागादिशून्ये ॥

निरवयवः । पुं । परमाणौ ॥ त्रि । अवयवहीने ॥

निरवशेषः । त्रि । सर्वस्मिन् ॥

निरवसितः । त्रि । बहिष्कृते । येनभुक्ते पात्रं संस्कारेणापि न शुद्ध्यति तत्र । चाण्डालादौ ॥

निरवहालिका । स्त्री । प्राचीरे ॥ इति शब्दमाला ॥

निरशनम् । न । भोजनाभावे । अनशने ॥ त्रि । तद्वति ॥

निरसनम् । न । प्रतिक्षेपे । प्रत्याख्याने ॥ असुक्षेपणे । ल्युट् ॥ वधे । निसूदने ॥ निष्ठीवने ॥

निरसा । स्त्री । निःश्रेणिकातृणे ॥

निरस्तः । त्रि । निष्ठ्यूते ॥ प्रेषितशरे ॥ द्रुतोदिते । त्वरितोदिते ॥ सन्त्यक्ते ॥ प्रतिहते ॥ प्रत्याख्याते ॥ भर्त्सिते ॥ निरस्यतेस्म । असु० । क्तः ॥

निरस्तदयः । त्रि । निष्कृपे ॥

निरहङ्कारः । त्रि । शरीरेन्द्रियादावयमहमस्मीत्यभिमानशून्ये ॥ विद्यावत्त्वादिनिमित्तात्मसम्भावनाविरहिते ॥

निराकः । पुं । पचने ॥ स्वेदे ॥ असत्कर्मफले ॥ इति हेमचन्द्रः ॥

निराकरणम् । न । निराकृतौ । निवारणे ॥ निराक्रियतेऽनेन । डुकृञ्० । ल्युट् ॥

निराकरिष्णुः । त्रि । क्षिपणौ । निराकरणशीले ॥ निराकरोति तच्छीलः । अलङ्कृञितीष्णुच् ॥

निराकर्त्ता । त्रि । निराकरिष्णौ ॥

निराकारः । त्रि । आकारहीने । देहाद्याकारवर्जिते परमात्मनि ॥ शब्दादिवत् कार्यातिरिक्त दृश्यस्वरूपाभावात् निर्गतःआकारोऽस्मात् । निरादय इति समासः ॥

निराकुलः । त्रि । आकुलताशून्ये ॥

निराकृतः । त्रि । प्रत्याख्याते । निरस्ते ॥ यथा । कैःपुष्पैरर्चतानद्त्वा भृङ्गाभुवि निमन्त्रिताः । केनवाचम्पकेनार्द्धचन्द्रंदत्वानिराकृताइति ॥ निराकारि । कृञः क्तः ॥ निस्सारिते ॥

निराकृतिः । पुं । पञ्चमहायज्ञानुष्ठानरहिते ॥ यस्तुपञ्चमहायज्ञविहीनः सनिराकृतिरितिजटाधरः ॥ तथाच

छन्दोगपरिशिष्टे । निराकर्त्तामरादीनांसविद्मयो निराकृतिरिति ॥ स्त्री । निरसने । निराकरणे ॥ निराकरणम् । डुकृञ्० । स्त्रियांक्तिन् ॥ त्रि । अनाकारे ॥ अस्वाध्याये ॥ आकृते रध्ययनचेष्टाया निर्गतः । आकृते र्जातेर्वा निर्गतः । अनधीत्यद्विजोवेदमन्यत्रकुरुते श्रमम् । सजीवन्नेव शूद्रत्वमाशुगच्छति सान्वयः ॥ वारणे । निषेधे ॥

निरागमः । पुं । आगममूलविकले तर्के ॥ तर्कमात्रोपजीविषु बौद्धकापादसांख्यादिषु ॥

निराचारः । त्रि । अनाचारे । आचारशून्ये ॥ निर्नविद्यते आचारो यस्यसः ॥

निरातङ्कः । पुं । शिवे ॥ निर्गते आतङ्कतापशङ्के यस्मात् ॥ त्रि । आतङ्कहीने ॥

निरातपा । स्त्री । रजन्याम् ॥ त्रि । आतपशून्ये ॥

निरादेशः । त्रि । वार्त्तासञ्चाररहिते ॥

निराधारः । त्रि । आश्रयशून्ये ॥

निरावाधः । त्रि । पत्ताभावविशेषे ॥ यथा । अप्रसिद्धं निरावाधं निरर्थं निष्प्रयोजनम् । असाध्यं वा विरुद्धं वा पत्ताभासंविवर्जयेदिति ॥ निरावाधम् अस्मत्कृष्णप्रदीपप्रकाशेनायं स्वगृहेव्यवहरतीतिमिताचरा ॥

निराभासः । पुं । वृत्तिव्याप्यत्वेपि फलव्याप्यत्वशून्ये परमात्मनि ॥ नितरामाभिमुख्येन भासते । भास्॰ । पचाद्यच् ॥ त्रि । निष्प्रतिविम्बे ॥

निरामयः । पुं । दुर्भिक्षे । वनच्छगले ॥ शूकरे ॥ त्रि । नीरुजि । वार्त्ते । रोगरहिते ॥ निष्क्रान्तआमयात् । निरादयइतिसमासः ॥ निर्गतआमयो व्याधिर्यस्माद्वा ॥

निरामालुः । पुं । कपित्थे ॥

निरामिषः । त्रि । विषयाभिलाषरहिते ॥ आमिषशून्ये ॥

निरामिषाशी । त्रि । अमांसाशिनि ॥

निरालम्बः । त्रि । आश्रयशून्ये । निराश्रये । निर्विषये ॥

निरालम्बनत्वम् । न । देहानुसन्धानराहित्यतायाम् ॥

निरालम्बा । स्त्री । आकाशमांस्याम् ॥

निराशः । त्रि । आशाशून्ये ॥

निराशी । त्रि । वैराग्यदार्ढ्येन विगततृष्णे ॥ निष्कामे ॥ निर्गताःआशिषःकामना यस्मात् ॥

निराश्रयः । त्रि । देहेन्द्रियाद्यभिमानशून्ये ॥ आश्रयोदेहेन्द्रियादिः अद्वैतदर्शनेन निर्गतो यस्मात् ॥ आ-

श्रयविहीने ॥ निर्गतः आश्रयो यस्मात् यस्यवा ॥

निरासनम् । न । निरसने ॥ निराङ्पूर्वासधातोर्ल्युट् ॥ आसनाभावे ॥ त्रि । तद्वति ॥

निराहारः । त्रि । आहाररहिते ॥

निरिङ्गिणी । स्त्री । तिरस्करिण्याम् । पत्याम् । यवनिकायाम् ॥

निरिन्द्रियः । त्रि । प्रजननासमर्थे । जीर्णे । इन्द्रियशून्ये ॥

निरीक्षणम् । न । दर्शने ॥

निरीक्षितः । त्रि । अवलोकिते ॥

निरीशम् । न । फाले । फले । यत्रकाष्ठे फालो निबध्यते तत्र । फालाधारे ॥ इत्यमरः ॥ ईशाया निर्गतः । निरादय इति समासः ॥ त्रि । ईशशून्ये ॥ नास्तिके ॥

निरीषम् । न । फले । फालाधारे । निरीशे ॥ इतिभरतोमरटीकाकृत् ॥ निष्क्रान्माईषा ऽस्मात् । निरादय इति समासः ॥

निरीहः । त्रि । निराकाङ्क्षे । प्राप्तसमस्तैश्वर्ये ॥ निरीहस्य तृणं नृपः ॥ ईहारहिते ॥ पुं । विष्णौ ॥

निरुक्तम् । न । वेदाङ्गविशेषे ॥ यथा । ज्योतिषामयनं नेत्रं निरुक्तंश्रोत्रमुच्यत इतिस्मृतिः ॥ पदभञ्जने ॥ देवविद्यायाम् ॥ त्रि । निर्वचने ॥ स्पष्टे ॥ कथिते ॥ निश्चयेनोक्तोर्थोनेन । वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेनयोग स्तदुच्यतेपञ्चविधं निरुक्तम् ॥

निरुक्तिः । स्त्री । निर्वचने ॥ निश्चितोक्तिः ॥

निरुद्धम् । न । ध्येयाकारवृत्तेर्निरोधे ॥ निरुद्धंचित्तं पञ्चमी चित्तस्य असम्प्रज्ञातसमाधिभूमिः । तदुक्तम् । तस्यापिनिरोधे सर्ववृत्तिनिरोधान्निर्बीजः समाधिरिति ॥ त्रि । संरुद्धे । रोधविशिष्टे ॥ निश्चयेनरुद्धम् ॥

निरुद्धप्रकाशः । पुं । मेढ्रजातक्षुद्ररोगविशेषे ॥ इति भावप्रकाशः ॥

निरुद्योगः । त्रि । उद्योगाभावविशिष्टे । निरुद्यमे ॥

निरुपद्रवः । त्रि । उत्पातरहिते ॥

निरुपप्लवः । त्रि । निर्बाधे ॥ निर्गत उपप्लवो यस्मात् ॥

निरुपमः । त्रि । अनुपमे । उपमाशून्ये ॥ निर्गता उपमासादृश्यं यस्यसः ॥

निरुपाख्यः । त्रि । असति ॥ वाचोमनसश्चागोचरे विषयतयोल्लेखायोग्ये ॥ निर्गतः उपाख्यायाः प्रत्यक्षत उपलब्धेः ॥ अस्फुटस्वरूपे ॥

निरुपेक्ष: । चि । अनपेक्षे । उपेक्षारहिते ॥ निर्गता उपेक्षा औदासीन्यं यस्मात् ॥

निरुप्त: । चि । यज्ञादौ भागश: पृथक्कृते ॥

निरूढ: । पुं । निरूढलक्षणाके शब्दे ॥ यथा । पूर्वस्वामिसम्बन्धाधीनं तत् स्वाम्युपरमे यद्द्रव्ये स्वत्वं तत्र निरूढोदायशब्द इतिदायभाग: ॥

निरूढलक्षणा । स्त्री । शक्तितुल्यलक्षणायाम् ॥ यथा । निरूढलक्षणा: काश्चित् काश्चिन्नैवत्वशक्तित इतिकाव्यप्रकाशटीकायां महेश्वर: ॥

निरूढा । स्त्री । लक्षणाविशेषे ॥

निरूढि: । स्त्री । प्रसिद्धौ ॥

निरूपणम् । न । आलोके ॥ विचारे ॥ निदर्शने ॥ इतिमेदिनी ॥ ज्ञानानुकूले शब्दे ॥

निरूपित: । चि । नियुक्ते ॥ कृतनिरूपणे ॥ उपकल्पिते ॥

निरूह: । पुं । वस्तिभेदे ॥ यथा । वस्तिर्द्विधाऽनुवासाख्यो निरूहश्चेति संज्ञित: । य:स्नेहैर्दीयते स स्यादनुवासननामक: । कषायक्षीरतैलैर्यो निरूह:सनिगद्यते इति ॥ निग्रहे ॥ तर्के ॥ चि । ऊहशून्ये ॥ निश्चिते ॥

निरेना: । चि । निष्पापे ॥

निरेभ: । चि । नि:शब्दे ॥

निरोध: । पुं । नाशे ॥ रोधे ॥ निरोधनम् । रुधिर्° । घञ् ॥ प्रलये ॥ निग्रहे ॥

निरोधनम् । न । निरोधे । प्रत्युपवेशने ॥ कारागारप्रवेशने ॥ रुधिर् आवरणे । ल्युट् ॥

निरोद्धव्य: । त्रि । रक्षणीये ॥

निर्ऋति: । पुं । दिक्पालविशेषे । नैर्ऋतकोणाधिपतौ ॥ स्त्री । अलक्ष्म्याम् ॥ नियताऋतिर्ष्टणायत्र । निर्गता ऋते: शुभादितिवा ॥ त्रि । निरुपद्रवे ॥

निर्ऋथ: । पुं । सामवेदे ॥ निरन्तरम् ऋच्छति । ऋगतिप्रापणयो: । अर्त्तेर्निरीतिथक् ॥ निर्ऋथोहिंसेति वेदभाष्यम् ॥

निर्ग: । पुं । देशे ॥ इतिहेमचन्द्र: ॥

निर्गत: । त्रि । नि:सृते । वहिष्प्राप्ते ॥ निर्मुक्ते ॥ नितराङ्गत: ॥

निर्गन्ध: । त्रि । गन्धशून्ये ॥

निर्गन्धनम् । न । मारणे ॥ गन्धअर्दने । भावे ल्युट् ॥

निर्गन्धपुष्पी । स्त्री । शाल्मलिद्रुमे ॥

निर्गम: । पुं । नि:सरणे ॥ निर्गमनम् । गम्लृ° । ग्रहवृद्रिच्यप् ॥

निर्गमनम् । न । प्रतीकारे । द्वारि ॥

निर्गमनद्वारम् । न । नैर्बाह्यिके ॥

निर्गुणः । पुं । परमात्मनि । परमानन्दे ॥ त्रि । परमार्थतः सत्त्वरजस्तमोगुणरहिते ॥ रूपादिगुणहीने ॥ निर्धर्मके ॥ निर्गताः गुणाः सत्त्वादयो रूपादयो वा यस्मात् ॥ विद्यादिशून्ये ॥

निर्गुणा । स्त्री । गुणचयोपचयापचयरहितसाम्यावस्थमायोपाधिकब्रह्मरूपिण्यां शक्तौ ॥

निर्गुण्डी । स्त्री । नीलशेफाल्याम् ॥ सिन्दुवारे । संभालू इति भाषा । निसिन्दा इति गौडभाषा ॥ श्वेतनीलपुष्पभेदा निर्गुण्डी द्विविधा मता ॥ अजकन्दे । करहाटे ॥ निर्गुडति । गुडरक्षायाम् । इगुपधेतिकः । पृषोदरादिः ॥ गुडाद्वेष्टनान्निर्गतेति स्वामी । गौरादिः ॥

निर्गूढः । पुं । वृक्षकोटरे ॥ त्रि । संवृते ॥

निर्ग्रन्थः । पुं । नग्ने । क्षपणके ॥ निःस्वे । निर्द्धने ॥ वालिशे । मूर्खे ॥ द्यूतकारे ॥ ग्रन्थेभ्योनिर्गतः ॥ मुनौ ॥ त्रि । निर्वेदङ्गते ॥ निःसहाये । निवृत्तहृदयग्रन्थाविति श्रीधरस्वामी ॥

निर्ग्रन्थकः । पुं । क्षपणे ॥ निष्फले ॥ त्रि । अपरिच्छदे ॥

निर्ग्रन्थनम् । न । मारणे ॥ ग्रथिकौटिल्ये । भावे ल्युट् ॥

निर्ग्रन्थिकः । पुं । क्षपणे ॥ त्रि । निपुणे ॥ हीने ॥

निर्ग्राह्यः । त्रि । निश्चेतुं शक्ये ॥

निर्घटम् । न । बहुमनुजसङ्कीर्णहट्टे ॥ इतिहारावली ॥ करशून्यहट्टे ॥ घटशून्ये ॥

निर्घण्टः । पुं । निघण्टौ । निर्घण्टने । गणसङ्ग्रहे । ग्रन्थानां सूचीतिख्याते ॥

निर्घातः । पुं । वाय्वभिहतवायुप्रपतनजन्यशब्दविशेषे ॥ यथाह वराहः । पवनः पवनाभिहतो गगनादवनौ यदा समापतति । भवति तदा निर्घातः सच पापो दीप्तविहगरुतः ॥ १ ॥ अथ वेलादर्शनफलम् । अर्कोदयेऽधिकरणिकन्पधनियोधाङ्गनावणिग्वेश्याः । आप्रहरांशेऽजाविकमुपहन्याच्छूद्रपौरांश्च ॥ २ ॥ आमध्याह्नाद्राजोपसेविनो ब्राह्मणांश्च पीडयति । वैश्यजलदां स्तृतीये चौरान्प्रहरे चतुर्थे तु ॥ ३ ॥ अस्तं याते नीचान् प्रथमे यामे निहन्ति सस्यानि । रात्रेर्द्वितीययामे पिशाचसङ्घान्निपीडयति ॥ ४ ॥ तुरगकरिणः तृतीये विनिहन्याद्यायिन श्च

तुर्थेच । भैरवजर्जरशब्दे। याति य
त स्तां दिशंहन्ति ॥ ५ ॥ भूम्यन्तरी
क्षगतउत्पातध्वनिरेवायम्॥ निरव्
भ्रवज्रपाते ॥ यदान्तरीक्षेबलवान्
मारुतोमरुताहतः । पतत्यधःसनि
र्घातोजायतेवायुसम्भवइति ज्योति-
षम् ॥

निर्घृणः । त्रि । निर्दये ॥

निर्घोषः । पुं । शब्दमात्रे ॥ निर्घोषण
म् । घुषघुष्टौ । निष्पूर्वात् घञ् ॥

निर्ज्जनः । त्रि । विविक्ते । जनैरना
कीर्णे ॥

निर्ज्जरः । पुं । देवे । सुरे ॥ जरायानि
ष्क्रान्तः । निरादयःक्रान्ताद्यर्थेपञ्च
म्याइतिसमासः ॥ अनेकान्तवादिनां
सप्तपदार्थेषुपदार्थविशेषे ॥ तत्पशि
लाशयनकेशोल्लुञ्चनादितपःसञ्चय
निर्जीर्णवीर्यैकर्मनिर्जरशब्देन तैरु-
च्यते ॥ त्रि । जरारहिते ॥ न । सु
धायाम् ॥

निर्ज्जरसर्षपः । पुं । देवसर्षपवृक्षे ॥

निर्ज्जरा । स्त्री । गुडूच्याम् ॥ तालप
र्ण्याम् ॥

निर्ज्जलः । त्रि । जलहीनदेशादौ ॥
यथा। सम्प्राप्तादशमध्वजातुगतिना
सम्मूर्छितानिर्जले तुर्यदादशवह्नि
तीयमतिमस्तेकादशाभस्मनी । सा

षष्ठी न्टपपञ्चमस्यनवमभूःसप्तमी
वर्जिता प्राप्नोत्यष्टमवेदनांप्रथमहे
तस्यास्तृतीयोभवेतिवल्लालसेनः ॥

निर्ज्जला । स्त्री । ज्येष्ठशुक्लैकादश्या
म्॥ यथाहव्यासोभीमसेनं प्रति ।
वृषस्थेमिथुनस्थेऽर्केशुक्लाह्येकादशी
ह्यिया। ज्येष्ठे मासिप्रयत्नेन सोपास्या
जलवर्जिता ॥ स्नानेचाचमनेचैव व
र्जयित्त्वोदकंबुधः । उपयुञ्जीत नैवा
न्यद्व्रतभङ्गोऽन्यथा भवेत् ॥ उद-
यादुदयं यावद् वर्जयित्त्वाजलंबुधः ।
अप्रयत्नादवाप्नोति द्वादशद्वादशीफ
लमिति ॥

निर्ज्जितः । त्रि । वशीकृते ॥ विजिते।
प्राप्तपराजये । पराभूते ॥ नितरां-
जितः ॥

निर्ज्जितेन्द्रियग्रामः । त्रि । यतौ ॥ इ
न्द्रियाणाङ् ग्रामः । निर्जितइन्द्रिय
ग्रामो येन ॥

निर्ज्जीवः । त्रि । जीवात्मरहिते ॥ प्रा
णिशून्ये ॥

निर्झरः । पुं । झरे । पर्वतान्निस्सृतज
लप्रवाहे । झर्ना इतिभाषा ॥ निर्झ
रणम् । झृष्वयोहानौ । ऋदोरप्
॥ सहस्रांशुतरङ्गे ॥ तुषाग्नौ ॥

निर्झरिणी । स्त्री । नद्याम् ॥

निर्झरी । पुं । शैले । पर्वते ॥ निर्झ

रा:सन्त्यस्याम् । मत्वर्थीय इनिः ॥

निर्झरी । स्त्री । नद्याम् ॥ निर्झरे ॥

निर्णतोदरी । स्त्री । लम्बोदर्याम् ॥ तनुमध्यायाम् ॥ नितरां नतं नम्रमुदरं यस्याः ॥

निर्णयः । पुं । विचारे । तर्के । चर्चायाम् ॥ अवधारणे । निश्चये ॥ विरोधपरिहारे ॥ परस्परविरुद्धार्थानां स्मृत्यादिवाक्यानां विरोधपरिहारे शास्त्रार्थावधारणं निर्णयः । उक्तञ्च । तत्त्वे विप्रतिपन्नानां वाक्याना मितरेतरम् । विरोधपरिहारो ऽथ निर्णय स्तत्त्वदर्शनमिति ॥ निर्णय एव तत्त्वदर्शनमित्यर्थः ॥ निर्णयनम् । णी ञ° । भावे एरच् । उपसर्गादसमासे ऽपीति णत्वम् ॥ अधिकरणविशेषे ॥ न्यायमते तदभावाप्रकारकत्वे सति तत्प्रकारकज्ञानं निर्णयः । यथा । वह्निमान् पर्वत इत्यादिबोधः ॥ इतिभाषा प° ॥ तद्धर्मावच्छिन्नप्रकारत्वान्यप्रकारत्वानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिज्ञानमिति जगदीशः ॥ अस्य लक्षणमाह गौतमः ॥ यथा । विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥ ४° ॥ विमृश्य सन्दिह्य पक्षप्रतिपक्षाभ्यां साधनोपालम्भाभ्याम् उपालम्भः परपक्षदूषणम् अर्थस्यावधारणम् तदभावाप्रकारकं तत्प्रकारकं ज्ञानम् । यद्यप्येतावदेव निर्णयसामान्यलक्षणं तथापि विमृश्येत्यादिकं जल्पवितण्डाशून्यस्थलीयनिर्णयमधिकृत्य । तदुक्तम्भाष्ये । शास्त्रेवादे च विमर्शवर्जमिति । एवं प्रत्यक्षतः शब्दाच्च निर्णये न विमर्शपक्षप्रतिपक्षापेक्षेति ॥ ४° ॥ चतुष्पाद्व्यवहारान्तर्गते शेषपादे । फैसला इति डिगरी इतिचेतरभाषा ॥

निर्णयनम् । न । निर्णये ॥

निर्णयपादः । पुं । चतुष्पाद्व्यवहारान्तर्गतव्यवहारविशेषे ॥ तस्यस्वरूपं यथा । मिलितानां सभासदां पराजितोऽयमित्यवधारणमिति व्यवहारतत्त्वम् ॥

निर्णायनम् । न । गजापाङ्गदेशे । निर्याणे ॥

निर्णिक्तः । त्रि । शोधिते । अपनीतमले ॥ निर्णिज्यतेस्म । णिजिर् शौचपोषणयोः । क्तः ॥ जलदेवगृहस्यैव श्मशानं गोद्विजालयम् । निर्णिक्तपादः प्रविशेन्नानिर्णिक्तः कदाचनेति स्मृतिः ॥

निर्णीतः । त्रि । कृतनिर्णये । निश्चयी कृते ॥ यथा । निर्णीतेव्यवहारे तु प्र

भागमफलंभवेत् । लिखितंसाक्षिणोवापि पूर्वमावेदितंनचेत्॥ यथा पक्केषुधान्येषु निष्फलाःप्रावृषोगुणाः। निर्णीतव्यवहाराणां प्रमाणमफलंतथेतिव्यवहारतत्त्वम् ॥

निर्णेजकः । पुं । रजके ॥ निर्णेनेक्ति । णिजर्० । ण्वुल् । उपसर्गादसमासेऽपीतिणत्वम् ॥

निर्णेजनम् । न । क्षालने ॥ निर्णिजेल्युट् ॥

निर्णेता । त्रि । प्रतिभुवि ॥

निर्दटः । त्रि । दयाहीने । निर्दये ॥ निष्प्रयोजने ॥ परापवादरक्ते । अन्यदोषरते ॥ मत्तेतीव्रेपीतिशब्द०॥

निर्दयः । त्रि । दयाहीने ॥ निर्गता दया यस्मात् ॥

निर्दरम् । न । निर्भये ॥ सारे ॥ त्रि । कठिने ॥ अचये ॥ इतिमेदिनिकरः॥ निर्गतः दरोयस्मात् ॥

निर्दहनः । पुं । भल्लातके ॥ अग्निशून्ये ॥

निर्दहनी । स्त्री । मूर्वालतायाम् ॥

निर्दाता । त्रि । लवनकर्त्तरि ॥ यथो इरति निर्दाता कक्षं धान्यञ्च रक्षतीतिमनुः ॥

निर्दिग्धः । त्रि । बलिनि । मांसले ॥ इति हेमचन्द्रः ॥

निर्दिश्यमानः । त्रि । उच्चार्यमाणे ॥

निर्दिष्टः । त्रि । प्रदिष्टे । प्रदर्शिते ॥ कथिते ॥ निश्चिते ॥

निर्देशः । पुं । निदेशे । शासने । आज्ञायाम् ॥ निर्देशनम् । दिश० । घञ् ॥ निर्दिश्यतेऽभिधीयतेऽनेनेतिव्युत्पत्त्या प्रतिपादकशब्दे । नाम्नि ॥ भृतौ ॥ नाभिनन्देत मरणं नाभिनन्देत जीवितम् । कालमेव प्रतीक्षेत निर्देशं भृतकोयथा ॥ व्यवहारे ॥ कथने ॥ उपान्ते ॥ देशान् निष्क्रान्ते ॥ निरव वहिर्भावे ॥

निर्देश्यः । त्रि । निर्देष्टुंशक्ये ॥

निर्देष्टा । त्रि । निर्देशकर्त्तरि ॥

निर्दोषः । त्रि । दोषरहिते ॥ यथा । निर्दोषं दर्शयित्वातु सदोषंयः प्रयच्छति । समूल्याद्द्विगुणंदाप्यो विनयंतावदेवत्विति मिताक्षरा ॥

निर्द्धनः । पुं । जरद्गवे ॥ त्रि । धनहीने॥

निर्द्धर्म्मः । त्रि । धर्मरहिते ॥

निर्द्धारः । पुं । निश्चये ॥

निर्द्धारणम् । न । जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक् करणं ॥ तद्यतश्चनिर्द्धारणइतिषष्ठीसप्तमीच विभक्तिर्भवति । यथा । मनुष्याणां मनुष्येषुवा क्षत्रियःशूरतमः । गवांगोषुवा कृष्णासम्पन्नक्षीरा

। अध्वगानामध्वगेषु वा धावन्तः शीघ्रतमा इति ॥ निश्चये ॥

निर्द्धारणीयः । त्रि । निर्द्धार्य्ये । निर्द्धारितव्ये ॥

निर्द्धारितः । त्रि । कृतनिश्चये ॥

निर्द्धार्य्यः । त्रि । निर्द्धारणीये ॥ निःशङ्कं कर्म्मकर्त्तरि ॥ निर्द्धार्य्यः कार्य्यकर्त्ता यः संयतन् सत्त्वसम्पदा । व्यसनेऽभ्युदयेवापि ह्यविकारं सदामनः । तत्तुसत्त्वमिति प्रोक्तम् ॥ तत् सम्पदा संयतन् उद्यमं कुर्व्वन्नित्यर्थः । संयुत इतिवा पाठः ॥ निश्चयेनध्रियते । धृञ्० । कर्म्मणोर्य्यत् ॥

निर्द्धूतः । त्रि । खण्डिते । परित्यक्ते ॥ नितराङ्कम्पिते ॥ समुन्मूलिते ॥

निर्द्धौतः । त्रि । प्रक्षालिते ॥ धावेः कर्म्मणि क्तः । च्छोरितिवकारस्योठादेशः । एत्येधत्यूठ् स्वितिवृद्धिः ॥

निर्ध्यानम् । न । निध्याने ॥ दर्शने ॥ ध्यैचिन्तायाम् । ल्युट् ॥

निर्द्वन्द्वः । त्रि । शीतोष्णादिद्वन्द्वसहिष्णौ ॥ रागद्वेषादिद्वन्द्वरहिते ॥ निर्गतोद्वन्द्वात् द्वन्द्वेभ्योवा ॥

निर्ब्बन्धः । पुं । आग्रहे । अभिनिवेशे ॥ वपुर्व्वाग्धीषु निर्व्वन्धः कर्म्मिणो नतु साक्षिणि । ज्ञानिनः साक्ष्यलेपत्वेनिर्व्वन्धो नेतरत्रहि ॥ निश्चयेनवन्धः ॥

निर्ब्बाधः । त्रि । निरुपद्रवे ॥ विविक्ते ॥

निर्भटः । त्रि । दृढे ॥

निर्भयः । पुं । अजानेये ॥ हयोत्तमे ॥ त्रि । भीतिरहिते ॥ निर्गतं भयं यस्मात् यस्य वा ॥

निर्भरम् । न । अतिमात्रे ॥ निःशेषेण भरोभारोऽत्र । उपसर्गान्तरनिवृत्त्यर्थं निर्भरमित्युक्तम् ॥ त्रि । तद्वति ॥

निर्भर्त्सनम् । न । खण्डीकारे ॥ अलक्तके ॥ इतिमेदिनी ॥

निर्भर्त्सितः । त्रि । धिक्कृते । निन्दिते । कृतनिर्भर्त्सने ॥

निर्भाग्यः । त्रि । भाग्यहीने । मन्दे । मूढे ॥

निर्भाज्यः । त्रि । पृथक्कार्य्ये ॥

निर्भिन्नः । त्रि । नितरांदारिते ॥

निर्भिन्नचिर्भिटः । पुं । निर्भिन्नकर्कटीसस्ये । फूट इतिभाषा ॥

निर्भीकः । त्रि । निर्भये ॥

निर्म्मक्षिकम् । अ । मक्षिकाणामभावे ॥

निर्म्मटः । पुं । हट्टे ॥

निर्म्मथनम् । न । नितरांविलोडने ॥ अतिनिर्मथना दग्निश्चन्दनादपि जायते । विषायतेऽमृतमपि ययापथ्यं मुमूर्षतः ॥

निर्म्मदः । पुं । मदहीनगजे । उद्रान्ते

॥ मदान्निर्गतः । निर्गतामदो ऽस्मादा ॥

निर्म्मन्था । स्त्री । नलिकायाम् ॥

निर्म्मन्थ्यदारु । न । अरणौ । वह्निमन्थे ॥

निर्म्ममः । त्रि । भिक्षौ ॥ देहेपिममेति प्रत्ययरहिते ॥ शरीरयात्रामात्रार्थेपिप्रारब्धकर्माक्षिप्तकौपीनाच्छादनादौममेदमित्यभिमानहीने ॥ देहपुत्रभ्रात्रादिषु स्वीयेषुममताशून्ये ॥

निर्म्मर्य्यादः । त्रि । अविनीते ॥ निर्गतोमार्यादायाः ॥

निर्म्मलम् । न । निर्माल्ये ॥ अभ्रके ॥ त्रि । मलहीने । शुद्धे ॥ रजस्तमोमलामिश्रिते ॥ रागादिमलरहिते ॥ अविद्यातत्कार्यलक्षणमलरहिते ॥ मलान्निर्गतम् । निर्गतं मलमस्मादा ॥

निर्म्मलोपलः । पुं । स्फटिके ॥

निर्म्माणम् । न । निर्मितौ ॥ सारे ॥ समञ्जसे ॥ कामभेदे ॥ इतिहेमचन्द्रः ॥

निर्म्माता । त्रि । निर्माणकर्त्तरि ॥ निर्माति । माङ्माने । तृच् ॥

निर्म्मानः । त्रि । मानरहिते ॥ निर्गतोमानात् ॥

निर्म्मानमोहः । त्रि । मानमोहाभ्यांनिष्क्रान्ते । अहङ्काराविवेकाभ्यां रहिते ॥

निर्म्माल्यम् । न । देवार्पितोज्झिते । देवोच्छिष्टद्रव्ये ॥ यथा । अर्वाग्विसर्जनाद्द्रव्यं नैवेद्यं सर्वमुच्यते । विसर्जिते जगन्नाथे निर्माल्यं भवतिक्षणादिति ॥ त्रि । माल्यशून्ये ॥

निर्म्माल्या । स्त्री । पृक्कायाम् ॥

निर्म्मितः । त्रि । कृतनिर्माणे । निष्पादिते । रचिते ॥

निर्म्मितकः । त्रि । मन्त्रौषध्यादिभिर्निष्पादिते ॥

निर्म्मितिः । स्त्री । निर्माणे । रचनायाम् ॥ असाधारणचमत्कारकारिणीरचनाहिनिर्मितिरितिव्याख्यातारः ॥

निर्म्मुक्तः । पुं । मुक्तकञ्चुके भोगिनि ॥ त्रि । त्यक्तसङ्गे । निष्परिग्रहे ॥

निर्म्मुक्तिः । स्त्री । निवृत्तौ ॥

निर्म्मुटः । पुं । वनस्पतौ । अपुष्पवृक्षे ॥ खर्परे ॥ सूर्ये ॥ न । करशून्येहट्टे । पण्याजिरे ॥

निर्म्मोकः । पुं । मोचने ॥ व्योम्नि ॥ सन्नाहे ॥ सर्पकञ्चुके । अहिकोषे ॥ निश्चयेनमुच्यते । मुचृल० । कर्मणिघञ् ॥

निर्म्मोचः । पुं । त्यागे ॥ मोक्षाभावे ॥

निर्य्यत् । चि । निर्गच्छति ॥

निर्य्यन्त्रणः । त्रि । विशृङ्खले । अबाधे । निरर्गले । स्वच्छन्दे ॥

निर्य्याणम् । न । वारणापाङ्गदेशे ॥ मोक्षे ॥ अध्वनिर्गमे ॥ पशूनांपादबन्धनदामनि ॥ निर्याण्यनेन । याप्रापणे । ल्युट् ॥

निर्य्यातनम् । न । वैरशुद्धौ । दाने । त्यागे ॥ न्याससमर्पणे ॥ यतनिकारादौ । स्वार्थण्यन्तः । भावकर्मकरणादौ ल्युट् ॥ मारणे ॥ इतिहेमचन्द्रः ॥

निर्य्यामः । पुं । पोतवाहे ॥ इ० हे० ॥

निर्य्यासः । पुं । कषाये । क्काथे । क्कथितद्रव्यरसे ॥ वृक्षद्रवे । वृक्षान्निर्गत्यकठिनतांयातेरसविशेषे । वेष्टके । गूंद इतिभाषा ॥

निर्य्युक्तिकः । त्रि । युक्तिरहिते ॥ यथा । नहिक्रियारहितं वाक्यमस्तीतिप्राचां प्रवादोनिर्युक्तिकत्वादश्रद्धेयइति शब्दशक्तिप्रकाशिका ॥ निर्युक्तिकं ब्रुवाणास्तुनास्माभिर्विनिवार्यन्ते इतिन्यायः ॥

निर्य्यूषः । पुं । निर्यासे ॥ इतिश० मा० ॥

निर्य्यूहः । पुं । आपीडे । शेखरे ॥ द्वारे ॥ निर्यासे ॥ नागदन्तके ॥ निर्यूहति । यूहलैकिकोधातुः । इगुपधेतिकः ॥ निरूहइतिवा । पृषोदरादित्वात् धातोर्यडागमः ॥ मत्तवारणे ॥

निर्य्योगः । पुं । गोःपादबन्धनरज्जौ ॥ निर्युज्यतेगौरनेन । युजिर् ० । घञ् ॥

निर्ल्लक्षणः । त्रि । लक्षणहीने । पाण्डुरपृष्ठे ॥ इतिहेमचन्द्रः ॥

निर्ल्लिप्तः । पुं । श्रीकृष्णे ॥ त्रि । लेपरहिते ॥

निर्ल्लेखनम् । न । कर्षणे ॥

निर्ल्लेपः । त्रि । लेपवर्जिते ॥ शुद्धे ॥ आसङ्गरहिते ॥ पापशून्ये ॥

निर्ल्लोडितः । त्रि । आलोकिते ॥

निर्ल्वयनी । स्त्री । सर्पत्वचि । कञ्चुके ॥ यस्यांत्वचिसर्पोनितरां लीयते सा निर्ल्वयनीसर्पत्वगितिव्याख्यातारः ॥

निर्व्वचनम् । न । निरुक्तौ । शब्देनाभिधाने ॥ निश्चितं वचनम् ॥

निर्व्वपणम् । न । दाने । अन्नादीनां संविभागे ॥ टुवप् ० । भावेल्युट् ॥

निर्व्वरः । त्रि । निर्द्दरार्थेषु । इतिहेमानेकार्थः ॥

निर्व्वर्णनम् । न । दर्शने ॥ वर्णशब्दात् सत्यापेतिणिच् । ल्युट् ॥

निर्व्वर्त्तयन् । त्रि । कुर्वति ॥

निर्व्वर्त्तितः । त्रि । निष्पादिते ॥

निर्व्वहणम् । न । नाट्योक्त्या प्रस्तुतकथासमाप्तौ । प्रकृताभिनयस्य निर्वाहे । निर्वायाम् ॥ निर्वाहोनिर्वहणम् ।

वहेर्ल्युट् ॥ नाटकसन्ध्यन्तरे ॥ यथा । मुखं प्रतिमुखञ्चैव गर्भो विमर्ष एवच । तथा निर्वहणञ्चेतिनाटके पञ्चसन्धयइतिभरतः ॥

निर्वहणा । स्त्री । निष्ठायाम् । प्रकृताभिनयनिर्वाहे । निर्वहणे ॥ टाप् ॥

निर्व्वहिता । त्रि । निर्वोढरि ॥

निर्व्वाणम् । न । अस्तङ्गमने । विनाशे ॥ निर्वृतौ ॥ गजमज्जने ॥ सङ्गमे ॥ मोक्षे । अपवर्गे ॥ यथा । यतितव्यं समत्वेन निर्वाणमपिचेच्छतेति ॥ समत्वयुक्तैर्निर्वाणं फलमुक्तंश्रुतौस्मृतौ ॥ सर्वदुःखोपशमलक्षणं परमानन्दरूपं निर्वाणमितिभाष्यकाराः । सर्वदुःखोपशमात्मकत्वान्निरतिशयानन्दरूपत्वाच्च परमपुरुषार्थकैवल्यरूपंब्रह्मनिर्वाणमित्युच्यतइति व्याख्याकारः ॥ अपुण्यपुण्योपरमेयंपुनर्भवनिर्भयाः । शान्ताःसन्यासिनोयान्तितस्मैमोक्षात्मने नमइतिविष्णोर्निर्वाणरूपत्वेभारतवचनम् ॥ निश्चले ॥ शून्ये ॥ विश्रान्ते ॥ अपवर्गसाधनग्रन्थविशेषे ॥ विद्योपदेशने ॥ आदिगुरुविकले (ऽ) ॥ त्रि । मुक्ते ॥ शान्ते मुनिवह्न्यादौ । चरमावस्थमुनौ ॥ चरमावस्थवह्नौ ॥ इन्धानिर्गमनं निर्वाणम् । गन्धर्थक

वाधातोर्भावेल्युट् ॥ निर्वातिस्म । वा गतिगन्धनयोः । गत्यर्थेतिक्तः । निर्वाणोऽवातइतिसाधु ॥ आदिना निर्वाणोहस्तीनिमग्नइत्यर्थः । आदिना निर्वाणंमुक्तिर्निर्वृतिश्चेत्यपिवदन्ति ॥ यथा । प्रियदर्शनमेवास्तुकिमन्यैर्दर्शनान्तरैः । निर्वाणमाप्यते येन सरागेणापिचेतसेति ॥

निर्व्वाणमस्तकः । पुं । मुक्तौ ॥ इतित्रिकाण्डशेषः ॥

निर्व्वातः । त्रि । वायुरहिते ॥ निर्वातिस्म । वा० । गत्यर्थेतिक्तः ॥ नितरांवातोगतो वा ॥

निर्व्वादः । पुं । लोकवादे ॥ परिनिष्ठितवादे ॥ अपवादे ॥ निर्वदनम् । वदव्यक्तायांवाचि वदअभिवादनकुत्योर्वा । निष्पूर्वाद्वदेर्भावेघञ् ॥

निर्व्वापः । पुं । निवापे ॥

निर्व्वापणम् । न । वधे ॥ दाने ॥ टुवप० । स्वार्थण्यन्तः । ओवैशोषणे वा । ल्युट् ॥

निर्व्वाप्यः । त्रि । कर्त्तव्ये ॥

निर्व्वार्य्यः । त्रि । निःशङ्कङ्कर्मकृति । सत्वसम्पद्रासम्पतन्कार्यकर्त्तरि ॥ भयविक्रमयसनाभ्युदयादौनिर्विकारं मनःसत्वम् ततसम्पदासम्पतन् उद्यमंकुर्वन् यो निश्शङ्कोभूत्वाकर्मकृ

रते सनिर्वार्यउच्यते ॥ निश्चयेनव्रियते । वृञ० । कर्म्मणिल्युट् ॥

निर्व्वासनम् । न । मारणे । हिंसने ॥ नगरादेर्वहिष्कृतौ ॥ वासच्छेदे । चुरादिः । भावेल्युट् ॥

निर्व्वासितः । त्रि । निष्कासिते ॥

निर्व्वास्यः । त्रि । निर्वासनीये ॥

निर्व्वाहः । पुं । कार्यसाधने ॥ निर्वहणम् । वह० । घञ् ॥ निष्पत्तौ । समाप्तौ ॥ यावता स्यात् स्वनिर्वाहः स्वीकुर्यात् ताव दर्थवित् । आधिक्ये न्यूनतायाञ्च च्यवते परमार्थत इत्युपदेशः ॥

निर्व्वाहकः । पुं । कार्यसाधके । सम्पादके ॥ नहिस्वपरनिर्वाहकस्य परापेचाभवति ॥

निर्व्वाहकैक्यम् । न । सङ्गत्यन्तरे ॥ साचात्परम्परयावा एककार्यानुकूलत्वे ॥

निर्व्वाहणम् । न । निर्वहणे ॥

निर्व्वाहिका । स्त्री । प्रवाहिकायाम् ॥

निर्व्विकल्पः । पुं । सर्वविकल्पशून्ये परमात्मनि ॥ त्रि । कल्पनाहीने ॥ निरस्तभेदे ॥ निर्गतोविकल्पोविविधाकल्पनायस्मात् ॥ भोगैकवासनांत्यक्त्वा त्यजत्वंभेदवासनाम् । भावाभावौ ततस्त्यक्त्वानिर्विकल्पोस्थितोभव ॥

निर्व्विकल्पकः । पुं । असम्प्रज्ञातसमाधौ । ज्ञातृज्ञानादिविकल्पभेदलयापेक्षया ऽद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्ते रतितरामेकीभावेनावस्थाने ॥ तत्रदृष्टान्तः । जलाकाराकारितलवणानवभासेन जलमात्रावभासवत् अद्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमेवभासतइति । ततश्चास्यनिर्विकल्पकसमाधेः सुषुप्तेश्चाभेदशङ्का न भवति । उभयत्र हत्त्यभाने समानेऽपि तत्सद्भावासद्भावमात्रेण तयोर्भेदोपपत्तेरिति । सुषुप्तौ वृद्धिर्हि नास्ति वृद्धेः कारणात्मनावस्थानस्य तल्लक्षणत्वात् । इहतु वृद्धिवृत्तेरद्वितीयवस्त्वाकाराकारिताया अवस्थानाङ्गीकारात् सुषुप्तेर्भेदोपपत्तेरितिभावः । नापिमुक्तावतिव्याप्तिः । तत्रापि अविद्यातत्कार्यसंस्काराणा मत्यन्तमुच्छेदात् । इहपुनर्व्युत्थानादिव्यवहारदर्शनेन तेषामनुवृत्तेरिष्टत्वात् । नापिजीवन्मुक्तौ प्रसङ्गः । तस्यव्युत्थानदशायामपिवाधितानुवृत्तिमात्रप्रपञ्चावभासेपि स्वस्वरूप एवावस्थानात् । साधकस्यवाधितानुवृत्तिमात्रप्रपञ्चावभासाभावादिति ॥

त्रि । निरस्तभेदे ॥ स्वा० क: ॥ * ॥ न । प्रकारता विशेष्यतानापन्नसम्बन्धानवगाह्यतीन्द्रियज्ञाने ॥ यथा । तत्प्रमानाप्रमानापिज्ञानं यन्निर्विकल्पकम् । प्रकारतादिशून्यंहिसम्बन्धानवगाहियदिति ॥ ज्ञानंयन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते । इतिच भाषापरिच्छेद: ॥

निर्विकल्पकसमाधि: । पुं । निर्विकल्पके ॥ लयविक्षेपकषायरसास्वादलक्षणविघ्नचतुष्टयेन विरहितं चित्तं निवातदीपवदचलंसदखण्डचैतन्यमात्रमवतिष्ठते यदा तदानिर्विकल्पकसमाधिरुच्यते ॥

निर्विकार: । पुं । जन्मादिषड्भावविकारहीने आत्मनि ॥ त्रि । विकारशून्ये ॥ प्रकृतेरन्यथाभावोविकार: । निर्गतोविकारोऽस्मात् । निरादय इति समास: ॥

निर्विकारता । स्त्री । विषयानुसन्धानराहित्ये ॥ प्रकृतेरन्यथाभावाभावत्त्वे ॥

निर्विण्ण: । त्रि । प्राप्तवैराग्ये । विरक्ते ॥ यथा । निर्विण्णोहमनेनवासेन । यथावानिर्विण्णोहं दक्षिणेन मार्गेण गतागतक्षयेनेतीशभाष्यम् ॥ निरुपपदादिदे: कर्मणिक्त: । निर्विण्णोपसङ्ख्यानात् परत्वणत्वम् पूर्वस्यष्टुत्त्वम् ॥ विषण्णे । दु:खिते ॥

निर्विद् । त्रि । खिन्ने ॥ निर्विद्यते खिद्यते । विदेर्ज्ञानार्थान्निष्पूर्वात् सत्सूद्विषेत्यादिना क्विप् ॥

निर्विन्ध्या । स्त्री । कच्छाख्यकुलाद्रिनद्याम् ॥ विन्ध्याद्रिनिर्गतनदीविशेषे ॥

निर्विशेष: । त्रि । समे । स्वगतभेदरहिते परमात्मनि । नानाविधभेदरहिते ॥ यथा । निर्विशेषं परम्ब्रह्म साक्षात्कर्त्तुमनीश्वरा: । येमन्दास्तेनुकम्प्यन्ते सविशेषनिरूपणैरिति ॥ निर्गता विशेषा यस्मात् ॥

निर्विषय: । त्रि । निरालम्बे ॥

निर्विषा । स्त्री । तृणविशेषे । अविषायाम् । विषहायाम् । निर्विषी इति गौड भाषा ॥ यथा । निर्विषा कटुका शीताकफवातास्रदोषनुत् । अनेकविषहन्त्रीच व्रणनिर्मूलकारिणीत्यस्या गुणा: ॥

निर्विषी । स्त्री । श्यामकन्दायाम् । उपविषायाम् ॥ इयं चतुर्विधाभवति । रक्ता श्वेता भृशंकृष्णा पीतवर्णातथैवच । यथापूर्वंचविज्ञेया वस्याश्रेष्ठागुणोत्तमा ॥ सर्वदोषहरीलेपाद्भुक्ताश्वयथुनाशिनी । क्षेत्रजान् विंशतीरोगान् सद्योहन्यान्निषेवणा-

दितिभावप्रकाशः ॥

निर्विष्टः । त्रि । भुक्त ॥ कृतनिर्वेशे ॥ प्राप्ते ॥ स्थिते ॥ विवाहिते ॥ कृताग्निहोत्रे ॥

निर्बीजा । स्त्री । काकलीद्राक्षायाम् । कस्मिस् इतिभाषा इतिराजनिर्घण्टः ॥

निर्वीरः । त्रि । वीरशून्ये ॥

निर्वीरा । स्त्री । अवीरायाम् । पतिपुत्रविहीनायाम् ॥

निर्वीर्य्यः । त्रि । निष्प्रभावे ॥

निर्वृतः । त्रि । उपरतस्वभावे ॥

निर्वृतिः । स्त्री । सुस्थितौ ॥ अस्तङ्गमने । मृत्यौ ॥ सुखे ॥ मोक्षे ॥ सिद्धौ ॥

निर्वृत्तः । त्रि । निष्पन्ने ॥ निर्वर्त्ततेस्म । इतुवर्त्तने । क्तः ॥ आप्ते ॥

निर्वृत्तिः । स्त्री । निष्पादे ॥ समाप्तौ ॥ यथा ऽध्ययननिर्वृत्तिरिति ॥ त्रि । वृत्तिरहिते ॥

निर्वेदः । पुं । स्वावमानने ॥ एतावता कालेनाप्ययं न सिद्धः किमतः परं कष्टमित्यनुतापे । खेदे ॥ वैराग्ये ॥ यथा । यदाते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदागन्तासिनिर्वेदं श्रोतव्यस्यश्रुतस्यचेति ॥ शान्तरसस्य स्थायिभावे । निर्वेदः स्थायिभावो स्ति शान्तोपिनवमोरसः ॥ परवैराग्ये ॥ यथा । ततः कदाचिन्निर्वेदान्निराकाराश्रितेनच । लोकतन्त्रं परित्यक्तं दुःखार्त्तेन भृशं मयेतिमोक्षधर्म्मः ॥

निर्वेशः । पुं । भोगे ॥ वेतने ॥ मूर्च्छने ॥ निर्वेशनम् निर्विश्यते ऽनेनवा । विश० । अकर्त्तरिचेति इलश्चेति वा घञ् ॥

निर्वेशनम् । न । उपभुक्तौ ॥

निर्वेष्टनम् । न । नाडिचीरे । सूत्रवेष्टनन्याम् ॥ त्रि । वेष्टनरहिते ॥

निर्वैरः । त्रि । सर्वभूतेष्वपकारिष्वपिद्वेषरहिते ॥ निष्क्रान्तो वैरात् ॥

निर्वोढा । त्रि । निर्वहितरि ॥

निर्व्यग्रः । त्रि । स्वस्थे ॥

निर्व्यथनम् । न । छिद्रे । रन्ध्रे ॥ व्यथ० । भावेल्युट् । निश्चयेनव्यथनं भयं चलनंवा यत्र ॥

निर्व्यपेक्षः । त्रि । निस्पृहे ॥

निर्व्यूढः । त्रि । त्यक्ते ॥ समाप्ते ॥

निर्व्यूहः । पुं । शेखरे ॥ द्वारि ॥ निर्यासे ॥ नागदन्तके ॥ निर्व्यूहति । इगुपधेतिकः ॥

निर्व्यूह्यमानः । त्रि । इतस्ततश्चाल्यमाने ॥

निर्हरणम् । न । दाहार्थं शवादिनय

ने ॥ निष्काशने ॥ निःशेषेण हरणे ॥

निर्हारः । पुं । शल्याद्युत्पाटने । अभ्यवकर्षणे ॥ मलमूत्रादित्यागे ॥ निर्हरणम् । हृञ्० । घञ् ॥ यथेष्टविनियोगे ॥ न निर्हारं स्त्रियः कुर्युः कुटुम्बाद्बहुमध्यगात् । स्वकादपि च वित्ताद्धि स्वस्य भर्त्तुरनाज्ञया ॥

निर्हारगृहम् । न । } विण्मूत्रादित्यागार्थगेहे । पोखरा इतिभाषा ॥
निर्हारस्थानम् । न । }

निर्हारी । पुं । दूरगामिगन्धे । समाकर्षिणि ॥ त्रि । तद्वति ॥

निर्हृतः । त्रि । दग्धे ॥

निर्ह्रादः । पुं । स्वाने । शब्दे ॥

निलयः । पुं । गृहे । वेश्मनि ॥ निलीयते ऽत्र । लीश्लेषणे । पुंसीतिघः ॥

निलयनम् । न । आधारे ॥ स्थाने ॥ निलीयतेऽस्मिन् । लीं० । ल्युट् ॥

निलायी । त्रि । निवासिनि ॥

निलिम्पः । पुं । देवे । सुरे ॥ निलिम्पति । लिपउपदेहे । नौलिम्पेरितिशः । मुचादित्वान्नुम् ॥

निलिम्पा । स्त्री । स्त्रीगवि ॥

निलिम्पिका । स्त्री । निलिम्पायाम् । सौरभेय्याम् ॥ स्वार्थेकन् ॥

निलीनः । त्रि । निःशेषेणलीने । संलग्ने ॥

निवचनेकृत्य । अ । } वाचंनियम्येत्यर्थे ॥ वचनाभावेनिवचने । अर्थाभावेऽव्ययीभावः । तृतीयासप्तम्योर्बहुलम् । सधोपदेनिवचनेचेतिगतिसंज्ञा । कुगतीतिसमासः ॥
निवचनेकृत्वा । अ । }

निवपनम् । न । पित्रुद्देश्यकदाने ॥

निवरा । स्त्री । कन्यायाम् । कुमार्याम् ॥ वृञ्० वृञ्० । आम्यां ग्रहवृद्रिश्चादिनाकर्मण्यप् ॥

निवर्त्तनम् । न । व्यावर्त्तने । निवृत्तौ ॥ यतोयतो निवर्त्तते ततस्ततो विमुच्यते । निवर्त्तनाद्धि सर्वतो नवेद दुःखमण्वपि ॥ विंशतिवंशपरिमाणे ॥

निवर्त्तितः । त्रि । आकृष्टे ॥

निवर्हणम् । न । मारणे ॥ वर्हहिंसायाम् । भावेल्युट् ॥

निवर्हणीयः । त्रि । वध्ये ॥

निवर्हितः । त्रि । अपहृते ॥

निवसतिः । स्त्री । गृहे ॥

निवसथः । पुं । ग्रामे ॥ इतिहेमचन्द्रः ॥

निवसनम् । न । वस्त्रे ॥ गृहे ॥ निवसेर्ल्युट् ॥

निवहः । पुं । समूहे ॥ नितरामूह्यते । ऊह० । पुंसीतिघः ॥ सप्तवाय्वन्तर्गतवायुविशेषे ॥ नितरां वहति । वह० । पचाद्यच् ॥

निवातः । पुं । दृढसन्नाहे । शस्त्राभेद्यवर्मणि ॥ आश्रये ॥ त्रि । वातशून्ये ॥ निरुद्धो निवृत्तो वा वातोऽस्मात् ॥

निवातकवचः । पुं । अच्छिद्रकञ्चुके ॥ हिरण्यकशिपोः पौत्रे दैत्ये । संह्लादपुत्रे ॥

निवापः । पुं । पितृदाने । सपिण्डनादूर्ध्वं पितुद्देशेनदाने ॥ न्युप्यते निवपनंवा । टुवप० । कर्मणि भावे वा घञ् ॥ दानमात्रे ॥

निवारः । पुं । निवारणे ॥

निवारणम् । न । निश्चयेनवारणे ॥

निवारितः । त्रि । निराकृते । कृतनिवारणे ॥

निवासः । पुं । गृहे ॥ निवसन्त्यस्मिन् । वस० । घञ् ॥ निवासदेशे ॥ निवासो नाम यत्र सम्प्रत्युष्यतइति भाष्यम् ॥

निवासी । त्रि । निवसनशीले ॥ निवसति तच्छीलः । वस० । णिनिः ॥

निविडः । त्रि । सान्द्रे । घने । नीरन्ध्रे । दृढे ॥ निविडाःकेशाः ॥ अवटीटे ॥ नासिकायाःनतम् । नेर्बिडज्बिरीसचौ । तद्योगान्नासिकानिविडा ॥

निविरीसः । त्रि । अवनाटे । निविडे ॥ नासिकायानतम् । नेर्बिडज्बिरीसचौ । तद्योगान्नासिका निविरीसा पुरुषोनिविरीसः ॥ सान्द्रे ॥

निविष्टः । त्रि । स्थिते ॥ निविश० । क्तः ॥ प्रविष्टे ॥ यथा । उडुगणपरिवारो नायकोप्योषधीनामसृतमयशरीरः कान्तियुक्तोपिचन्द्रः । भवति विकलमूर्त्तिर्मण्डलं प्राप्य भानोः परसदननिविष्टःकोलघुत्वंनयातीति ॥

निवीतम् । न । कण्ठलम्बिते यज्ञसूत्रे ॥ त्रि । प्रावृते । परिहित वस्त्रे ॥ निवीयतेस्म । व्येञ्संवरणे । क्तः । सम्प्रसारणादिः ॥ यद्वा । निवीयतेस्म । अज० । अजेर्वीः । वीगत्यादिषु वा । क्तः ॥ न्यजतिस्म निवेतिस्मवा । गत्यर्थेतिक्तः ॥ निम्नधोभागे वीतं गमन मस्य वा ॥

निवीती । पुं । कण्ठलम्बियज्ञसूत्रवति द्विजे ॥ शिरोवधाय दक्षिणपाण्यादावप्यमुक्तकण्ठादेवसञ्जने ऋजुप्रालम्बे यज्ञसूत्रे वस्त्रेवा निवीती द्विजो भवति ॥ निवीतमस्यास्ति । अतइनिठनावितीनिः ॥ कृतोपवीती देवेभ्यो निवीतीच भवेत्ततः । मनुष्यांस्तर्पयेद्भक्त्या ऋषिपुत्रा नृषींस्तथा ॥

निवृतम् । त्रि । निवीते ॥ परिक्षिप्ते । परिखादिना वेष्टिते ॥ निव्रियते-

स्म । वृञ्० । क्तः ॥

निवृत्तः । त्रि । व्यावृत्ते ॥ गते ॥ परिसमाप्ते ॥ निवृत्तिविशिष्टे । विरते ॥

निवृत्तचक्षुः । त्रि । आवृतनेत्रे ॥ निवृत्तानि विमुखीकृतानि विषयेभ्यश्चक्षूंषि वाह्यानि करणानि येन ॥

निवृत्तात्मा । पुं । निषेधे ॥ निषेधस्तु निवृत्तात्मा कालमात्रमपेक्षते ॥

निवृत्तिः । स्त्री । उपरतौ । उपरमे । विरतौ ॥ यद्विषयं यदाश्रय मज्ञानं तद्विषयतदाश्रयप्रमाणज्ञानात् तन्निवृत्ति र्भवति ॥ प्रवृत्तिप्रागभावे ॥ निवर्त्तते निवर्त्तनं वा । वृतु० । क्तिन् ॥

निवेदकः । त्रि । विज्ञापनस्य कर्त्तरि ॥

निवेदनम् । न । आवेदने । सम्मानपूर्वकविज्ञापने ॥ नि विद० । ल्युट् ॥ समर्पणे ॥

निवेदितः । त्रि । कृतनिवेदने ॥

निवेशः । पुं । विन्यासे ॥ सैन्यविन्यासे ॥ शिविरे । आगन्तुकसैन्यवासे ॥ उद्वाहे ॥ स्थाने ॥ निवेशनम् । निविश० । घञ् ॥ निविशन्त्यस्मिन् । हलश्चेतिघञ् ॥ कटके ॥ इतिशब्दाम्बुधौ प्राणकृष्णः ॥

निवेशनम् । न । गेहे ॥ स्थितौ ॥ प्रवेशे ॥ निविश० । ल्युट् ॥

निवेशनीयः । त्रि । निवेष्टुं योग्ये । निवेशनार्हे ॥

निवेशितः । त्रि । विहिते ॥ विशतेर्ण्यन्तात् कर्म्मणि क्तः ॥

निवेश्यः । त्रि । निवेशनीये ॥

निट् । स्त्री । निशायाम् । रात्रौ ॥ नितरां श्यति तनूकरोति व्यापारान् । शोतनूकरणे । आतश्चोपसर्गे इति कः । पृषोदरादिः ॥

निशठः । पुं । वसुदेवात्मजे ॥

निशमनम् । न । दृष्टौ ॥ श्रुतौ ॥

निशा । स्त्री । रक्षोजनन्याम् । रात्रौ ॥ नितरां श्यति तनूकरोतिव्यापारान् । शो० । आतश्चोपसर्गे इतिकः ॥ टाप् ॥ दारुहरिद्रायाम् ॥ हरिद्रायाम् ॥ लग्नविशेषे ॥ यथा । अजगोपतियुग्मञ्च कर्किधन्विमृगा स्तथा । निशासंज्ञाःस्मृताश्चै ते शेषाश्चान्ये दिनात्मकाइति ॥

निशाकरः । पुं । चन्द्रे ॥ निशां करोति । डुकृञ्० । दिवाविभानिशेति टः ॥ कुक्कुटे ॥

निशाख्या । स्त्री । हरिद्रायाम् ॥

निशागणः । पुं । गणरात्र । रात्रिसमूहे ॥

निशाचरः । पुं । राक्षसे ॥ फेरौ । शृगाले ॥ पेचके । घूके ॥ सर्पे ॥ भूते

॥ चक्रवाके ॥ चोरकभेषजे ॥ निशायां चरति । चर॰ । चरेष्टः ॥ त्रि । रात्रिचरमात्रे ॥

निशाचरी । स्त्री । पांशुलायाम् । कुलटायाम् ॥ राक्षस्याम् ॥ अनिर्वृति निशाचरी मम गृहान्तराले स्थिता निहन्ति निगमागमस्मृतिपुराणशास्त्रोदिताम् । क्रियां तदनुगा सखी हृदय एव चिन्ताविशत् तयोर्दमनकारणं त्वमसि केवलं भूपते ॥ केशिनीनामगन्धद्रव्ये ॥ टित्वान् ङीप् ॥

निशाचर्म्म । न । तमसि । अन्धकारे ॥

निशाजलम् । न । हिमे । तुहिने ॥

निशाटः । पुं । पेचके ॥ निशाया मटति । अट॰ । अच् ॥ निशाचरे ॥

निशाटकः । पुं । गुग्गुलौ ॥ इतिराजनिर्घण्टः ॥

निशाटनः । पुं । उलूके । पेचके ॥ निशाचरे ॥

निशातः । त्रि । तेजिते । निशिते । शाणिते ॥ निशायते स्म । शो॰ । क्तः । शाछोरिति पक्षे इत्वाभावः ॥

निशादः । त्रि । निशाभुजि ॥

निशादिः । स्त्री । सन्ध्यायाम् ॥ इति राजनिर्घण्टः ॥

निशानम् । न । तीक्ष्णीकरणे ॥

निशान्तम् । न । वस्त्ये । गृहे । भवने ॥ उषसि । प्रभाते ॥ यथा । निशान्ते निशान्ताङ्गनागानयुक्ते स्फुरत्तारकाभानुमद्भानुपूते । प्रसन्नाम्बरान्ते रटद्ब्रह्मगीते जगद्रक्षितुं मुञ्च निद्रां दृगन्ते ॥ इत्युत्कलदयाराममभट्टाचार्य्यः ॥ त्रि । शान्ते ॥

निशान्धः । त्रि । रात्र्यन्धे ॥

निशान्धा । स्त्री । जतुकालतायाम् ॥

निशापतिः । पुं । चन्द्रे ॥ निशायाः पतिः ॥ कर्पूरे ॥

निशापुष्पम् । न । उत्पले ॥

निशाबलः । पुं । मेषवृषमिथुनकर्कटधनुर्मकरराशिषु ॥

निशाभङ्गा । स्त्री । दुग्धपुष्प्याम् । दुग्धपेया इतिगौडभाषा ॥

निशामणिः । पुं । चन्द्रे ॥ निशाया मणिरिव ॥

निशामनम् । न । दर्शने । चाक्षुषज्ञाने ॥ आलोचने ॥ श्रवणे ॥ ज्ञापनमात्रे ॥

निशामृगः । पुं । शृगाले ॥

निशारणम् । न । मारणे ॥ शॄ हिंसायाम् । स्वार्थणयन्तः । भावे ल्युट् ॥ पुं । रात्रियुद्धे ॥

निशारत्नः । पुं । चन्द्रे ॥ इति हेमचन्द्रः ॥

निशारुकः । पुं । सप्तरूपकान्तर्गतरूपकभेदे ॥ तल्लक्षणं यथा । लघुद्वन्द्वं

गुरुद्वन्द्वंतन्न्यासतालकः स्मृतः । चतु
र्विंशति वर्णैस्तु रसेहास्ये निशारुकः
॥ तालविशेषे ॥ यथा । प्रविश्यनर्त्त
कोरङ्गं विकीर्य्य कुसुमादिकम् । नि
शारुकेण तालेन कोमलं नृत्यमा
चरेत् ॥ इतिसङ्गीतदामोदरः ॥

निशावनः । पुं । शणे ॥ इतिराजनि-
र्घण्टः ॥

निशावेदी । पुं । कुक्कुटे इतिहेमचन्द्रः ॥

निशाहसः । पुं । कुमुदे । कैरवे ॥ इ-
ति त्रिकाण्डशेषः ॥ निशायां हसः
हसनं विकाशो ऽस्य ॥

निशाह्वा । स्त्री । हरिद्रायाम् ॥ निशा
आह्वायस्याः । निशापदेन सर्वेरात्रि
पर्य्याया हरिद्रानामानि भवन्ति ॥

निशितः । त्रि । शाणिते । तीक्ष्णीकृते ॥
निशायते स्म । शो° । क्तः । शाछो-
रिति वेत्त्वम् ॥ न । लौहे ॥

निशिपालः । पुं । छन्दविशेषे ॥ यथा
। तालशररज्जुधररत्नवरसुन्दरम् भा
वयुततालगणमन्त्यकृतचामरम् ।
शुद्धमतिनागपतिचित्तकृतसङ्गमम्
वृत्तनिशिपालमसिताक्षिहृदयङ्गम
म् ॥ यथा । चन्द्रमुखि जीवमुषि वा
ति मलयानिले याति ममचित्तमि
व गाढमदनानले । तापकरकाम
मरशल्यभरशीलितं मा मिहद्दिप
ष्य जहि रोष मतिसञ्चितमिति ॥

निशिपुष्पा । स्त्री ।
निशिपुष्पिका । स्त्री । } शेफालिका-
याम् । पारजात इति हारसिङ्गार
इतिच भाषा ॥

निशिपुष्पी । स्त्री । निशिपुष्पिकायाम्
॥ निशि रात्रौ विकसितानि पुष्पाण्य
ऽस्याः । मध्यमपदलोपः । सप्तम्या
अलुक् । पाककर्णेति ङीष् ॥

निशीथः । पुं । अर्द्धरात्रे ॥ निशेरते ऽ
स्मिन् । शीङ्° । निशीथगोपीथा
वगथाः इतिथक् ॥ रात्रिमात्रे ॥

निशीथिनी । स्त्री । त्रियामायाम् । रा
त्रौ ॥ निशीथो ऽस्त्यस्याम् । इनिः
ङीप् ॥

निशीथिनीनाथः । पुं । चन्द्रमसि ॥

निशीथ्या । स्त्री । रात्रौ इति भूरि° ॥

निशुम्भः । पुं । शुम्भावरजे दानववि
शेषे ॥ वधे ॥

निशुम्भनम् । न । मारणे ॥ इतिहला
युधः ॥

निशुम्भमथनी । स्त्री ।
निशुम्भमर्द्दिनी । स्त्री । } दुर्गाया
निशुम्भशुम्भमथनी । स्त्री । म् ॥

निशुम्भी । पुं । बुद्धविशेषे । वज्रकपा
लिनि । वज्रटीके ॥

निशैतः । पुं । बकपक्षिणि ॥ इति त्रि-

काण्डशेष: ॥

निशोथा । स्त्री । त्रिवृतायाम् । रेचन्याम् ॥

निश्चय: । पुं । संशयान्यज्ञाने । निर्णये । सिद्धान्ते । अध्यवसाये । इदमित्थ मेवेति संशयविपर्ययरहिते विषयपरिच्छेदे ॥ निश्चयनम् ॥ त्रिञ्० । ग्रहवृदनिश्चिगमश्चेत्यप् ॥ चिन्मात्र ममल मद्वयमद्वयं मानन्द मनुभवारूढम् । ब्रह्मैवास्ति तदन्य न्न किञ्चिदपि निश्चयो विदुषामिति पूज्यपादा: ॥ प्रमाणनिबन्धने । शास्त्राचार्यवचनतात्पर्यविषयेऽर्थे ॥

निश्चल: । त्रि । अचले । स्थिरे ॥ असम्भावनाविपरीतभावनारहिते ॥ जाग्रत्स्वप्नदर्शनलक्षणविक्षेपरहिते ॥ अवहितकरणकलापे ॥

निश्चला । स्त्री । भूमौ । अचलायाम् ॥ शालपर्ण्याम् ॥

निश्चलाङ्ग: । पुं । वके ॥ त्रि । पर्वतादौ ॥ स्पन्दरहिते ॥

निश्चायक: । त्रि । निर्णायके । निश्चयकर्त्तरि ॥

निश्चारक: । पुं । पुरीषस्यचये ॥ स्वैरे ॥ समीरणे ॥ इतिमेदिनी ॥

निश्चित: । त्रि । विशेषतयाज्ञाते । प्रमाणतो निर्णीते ॥ यथा । जगतश्चयन्मूलं तत्परिज्ञानात् परंश्रेय इति सर्वोपनिषदां निश्चितोर्थइति भाष्यम् ॥ निश्चितवति ॥ ब्रह्मविदि ॥ निसृचिञ्० । कर्त्तरि क्त: ॥

निश्चिन्त: । त्रि । चिन्ताशून्ये । चिन्तामुक्ते ॥ निर्गताचिन्तायस्मात् ॥ द्वावेव चिन्तया मुक्तौ परमानन्दआप्लुतौ । यो विमुग्धो जडो बालो यो गुणेभ्य:परङ्गत: ॥

निश्चीयमान: । त्रि । निश्चयविषये ॥

निश्चीरानदी । स्त्री । तीर्थविशेषे ॥

निश्चुक्कणम् । न । दन्तशाणे । मिसि इतिभाषा ॥इतित्रिकाण्डशेष:॥

निश्चेष्ट: । त्रि । ईहारहिते । निरुद्योगे ॥ निर्गता चेष्टा यस्मात् ॥

निश्चेष्टता । स्त्री । कायिकव्यापाराकरणे ॥

निश्चेष्टाकरण: । पुं । कामबाणविशेषे ॥ मन:शिलाघटितौषधविशेषे ॥

निश्रेणी । स्त्री । अधिरोहिण्याम् । काष्ठादिकृतारोहणमार्गे । निसैनी इति भाषा ॥ नियता श्रेणि:पङ्क्तिरत्र ॥

निश्वास: । पुं । श्वसने । वहिर्मुखश्वासे ॥ निश्वसनम् । श्वसप्राणने । घञ् ॥

निश्वाससंहिता । स्त्री । वराहपुराणप्रसिद्धे शिवप्रणीतशास्त्रविशेषे ॥

निषङ्गः । पुं । तूणीरे ॥ नितरां सज्यन्ते शराअत्र । षञ्ज० । हलश्चेतिघञ् ॥ सङ्गमे ॥

निषङ्गथिः । पुं । समालिङ्गे ॥ निषजति । षञ्जसङ्गे । नैषञ्जेर्गथिन् । चजोरितिकुत्त्वम् ॥

निषङ्गी । त्रि । धनुर्द्धरे ॥ तूणीरे ॥ निषङ्गोस्यास्मिन्वास्ति । इनिः ॥

निषण्णः । त्रि । आसीने ॥ यथास्थानस्थिते ॥ यथा । ज्वरे प्रमेहो भवति स्वल्पैरपि विचेष्टितैः । निषण्णं भोजयेत् तस्मान्मूत्रोच्चारौ चकारयेदिति ॥ निषीदतिस्म । षद्लृ० । गत्यर्थेतिक्तः । रदाभ्यामितिनः ॥

निषण्णकम् । न । सुनिषण्णे ॥ त्रि । आसीने ॥

निषदनम् । न । स्थाने ॥ निश्चयेनसीदन्त्यत्र । षद्लृ० । अधिकरणे ल्युट् ॥

निषद्या । स्त्री । आपणे । हट्टे ॥ निषीदन्त्यस्यां जनाः । षद्लृ० । संज्ञायांसमजेतिक्यप् । सदिरप्रतेरितिषः ॥ क्षुद्रखट्वायाम् ॥

निषद्वरः । पुं । जम्बाले । कर्दमे ॥ निसीदन्त्यत्र । षद्लृ० । नैसदेरितिष्वरच् । सदिरप्रतेरितिषत्त्वम् ॥ यद्वा । निषदनम् । सं० । क्विप् । निषद् आसनस्य वरः आवरकः । वृञ् आवरणे आधृषीयः । पचाद्यच् ॥ स्मरे ॥

निषद्वरी । स्त्री । निशायाम् ॥ षित्त्वान्ङीष् ॥

निषधः । त्रि । कठिने ॥ पुं । देशविशेषे बहुवचनान्तः ॥ तद्देशराजे ॥ निषादस्वरे ॥ पर्वतविशेषे । इलावृतस्य दक्षिणे द्विसहस्रयोजनविस्तीर्णे पूर्वतोदीर्घेहरिवर्षस्यमर्यादाशैले ॥ निषीदति । षद्लृ० । अच् । पृषोदरादिः ॥

निषादः पुं । तन्त्रीसमुत्थिते कण्ठोत्थितेच स्वरविशेषे ॥ निषादं रौति कुञ्जरः ॥ पारशवे । ब्राह्मणाच्छूद्रकन्यायामूढायामुत्पन्ने धीवरविशेषे ॥ चण्डाले ॥ निषीदति मनोयस्मिन् पाप मस्मिन्वा । षद्लृ० । हलश्चेतिघञ् । सदिरप्रतेरितिषत्त्वम् ॥ वेणोरूमन्थनादुत्पन्ने ॥ दग्धस्थूणाप्रतीकाशो विकटाक्षो तिह्रस्वकः । किङ्करोमीति तान् सर्वान्विप्राना ह सचातुरः ॥ निषीदेति तमूचुस्ते निषादस्तेन सोभवत् तत स्तत्सम्भवाज्जाता विन्ध्यशैलनिवासिनः ॥ निषादा मुनिश्रे,ष्ठ पापकर्मोपलक्षणाः । तेन द्वारेण निष्क्रान्तं

तत् पापं तस्य भूपतेः ॥ निषादास्ते
ततो जाता वेनकल्मषनाशनाः ॥
इति विष्णुपुराणम् ॥

निषादकर्षूः । पुं । देशविशेषे ॥

निषादाधिपः । पुं । रामायणप्रसिद्धे गुहाख्ये ॥ निषादानामधिपे ॥

निषादी । पुं । हस्तिपके । हस्त्यारोहे ॥ निषीदत्यवश्यम् । षद् ऌ० । आवश्यके णिनिः ॥ यद्वा । निषादयत्युपवेशयति हस्तिनम् । ग्रह्यादित्वात् आवश्यके वा णिनिः ॥ उपविष्टे ॥

निषिद्धः । त्रि । अभावगतेष्टसाधनता निषेधकनञ्पदयोगिवाक्यगम्ये । लिङाद्यनुषक्तनञ्योगिवाक्यगम्ये ॥ बाधिते ॥ निषेधविषये ॥ निषिध्यते निषिध्यते स्म वा । सिधु० । कर्त्तरि कर्म्मणि वा क्तः ॥

निषिद्धकर्म्म । न । नरकाद्यनिष्टसाधने ब्राह्मणहननादौ ॥ नरकादीत्यादिपदादैहिकदुःखग्रहः । ब्राह्मणहननादीत्यादिपदात् सुरापानादिग्रहः ॥

निषेकः । पुं । गर्भाधाने ॥ न । रेतसि ॥ निषिच्यते । षिच० । घञ् ॥

निषेदिवान् । त्रि । निषसे ॥ भाषायां सदवसश्रुव इति क्वसुप्रत्ययः ॥

निषेदुषी । स्त्री । निषसायाम् ॥ ङीप् ॥

निषेधः । पुं । प्रतिषेधे । निवर्त्तने ॥ यन्निन्द्यते तन्निषिध्यते इति विधिस्पृष्टे निषेधानवकाशश्चेति न्यायः ॥ निषेधनम् । निपूर्वात् सेधतेर्घञ् । सुषामादित्वात् षत्वम् ॥

निषेवणम् । न । सेवने ॥

निषेवितः । त्रि । नितरामनुष्ठिते ॥

निषेव्यः । त्रि । सेवनीये ॥ सेव्यमाने ॥ सेविते ॥ निषेवितुमर्हः । षेवृ० । अर्हे यत् । सतां निषेव्यो हिमवान् भोगिनां मलयाचलः ॥

निष्कः । पुं । न । साष्टहेमशते । साष्टसुवर्णशते । शार्ङ्गीयषोडशमाषकपरिमितं स्वर्णं सुवर्णः तेषामष्टाधिकशते ॥ दीनारे । व्यावहारिकरूपके ॥ कर्षे । स्वर्णकर्षे ॥ वक्षोऽलङ्कारे ॥ हेममाषे ॥ हेमपले ॥ निश्चयेन कायति । कै० । आतश्चेति कः । इदुदुपधस्य चेति षः ॥ यद्वा । निषीदति । षद्लृ० । नौ सदेर्डिच्चेति कन् । सदिर प्रतेरिति षः ॥ चतुर्भिः सुवर्णैः परिमिते मानविशेषे ॥ चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः ॥ षोडशद्रम्मे । सोलहकाहन इति गौडभाषा ॥ माषकचतुष्टये ॥ इति वैद्यकपरिभाषा ॥

निष्कण्टकः । त्रि । उपसर्गरहिते ॥

निष्काथः । पुं । वकणद्रुमे ॥ इतिशब्दचन्द्रिका ॥

निष्कम्पः । त्रि । निस्तरङ्गे ॥ निर्वेपथौ ॥

निष्कर्षः । पुं । निश्चये ॥ निष्कर्षणम् । कृष० । घञ् ॥ इयत्तापरिच्छेदे ॥

निष्कलम् । न । ब्रह्मणि । निरवयवे ॥ निर्गताः कला यस्मात् ॥ त्रि । कलाशून्ये ॥ नष्टवीर्ये ॥ निरुपाधौ ॥ निर्गतः कलाभिः ॥ आधारेपुल्लिङ्ग इति शब्दचन्द्रिका ॥

निष्कला । स्त्री । विगतार्त्तवायाम् । रजोहीनायाम् ॥ वृद्धायाम् ॥ कलाया निष्क्रान्ता । निरादयइति समासः ॥ निर्गतंकलं शुक्रमस्या वा ॥

निष्कली । स्त्री । विगतार्त्तवनार्याम् ॥ गौरादित्वात् ङीष् ॥

निष्कामः । त्रि । मानसकामनाशून्ये । निस्त्रैगुण्ये विवेकिनि ॥ विभ्रमापादिताः कामाः मत्त्यकृतस्ताविवेकिनः । यस्मा द्विनिर्गताः सोयं निष्काम इति भण्यते ॥ निर्गतः कामेभ्यः ॥

निष्कारणः । त्रि । फलापेक्षारहिते ॥ कारणशब्दः फलपरः । यथा ब्राह्मणेन निष्कारणः षडङ्गोवेदो ऽध्येयोज्ञेयश्चेत्यागमः ॥ निष्कारण-इत्यत्र कारणमनपेक्ष्यत्यर्थः ॥

निष्कालकः । पुं । मुण्डितलोम्नि घृताभ्यक्ते प्रायश्चित्तार्थे ॥

निष्काशः । पुं । प्रासादाद्युपस्थाने । छज्जा इ० बारण्डा इ० बारजा इ० पगिया इतिचभाषा ॥ इतिमहाभारतम् ॥

निष्कासितः । त्रि । निर्गमिते । अवकृष्टे । निस्सारिते ॥ आहिते ॥ धिकृते ॥ निष्काशते स्म । कसगतौ । णयन्तः । क्तः ॥

निष्कुटः । पुं । गृहासन्नोपवने । गृहारामे ॥ कुटात् गृहात् निष्क्रान्तः । निरादय इति स० ॥ केदारे ॥ कपाटे ॥ पत्न्याटे । अन्तः पुरे । वेडा रावला रणवास इत्यादिभाषा ॥

निष्कुटिः । स्त्री । वृहदेलायाम् । बहुलायाम् ॥ निश्चिताकुटिः कौटिल्यमस्याः । निष्क्रान्ता कुटेर्वा ॥

निष्कुटी । स्त्री । पृथ्वीकायाम् । वृहदेलायाम् ॥ कृदिकारादिति ङीष् ॥

निष्कुषितः । त्रि । निष्कासिते ॥

निष्कुषितः । त्रि । खण्डिते ॥ कुषातेः कर्मणिक्ते इणिनष्ठायामितीडागमः ॥

निष्कुहः । पुं । कोटरे । वृक्षादिरन्ध्रे ॥ निश्चयेन कुह्यते । कुहविस्मापने । पचाद्यच् ॥

निष्कृतः । त्रि । नाशिते ॥ प्रायश्चित्ते ॥

निष्कृतिः । स्त्री । निर्मुक्तौ । निष्कारे ॥

निष्करणम्। कृञ्०। क्तिन्॥ शुद्धौ। उत्पन्नपापस्यनाशे॥ ब्रह्मघ्नेचैवमि त्रघ्ने सुरापेगुरुतल्पगे। सर्वत्रविहिता सद्भिः कृतघ्नेनास्तिनिष्कृतिः॥

निष्कृपः। त्रि। निर्दये॥

निष्कृष्टः। त्रि। सारे। निचोड इति भाषा॥

निष्कृष्टार्थः। त्रि। सारार्थे॥

निष्कोषणम्। न। अन्तरवयवानां वहिर्निस्सारणे॥

निष्क्रमः। पुं। बुद्धिसम्पत्तौ। धीशक्तौ॥ निर्गमे॥ दुष्कुले॥ निष्क्रमण संस्कारे॥ निष्क्रमणम्। क्रमु०। घञ्। नोदात्तेति वृद्धिर्न॥

निष्क्रमणम्। न। दशसंस्कारान्तर्गत संस्कार विशेषे। चतुर्थेमासि कर्त्तव्य शिशो निष्क्रमणं गृहादिस्थायुक्त विधिविहिते सूर्य दर्शने॥ गृहाद्वहिर्निर्गमने॥

निष्क्रयः। पुं। विक्रये॥ भृतौ। वेतने॥ निष्क्रयणम्। डुक्रीञ्०। एरच्॥ बुद्धियोगे॥ सामर्थ्ये॥ निर्गतौ॥ प्रत्युपकारे॥ विनिमये॥ निष्क्रियते प्रत्याह्रियते ऽनेन परगृहीतम्। डुक्रीञ्०। एरच्॥

निष्क्रान्तः। त्रि। निर्गते॥

निष्क्रियः। त्रि। क्रियारहिते॥ न। ब्रह्मणि॥

निष्क्वाथः। पुं। रसके। मांसादिक्वाथे। जोल इति रसा इति च भाषा॥

निष्ठ्यः। त्रि। वर्णाश्रमादिभ्यो निर्गते चाण्डालादौ॥ निर्गतः। निसोगते इत्य प्रत्ययः। ह्रस्वात्तादाविति षत्वम्॥

निष्ठा। स्त्री। निर्वहणे। नाट्यसन्धिसमापने। नाट्योक्त्या प्रस्तुतकथासमाप्तौ॥ निष्पत्तौ॥ नाशे॥ अन्ते॥ याच्ञायाम्॥ उत्कर्षे॥ व्यवस्थायाम्॥ क्लेशे॥ व्रते॥ गुरुशुश्रूषादौ तत्परतायाम्॥ नियतं स्थानम्। आतश्चोपसर्गइत्यङ्॥ उपसर्गादितिषत्वम्। टाप्॥ निश्चयेन स्थितौ॥ धर्मादौश्रद्धायाम्॥ यथा। निष्ठयाहि प्रतिष्ठास्या दनिष्ठस्य कुतः कुलम्। शक्नोति नैष्ठिकः स्वीयं धर्मं त्रातुं न चेतर इति॥

निष्ठानम्। न। तेमने। व्यञ्जने। भक्ताद्यन्नोपसेचने दध्यादौ॥ निष्ठीयते ऽत्र। ष्ठा०। ल्युट्॥

निष्ठितः। त्रि। निष्णाते॥ नितरां स्थिते॥ निष्ठाविशिष्टे॥ निष्ठासञ्जाता ऽस्य। ता० इतच्॥ निश्चयेनस्थिते॥

निष्ठीवः। पुं। निष्ठीवने॥

निष्ठीवनम्। न। मुखेन श्लेष्मनिरसने

। निष्ठेवने ॥ ष्ठिवुनिरसने । ल्युट् । ष्ठिवुसिव्योर्ल्युटि दीर्घो वेति स्वामी । । पृषोदरादित्त्वादिति मुकुटः ॥

निष्ठुरः । त्रि । कर्कशवाग्युक्ते । परुषे ॥ कठोरे ॥ नितिष्ठति । ष्ठा० । मद्गु० उरच् । उपसर्गात्सुनोतीतिषत्त्वम् ॥ न । वचनविशेषे ॥ यथा । गुह्याङ्गामेध्यसंज्ञानां वचनं निष्ठुरं विदुः । यदन्यद्वा वचोनीचं स्त्रीपुंसो मिथुनाश्रयमिति ॥

निष्ठेवः । पुं । निष्ठीवे । निष्ठीवने ॥ ष्ठिवु० । घञ् ॥

निष्ठेवनम् । न । निष्ठीवने ॥ ष्ठिवु० । ल्युट् ॥

निष्ठ्यूतः । त्रि । आविद्धे । नुन्ने । क्षिप्ते ॥ निष्ठीव्यते स्म । ष्ठिवु० । क्तः । यस्येतिनेट् । च्छ्वोःशूडिच्छ्यूठ् ॥

निष्ठ्यूतिः । स्त्री । निष्ठीवने ॥ ष्ठिवु० । क्तिन् । च्छ्वोरिच्छ्यूठ् ॥

निष्णातः । त्रि । कुशले । निपुणे । विज्ञे ॥ न्यस्नासीत् । ष्णाशौचे । गत्यर्थेतिक्तः । निनदीभ्यामितिषत्त्वम् ॥ पारङ्गते ॥

निष्पक्कः । त्रि । क्वथिते ॥ निश्चयेन पक्कः ॥

निष्पचनम् । न । निष्पाके ॥

निष्पत्तिः । स्त्री । सिद्धौ ॥ निष्पदनम् । पद० । स्त्रियाक्तिन् ॥ समासौ ॥

निष्पचाकृतिः । स्त्री । सपचाकृतौ । अत्यन्तपीड़ायाम् ॥

निष्पचिका । स्त्री । करीरवृत्ते ॥ इति राजनिर्घण्टः ॥

निष्पदयानम् । न । नावि । तरण्याम् ॥ अत्र निष्पदयानोद्देशो यथा । नौकाद्यं निष्पदं यानं तस्य लक्षण मुच्यते । अश्वादिकन्तु यद्यानंस्थले सर्वं प्रतिष्ठितम् ॥ जले नौकैव यानं स्या दतस्तां यत्नतो वदेत् ॥ * ॥ अत्र समयो यथा । सुवारवेलातिथिचन्द्रयोगे चरेविलग्ने मकरादिषट्के । ऋक्षेन्त्यसप्तस्वतिरेकतोन्ये वदन्ति नौकाघटनादिकर्म ॥ * ॥ अश्विखरांशुसुधानिधिपूर्वामित्रधनाच्युतभे शुभलग्ने । तारकयोगतिथीन्दुविशुद्धौ नौगमनं शुभदं शुभवारे ॥ * ॥ वृक्षायुर्वेदगदिता वृक्षजातिश्चतुर्विधा । समासेनैव गदितं तेषां काष्ठं चतुर्विधम् ॥ तद्यथा । लघु यत् कोमलं काष्ठं सुघटं ब्रह्मजाति तत् । दृढाङ्गं लघु यत् काष्ठमघटं क्षत्रजाति तत् ॥ कोमलं गुरुयत्काष्ठं वैश्यजाति तदुच्यते । दृढाङ्गं गुरु यत् काष्ठं शूद्रजाति तदुच्यते ॥ लक्षणद्वययोगेन द्वि-

जातिः काष्ठसङ्ग्रहः ॥ क्षत्रियका
ष्ठैर्घटिता भोजमते सुखसम्पदं नौका
। अन्येर्लघुभिः सुदृढैर्बिदधति जल
दुष्पदे नौकाम् ॥ विभिन्नजातिद्वय
काष्ठजाता नश्रेयसेनापि सुखायनौ
का । नैषा चिरंतिष्ठति पच्यतेच वि
भिद्यते वारिणि मज्जतेच ॥ न सि
न्धुगाद्यार्हति लौहबन्धं तल्लोहका
न्तै र्ह्रियते हिलौहम् । विपद्यते ते
न जलेषु नौका गुणेन बन्धं निज-
गाद भोजः ॥ * ॥ अथ लक्षणानि
। सामान्यञ्च विशेषश्च नौकाया ल
क्षणद्वयम् । तत्रसामान्यम् । राज
हस्तमितायामा तत्पादपरिणाहि-
नी । तावदेवोन्नता नौका क्षुद्रेति
गदिता बुधैः ॥ अतःसार्द्धमितायामा
तदर्द्धपरिणाहिनी । त्रिभागेणोच्छ्रि
तानौका मध्यमेति प्रचक्षते ॥ क्षु-
द्राथमध्यमा भीमा चपलापटलाभ
या । दीर्घापत्रपुटाचैव गर्भरा मन्थ
रातथा ॥ नौका दशक मित्युक्तं रा
जहस्तैरनुक्रमम् । एकैकवृद्धैः सा-
र्द्धैश्च विजानीयाद्द्वयं द्वयम् ॥ उन्न
तिश्च प्रवीणाच हस्तादर्द्धांशसम्मिता
। अत्र भीमा भयाचैव गर्भराचाशु
भप्रदा ॥ मन्थरापरतो यास्तु तासा
मेवाम्बुधौ गतिः । तासां गुणास्तु स-

ञ्चेपाद्दृढताच प्रकीर्त्तिता ॥ * ॥
अथविशेषः ॥ दीर्घाचैवोन्नताचेति
विशेषे द्विविधा भिदा । तत्रदीर्घाय
था । राजहस्तद्वयायामा अष्टांशप-
रिणाहिनी । नौकेयं दीर्घिकाना
म दशाङ्के नोन्नतापिच ॥ दीर्घिका
तरणि र्लोला गत्वरागामिनीतरिः
। जङ्घालाप्लाविनीचैव धारिणी वे
गिनी तथा ॥ राजहस्तैकैकवृद्धा नौ
का नामानि वै दश । उन्नतिः परि
णाहश्च दशाष्टांशमितौ क्रमात् ॥
अत्र लोला गामिनीच प्लाविनी दुःख
दा भवेत् । लोलायामान मारभ्य
यावद् भवति गत्वरा ॥ लोलायाःफ
लमाधत्ते एवं सर्वासुनिर्णयः । वे-
गिन्याः परतो यातु सा शिनायोत्त
राथया ॥ भोजोपि । नौकादीर्घं य
येच्छं स्यात् तन्नैतानिविवर्जयेत् ।
हस्तसंख्या परित्याज्या वसुवेदग्रहो
त्तरे ॥ षष्ट्युत्तरमितानौका कुलं
हन्ति बलं धनम् । नवते रुत्तरे या
पि या चत्वारिंशतेःपरा ॥ एतेन च
त्वारिंशतिषष्टिनवतिसंख्या तत्पर
तोपि । यावदपरदशकं तावदेव त
त्फलमिति । इतिदीर्घा ॥ अथोन्न
ता । राजहस्तद्वयमिता तावत्प्रसर
णोन्नता । इयमूर्द्ध्वाभिधानौका क्षेमा

य पृथिवीभुजाम् ॥ ऊर्द्धानूर्द्धास्वर्ण
मुखी गर्भिणी मन्थरातथा । राज
हस्तैकैकवृद्धा नाम पञ्चचयं भवेत्
॥ अथानूर्द्धा गर्भिणीच निन्दितं ना
मयुग्मकम् । मन्थरायाः परा यास्तु
ताः शुभायययोद्भवम् ॥ भोजोऽपि
। वाणाग्न्युत्तरतो मानं नौकानाम
शुभंवहेत् । पञ्चाशदूर्द्धादुल्लासं धन
नाशं चयोर्द्धतः ॥ इत्युन्नता ॥ * ॥
धात्वादीनामतो वक्ष्ये निर्णयं तदि
संश्रयम् । कनकं रजतं ताम्रं त्रितयं
वा यथाक्रमम् ॥ ब्रह्मादिभिः परि-
न्यस्य नौकाचित्रण कर्मणि । चतुःशृ
ङ्गा त्रिशृङ्गा भाद्विशृङ्गाचैक शृङ्गिणी
॥ सितरक्तपीतनीलवर्णान् स्या-
त् यथाक्रमम् । केशरी महिषोना-
गो द्विरदो व्याघ्र एवच । पक्षीभेको
मनुष्यश्च एतेषां वदनाष्टकम् ॥ ना
वां मुखे परिन्यस्य आदित्यादिदशा
भुवाम् । कलशो दर्पणश्चन्द्र स्वैदशा
नां महीभुजाम् ॥ हंसः केकीशुकः
सिंहो गजोऽहिर्व्याघ्रषट्पदौ ।
आदित्यादिदशाजात नौकोपरि प
रिन्यसेत् ॥ * ॥ नौकासु मणिवि-
न्यासो विज्ञेयो नवदण्डवत् । मुक्ता
स्तवकै युक्ता नौका स्यात् सर्वतो भ
द्रा ॥ तत् संख्या चेदयरसवेदद्वय-

सम्मिता क्रमशः। कनकादीनां माला
जयमालेति गद्यते सद्भिः ॥ ब्रह्म क्ष
चे द्वितये एकैके वैश्यशूद्रयोनी ॥
* ॥ निर्गृहं सगृहं वाथ तत् सर्वं द्वि
विधं भवेत् । निर्गृहं पूर्वं मुद्दिष्टं स
गृहाणि यथा शृणु ॥ सगृहा त्रिविधा
प्रोक्ता सर्वमध्याग्रमन्दिरा पर्वतोम
न्दिरं यत्र साज्ञेया सर्वमन्दिरा ॥ रा
ज्ञां कोशाश्वनारीणां यान मत्र प्रश
स्यते । मध्यतो मन्दिरं यत्र साज्ञेया
मध्यमन्दिरा ॥ राज्ञां विलासयात्रा
दिवर्षासुच प्रशस्यते। अग्रतो मन्दि
रं यत्र साज्ञेया त्वग्रमन्दिरा ॥ चिर
प्रवासयात्रायां रणे काले घनात्यये
। मन्दिरमानं नौका प्रसरत एवार्द्ध
भागतो न्यूनम् ॥ भोजस्तु । दी
र्घहस्तवसुषट्दिवाकरानेकदिङ्नव
मिता यथाक्रमम् । राजपञ्चभुजस
म्मितोन्नतिर्मन्दिरे तरिगते महीभु
जाम् ॥ भास्करादिकदशाभुवां पुन
र्धातुनिर्णयनमत्र पूर्ववत् । पताका
कलसादीनां निर्णयो नवदण्डवत्
॥ काष्ठजं धातुजं चेति मन्दिरं द्विवि
धं भवेत् । काष्ठजं सुखसम्पत्यै त्रि
लासे धातुजं मतम् ॥ अत्रशय्यासना
दीनां मन्थरोल्लोचयोरपि । अन्ये
षाञ्चैव मुनिभिर्निर्णयः पूर्ववत्कृतः

॥ दिङ्मात्रमिदमुद्दिष्टं नौकायानच या मग्रजम्। प्रधानेष्वेव नियमो न प्रधाने न निर्णयः॥ लघुता दृढता चैव गामिताच्छिद्रता तथा। समतेति गुणोद्देशो नौकानां सम्प्रकाशितः ॥ एवं विचिन्त्य योराजा नौकायानं करो[illegible]च। सचिरं सुखमाप्नोति वि[illegible]रे श्रियम् ॥ यो ऽप्रमाद न्यथायानं नौकानां कुरुते नृपः। तस्यैतानिविनश्यन्ति यशोवीर्यं बलं धनम् ॥ इति निष्पद्यानोद्देशे नौकायानम् ॥ * ॥ जघन्यजलयानानि यथा। नौकान्यतोजलेयानं जघन्यमिति गद्यते। तद्देशावद्व स्रोतु पाश्चात्यानां प्रकीर्त्तिताः ॥ द्रोणीरूपन्तु यद्यानं द्रोणीयानं तदुच्यते। घटीभिर्घटितं यानं घटीनौकेति गद्यते॥ तुम्ब्याद्यैस्तुफलैर्यानं फलयानं प्रचक्ष्यते। चर्मभिस्तूलपूर्णैश्च चर्मयानं तदुच्यते ॥ यानं यल्लघुभिर्वृक्षैस्तद्वयानं तदुच्यते। जन्तुभिः सलिले यानं जन्तुयानं प्रचक्ष्यते॥ बाहुभ्यांसन्तरेद्वारि जघन्येषु न निर्णयः ॥ * ॥ इतियुक्तिकल्पतरौ-निष्पद्यानोद्देशः ॥

निष्पन्नः। त्रि। निर्वृत्ते। सिद्धे। सम्पन्ने॥ निष्पद्यते स्म। पद०। गत्य र्थेतिक्तः॥

निष्पन्नत्वम्। न। विद्यमानकालसम्बन्धत्वे॥

निष्परिग्रहः। चि। परमहंसे ॥ निर्गतः कन्याकौपीनाध्यात्मपुस्तकादिव्यतिरिक्तःपरिग्रहो यस्मात्सः॥ चि। त्यक्तसङ्गे ॥

निष्पाकः। पुं। निष्पचने॥

निष्पातः। पुं। प्रहारे॥

निष्पादः। पुं। निष्पादने॥

निष्पादनम्। न। सम्पादने। निष्पत्तौ ॥ निस् पूर्वात् पदेर्ण्यन्तात् ल्युट् ॥

निष्पादना। स्त्री। निष्पत्तिप्रेरणे॥

निष्पादितः। त्रि। कृतनिष्पादने॥

निष्पाद्यः। त्रि। साध्ये। निष्पादनीये॥

निष्पापः। त्रि। पापरहिते॥ निर्गतः पापेभ्यः॥ निरादयइति समासः॥

निष्पावः। पुं। शूर्पपवने॥ धान्यादिनिस्तुषीकृतौ। पवने॥ निष्पूयते शोध्यते तुषाद्यपनयनेन। पूञ्०। परिमाणाख्यायां सर्वेभ्य इति घञ् ॥ यथा। द्वौ शूर्पनिष्पावौ। शूर्पेणेति करणतृतीयान्तस्य कर्त्तृकरणे कृता बहुलमिति समासः। अत्रशूर्पसङ्ख्यया तण्डुलादेरपि परिच्छित्तिर्गम्यते। शूर्पं विस्तीर्णत्वाद्भिकं मतुम्लाव्दम्। यत्पवन निरभ्यो पूष्णोरिति

घञ् लभ्यते तथापि सर्वग्रहणबला दनेनापि भवितु मर्हति ॥ राजमाषे । श्वेतशिम्बिधान्ये । राजशिम्बी वीज भटवांसु वोडा चौरा इतिष यस्य भाषा ॥ निष्पावो मधुरोरूक्षो विपाकेऽम्लो गुरुः सरः । कषायः स्त न्यपित्तास्रमूत्रवातविबन्धकृत् । वि दाह्युष्णो विषश्लेष्मशोथघ्नश्च कनाश नः ॥ कडङ्करे ॥ पवने ॥ शिम्बिकायाम् ॥ त्रि । निर्विकल्पे ॥ निष्पवनम् । पूञ्० । घञ् ॥

निष्पावकः । पुं श्वेतशिंव्याम् ॥

निष्पावी । स्त्री । शिम्बीविशेषे । चौंरा चौला वोडा इति भाषा प्रसिद्धे ॥ साद्विधा । श्वरिदर्धी शुभ्राच ॥

निष्पृहः । त्रि । इच्छारहिते ॥ निःसङ्गे । वैषयिकसुखेऽनुरागरहिते ॥ निर्गता स्पृहा यस्य सः ॥

निष्पृहा । स्त्री । अग्निशिखायाम् ॥

निष्पेषः । पुं । सङ्घर्षे ॥

निष्प्रतिभः । त्रि । जडे । अप्रे ॥ निर्गतः प्रतिभायाः ॥

निष्प्रत्यूहः । त्रि । निर्विघ्ने ॥

निष्प्रभः । त्रि । विगते । अरोके । दीप्तिवर्जिते ॥ निष्क्रान्ता प्रभाऽस्मात् ॥ अप्रकाशस्वरूपे ॥

निष्प्रवाणम् । न । नवीनवस्त्रे । तन्त्र विमुक्तवाससि ॥

निष्प्रवाणिः । त्रि । अनाहते । तन्त्रके । नवाम्बरे ॥ प्रोयन्तेऽनया अस्यां वा । वेञ्० । करणेति ल्युट् । ङीप् । निर्गता प्रवाणी तन्तुवायशलाका अ स्मात्स्माद्वा । निष्प्रवाणिश्चेतिकवभावेनिपात्यते ॥ निष्प्रवाणि पटः नवीनइत्यर्थः ॥

निष्फलः । त्रि । फलशून्ये ॥

निष्फला । स्त्री । निष्फलायां नार्याम् । विगतार्त्तवायाम् ॥

निष्फली । स्त्री । निष्फलायाम् ॥

नि० । अ । निषेधे ॥ निश्चये ॥ साकल्ये ॥ अतीते ॥

निसम्पातः । पुं । अर्द्धरात्रे । निशीथे ॥ इतिशब्० ॥

निसर्गः । पुं । रूपे । स्वभावे ॥ सर्ग ॥ निसर्जनम् । सृज० । घञ् ॥

निसिन्धुः । पुं । सिन्धुवारे ॥

निसुम्भः । पुं । असुरान्तरे ॥

निसूदनम् । न । वधे । मारणे ॥ षूद क्षरणे । भावे ल्युट् ॥

निसृता । स्त्री । निवृतायाम् ॥

निसृष्टः । त्रि । न्यस्ते ॥ निसृज्यते स्म । सृज० । क्तः ॥ मध्यस्थे इति त्रिकाण्डशेषः ॥

निसृष्टार्थः । पुं । दूतविशेषे ॥ यथा ।

निसृष्टार्थो मितार्थश्च तथासन्देश हारकः । कार्यप्रेष्य स्त्रिधा दूतो दूत्यश्चापि तथाविधा ॥ तल्लक्षणं यथा । उभयो र्भाव मुन्नीय स्वयं वदति चोत्तरम् । सुश्लिष्टं कुरुते कर्म निसृष्टार्थस्तु सस्मृतः ॥ इतिसाहित्यदर्पणे परिच्छेदः ॥ पुरुषविशेषे ॥ यथा । धीरःस्थिरमतिः शूरःस्वामि कार्यविधायकः । स्वपौरुषप्रकाशीच निसृष्टार्थः स उच्यतइतिसङ्गीतदामोदरः ॥ धनायव्ययपालनादौनियुक्त ॥ यथा । यःस्वामिनानियुक्तोपिधनायव्ययपालने । कुषीदकृषि वाणिज्ये निसृष्टार्थस्तुसस्मृतइतिवृहस्पतिः ॥ निसृष्टाअर्थायस्मिन् सः ॥

निस्तत्त्वः । त्रि । असति ॥ निर्गतं तत्त्वं वास्तवं रूपं यस्मात् ॥

निस्तनी । स्त्री । वटिकायाम् । वडी इतिभाषा ॥ स्तनहीनायाम् ॥

निस्तन्द्रिः । त्रि । अनलसे ॥ निर्गतात न्द्रिरालस्यं यस्मात् ॥

निस्तरणम् । न । उपाये ॥ निस्तारे ॥ तरणे ॥ निर्गमेइतिविश्वः ॥

निस्तर्हणम् । न । मारणे ॥ तृहूहिंसायाम् । निर्पूर्वः । स्तृहूवा । भावे-ल्युट् ॥

निस्तलः । त्रि । वर्तुले ॥ चले ॥ निर्गतं तलं यस्य ॥

निस्तली । स्त्री । वटिकायाम् ॥ इति शब्दचन्द्रिका ॥

निस्तारः । पुं । उद्धारे । निस्तरणे ॥ यथा । जीर्णा तरिः सरिदतीवगभीरनीरा बाला वयं सकलमित्थमनर्थहेतुः । निस्तारबीज मिदमेव कृशोदरीणां यन्माधव त्वमसि सम्प्रतिकर्णधारः ॥ इत्युद्भटः ॥

निस्तारबीजम् । न । संसारार्णवतरणहेतौ ब्रह्मोपासने ॥ यथा । कलौ-पापयुगे घोरे तपोहीनेति दुस्तरे । निस्तारबीजमेतावद् ब्रह्ममन्त्रस्यसाधनम् ॥ साधनानिबहूनिस्युर्नानातन्त्रागमादिषु । कलौदुर्बलजीवानामसाध्यानिमहेश्वरीतिमहानिर्वाणतन्त्रम् ॥ अपिच । स्मरणंकीर्त्तनं-विष्णोरर्चनंपादसेवनम् । वन्दनंस्तवनंनित्यंभक्त्या नैवेद्यभक्षणम् ॥ चरणोदकपानञ्चतन्मन्त्रजपनं तथा । इदंनिस्तारबीजञ्च सर्वेषामीप्सितं-भवेदितिब्रह्मवैवर्त्तेप्रकृतिखण्डे २२ अध्यायः ॥

निस्तितीर्षत् । त्रि । निस्तरितुमिच्छति ॥

निस्तुषक्षीरः । पुं । गोधूमे ॥ इतिराजनिर्घण्टः ॥

निस्तुषरत्नम् । न । स्फटिके ॥

निस्तुषितः । त्रि । त्यक्ते ॥ त्वग्विहीने ॥ लघूकृते ॥ इतिमेदिनी ॥

निस्तेजाः । त्रि । तेजोरहिते ॥

निस्तोदः । पुं । पीडाविशेषे ॥

निस्त्रिंशः । पुं । खड्गे ॥ निर्गतस्त्रिंशद्भ्योऽङ्गुलिभ्यः । निरादयइति स० । सङ्ख्यायास्ततपुरुषस्यडज्वाच्यः ॥ त्रि । निर्दये । निर्घृणे ॥

निस्त्रिंशपत्रिका । स्त्री । स्नुहीवृक्षे ॥

निस्त्रैगुण्यः । त्रि । निष्कामे ॥ निष्क्रान्त स्त्रैगुण्यात् ॥ पुं । त्रिगुणातीते परशिवे ॥ त्रैगुण्यः संसारस्तद्रहितत्वात् ॥

निस्त्रैणपुष्पिकः । पुं । राजधत्तूरके ॥

निस्नेहः । त्रि । प्रेमशून्ये ॥

निस्नेहफला । स्त्री । श्वेतकण्टकार्याम् ॥

निस्पन्दः । पुं । स्पन्दने ॥ इतित्रिकाण्डशेषः ॥ त्रि । स्पन्दरहिते । ईषत्कम्पहीने ॥

निस्पन्दतरः । त्रि । एकान्तस्पन्दरहिते ॥

निस्पृहः । त्रि । अतिविरक्ते ॥ निर्गता दोषदर्शनेन सर्वेभ्योदृष्टादृष्टविषयेभ्यः स्पृहातृष्णा यस्यसः ॥ व्यासादिषु ॥ व्यासादीनां निस्पृहाणां पारार्थ्यमिहदृश्यते ॥

निस्पृहा । स्त्री । अग्निशिखावृक्षे ॥

निस्यन्दः । पुं । स्यन्दने । चरणे ॥ निस्यन्दतेऽनेन । स्यन्दू० । स्यदोजवे इतिघञन्तोनिपातितः ॥

निस्यन्दनम् । न । स्यन्दे । स्यन्दू० ल्युट् ॥

निस्रावः । पुं । मासरे । भक्तसमुद्भवे मण्डे । माँड इति भाषा ॥ निस्राव्यते । स्रु० । ण्यन्तः । एरच् घञ्वा ॥

निस्वः । त्रि । निर्धने ॥

निस्वनः । पुं । शब्दे ॥ निस्वननम् । स्वनशब्दे । नैागदनदपठस्वन इत्यप् ॥

निस्वानः । पुं । निनादे । शब्दे ॥ निस्वननम् । स्वन० । नैागदनदपठस्वन इति पाक्षिकोघञ् ॥

निस्सारितः । त्रि । निष्कासिते ॥ निराकृते ॥

निस्सीमः । त्रि । अपर्यन्ते ॥

निहतः । त्रि । नाशिते ॥

निहननम् । न । वधे । मारणे ॥ हन्तेर्भावेल्युट् ॥

निहन्ता । त्रि । हननकर्त्तरि ॥

निहवः । पुं । आह्वाने ॥ ह्वेञ्० निपूर्वः । ह्वः सम्प्रसारणञ्चन्यभ्युपविष्विच्यप् सम्प्रसारणञ्च ॥

निहाका । स्त्री । गोधिकायाम् ॥ नियतं जहातिभुवम् । नौहश्चेतिहाकः कन् । बाहुलकात् न ह्रस्वः ॥

निहारः । पुं । नीहारे । हिमे ॥ नि-

ह्रियते। हृञ्०। घञ्॥

निर्हिंसनम्। न। मारणे॥ हिसिहिं सायाम्। भावे ल्युट्॥

निहितः। त्रि। आहिते। स्थापिते॥ निक्षिप्ते॥ स्थिते॥ निधीयते स्म। डुधाञ्०। क्तः। दधातेर्हिः॥ आत्म भूते॥ निश्चयेनहितः॥

निहीनः। त्रि। नीचे। पामरे॥ निश्चयेन हीनः। कुगतीति समासः॥

निह्नवः। पुं। निकृतौ। शाठ्ये॥ अविश्वासे॥ अपलापे। गोपने। धारयन्नेव न धारयामीत्याद्युक्तौ॥ निह्नवनम्। ह्नुङ् अपनयने। ऋदोरप्॥

निह्नुतः। त्रि। अपह्नुते॥

निह्नुतिः। स्त्री। निह्नवे॥

निह्रादः। पुं। निर्घोषे। शब्दे॥ ह्राद अव्यक्तेशब्दे। घञ्। निह्राद एकरेफः॥

नीः। त्रि। प्रापणकर्त्तरि॥ नयति। णीञ्प्रापणे। क्विप्॥

नीकः। पुं। वृक्षविशेषे॥ नयति। णीञ्०। अजियुधूनीभ्योदीर्घश्चेति कन्॥

नीकारः। पुं। अवहेलायाम्। न्यक्कारे॥ इति शब्दरत्नावली॥

नीकाशः। पुं। निश्चये॥ त्रि। परप दस्थिच्चातुल्ये॥ नितरांकाशते। काशृ०। पचाद्यच्। इकः काशइत्युपसर्गदीर्घः॥

नीचः। त्रि। पामरे। पृथग्जने। अपसदे॥ नीचसङ्गदोषोयथा। नमा मोतिसुखं किञ्चिन्नीचसङ्गान्महानपि। प्रेतसङ्गान्महादेवोनग्नोभस्मविभूषितः॥ प्रविश्यनिलयं नीचः स्त्रीधनादिक मिष्यते स्वयंनेतुं नशक्नोति तदा नाशयतिध्रुवम्॥ स्थिते गुणेपिनीचस्तुयत्नाद्दोषं प्रपश्यते। किञ्चित्तुसङ्गमासाद्यतदुक्तंस्यात्सनातनम्॥ सतांश्रुत्वागुणं नीचःश्रोतुमायातिवन्धुवत्। ततःसमयमासाद्य प्रकाशयतितद्वसन्॥ मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्। मनस्यन्यद्वचस्यन्यत् कर्मण्यन्यद्दुरात्मनाम्॥ इतिपाद्मे क्रियायोसारे ५ ऽध्यायः॥ धर्मेप्रमादोनीचानां स्वभावेनैवदृश्यते। अतोधर्मविचारस्तैर्न कुत्रापिनिरूपितः॥ न नीचो यवनात्परः॥ नीचंसमुद्रमपिसेवतिनीच एव॥ पुं। चोरकनामगन्धद्रव्ये॥ खर्वे। वामने॥ नीचैर्नीचैस्त्वमस्त्यच। अर्शआद्यचि अव्ययानां भमात्र इतिटिलोपः॥ निकृष्टामीं लक्ष्मींचिनोति वा। चिञ्०। अन्येभ्योपिदृश्यतइति डः॥ निम्ने॥ पापे॥

नीचकः । त्रि । खर्वे ॥ स्वा° तद्धितः ॥

नीचकी । पुं । उच्चे । उपरिभागे ॥

नीचकैः । अ । नीचैरित्यर्थे ॥ अव्ययसर्वनाम्नामकच् प्राक्टेः ॥

नीचगम् । न । जले ॥ नीचंनिम्नंग-च्छति । गम्लृ° । डः ॥ त्रि । पामरे ॥

नीचगा । स्त्री । निम्नगायाम् । नद्याम् ॥ टाप् ॥

नीचभोज्यः । पुं । पलाण्डौ ॥ नीचैर्भोज्यः ॥ त्रि । पामरभक्ष्ये ॥

नीचवज्रम् । न । वैक्रान्तमणौ ॥

नीचवृत्तिः । स्त्री । कर्षणवहनादिनिकृष्टकर्मणि ॥

नीचीनः । त्रि । अधोमुखे ॥

नीचैः । अ । स्वैरे ॥ अल्पे ॥ नीचे ॥ निचीयते । चिञ्° । नेर्दीर्घश्चेति डैसिः ॥

नीचैर्गतिः । स्त्री । मन्दगमने ॥ असद्व्यवहारे ॥

नीडः । पुं । खगगृहे । कुलाये ॥ नितरामीड्यते । ईड° । घञ् ॥ यद्वा । निश्चितादृखमस्यत्र । दृखस्वप्ने । ष्वल-श्चेतिघञ् । संज्ञापूर्वकत्वान्नगुणः । डलयोरेकत्वम् ॥ स्थाने ॥ रथावयवविशेषे ॥

नीडकः । पुं । पक्षिणि ॥

नीडजः । पुं । विहगे ॥ नीडेजातः । जनी° । डः ॥

नीडजेन्द्रः । पुं । गरुडे ॥

नीडोद्भवः । पुं । खगे । गरुत्मति ॥ नीडे उद्भवोयस्य ॥

नीतः । त्रि । प्राप्ते । गृहीते ॥ यथा । नीतं यदि नवनीतं नीतं नीतं किमेतेन । आतपतापितभूमौ माधव माधाव माधाव ॥ णीञ्° । क्तः ॥

नीतिः । स्त्री । नये । न्याये ॥ जेतुमिच्छतां नीति र्न्यायो जयोपायस्य प्रवर्त्तको भगवद्विभूतिः ॥ उचितव्यवहारे । सामदानाद्युपाये ॥ प्रापणे ॥

नीतिघोषः । पुं । बृहस्पतिरथे ॥ इति त्रिकाण्डशेषः ॥

नीतिज्ञः । त्रि । नीतिविदि ॥ आन्वीक्षिकीं त्रयीं वार्त्तां दण्डनीतिञ्च पार्थिवः । तद्विद्यैस्तत्क्रियोपेतै श्चिन्तये द्विनयान्वितः ॥ आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौत्रयीस्थितौ । अर्थानर्थौतुवार्त्तायां दण्डनीत्यां नयाऽनयौ ॥ विद्यास्वतस्त्वप्येता योगक्षेमाय देहिनाम् । विद्याविनीतो नृपति र्नकृच्छ्रेष्ववसीदति ॥

नीतिमान् । प्रशस्तनीतिमति ॥

नीतिशास्त्रम् । न । औशनसबृहत्का-मन्दकपञ्चतन्त्रनीतिमयूखहितोपदेशचाणक्यभारतीयराजधर्मादौ ॥

नीतिसारः। पुं। इन्द्रप्रतिवृहस्पत्युक्तेनीतिशास्त्रविशेषे॥ सचशक्रडपुराणेऽष्टास्वध्यायेष्वस्ति॥

नीथः। पुं। नेतरि। प्रापयितरि॥ स्तोत्रे इति वेदभाष्यम्॥ नयति। णीञ्०। हनिकुषिनीरमिकाशिभ्यःक्थन्॥ न। जले॥

नीध्रम्। न। नीव्रे। वल्मीके। पटलप्रान्ते। चालान्ते। ओलातीइतिभाषा॥ नितरांध्रियते। धृङ्अवस्थाने। निश्चयेन धरति जलमितिवा। धृञ्धारणे। मू०कः। अन्येषां० दीर्घः॥ वने॥ नेमौ॥ चन्द्रे॥ रेवतीनक्षत्रे॥

नीपः। पुं। कदम्बे। हलिप्रिये॥ बन्धूके॥ नीलाशोकद्रुमे॥ धाराकदम्बे॥ नीपेमहाकदम्बःस्याद्धाराकम्बइत्यपीतिसाम्बः॥ नयति नीयते वा। णीञ्०। पानीविषिभ्यःपः। बाहुलकात् गुणाभावः॥ ध ननीतिप्रावाकृष्णः॥

नीयमानः। त्रि। प्राप्यमाणे॥

नीरम्। न। क्षीरे। अम्बुनि। जले॥ शरदा नीरजोत्पत्त्या नीराणिप्रकृतिं ययुः। भ्रष्टानामिवचेतांसि पुनर्योगनिषेवया॥ रसे॥ नीयते। णीञ्०। स्फायितञ्चीतिरक्॥ निर्गतं राद्गमेर्वा। निरादय इतिसमासः। अग्नेराप इतिश्रुतेः॥ निर्गतोरोऽग्निरस्मात्। प्रादिभ्योधातुजस्येतिबहुव्रीहिः। अद्भ्योग्निर्ब्रह्मणःक्षत्रमितिस्मृतेः॥ निश्चयेनरातिसुखम्। रा०। आतश्चेतिके ढ्लोपइतिदीर्घः॥ निष्ठीवासृक्शकृन्मूत्रविषाण्यप्सु न सङ्क्षिपेत्॥

नीरजम्। न। कुष्ठौषधौ॥ पद्मे॥ मुक्तायाम्॥ त्रि। जलजाते॥ नीरे जातम्। जनी०। डः॥ पुं। उशीरे॥ उद्रे॥

नीरजाः। त्रि। निर्धूलिर्दैशपुष्पादौ॥ स्त्री। अरजस्कायाम्॥

नीरजस्कः। त्रि। निर्धूलिके॥

नीरतरङ्गः। त्रि। विरते सुरतरागे। रमणाभाववति॥ यथा। आयाताः सखि वर्षा वर्षादपि यासु वासरोदीर्घः। दिशिदिशि नीरतरङ्गो नीरतरङ्गो ममापिहृदयेशः इति॥

नीरदः। पुं। मेघे॥ मुस्तके॥ त्रि। दन्तशून्ये॥ यथा। आस्वाद्य निरवशेषं विरहिवधूनां मृदूनि मांसानि। करकामिषेण मन्ये निष्ठीवति नीरदोऽस्थीनीति॥

नीरदिनी। स्त्री। मेघवत्याम्॥

नीरधिः। पुं। अब्धौ। समुद्रे॥ नीराणिधीयन्तेऽस्मिन्। डुधाञ्। कर्म

ण्यधिकरणेचेतिकि: ॥

नीरनिधि: । पुं । अकूपारे । समुद्रे ॥ नीराणिनितरां धीयन्तेऽत्र । डुधा ञ्० । कि: ॥

नीरन्ध्र: । त्रि । सान्द्रे । घने ॥ छिद्ररहिते ॥ यथा । श्रीमन्नायतशार्जिते।र्जितयश:संशुद्धमुक्तावली माद्यैवविधिर्विधित्सुरमलंहारं त्वदीयैर्गुणै: । नीरन्ध्रामवलोक्यतामपि ततो नाप्तं गुणानामहोउत्पतिसुगैगनान्तरे समकिरत्तास्तास्ततस्तारका: ॥ इतिकालिदास: ॥

नीरस: । पुं । दाडिमे ॥ त्रि । रसहीने ॥ यथा । शृङ्गारी चेत् कवि: काव्ये जातं रसमयं जगत् । सएव चेद् शृङ्गारी नीरसं सर्वमेव तत् ॥

नीराखु: । पुं । उद्रे । जलविडाले ॥

नीराजनम् । न । आरात्रिके । दीपादिना सत्कृतौ ॥ पञ्चनीराजनं कुर्यात् प्रथमं दीपमालया । द्वितीयं सोदकाब्जेन तृतीयं धौतवाससा ॥ चूताश्वत्थादिपत्रैश्च चतुर्थम्परिकीर्त्तितम् । पञ्चमंप्रणिपातेनसाष्टाङ्गेनयथाविधि ॥ आश्विनशुक्लदशम्यामश्वादे:पूजने ॥ यथा शरत्कालेमहाष्टम्यांदुर्गाया:परिपूजनम् । नीराजनंदशम्यान्तुकुर्याद्बलवृद्धये ॥ नि:शेषेणराजनमत्र । नीरस्यशान्त्युदककस्यअजनं चेपोयत्रवा । नीरेजलेऽजनंस्पर्शनं वा ॥

नीराजना । स्त्री । आरात्रिके । दीपादिनासत्कृतौ ॥ नि:शेषेण नितरां-वा राजनम् । राजृदीप्तौ ण्यन्त: । ण्यासश्रन्थेतिभावेयुच् ॥

नीरिन्दु: । पुं । शाखोटके । आस्थेडा इतिगौडेषुख्याते वृक्षे ॥

नीरुक् । पुं । स्त्री । रोगाभावे । स्वास्थ्ये । अनामये ॥ त्रि । रोगरहिते । उल्लाघे । पटौ ॥ निरोचते । रुच् । क्विप् । नहिवृतिवृषीतिदीर्घ: ॥

नीरुजम् । न । कुष्ठौषधौ ॥ त्रि । रोगाऽभाववति ॥ रुजायानिर्गतम् ॥

नीरूप: । त्रि । रूपाभावविशिष्टे ॥ नीरूपस्यापिकालस्येन्द्रियवेद्यत्त्वाभ्युपगमेनेतिवेदान्तपरिभाषा ॥

नील: । पुं । निधिप्रभेदे ॥ अद्रिविशेषे । इलावृतस्योत्तरस्मिन् दिसहस्रयोजनविस्तीर्णे प्रागायते रम्यकवर्षस्य मर्यादापर्वते ॥ भारतवर्षस्थेशैलविशेषे ॥ वानरविशेषे ॥ वर्णविशेषे ॥ नीलौषधौ ॥ लाञ्छने ॥ मञ्जुघोषे ॥ वटवृक्षे ॥ कृष्णवर्णे ॥ वृषोत्सर्गवृषे ॥ चरणानि मुखं पुच्छं यस्यश्वेतानि गोपते: । ला

चारससवर्णश्च तं नीलमितिनिर्दिशेत् ॥ अपिच । लोहितो यस्तुवर्णेन पुच्छाग्रेणतुपाण्डुरः । श्वेतः खुरविषाणाभ्यां स नीलोवृष उच्यते ॥

नीलति । नीलवर्णे । इगुपधेतिकः ॥ न । नालीरक्ते ॥ नील्यारक्तम् । नील्याश्रन् ॥ इन्द्रनीलमणौ । नीलम् इति भाषा प्रसिद्धे सौरिरत्ने ॥ काचलवणे ॥ तालीशपत्रे ॥ विषे ॥ सौवीराञ्जने ॥ तुत्थे ॥ नृत्याङ्गाष्टोत्तरशतकरणान्तर्गतकरणविशेषे ॥ वर्णवृत्तप्रभेदे ॥ तालपयोधरनायकतोमरवज्रधरम् पाणियुतञ्च विभावय भामिनि वृत्तवरम् । नीलमिदम् फणिनायकपिङ्गलसंलपितम् पण्डितमण्डलिकासुखदं सखिकर्णगतम् ॥ यथा । सुन्दरि सुन्दरि पीनतिशालिनि किङ्कुरुषे मानिनि मानिनिकाममिदं हृदयं परुषे । हारिणि हारिणि ते हृदये निहितोदयितो भामिनि भाविनि वासिमनोऽस्य चिराय यतःइति ॥ नीलंलक्ष्म छिद्ररूप उत्पातः । तथाहिवराहः । अपर्वणि यदाराहुग्रहणं चन्द्रसूर्ययोः । चन्द्रार्कमण्डलं छिद्रंदृष्टा जनपदक्षयः इति ॥ यदानीलं लक्ष्म चन्द्रवकलङ्कोदृश्यते एतदेवोत्पाति

कं नैल्यमधिकृत्योक्तम् । यदादित्ये नैल्यंतदानश्येदिति ॥ त्रि । नीलवर्णयुक्ते ॥

नीलकम् । न । कालालूणा इतिभाषा प्रसिद्धेकाचलवणे ॥ वर्त्तलोहे ॥ पुं । असनवृक्षे ॥

नीलकण्ठः । पुं । शिवे । हरे ॥ क्षीराब्धेर्मथ्यमानाच्च विषं हालाहलोद्भूत् । हरेण धारितं कण्ठे नीलकण्ठस्ततोहरः ॥ दात्यूहे ॥ ग्रामचटके ॥ मयूरे ॥ खञ्जने ॥ नीलः कण्ठोयस्यसः ॥ पीतसारे ॥ न । मूलके ॥ इतिराजनिर्घण्टः ॥

नीलकण्ठशिखा । स्त्री । मयूरशिखायाम् ॥ नीलकण्ठशिखा लघ्वी पित्तश्लेष्मातिसारजित् ॥

नीलकण्ठाक्षम् । न । रुद्राक्षे ॥ त्रि । खञ्जनाक्षे ॥

नीलकन्दः । पुं । महिषकन्दप्रभेदे । विषकन्दे । महिषीकन्दे ॥ इतिराजनिर्घण्टः ॥

नीलकमलम् । न । नीलवर्णपद्मे । उत्पले । हिमाब्जे ॥

नीलकुन्तला । स्त्री । गौर्याःसखीविशेषे ॥ त्रि । नीलकुन्तलविशिष्टे ॥

नीलकुरण्टकः । पुं । नीलझिण्ट्याम् ॥

नीलक्रान्ता । स्त्री । विष्णुक्रान्तायाम् ॥

नीलक्रौञ्चः । पुं । नीलवके । दीर्घ-ग्रीवे ॥

नीलग्रीवः । पुं । शिवे ॥ नीलाग्रीवा यस्यसः ॥

नीलङ्गुः । पुं । मक्षने ॥ सृगाले ॥ मगे ॥ क्रिमिविशेषे ॥ नितरां लङ्गति । लगि° । नीलति वा । नीलवर्णे । लङ्ग्वङ्कितिनिपातनात् साधुः ॥ स्त्री । भम्भराल्याम् ॥

नीलचर्म । न । पक्षषके ॥ नीलवर्णाजिने ॥

नीलजम् । न । वर्त्तलोहे ॥ चि । नीलाज्जाते ॥

नीलजिण्टी । स्त्री । नीलकुरण्टके ॥

नीलतरुः । पुं । नारिकेले ॥

नीलतालः । पुं । तमाले ॥ हिन्ताले ॥

नीलदूर्वा । स्त्री । श्यामायाम् । भार्गव्याम् । रुहायाम् ॥ नीलदूर्वाहिमा तिक्तामधुरा तुवरा हरेत् । कफपित्तास्रवीसर्पतृष्णादाहत्वगामयान् ॥ नीलाचासैादूर्वाच ॥

नीलध्वजः । पुं । तमालवृक्षे ॥ माहिष्मत्याः पुर्याराजविशेषे ॥ चि । नीलध्वजाविशिष्टे ॥-

नीलनिर्गुण्डी । स्त्री । नीलसिन्धुवारे ॥

नीलनिर्य्यासकः । पुं । नीलासनवृक्षे ॥

नीलपङ्कम् । न । अन्धकारे ॥

नीलपत्रम् । न । इन्दीवरे ॥ नीलानिपत्राण्यस्य ॥ पुं । गुण्डतृणे ॥ अश्मन्तकवृक्षे ॥ नीलासनवृक्षे ॥ दाडिमे ॥

नीलपद्मम् । न । इन्दीवरे ॥ नीलञ्चतत् पद्मञ्च ॥

नीलपिच्छः । पुं । श्येनखगे ॥

नीलपुनर्नवा । स्त्री । कृष्णवर्णपुनर्नवाशाके । नीलायाम् । नीलगदहपडोआ इति भाषा ॥

नीलपुष्पः । पुं । नीलभृङ्गराजे ॥ नीलाम्लाने ॥ शीतसहे । निर्गुण्डीद्रुमे ॥ न । ग्रन्थिपर्णे ॥ नीलवर्णपुष्पे ॥

नीलपुष्पा । स्त्री । विष्णुक्रान्तायाम् ॥

नीलपुष्पिका । स्त्री । नील्याम् ॥ अतस्याम् ॥

नीलपुष्पी । स्त्री । नील्याम् ॥ निर्गुण्ड्याम् । सिन्दुके ॥ अतस्याम् ॥ नीलवुह्लायाम् ॥

नीलफला । स्त्री । जम्ब्वाम् ॥

नीलभृङ्गराजः । पुं । नीलवर्णभृङ्गराजे । महाभृङ्गे । श्यामले । नीलाभंगरा इतिभाषा ॥

नीलमणिः । पुं । इन्द्रनीलमणौ । मसारे । नीले ॥ क्षीरमध्ये क्षिपेन्नीलं क्षीरञ्चेन्नीलतां व्रजेत् । इन्द्रनीलमितिख्यात मागमज्ञे रत्ननिर्णये

॥ नीलीरसनिभाः केचि च्छशुकाण्ठ निभाःपरे इत्यादिनागशास्त्रे नरत्नाश स्त्रे एषामेकादश विधाश्छायोक्ता ॥

नीलमाधवः । पुं । विष्णौ ॥

नीलमाषः । पुं । राजमाषे ॥

नीलमौलिकः । पुं । खद्योते ॥

नीलम्लिका । स्त्री । पुष्पकासीसे ॥ कृष्णवर्णायांमृदि ॥

नीललोहम् । न । वर्त्तलोहे ॥

नीललोहितः । पुं । शिवे । धूर्जटौ ॥ नीलश्चासौ लोहितश्च । कण्ठेजटा सुच । नीलः कण्ठो लोहिताश्चके शा अस्येतिस्वामी ॥ नीलरक्तमिश्रितवर्णे ॥ व्रतविशेषे ॥

नीललोहिता । स्त्री । भूमिजम्बाम् ॥

नीलवर्षाभूः । स्त्री । नीलपुनर्नवायाम् ॥ पुं । कृष्णभेके ॥

नीलवल्ली । स्त्री । वन्दायाम् ॥

नीलवसनः । पुं । शनौ ॥ हलायुधे । नीलाम्बरे ॥ त्रि । नीलवस्त्रयुक्ते ॥

नीलवस्त्रः । पुं । बलदेवे ॥ न । नीलवर्णवसने ॥ यथा । स्त्रीक्रीडाशयनीयादौ नीलवस्त्रं नदुष्यति । नीली वस्त्रंनस्पृशेद्यनोविशामात्रकंत्रजेदिति गारुडेप्रायश्चित्ताध्यायः ॥ तद्धारणे प्रायश्चित्तमाहयुक्तंप्रायश्चित्तविवेके । तत्रभविष्यपुराणे । शृणुष्वेतिमहाबा होनीलीरक्तस्यधारणात् । वाससो गरुडाद्दूलगदतो ममकृत्स्नशः ॥ पालनाद्विक्रयाच्चैव तद्वृत्तेरुपजीवनात् । पतितस्तुभवेद्विप्रस्त्रिभिःकृच्छैर्विशुध्यति ॥ नीलीरक्तेनवस्त्रेण यत्कर्मकुरुतेद्विजः । स्नानंदानंतपो होमःस्वाध्यायःपितृतर्पणम् ॥ वृथा तस्यमहायज्ञोनीलीवस्त्रस्य धारणात् । नीलीरक्तं यदावस्त्रं कश्चिद्विप्रस्तुधारयेत् ॥ अहोरात्रोषितोभूत्वा पञ्चगव्येन शुध्यतीति । इदम् स्नाने । स्नानेतुद्वैगुण्यम् । अपापवादमाहापस्तम्बः । नीलीस्यनुहस्तौ । स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यतीति ॥

नीलवासाः । पुं । शनैश्चरे ॥ बलभद्रे ॥ नीलेवाससीयस्यसः ॥

नीलशुङ्गा । स्त्री । अजान्त्याम् । अतिलोमशायाम् । नीलवर्णवेना इति गौडभाषा ॥

नीलवृक्षः । पुं । वृक्षविशेषे । तालारौ । शोफनाशने ॥

नीलवृन्तकम् । न । तूले ॥ इतिराजनिर्घण्टः ॥

नीलवृषः । पुं । कृष्णवर्णवृषे ॥ वृषविशेषे ॥ पश्चाच्छ्वलवर्णावृषे ॥

नीलवृषा । स्त्री । वार्त्ताक्याम् ॥

नीलव्रतम् । न । व्रतविशेषे ॥ नीललोहितव्रते ॥

नीलशिखण्डः । पुं । नीलजटाधारे । रुद्रे ॥ नीलःशिखण्डोऽस्य ॥

नीलशिग्रुः । पुं । शोभाञ्जने ॥

नीलसरस्वती । स्त्री । तारायाम् । चीनाधिवासिन्यां वुद्धशक्तिविशेषे ॥

नीलसारः । पुं । तिन्दुकवृक्षे ॥

नीलसिन्दुकः । पुं । } निर्गुण्ड्याम् ।
नीलसिन्धुवारः । पुं । } शीतसहायाम् ॥

नीला । स्त्री । मक्षिकाप्रभेदे । वर्वयायाम् ॥ नीलति । नीलवर्णे । अच् ॥ देवीविशेषे ॥ नीलपुनर्नवायाम् ॥ नील्याम् ॥ मल्लाररागस्त्रनायाभिमतवृषहर्म्मपुरायाम् ॥

नीलाङ्गः । पुं । सारसखगे ॥ चाषे ॥

नीलाङ्गुः । पुं । कृमौ ॥ नितरांलङ्गति । खगिगतौ । खद्यङ्कुपीयुनीलङ्गुलिगु इति निपूर्वाल्लगेःकुः प्रत्ययोनेर्दीर्घेनीलङ्गुः । नीलाङ्गु इतिपाठान्तरेतुधातोरपिदीर्घोनिपात्यते ॥ स्त्री । भम्भराल्याम् ॥ शुषिरे ॥ प्रसूने ॥

नीलाञ्जनम् । न । सौवीराञ्जने ॥ तुत्थे ॥

नीलाञ्जना । स्त्री । विद्युति ॥ इतिजटाधरः ॥

नीलाञ्जनी । स्त्री । कालाञ्जनीक्षुपे ॥

नीलाञ्जसा । स्त्री । अप्सरोभेदे ॥ नदीभेदे ॥ विद्युति ॥

नीलाण्डकः । पुं । ऋष्ये । गवये ॥

नीलापराजिता । स्त्री । नीलवर्णापराजितालतायाम् । महानील्याम् ॥

नीलाब्जम् । न । नीलोत्पले ॥

नीलाम्बरः । पुं । बलदेवे । अच्युताग्रजे ॥ कौशपे । राक्षसे ॥ शनैश्चरे ॥ नीलमम्बरंयस्य ॥ न । तालीशपत्रे । शुकोदरे ॥ नीलवस्त्रे ॥ त्रि । नीलवस्त्रविशिष्टे ॥

नीलाम्बा । स्त्री । देवीविशेषे ॥ नीलाद्रिपर्वतोपरिस्थेतत्स्थाने ॥

नीलाम्बुजन्म । न । नीलोत्पले ॥ नीलञ्चतदम्बुजन्मच ॥

नीलाम्लानः । पुं । पुष्पवृक्षविशेषे । दास्याम् । आर्त्तगलायाम् ॥

नीलाम्ली । स्त्री । क्षुपविशेषे । श्यामाम्लयाम् ॥

नीलालुः । पुं । कन्दविशेषे । श्यामालुके ॥

नीलाश्मा । पुं । नीलमणौ ॥

नीलासनः । पुं । नीलपत्रे । नीलद्रुमे ॥ रतिबन्धविशेषे ॥ यथा । लिङ्गोपरिस्थिता नारी शय्यां कृत्वा पदद्वय

म। हृदये दत्तहस्ताच वन्धो नीला सनोमतः ॥ इतिस्म० ॥
नीलिका। स्त्री। नीलिन्याम् ॥ क्षुद्र रोगभेदे॥ नेत्ररोगविशेषे ॥ शेफालिकायाम्॥ जलस्यन्चरे ॥ यथा। भूमेरूषरो वृक्षस्यकोटरो जलस्य नीलिकेत्यादिज्वरप्रकरणे विजयरक्षितः॥ नीलवर्णा नीलादोषधौ- प्राणिनिचेतिङीष्। स्वार्थेकन्॥
नीलिनी। स्त्री। नीलीवृक्षे ॥ कृष्णचिवृति ॥ अजमीढस्यपत्न्याम् ॥ नीलोवर्णोस्त्यस्याः। इनिः। ङीप्॥
नीली। स्त्री। नीलिकारोगे ॥ नीलिन्याम्। कालायाम्। रञ्जन्याम्। नीलकावृक्ष इतिभाषा॥ नीलाज्जानपदेत्यनाच्छादनेर्थेङीष्। नीलादोषधौ प्राणिनिचनित्यंङीष् ।संज्ञायान्तु वा॥ नीलिनी रेचनी तिक्ता केश्या मोहभ्रमापहा। उष्णा हन्त्युदरश्लीहवातरक्तकफानिलान्॥ आमवातमुदावर्त्तंमदञ्चविषमुद्धतम्॥
नीलीरागः। पुं। स्थिरसौहृदेपुरुषे॥
नीलीवृक्षाकृतिः। पुं। शरपुङ्खे॥
नीलोत्पलम्। न। इन्दीवरे। नीलशाँपलाइति गैाडभाषा॥
नीलोत्पली। पुं। मञ्जुघोषे ॥ इतित्रिकाण्डशेषः॥
नीलोपलः। पुं। इन्द्रनीलमणौ॥
नीवरः। पुं। वास्तव्ये॥ वणिजके॥ परिव्राजि। भिक्षुके ॥ नयति नीयते वा। णीञ्०। छित्वरच्छत्वरधीवरपीवरेत्यादिनासाधुः॥
नीवाकः। पुं। प्रयामे । मूल्योत्कर्षार्थंधान्यादिसञ्चये॥ महार्घहेतोर्धान्यादिषुजनानामादरातिशये॥ तुलाधरणाधिक्ये॥ तुलाकृतंन्यूनाधिक्यंक्रयादरोवेतिस्वामी॥ नियतं वचनम्। वच०। घञ् । उपसर्गस्येतिदीर्घः॥ मूल्याधिक्यहेतोर्निश्चयेनपरिच्छेदनेइतिभरतः॥ वचनाभावे॥
नीवारः। पुं। श्यामाकादितृणधान्ये। मुनिधान्ये। अरण्यधान्ये ॥ निव्रीयते। वृञ्वरणे। नैावृधान्ये इतिघञ्। दीर्घः ॥ नीवारःशीतलोग्राही पित्तघ्नःकफवातकृत्॥
नीविः। स्त्री। परिपणे । वणिङ्मूलधने॥ उच्चये। स्त्रीणांकटीवसनबन्धने॥ स्त्रीणामित्युपलक्षणम् पुंस्कटीवस्त्रवन्धेपि॥ निव्ययति निवीयते वा। व्येञ्०। नैाव्योयलोपःपूर्वस्यचदीर्घइतीणुडित्॥ नितरामिन्वति। इ[illegible] णाने आगमशास्त्रस्या

निश्चयस्यानुम्। इगुपधात्किदितीन् ॥

नीवी। स्त्री। नीविशब्दार्थे ॥ राजपुत्रादेर्बन्धके। परिपणे॥ कृदिकारादितिङीष्॥

नीवृत्। पुं। स्त्री। जनपदे। देशे। अङ्गादिजननिवासस्थाने॥ नियतो वर्त्तते। अधिकरणस्य कर्तृत्वविवक्षा। वृतु०। क्विप्। नहिवृतीति दीर्घः॥ नीवृज्जनपदयोर्मतादेशे इति शब्दाम्बुधिः॥

नीशारः। पुं। हिमानिलनिवारणप्रावरणे। वोड इति भाषा॥ गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः॥ नितरां शीर्य्यते हिमानिलावयाने नया। शृहिंसायाम्। शृवायुवर्णनिवृतेष्विति घञ्॥ उपसर्गस्य घञीतिदीर्घः॥

नीहारः। पुं। अवश्याये। तुषारे। हिमे। धुवारा इति भाषा॥ निह्रियते। हृञ्०। घञ्। उपसर्गस्य घञीतिदीर्घः॥ कफवायुवर्द्धकोयम्॥

नु। अ। वितर्के॥ अपमाने॥ विकल्पे॥ अनुनये॥ अतीते॥ प्रश्ने॥ हेतौ॥ अपदेशे॥ अनुशये॥ नुदति नौतिवा। णुद०। णु० वा। मितद्र्वादित्वात् डुः॥

नुतः। त्रि। स्तुते॥

नुतिः। स्त्री। स्तुतौ। स्तोत्रे॥ नूयते ऽनेन। णु०। स्त्रियांक्तिन्॥ पूजायामिति शब्दरत्नावली॥

नुत्तः। त्रि। प्रेरिते॥ नुद्यतेस्म। णुद०। क्तः। नुदविदेति पाक्षिकोनत्वाभावः॥

नुन्नः। त्रि। नुत्ते। अस्ते। प्रेरिते॥ नुद्यतेस्म। णुद०। क्तः। नुदविदेति वानत्वम्॥ निरस्ते॥

नुन्ननुन्नत्। त्रि। अतिपीडितपीडके॥ अतिशयेन नुन्नोनुन्ननुन्नः तं नुदतीतिविग्रहः॥

नुन्नसारः। त्रि। परिच्छिन्नधैर्ये॥

नूतः। त्रि। स्तुते॥

नूतनः। त्रि। प्रत्यग्रे। अभिनवे। नवीने॥ नवएव। नवस्यनप्तनप्खाश्चप्रत्ययाः नूरादेशश्च॥

नूत्नः। त्रि। नवे। नव्ये। नूतने॥ नवएव। नवस्यत्नप्प्रत्ययोनूरादेशः॥

नूदः। पुं। ब्रह्मदारुवृक्षे। अश्वत्थाकारे पार्श्वपिप्पल इतिख्याते॥ तूत इति प्रसिद्धेपि॥ नुदति पापम्। नुद०। इगुपधेतिकः। पृ०॥ यद्वा। नुवदति। वद०। मू० कः। कर्मणः कर्त्तृत्वम्॥ यद्वा। नूयते। णु०। बा० दः। कुटादिः॥

नूनः । त्रि । समग्रे ॥ नजनः । श० ॥

नूनम् । अ । निश्चिते ॥ तर्के ॥ स्मरणे ॥ वाक्यपूरणे ॥ नुवा स्तुत्या नमति । विच् ॥ यद्वा । नुजनयति । जनपरिहाणे । अम् ॥

नूपुरः । पुं । न । पादाङ्गदे । मञ्जीरे । नेउर इति बिछुवा इतिच भाषा ॥ ॥ नुवनम् नूयतेवा । णू० । सं० क्किप् । नुविपुरति । पुर अग्रगमने । इगुपधेतिकः ॥

ना । पुं । मनुष्ये । पुरुषे ॥ नयति नयते वा । णीञ्० । नयतेर्डिच्चेत्यृन् । नरौ । नरः ॥

नृकरोटिका । स्त्री । नरकपाले ॥ नुः करोटिका ॥

नृकेशरी । स्त्री । नरसिंहावतारे ॥

नृगः । पुं । पुराणप्रसिद्धे नृपविशेषे ॥

नृगधूमः । पुं । तीर्थविशेषे ॥

नृचक्षाः । पुं । राक्षसे ॥ नॄन्चष्टे । चक्षिङ्० । सर्वधातुभ्यइत्यसुन् । असनयोश्चेति न ख्याञादेशः ॥ यद्वा । चष्टे बहुलंशिच्चेत्यसिः । सार्वधातुकसंशत्त्वात् ख्याञ्न ॥ नृणां द्रष्टरि ॥

नृता । स्त्री । पुंस्त्वे ॥ नुर्भावः । तल् ॥

नृतिः । स्त्री । नर्त्तने ॥ इतिशब्द० ॥

नृतुरङ्गः । पुं । हयग्रीवावतारे ॥

नृतूः । पुं । नर्त्तके ॥ नृत्यति । नृती०

। नृतिशृध्योःकूः ॥

नृत्तम् । न । नर्त्तने । ताण्डवे । लास्ये ॥ नृतीगात्रविक्षेपे । भावेक्तः ॥ भावाश्रयन्तु नृत्तंस्यान्नृत्यं ताललयाश्रयम् । आद्यंपदार्थाभिनयो मार्गो देशीतथा परः ॥ मधुरोद्धतभेदेन तद्द्वयं द्विविधंपुनः । लास्यताण्डवरूपेण नाटकाद्युपचारकम् ॥ गात्रविक्षेपमात्रे ॥

नृत्यम् । न । तालमानरसाश्रयसविलासाङ्गविक्षेपे । ताण्डवे । नटने । । नाच इतिभाषा ॥ देवरुच्या प्रतीतोयस्तालमानरसाश्रयः । सविलासोङ्गविक्षेपो नृत्यमित्युच्यते बुधैः ॥ * ॥ ताण्डवञ्च तथालास्यं द्विविधं नृत्यमुच्यते । पेवलिर्बहुरूपञ्च ताण्डवं द्विविधंमतम् ॥ अङ्गविक्षेपवाहुल्यं तथाभिनयशून्यता । यत्रसा पेवलिस्तस्याः संगादेशीति लोकतः ॥ छेदनं भेदनं यत्रबहुरूपानुवात्रली । ताण्डवं बहुरूपं तदाख्यागलमुद्धतम् ॥ * ॥ इतिसङ्गी० ॥ नृत्येनाखमरूपेण सिद्धिर्नास्यस्य रूपतः । चार्वधिष्ठानवन् नृत्यं नृत्यमन्यद्विडम्बनेति ॥ गेयादुत्तिष्ठतेवाद्यं वाद्यादुत्तिष्ठतेलयः । लयतालसमारब्धं नृत्यंप्रवर्त्तते ॥ नृती०

। ऋदुपधाच्चाक्लृपिचृतेरिति क्यप् ॥

नृदुर्गम् । न । चतुर्दिगवस्थायिहस्त्यश्वरथयुक्तबहुपदातिरचिते राज्ञोवसतिस्थले ॥

नृदेवः । पुं । राजनि ॥

नृधर्म्मा । पुं । धनदे । कुवेरे ॥ नुरिव धर्म आचारः श्मश्रुलत्वादिर्वाऽस्य । धर्मादनिच् केवलात् ॥

नृपः । पुं । भूपे । राजनि ॥ नॄन् पाति । पा रक्षणे । आतोनुपेतिकः ॥ चतुर्ग्रामजनपर्य्यन्त मधिकारो नृपस्य च ॥ अस्यप्रशंसा यथा । अपुत्रस्य नृपः पुत्रो निर्धनस्य धनं नृपः । अमातुर्जननी राजा अतातस्यपितानृपः ॥ अनाथस्यनृपोनाथो ह्यभर्त्तुः पार्थिवःपतिः । अभृत्यस्यनृपोभृत्यो नृपएवनृणांसखा ॥ सर्वदेवमयोराजा तस्मात् त्वामर्थये नृपेति कालिकापुराणम् ॥ षोडशसङ्ख्यायाम् ॥

नृपकन्दः । पुं । राजपलाण्डौ ॥

नृपतिः । पुं । धनदे । कुबेरे ॥ भूपतौ । राजनि ॥ नॄन्पाति । पा० । पाते र्डतिः ॥ नृणांपतिर्वा ॥

नृपतिप्रियः । त्रि । राजवल्लभे ॥ नृपस्यप्रियः ॥

नृपतिवल्लभः । पुं । नृपवल्लभ इतिख्या

ते औषधविशेषे ॥ यथा । जातीफलं लवङ्गाब्दत्वगेलाटङ्कणरामठम् । जीरकञ्च यमानीच विश्वसैन्धवपञ्चकम् ॥ लौहमभ्रं रसं गन्धं ताम्रंप्रत्येकशः पलम् । मरिचं त्रिपलं दत्त्वा छागीदुग्धेन पेषयेत् ॥ धात्रीरसेन वा पिष्ट्वा वटिकां कुरुयत्नतः । श्रीमन्नन्दननाथेन विचिन्त्यपरिनिर्मितः ॥ सूर्य्यवत्तेजसाचाऽयं रसो नृपतिवल्लभः । अष्टादशवटीं खादेत् पवित्रः सूर्य्यदर्शकः ॥ * ॥ हन्ति मन्दानलं सर्व्वं मामदोषं विसूचिकाम् । प्लीहगुल्मोदराष्ठीलायकृत्पाण्डुहलीमकम् ॥ हृच्छूलं कण्ठशूलञ्च चक्षुःशूलञ्च कामलाम् । शिरश्शूलं कटीशूल मानाहमोष्ठशूलकम् ॥ कासश्वासामवातञ्च श्लीपदंशोथमर्व्वुदम् । गलगण्डं गण्डमालां मम्लपित्तञ्च गर्द्दभीम् ॥ क्रिमिकुष्ठानि दद्रूणि वातरक्तं भगन्दरम् । उपदंश मतीसारं ग्रहण्यर्शः प्रमेहकम् ॥ अश्मरीं मूत्रकृच्छ्रञ्च मूत्राघात मसृग्दरम् । ज्वरं जीर्णज्वरं कण्डुं तन्द्रालस्यं वमिं भ्रमिम् ॥ दाहविद्रधिहिक्काश्च जडगद्गदमूकताः । वाधिर्य्यं स्वरभेदञ्च वृध्नवृद्धिविसर्पकान् । ऊरुस्तम्भ रक्तपित्त गुदभ्रं

सारुचिं तृषाम्। कर्णनासानुशोथांश्चदन्तरोगश्च पीनसम्॥ स्थौल्यञ्च-शीतपित्तञ्च स्थावराणि विषाणिच। वातपित्तकफोत्थांश्च द्वन्द्वजान् सान्निपातिकान्॥ सर्वरोगचयान्हन्ति चण्डांशु रिवपापहा। बलवर्णकरो ह्येष आयुष्यो वीर्यवर्द्धनः॥ परं वाजीकरः श्रेष्ठः पटुतामन्त्रसिद्धिदः। अरोगी दीर्घजीवी स्या द्रोगी रोगं विमुच्यति॥ रसस्यास्यप्रसादेन सुबुद्धिर्जायतेजनः। इतिरत्नावली॥

नृपद्रुमः। पुं। आरग्वधे॥ राजादनीवृक्षे॥

नृपप्रियः। पुं। बेडुवांस इतिगौडभाषाप्रसिद्धे वेणुवंशे॥ राजपलाण्डौ॥ राजशुके॥ रामशरे॥ शालिधान्ये॥ आम्रे॥ त्रि। राजवल्लभे॥ नृपस्य प्रियः॥

नृपप्रियफला। स्त्री। वार्त्ताक्याम्॥ इतिराजनिर्घण्टः॥

नृपप्रिया। स्त्री। केतक्याम्॥ राजखर्जूर्याम्॥ राजभार्यायाम्॥

नृपवदरः। पुं। राजवदरवृक्षे॥ न। तत्फले॥

नृपमन्दिरम्। न। सौधे। राजसदने॥

नृपमाङ्गल्यकम्। न। आहुल्यवृक्षे॥

नृपमानम्। न। भूभुजांभुक्तिकालवेदकवाद्यविशेषे॥ इतिशब्दाम्बुधिः॥

नृपलक्ष्म। न। राजच्छत्रे॥ राजचिह्ने॥ नृपस्यलक्ष्म॥

नृपलिङ्गधरः। पुं। राजवेशधारिणि॥ यथा। निजग्राहौजसा वीरःकलिं दिग्विजयेक्वचित्। नृपलिङ्गधरं शूद्रं घ्नन्तंगोमिथुनंपदेतिश्रीभागवतम्॥ प्रवृत्तेकलिकालेतुतद्विधाएवभूभुजः। प्रजाधनादानपराक्रूरास्तेतोदुःखभागिनः॥

नृपवल्लभः। पुं। राजाम्रे॥ त्रि। राजप्रिये॥

नृपवल्लभा। स्त्री। राजमहिष्याम्॥ केविकापुष्पे॥

नृपशुः। पुं। कार्याकार्यविवेकशून्ये॥ ना पशुरिव। उपमितसमासः॥

नृपसभम्। न। राज्ञांसभायाम्॥ नृपाणांसभा। सभाराजामनुष्यपूर्वेति-क्लीवत्वम्॥

नृपात्मजा। स्त्री। राजपुत्र्याम्॥ नृपस्य आत्मजा॥ कटुतुम्ब्याम्॥

नृपाध्वरः। पुं। राजसूययज्ञे॥

नृपान्नम्। न। राजान्ननामधान्ये॥ राजोऽन्ने॥

नृपाभीरम्। न। भक्ततूर्ये। राजभोजनकालीनवाद्यविशेषे॥

नृपामयः। पुं। राजयक्ष्मणि। क्षयरो

गे ॥ राजरोगे ॥

नृपावर्त्तम् । न । राजावर्त्तरत्ने ॥

नृपासनम् । न । भद्रासने । सिंहासने । मण्याद्यिकृतराजासने ॥ नृपस्य आसनम् ॥

नृपाह्वयः । पुं । राजपलाण्डौ ॥ नृपनामनि ॥

नृपेशः । पुं । सार्वभौमे ॥ नृपाणामीशः ॥

नृपोचितः । पुं । राजमाषे ॥ त्रि । राजार्हे ॥

नृमणा । स्त्री । ब्रह्मद्वीपस्य प्रधाननद्याम् ॥

नृयज्ञः । पुं । अतिथिपूजने । ब्राह्मणश्रेष्ठस्यार्चायाम् ॥

नृवराहः । पुं । वराहरूपधृग्भगवदवतारे ॥ अयंबलेर्द्वारीति पुराणम् ॥ नृवराहस्य वसति र्महर्लोके प्रतिष्ठितेति पद्मपुराणम् ॥

नृशंसः । त्रि । घातुके । क्रूरे ॥ नॄन्शंसति । शंसुहिंसायाम् । कर्मण्यण् ॥ परुषे । रूक्षे ॥

नृषद् । पुं । मनुष्येषु विद्यमाने ॥ वुद्धौ ॥ नृषुसीदति । षद्लृ० । सं० क्विप् ॥

नृसिंहः । पुं । विष्णौ । हरेरवतारविशेषे ॥ यथा । यत्पादपद्ममकरन्दरसाऽनभिज्ञाविश्राममाविधिपदादपिसञ्चरन्तः । नप्राप्नुवन्तिपशुकर्मरताधनेहास्तस्मैनृसिंहवपुसे हरये नमस्ते इतिविष्णुभागवतम् ॥ अपिच । पुण्यारण्येनृसिंहैकनामसिंहोविराजते । यस्मादतःपलायन्तेमहाकिल्बिषकुञ्जराइति ॥ अस्यवसतिर्जनलोके । यथा । नृवराहस्यवसतिर्महर्लोकेप्रतिष्ठिता । नृसिंहस्यतथाप्रोक्ताजनलोके महात्मनइतिपाद्मेस्रष्टिखण्डे २८ अध्यायः ॥ मनुजोत्तमे ॥ ना सिंह इव । उपमितंव्याघ्रादिभिरितिसमासः ॥ नाचासौसिंहश्चेति वा ॥ रतिबन्धविशेषे । यथा । पादौसम्मील्ययोनैाचहठाल्लिङ्गप्रवेशनम् । हस्तयोर्वेष्टयेन्नारीवन्धोनृसिंहसंज्ञकइति ॥

नृसिंहचतुर्दशी । स्त्री । वैशाखशुक्लचतुर्दश्याम् ॥ यथा । वैशाखस्यचतुर्दश्यांशुक्लायां श्रीनृकेशरी । जातस्तदस्यां तत्पूजोत्सवं कुर्वीतसव्रतमिति ॥

नृसिंहपुराणम् । न । नारसिंहे ॥

नृसेनम् । न । नरसेनायाम् ॥ नृणां सेना । विभाषासेनेतिपाक्षिकंक्लीवत्वम् ॥

नृसेना । स्त्री । नृसेने ॥ नृणांसेना ॥

नृहरिः । पुं । नृसिंहे ॥

नृहरिदासः । पुं । प्रह्लादे ॥

नेजकः । निर्णेजके । रजके ॥ नेनेक्ति । णिजिर् ० । ण्वुल् ॥

नेत् । अ । शङ्कायाम् ॥ प्रतिषेधे ॥ विचारे ॥ समुच्चये ॥

नेता । त्रि । प्रभौ । नायके ॥ प्रवर्त्तके ॥ नयति । णीञ् ० । तृच् ॥ निम्बवृक्षे ॥ प्रापयितरि ॥ निर्वाहके ॥ यथा । जगद्बन्धनिर्वाहको नेतेति विष्णुसहस्रनामभाष्यम् ॥

नेत्रम् । न । मन्थगुणे ॥ वस्त्रभेदे ॥ द्रुमस्यमूले ॥ रथे ॥ जटायाम् ॥ नाड्यामिति विश्वः ॥ वस्तिशलाकायाम् ॥ चक्षुषि ॥ अथ नेत्रपरीक्षा । नेत्रं स्यात् पवनाद्रूक्षं धूम्रवर्णं तथारुणम् । कोटरान्तःप्रविष्टञ्च तथास्तब्धविलोकनम् ॥ हरिद्राखण्डसङ्काशं रक्तं वा हरितं तथा । दीपद्वेषि सदाहञ्च नेत्रं स्यात् पित्तकोपतः ॥ चक्षुर्बलासबाहुल्यात् स्निग्धं स्यात् सलिलप्लुतम् । तथा धवलवर्णञ्च ज्योतिर्हीनं बलान्वितम् ॥ नेत्रं द्विदोषबाहुल्यात् स्याद्दोषद्वयलक्षणम् । त्रिदोषलिङ्गं रन्ध्रेण तन्मारयति रोगिणाम् । त्रिदोषदूषितं नेत्रमन्तर्मग्नं भृशं भवेत् । त्रिलिङ्गं सलिलस्रावि प्रान्ते नोन्मीलयत्यपीति ॥ नयति नीयतेऽनेन वा । णीञ् ० । सर्वधातुभ्यः ष्ट्रन् । दाम्नीत्यादिना वा ष्ट्रन् ॥ त्रि । नेतरि । नयनसाधने । प्रापयितरि ॥ प्रवर्त्तकेपि ॥

नेत्रच्छदः । पुं । अक्षिपुटे । नेत्रपिधायके चर्मपुटे । आंखकाढक्कन इति भाषा ॥

नेत्रपर्य्यन्तः । पुं । अपाङ्गे ॥ त्रि । नयनावधिके ॥

नेत्रपिण्डः । पुं । विडाले ॥ इति हारावली ॥ चक्षुर्गोलके ॥

नेत्रपुष्करा । स्त्री । रुद्रजटायाम् ॥

नेत्रबन्धः । पुं । बालानां क्रीडाविशेषे । आंखमिचौनी इति भाषा ॥

नेत्रमलम् । न । दूषिकायाम् ॥ नेत्रयोर्मलम् ॥

नेत्रमीना । स्त्री । यवतिक्तालतायाम् ॥

नेत्रयोनिः । पुं । इन्द्रे । वासवे ॥

नेत्ररञ्जनम् । न । कज्जले ॥ नमस्त्वा-चेयोजयेत्तु साधको नेत्ररञ्जनमिति-कालिकापुराणम् ॥

नेत्ररोगः । पुं चक्षूरोगे ॥ तन्निदानमाह माधवः । उष्णाभितप्तस्य जलप्रवेशात् दूरेक्षणात् स्वप्नविपर्ययाच्च । स्वेदाद्रजोधूमनिषेवणाच्च छर्देर्विघातात् वमना

तियोगात् । प्रसक्तसंरोदनशोकताऽपाच्छिरोभिघातादतिमद्यपानात् ॥ तथाऽऽकूतूनाञ्च विपर्ययेण क्लेशाभिघातादतिमैथुनाच्च । वातात् पित्तात् कफाद् रक्तादभिष्यन्दश्चतुर्विधः । प्रायेण जायते घोरः सर्वनेत्रामयाकरः इति च ॥ वाष्पग्रहात् सूर्यनिरीक्षणाच्च नेत्रविकारान् जनयन्ति दोषाः ॥

नेत्ररोगहा । स्त्री । वृश्चिकालीवृक्षे ॥ त्रि । चक्षूरोगनाशके ॥

नेत्रामयः । पुं । नेत्ररोगे ॥

नेत्राम्बु । न । अश्रुणि ॥ नेत्रयोरम्बु ॥

नेत्रारिः । पुं । सेहुण्डवृक्षे ॥

नेत्री । स्त्री । नद्याम् ॥ नाड्याम् ॥ श्रियि । लक्ष्म्याम् ॥ नेतृशब्दात्स्त्रियां ङीप् ॥ प्रापयित्र्याम् ॥

नेत्रोपमफलः । पुं । वातादे । बदाम इति भाषा ॥

नेत्रौषधम् । न । पुष्पकासीसे ॥ चक्षूरोगौषधमात्रे ॥

नेत्रौषधी । स्त्री । अजशृङ्ग्याम् ॥

नेदिष्ठः । त्रि । अत्यासन्ने ॥ अयमेषामतिशयेनान्तिकः । इष्ठन् । अन्तिकशब्दस्येयोर्नेदसाधौ ॥ निपुणे ॥ अङ्कोठ वृक्षे ॥

नेदीयस् । त्रि । अत्यन्तसमीपे ।

अयमनयोरतिशयेनान्तिकः । ईयसुन् । अन्तिकस्य नेदादेशः ॥

नेपः । पुं । पुरोहिते ॥ नयति नीयते वा । णीञ्० । पानीविषिभ्यः पः ॥

नेपथ्यम् । न । रङ्गज्यायाम् । रङ्गभूमौ ॥ पुं । अलङ्कारे । प्रसाधने । वेशे ॥ वेशस्थाने ॥ नयति । णीञ्० । विच् । गुणः । नयोनेपस्य नेतुर्वा पथ्यः ॥

नेपालः । पुं । स्वनामप्रसिद्धे हिमालयैकदेशविशेषे ॥ यथा । जटेश्वरं समारभ्य योगेन्यन्तं महेश्वरि । नेपालदेशो देवेशी साधकानां श्रीप्रसिद्धिसङ्गमे ॥

नेपालकम्बलः । पुं । कृतपाख्ये ॥

नेपालनिम्बः । पुं । नैपाले । तृणनिम्बे । ज्वरान्तके । नाडीतिक्ते ॥

नेपालमूलकम् । न । हस्तिदन्तसदृशे मूलकविशेषे ॥ नैपालमूलकं चान्यत् सङ्घेशमदन्तवत् ॥

नेपालिका । स्त्री । मनःशिलायाम् ॥

नेमः । पुं । काले ॥ अवधौ ॥ अर्द्धे । खण्डे ॥ प्रकारे ॥ कैतवे ॥ गर्त्ते ॥ नीयते । णीञ्० । अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन् ॥ मात्रादौ ॥ अन्यस्मिन् । इति शब्द० ॥

नेमिः । पुं । जिनविशेषे ॥ तिमिशवृक्षे

चे । तिनाश इतिभाषा॥ स्त्री । त्रि कायाम्। कूपसमीपे रज्जुधारणा र्थे चिद्राश्रयन्त्रे॥ चक्रान्ते। प्रधौ। रथचक्रस्यभूमिस्पर्शिभागे॥ कूपा न्तिके समानस्थलभागे॥ इति शब्द रत्नावली॥ नयतिरथम् नयन्त्यने- नवा। णीञ्०। नियेर्मिः॥

नेमिचक्रः। पुं। परीचिद्वंशजे असीम कृष्णस्यपुत्रे॥

नेमिशम्। न। नैमिशारण्याख्ये चेत्रे॥ ब्रह्मणाविसृष्टस्यचक्रस्य नेमिः शी र्यतेकुण्ठीभवति यत्र तत्॥

नेमी। स्त्री। कूपस्यत्रिकायाम्॥ च- क्रान्तभागे। प्रधौ॥

नेष्टः। त्रि। निषिद्धे॥

नेष्टुः। पुं। लोष्टे॥ इतिशब्दाम्बुधिः॥

नेष्टा। पुं। ऋत्विग्विशेषे॥ नयति। णीञ्०। नयतेः षुक्चेतितृन्॥ नप्तृ नेष्ट्रितिसाधुः॥

नैःस्वम्। न। निःस्वतायाम्। दुर्गतौ॥

नैकटिकः। पुं। भिक्षौ॥ भिक्षुणाग्रा मात् क्रोशे वस्तव्यमितिशास्त्रम्। प्र योजनान्निकटे वसति। ठक्॥ त्रि। निकटवर्त्तिनि॥

नैकट्यम्। न। निकटत्वे॥

नैकभेदः। त्रि। बहुविधे। उच्चावचे॥ अनेकप्रकारे॥ एकोभेदोऽस्य। न एकभेदः। सुप्सुपेति समासः॥ न एकोभेदोऽस्येतिवा। उत्तरपदशब्द स्य समास चरमावयवेरूढत्वान्मध्य पदे न लोपाभावः॥

नैकषेयः। पुं। राक्षसे॥ निकषाया अपत्यमित्यर्थे ढक्॥

नैकृतिकः। त्रि। स्वस्मिन्नुपकारित्व भ्रममुत्पाद्यपरवृत्तिच्छेदनेन स्वाऽ र्थपरे॥ निकृत्यापरापकारेणजी- वति। निकृत्यानिष्ठुरतया चरतिवा। ठक्॥

नैगमः। पुं। न। उपनिषदि॥ वणि जि। वाणिजे॥ नागरे। पौरे॥ न ये॥ कृत्याम्॥ निगमे भवः। त त्रभवः इत्यण्॥ निगमएववा। प्र० अण्॥ त्रि। निगम सम्बन्धिनि॥

नैचिकम्। न। गोः शिरोदेशे॥ इति हेमचन्द्रः॥

नैचिकी। स्त्री। उत्तमायांगवि॥ नी चैश्चरति। चरतीति ठक्। अव्य- यानामितिटिलोपः। यद्वा। निचिः कर्णशिरोदेशः इतिरभसः। ततः स्वार्थेकन्। प्रशस्तंनिचिकमस्याः। ज्योत्स्नादिभ्य इत्यण्॥

नैजः। त्रि। निजसम्बन्धिनि। स्वीये॥

नैत्यम्। न। नित्यत्वे॥ इ०राधाकान्तः॥

नैत्यकम्। न। नित्यानुष्ठेये। अप

यज्ञे । ब्रह्मयज्ञादिरूपे ॥ यथा । वेदोपकरणे चैव स्वाध्याये चैव नैत्यके । नानुरोधोऽस्त्यनध्याये होममंत्रेषु चैव हीति ॥ नैत्यके नास्त्यनध्यायो ब्रह्मसत्रं हि तत् स्मृतम् । ब्रह्माहुति हुतं पुण्यमनध्यायवषट्कृतमिति मनुः ॥

नैत्यशब्दिकः । पुं । नित्यशब्दत्ववादिनि ॥ नित्यः शब्द इति आह । तदाहेतिमाशब्दादिभ्य ष्ठक् ॥

नैदानिकः । त्रि । निदानविदि ॥ निदानाध्येत्तरि ॥

नैद्रः । त्रि । निद्रासम्बन्धिनि ॥

नैपालः । पुं । नेपालनिम्बे ॥ त्रि । नेपालदेशसम्बन्धिनि ॥

नैपालिकम् । न । ताम्रे ॥ इतिरानि० ॥

नैपाली । स्त्री । नवमाल्याम् ॥ कुनव्याम् । मनःशिलायाम् ॥ सुवहायाम् । शेफालिकायाम् ॥ नेपाले भवा । तत्रभवइत्यण् ॥ नील्यामिति शब्दरत्नावली ॥

नैपुणम् । न । नैपुण्ये ॥ निपुणस्य भावः ॥

नैपुण्यम् । न । निपुणत्वे ॥ निपुणस्य कर्म भावो वा । ब्रा० ष्यञ् ॥

नैमित्तिकम् । न । पुत्रजन्माद्यनुबन्धिषु जातेष्ट्यादिकर्मसु । निमित्तसमासाद्यावश्यकर्त्तव्यतया विहितेषु ॥ त्रि । हेतुमति । निमित्तादागते ॥ ठक् ॥

नैमित्तिकक्रिया । स्त्री । निमित्तनिश्चयवदधिकारिकर्त्तव्ये कर्मणि ॥

नैमित्तिकदानम् । न । निमित्तनिश्चयवदधिकारिकर्त्तव्ये दाने ॥ यथा । यत्तु पापोपशान्त्यै व दीयते विदुषां करे । नैमित्तकं तदुद्दिष्टं दानं सद्भिरनुष्ठितमिति गरुडपुराणम् ॥

नैमित्तिकधर्मः । पुं । निमित्ताश्रित धर्मे ॥ निमित्त मेक माश्रित्य यो धर्मः सम्प्रवर्त्तते । नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा ॥

नैमित्तिकलयः । पुं । प्रलयविशेषे ॥ चतुर्युगसहस्रान्ते ब्राह्मो नैमित्तिको लयः ॥

नैमित्तिकस्नानम् । न । निमित्तनिश्चयवदधिकारिकर्त्तव्ये स्नाने ॥ यथा । चाण्डालशवपूयादिस्पृष्ट्वाऽस्नातां रजस्वलाम् । स्नानार्हस्तु यदास्नाति स्नानं नैमित्तिकं हि तदिति ॥

नैमिशम् । न । नैमिशारण्ये ॥ नेमिशमेव । स्वार्थेऽण् ॥ तीर्थविशेषे ॥

नैमिशारण्यम् । न । प्रसिद्धेऽरण्यविशेषे ॥ नैमिशञ्च तदरण्यञ्च ॥

नैमिषम् । न । नैमिषारण्ये ॥ तीर्थं

विशेषे ॥

नैमिषकुञ्जम्। न। तीर्थविशेषे ॥

नैमिषारण्यम्। न। स्वनामप्रसिद्धेऽरण्यविशेषे ॥ अत्रारण्ये निमिषेण दानवबलं विष्णुना निहतम्। तथा हि। तेन चक्रेण तत्सैन्य मासुरं दौर्जयं क्षणात्। निमिषान्तरमात्रेण भस्मबद्धहुधाकृतम् ॥ एवंकृत्वा ततो देवो मुनिंगौरमुखं तदा। उवाच निमिषेणेदं निहतं दानवं बलम् ॥ अरण्येऽस्मिंस्ततस्तेन नैमिषारण्य संज्ञितम्। भविष्यति यथार्थं वै ब्राह्मणानांविशेषतः ॥ इतिवराहपुराणे गौरमुखंप्रतिभगवद्वाक्यम् ॥ सुकथादेव्यधिष्ठितेसिद्धसिद्धस्थानम् ॥ सुकथात्रदेवता। देवदेवाधिपःशम्भुर्नैमिषेच महेश्वरेत्यागमोक्तः ॥ नैमिषेतुमहास्थानेदेवीसालिङ्गधारिणीतिदेवीगीता ॥

नैमेयः। पुं। परीवर्त्ते। परिदाने। विनिमये ॥ निमानम्। मेङ्प्रणिदाने। अचोयत्। ईद्यति। गुणः। प्रज्ञाद्यण् ॥

नैयग्रोधम्। न। न्यग्रोधफले ॥ न्यग्रोधस्यविकारः। प्लक्षादिभ्योऽण्। तस्य विधानसामर्थ्यात्फलेनलुक्। न्यग्रोधस्यकेवलस्यैजागमः ॥ न्यग्रोध

जातेचर्मसादौ ॥

नैयङ्कवम्। त्रि। न्यङ्कुमृगजातवस्त्रचर्मादौ ॥

नैयमिकम्। न। नित्यनैमित्तिकविधिप्राप्तेसन्ध्याध्ययनजातेष्ट्यादौ ॥

नैयायिकः। त्रि। सांवादिके। स्वाक्षपादे। तर्कशास्त्राध्येतरि। तद्वेत्तरि च ॥ न्यायमधीते वेत्तिवा। क्रतूक्थादितिठक् ॥

नैयासिकः। त्रि। न्यासाभिज्ञे ॥ न्यासमधीते वेदवा। उक्थादित्वाट्ठक् ॥

नैरन्तर्य्यम्। न। निरन्तरत्वे ॥

नैराश्यम्। न। आशायाअभावे ॥

नैरुक्तः। त्रि। निरुक्तसम्बन्धिनि ॥

नैरुक्तिकः। त्रि। निरुक्ताध्येतृवेदित्रोः ॥ निरुक्तमधीते वेदवा। उ० ठक् ॥

नैर्ऋतः। पुं। राक्षसे ॥ पश्चिमदक्षिणकोणाधिपतौ ॥ सैंहिकेये ॥ निर्ऋतेरपत्यम्। तस्यापत्यमित्यण् ॥

नैर्ऋती। स्त्री। असुरपत्नी ॥ अवाचीप्रतीच्योर्मध्यायांदिशि। नैर्ऋतकोणे ॥

नैर्गुण्यम्। न। निर्गुणत्वे ॥

नैर्जरम्। न। भौमस्यैवपानीयस्यभेदे। निर्जरसम्बन्धिजले ॥ शैवसानुस्रवद्वारिप्रवाहो निर्जरो जरः। सतु प्रस्रवणस्यापि तत्रत्यं नैर्जरं ज

लम् ॥ नैर्झरं रुचिकृन्नीरं कफघ्नं दीपनं लघु । मधुरं कटुपाकञ्च वातलं स्यादपित्तलम् ॥

नैर्म्मल्यम् । न । निर्मलत्वे ॥ विषयवैराग्ये ॥ यथा । विषयेष्वतिसंरागोमानसो मलउच्यते । तेष्वेवहि-विरागस्तुनैर्मल्यंसमुदाहृतमिति ॥

नैर्वाहिकम् । न । वाप्याः निर्गमन-द्वारे ॥

नैविड्यम् । न । वंशफूत्कारगुणविशेषे ॥ यथा । नैविड्यंप्रौढताचापिस्तुस्वरत्वञ्चशीघ्रता । माधुर्यमितिपञ्चामीफुत्कृतेषुगुणाः स्मृताः ॥ निविडत्वे । सघनतायाम् ॥

नैवेद्यम् । न । निवेदनीयद्रव्ये ॥ अर्वागविसर्जनाद् द्रव्यं नैवेद्यं सर्वमुच्यते विसर्जिते जगन्नाथे निर्माल्यं भवति चणात् ॥

नैशम् । त्रि । नैशिके ॥ निशायांभवम् । निषाप्रदोषाभ्याञ्चेति शैषिकेऽर्णे पुपाचिकोण ॥

नैशिकम् । त्रि । नैशे ॥ निशायांभवम् । निशाप्रदोषाभ्याञ्चेति पक्षे ठञ् ॥

नैषधः । पुं । नलभूपतौ ॥ निषधदेशाधीश्वरे ॥ निषधानामयम् । तस्येदमित्यण ॥ त्रि । निषधसम्बन्धिनि ॥

नैषादकिः । पुं । निषादतनये ॥

नैष्कर्म्यम् । न । ब्रह्मविषयविचारनि-ष्पन्नज्ञाने ॥ सर्वकर्मशून्यत्वे । कर्मत्यागरूपेसन्यासे ॥ निष्कर्मणोभावः । ष्यञ् ॥ वेदोक्तमेवकुर्वाणो निःसङ्गोऽर्पितमीश्वरे । नैष्कर्म्यंसिद्धिंलभते रोचनार्थाफलश्रुति महाभागवते एकादशस्कन्धः ॥

नैष्किकः । पुं । रूप्याध्यक्षे । टङ्कादिशालायां नियुक्ते ॥ निष्के हेम्निनियुक्तः । तत्रनियुक्तइति ठक् ॥ त्रि । निष्केणक्रीते ॥ निष्कस्यविकारे ॥ क्रीतवत् परिमाणादित्यति देशात् अ समासेनिष्कादिभ्य इति ठक् ॥

नैष्ठिकः । पुं । ब्रह्मचर्येण यावज्जीवंगुरुकुलेवासिनि । निष्ठासंसारसमाप्तिस्तत्प्रयोजने ब्रह्मचारिविशेषे ॥ यथा । नैष्ठिको ब्रह्मचारीच वसेदाचार्यसन्निधौ । तदभावेऽस्यतनये पत्न्यांवैश्वानरेपिवा ॥ अनेनविधिना-देहं साधयेद्विजितेन्द्रियः । ब्रह्मलोकमवाप्नोतिनचेहाऽऽजायतेपुनः ॥ आरूढोनैष्ठिकंधर्मं यस्तु प्रच्यवते पुनः । प्रायश्चित्तं न पश्यामि येनशुद्ध्येत् स आत्महा ॥ आरूढपतितं विप्रंमण्डलाच्चविनिःसृतम् । उद्बद्धं क्रिमिदष्टञ्चस्पृष्ट्वाचान्द्रायणं चरेत् ॥

निष्ठाविद्यतेऽस्य। मत्वर्थीयष्ठक् ॥ निष्ठायां भव: भवार्थेठञ्वा ॥ त्रि। निश्चले॥

नैष्ठिकी। स्त्री। निश्चलायाम् ॥ टिड्ढे तिङीप् ॥

नैसर्गिक:। त्रि। स्वाभाविके ॥

नैस्त्रिंशिक:। त्रि। असियोधे। असिहे तैा॥ निस्त्रिंश: प्रहरणमस्य। प्रहरणमिति ठक् ॥

नो। अ। अभावे ॥ नह्यति। नह०। डोप्रत्यय: ॥

नोचेत्। अ। निषेधे ॥

नोदना। स्त्री। चोदनायाम् ॥

नोदित:। त्रि। प्रवर्त्तिते ॥ प्रेरिते ॥

नोधा:। पुं। ऋषिविशेषे ॥ नूयते। णु०। नुवोधुट्चेत्यसि:। नवंदधातिवा ॥

नोपस्थाता। त्रि। दूरस्थे ॥ हीनार्थिविशेषे। अनुपस्थिते। पास नही इति भाषा ॥ यथा। अन्यवादीक्रियाद्वषीनोपस्थातानिरुत्तर:। आहूतप्रपलायीचहीन: पञ्चविध: स्मृत: ॥ न उपसमीपे तिष्ठति। ष्ठा०। तृच् ॥

नैा:। स्त्री। नोकायाम् ॥ नैाकाविशेषे। कलकी नाव इतियस्यादेशभाषा इष्टिम्बोट इतीङ्ग्रेजभाषाच ॥

यथा। तत: प्रवासितो विद्वान् विदुरेणनरस्तदा। पार्थानादर्शयामासमनोमारुतगामिनीम् ॥ सर्ववातसहां नावं यन्त्रयुक्तांपताकिनीम्। शिवेभागीरथीतीरे नरैर्विस्रम्भिभि: कृताम् ॥ इतिमहाभारते आदिपर्वणिजतुकागृहे१४६ अध्याय: नुयते। णुद०। ग्लानुदिभ्यांडैा: ॥ यद्वा। नयति। णीञ्०। अन्येभ्यो० ड:। नम् अवति। क्विप्। ज्वरत्वरेत्यूठ्। वृद्धि: ॥

नैाका। स्त्री। नावि। तरण्याम्। निष्पद्याने। तर्याम् ॥ नैाशब्दात्स्वार्थेक: ॥

नैाकादण्ड:। पुं। क्षेपण्याम्। नैाकापार्श्वद्वयवद्दंचालनकाष्ठे। दाँड इति भाषा ॥ नैाकाया: दण्ड: ॥

नैातार्य्य:। त्रि। नाव्ये ॥ नावातार्य्य: ॥

न्यका। स्त्री। विट्कीटे ॥ न्यकाविट्कीटकेस्त्रियामिति शब्दाम्बुधि: ॥

न्यकाद्दका। स्त्री। विट्कीटे। शकृत्कृमैा ॥ इतिहारावली ॥

न्यक्करणम्। न। तिरस्कारे ॥

न्यक्कार:। पुं। अनादरे। अवहेलने ॥

न्यक्कृति:। स्त्री। रीढायाम्। न्यक्कारे ॥

न्यच:। पुं। यामदग्न्ये। परशुरामे ॥

मप्रिये ॥ न । कार्त्स्न्ये ॥ दृणे ॥ चि । निकृष्टे ॥ नियतानि निकृतानि वा अवाग्रियस्य यस्मिन् वा ॥

न्यग्रोधः । पुं । व्यामे । व्यामपरिमाणे ॥ वटवृक्षे ॥ शमीद्रुमे ॥ न्यक्रुणद्धि । रुधिर० । कर्मण्यण् ॥ हरौ ॥ न्यगर्वाक् रोहति सर्वेषामुपरिवर्त्त पृ० रुहस्य धः ॥ सर्वाणिभूतानिन्यक्-कृत्य निजमायया ऽऽवृणोतिरुणद्धीतिवा ॥ विषपर्ण्याम् ॥ मोहनाख्यौषधौ ॥

न्यग्रोधपरिमण्डलः । पुं । व्यामपरिमितोच्छ्रायपरीणाहेपुरुषे ॥ एतादृशाः पुरुषास्त्रेतायुगे चक्रवर्त्तिन आसन् । यथा । महाधनुर्द्धराश्चैव त्रेतायां चक्रवर्त्तिनः । सर्वलक्षण सम्पन्ना न्यग्रोधपरिमण्डलाः ॥ न्यग्रोधौतु स्मृतौ बाहू व्यामोन्यग्रोधउच्यते । व्यामेनउच्छ्रयोयस्य अधऊर्द्ध्वञ्चदेहिनः ॥ समोच्छ्रयपरीणाहोन्यग्रोधपरिमण्डलः ॥ इतिमात्स्ये ११८ अध्यायः ॥

न्यग्रोधपरिमण्डला । स्त्री । अङ्गनाविशेषे ॥ यथा । स्तनौसुकठिनौयस्या नितम्बेचविशालता । मध्ये क्षीणा-भवेद्या सा न्यग्रोधपरिमण्डलेति शब्दमाला ॥

न्यग्रोधा । स्त्री । न्यग्रोध्याम् ॥

न्यग्रोधी । स्त्री । उपचित्रायाम् । मूषिकपर्ण्याम् ॥ न्यक्रुणद्धि बहुमूलत्वात् । रुधिर० । पचाद्यच् । गौरादित्वान्ङीष् ॥

न्यञ्चं रुणद्धि इतिवा । कर्मण्यण् ॥

न्यङ्कुः । पुं । मुनिविशेषे ॥ बहुविषाणेमृगविशेषे । बारहसिंगा इति भाषा ॥ न्यङ्कुः स्वादुर्लघुर्बल्यो वृष्यो दोषत्रयापहः ॥ नितरामञ्चति । नावञ्चेरिच्चुः । न्यङ्क्वादित्वात् कुत्वम् ॥

न्यङ्कुभूरुहः । पुं । शोणकवृक्षे । श्योनाके ॥

न्यङ्गम् । न । अवयवेइतिवाक्पारुष्येमिताक्षरा ॥

न्यच्छम् । न । क्षुद्ररोगविशेषे ॥ इति भावप्रकाशः ॥

न्यङ् । त्रि । निम्ने ॥ नीचे ॥ कार्त्स्न्ये ॥ न्यञ्चति । अञ्चु० । ऋत्विगिति क्विन् ॥

न्यञ्चितम् । त्रि । अधः क्षिप्ते ॥

न्यन्तः । पुं । चरमप्रदेशे । पश्चिमभागे ॥ नितरामन्तः ॥

न्ययः । पुं । नाशे ॥ निपूर्वादिण एरच् । न्ययंगतः पापः । नाशमित्यर्थः ॥

न्यस्तः । त्रि । निसृष्टे । त्यक्ते । निहिते । स्थापिते ॥ यथा । शरणं मम न

ह्विजननी न पिता न सुता न सोदरानान्ये । परमं शरणमिदमेव चरणं ममम्बूहिदेशिकन्यस्यमिति ॥ न्यस्यतेस्म । अस्मु० । क्तः ॥

न्यस्तदण्डः । पुं । सन्यासिनि ॥

न्यस्तशस्त्रः । पुं । दिव्यपितृषु ॥ त्रि । अस्त्रशस्त्रवर्जिते ॥ न्यस्तानि शस्त्राणि येर्येनवा ॥

न्याक्यम् । न । मूंडी मुडकी फरही इत्यादिभाषा प्रसिद्धे भृष्टान्ने ॥ इति शब्दचन्द्रिका ॥

न्यादः । पुं । आहारे ॥ न्यदनम् । अद० । णोणचेत्यदेर्णः ॥

न्यायः । पुं । अभ्रेषे । कल्पे । देशरूपे उचिते ॥ नियमेन ईयते । इण० । परिन्योर्नीणोर्द्यूताभ्रेषयोरिति घञ् एषोचन्यायः उचितमित्यर्थः ॥ गोतमप्रणीते षोडषशपदार्थनिरूपणपरेशास्त्रविशेषे । तर्कविद्यायाम् । आन्वीक्षिक्याम् ॥ एतद्दर्शनमते नित्येच्छाकृतिमतिसहितः परमात्मा ईश्वरः । सतु ब्रह्मपदार्थोजीवातिरिक्तः । एतच्छास्त्रप्रयोजनं चार्वाकादि मतनिराकरणपूर्वकं जगत्कारणतयेश्वर संस्थापनं शंशयादि निरूपणेन वेदार्थनिर्णयश्च । एतद्दर्शनकारोगोतमः । तत्सूत्र प्रमाणादिषोडशपदार्थनिरूपणम् । तेषां तत्त्वज्ञानान्निश्श्रेयसम् । तस्यभाष्यकारोवात्स्यायनः । तद्वार्त्तिककारः कात्ययनः । तट्टीकाकारोवाचस्पति मिश्रः · तच्छाचउदयनाचार्यः । कुसुमाञ्जलिप्रभृति ग्रन्थकर्त्ता । तच्छिष्यप्रष्याहरिदासेरामभद्रगङ्गेशोपाध्यायचिन्तामणिकारादयोवहवः ॥ * ॥ प्रतिज्ञाहेतुदाहरणोपनयनिगमनात्मकपञ्चावयववाक्ये ॥ यथा । पर्वतोवह्निमान् धूमात् योयोधूमवान् ससवह्निमान् यथामहानसम् वह्निव्याप्यधूमवांश्चायम् तस्माद्वह्निमान् ॥ नीयते प्राप्यतेविवक्षितोऽर्थोयेनस न्यायः । अध्यायन्यायेति घञन्तोनिपातितः ॥ नीतौ ॥ उपाये ॥ भोगे ॥ युक्तौ ॥ युक्तिमूलकदृष्टान्तविशेषे ॥

न्यायपथः । पुं । मीमांसादिशास्त्रे ॥

न्यायवृत्तः । त्रि । शास्त्रविहिताचारे । यथाशास्त्रव्यवहारिणि ॥

न्यायसारिणी । स्त्री । लुप्ताम् । युक्तिपूर्वककर्मकारिण्याम् ॥ इतित्रिका- ण्डशेषः ॥ न्यायस्थले ॥

न्यायी । त्रि । न्यायवति ॥

न्याय्यः । त्रि । न्यायलब्धे । युक्ते औपयिके ॥ न्यायादनपेतम् । धर्म्यपथ्य

र्थन्यायादनपेतइतियत् ॥ उचिते । शास्त्रीयधम ॥ न्याये भवः न्यायादागतो वा । दिगादित्त्वाद्यत् ॥

न्यासः । पुं । त्यागे ॥ उपनिधौ । स्थाप्यद्रव्ये । प्रकाश्यस्यापितेद्रव्ये ॥ न्यस्यते । अस्तु० । कर्मणि घञ् ॥ अर्पणे । विन्यासे ॥ सन्यासे ॥ यथा । वक्ष्ये विविदिषान्यासं विद्वन्न्यासञ्चभेदतः । हेतू विदेहमुक्तेश्च जीवन्मुक्तेश्च तौक्रमात् ॥ काशिकाख्यपाणिनिसूत्रव्याख्यानग्रन्थविशेषे ॥ अङ्गेषु वर्णचिन्तने ॥

न्यासार्पणम् । न । निक्षेपप्रतिदाने ॥

न्युङ्खः । पुं । साम्नः षट्प्रणवेषु । सामविशेषस्वषडोङ्कार्याम् ॥ सम्यङ्मनोज्ञे । अतिप्रिये ॥

न्युप्तः । त्रि । दत्ते ॥

न्युजः । पुं । दर्भमयस्रुचि । कुशस्रुचि ॥ न । कर्मरङ्गफले । कमरख इति भाषा ॥ श्राद्धादिपात्रप्रभेदे ॥ त्रि । कुब्जे । कुब्डा इति भाषा ॥ रोगेणावक्रपुरुषे ॥ अधोमुखे ॥ न्युजन्त्यस्मिन् । उब्जआर्जवे । अधिकरणेघञि कवर्गाभावो भुजन्युब्जौपाण्युपतापयोरितिनिपात्यते ॥ न्युजनम् । भावे वा घञ् ॥ न्युजः पृष्ठवक्रत्वकारी यस्यास्ति । अर्श आद्यच् ॥

न्युजखड्गः । पुं । कटीतले । कुब्जखड्गे ॥

न्यूङ्खः । ओमोमिन्त्यादिषोडशोङ्कारेषु ॥

न्यूनः । त्रि । गर्ह्ये ॥ ऊने ॥ न्यूनयति । ऊनपरिहाणे । पचाद्यच् । घञ्वा ॥

न्यूनपञ्चाशद्भावः । पुं । ऊनपञ्चाशद्भावे । पागले ॥

न्यस्थिमाली । पुं । शिवे ॥ त्रि । नरास्थिमालावति ॥

न्वै । अ । वितर्के ॥ * ॥ * ॥ * ॥

इत्यादिगौडकुलोत्पन्नाडीचवालप्रधानोपनामतुलाराम मिश्रात्मजश्रीधनपतिमिश्रापरनाम्ना तथाश्रीसद्गुरुकुलावधूतश्रीपरमहंसपरिव्राजकार्यश्रीमद्धरिहरानन्दनाथभारतिशिष्येण ब्राह्मावधूतश्रीसुखानन्दनाथपरनामधेयेनविरचिते शब्दार्थचिन्तामणौ तवर्गः समाप्तिङ्गतः मुद्राङ्कितकराया कायस्थ कलश्रेष्ठ मुंशी श्रीरामप्रसादजीने ॥ * ॥